श्रीगणेशाय नमः ।

भाट्टदीपिका ।

पूर्व्वषट्कम् ।

प्रथमोऽध्यायः ।

विश्वेश्वरं नमस्कृत्य खण्डदेवः सतां मुदे ।
तनुते तत्प्रसादेन सङ्क्षिप्तां भाट्टदीपिकाम् ॥

आम्नायस्य ॥ वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेये-नोपधावति स एवैनं भूतिं गमयतीत्याद्यर्थवादानां विधिप्रतिषेधवदेव* कर्तृस्मरणाभावादपौरुषेयत्वे पूर्वाधिकरणेन सिद्धे, सम्प्रति तद्वदेव धर्माधर्मयोः प्रामाण्यमस्ति न वेति विचार्यते । तत्र विधिप्रतिषेधवाक्याभ्यां स्वप्रत्ता† साध्यसाधनेतिकर्त्तव्यताविशिष्ट-भावनाविषयकविधिप्रतिषेधयोः प्रतिपादनादर्थाच्च‡ विधिप्रतिषेध-विषययागादेरिष्टानिष्टसाधनत्वाक्षेपाद्युक्तं तयोरिष्टानिष्टसाधनरूपधर्माधर्मप्रमाजनकत्वम्§ । अर्थवादानान्तु प्रत्ता सद्सद्रूपसि-द्धार्थबोधकत्वान्न धर्माधर्मयोः प्रामाण्यसम्भवः । न च प्रत्ता तद्-

* विधिविप्रतिषेधवदेव,- इति क० ग० पुस्तकयोः पाठः ।

† स्वप्रत्तया,- इति नास्ति क० पुस्तके ।

‡ प्रतिपादनादर्थात्,- इति क० पुस्तके पाठः ।

§ धर्म्माधर्म्मप्रमाणत्वम्,- इति क० पुस्तके पाठः ।

सम्भवेऽपि लक्षणाऽध्याहारादिना तत्प्रतिपादनम्। यथाश्रुतार्थप्रतिपादनेनैवोपपत्तौ * अन्वयानुपपत्त्यभावेन † तदसम्भवात्। न च तात्पर्यानुपपत्त्या तत्कल्पनम्। तात्पर्यग्राहकाभावेन ‡ तस्या अप्यसम्भवात्। न हि शब्दः प्रमाणमात्रं वा प्रयोजनवद्विषयमेवेत्येवं नियमे प्रमाणमस्ति। येन स एव तात्पर्यग्राहकः शङ्क्येत। निष्प्रयोजनानामपि बहुशोदर्शनेन व्यभिचारात्। न च स्वाध्यायोऽध्येतव्य इति स्वाध्यायविधिरेवार्थज्ञानोद्देशेनाध्ययनं विदधन्निष्प्रयोजनार्थज्ञानस्य भाव्यत्वानुपपत्तेरर्थस्य § प्रयोजनवत्त्वमाक्षिपतीति वाच्यम्। अर्थज्ञानजनकत्वेनाध्ययनस्य लोकसिद्धत्वेनाविधेयत्वात्। तन्नियमस्य चार्थज्ञानेऽनुपयोगात्। अव्यभिचरितक्रतुसम्बन्धाभावेन क्रतुं यावदुपयोगकल्पनाऽनुपपत्तेश्च न विधेयत्वम्। अतः स्वाध्यायविधिना स्वर्गाद्यर्थमेवाध्ययनं विधीयते। लोकतः पूर्वप्रवृत्त्यङ्गीकारेण यथाश्रुतार्थज्ञानार्थं वा। अध्ययनमेव वा भावनायां भाव्यमस्तु। न चैवमिष्टभाव्यकत्वाभावात् प्रवृत्त्यनुपपत्तिः। अनधीयाना व्रात्याभवन्तीति वचनेनाकरणे प्रत्यवायबोधनेनापि प्रवृत्तिसिद्धेः। अतस्तस्य वेदत्वावच्छेदेन प्रयोजनवद्विषयत्वानाक्षेपकत्वादर्थवादेषु तद्वत्वेन लक्षणादिसिद्धिरित्यप्रमाणमर्थवादा धर्माधर्मयोरिति प्राप्तेऽभिधीयते।

---

* प्रतिदेशनेनैवोपपत्तौ,– इति क० पुस्तके पाठः।

† अन्वयानुपपत्त्यभावे,– इति ख० ग० पुस्तयोः पाठः।

‡ तात्पर्य्यग्राहकाभावे,– इति ख० ग० पुस्तकयोः पाठः।

§ संभाव्यतानुपपत्त्या अर्थस्य,– इति ख० ग० पुस्तकयोः पाठः।

न स्वाध्यायविधिः स्वर्गाद्यर्थमध्ययनं विधत्ते। दृष्टे सम्भवत्य-दृष्टफलकल्पनाया अन्याय्यत्वात् *। नापि यथाश्रुतार्थज्ञानार्थम्। तथात्वे आत्यन्ताबोधकवाक्येनाध्ययनस्यावश्यकत्वाद्गृहीतपदपदार्थ-सङ्गतिकस्य, स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थमित्यादि वचनाच्च ज्ञानस्यार्थावश्यकत्वेन यथाश्रुतार्थज्ञान-स्यानुषङ्गिकतयाऽपि सिद्धेः स्वाध्यायविधिवैयर्थ्यप्रसङ्गात्। एतेना-ध्ययनभाव्यकत्वपक्षोऽपि निरस्तः। अतो वैयर्थ्यपरिहारार्थं प्रयो-जनवदर्थज्ञानोद्देशेन स्वाध्यायाध्ययनं विधीयते प्रयोजनवदर्थज्ञा-नादिसाधनीभूतस्वाध्यायोद्देशेन वाऽध्ययनमात्रम्। तव्यप्रत्ययेन स्वाध्यायस्य कर्मत्वाभिधानात्। अतस्स्वाध्यायार्थस्य प्रयोजनवत्त्व-सिद्धौ तात्पर्यग्राहकत्वेन लक्षणा अर्थवादेषु। लक्षणीयस्त्वर्थः सन्निहितविधिनिषेधापेक्षितत्वात् स्तुतिनिन्दारूपः।

तथाहि। लिङाद्यर्थो लोके पुरुषाशयः। वेदे तदभावाल्लिङा-दिनिष्ठ एव कश्चिद्धर्मः। वाच्यतावच्छेदकश्चोभयसाधारणं व्यापारत्वं न तु प्रवृत्तिनिवृत्तिप्रयोजकत्वमपि। तस्यान्यलभ्यत्वात्। तच्च नञोऽभावे आख्यातार्थप्रवृत्तिप्रयोजकत्वं तत्सत्त्वे तु तदर्थप्रवृत्त्य-भावप्रयोजकत्वं संसर्ग इति विशेषः। प्रयोजकत्वं चात्र प्रवृत्ति-तदभावकारणीभूतेष्टानिष्टसाधनताज्ञानजनकज्ञानविषयत्वम्। अ-भावकारणता च योगक्षेमसाधारणी। तत्त्वं च प्रवृत्तिसामग्रीविघ-टकत्वमित्यन्यत्र विस्तरः। स च लिङाद्यर्थो विधिवाक्ये प्रवर्त्तना-

---

* दृष्टे सम्भवत्यदृष्टस्यान्याय्यत्वात्,— इति क० पुस्तके पाठः।

प्रेरणाविध्यपरपर्यायः, निषेधवाक्ये च निवर्त्तनानिवारणानिषेधप्रतिषेधापरपर्यायः। इत्थं च द्विविधाऽपि शाब्दी भावना। तस्याश्च भाव्यं यथायोगं प्रवृत्तिनिवृत्ती। शाब्दभावनाज्ञानं करणम्। करणत्वञ्च भावनाभाव्यनिष्पादकत्वम्। इतिकर्त्तव्यता च यथायोगं स्तुतिनिन्दे। स्तुतिनिन्दाज्ञानस्य हि प्रवृत्तिनिवृत्तिप्रयोजकसहकारित्वं इच्छद्वेषोत्पादनद्वारा लोकसिद्धम्। स्तुतिनिन्दापदवाच्ये प्राशस्त्याप्राशस्त्यापरपर्याये बलवदनिष्टाननुबन्धित्वानुबन्धित्वयोग्यत्वरूपे। ते च यथायोगं विधिनिषेधापेक्षितत्वात्तत्समभिव्याहृतार्थवादैर्लक्षणया प्रतिपाद्येते।

तत्र वायुर्वै क्षेपिष्ठेत्यादौ स्वशक्यक्षेपिष्ठत्वादिगुणैरेव लक्षणा। यजमानः प्रस्तर इत्यादौ तु गौणीगम्यस्वकार्यकर्तृत्वादिगुणैरिति * वक्ष्यते। अतः सिद्धं भावनाऽन्वितस्तुतिनिन्दाविषयकप्रमाजनकत्वेनार्थवादानां धर्माधर्मयोः प्रामाण्यमिति। प्रयोजनं पूर्वपक्षे अर्थवादानुपस्थितप्राशस्त्यज्ञानादपि प्रवृत्तौ फलसिद्धिः। सिद्धान्ते तु मन्त्रवदर्थवादानामेव प्ररोचकत्वनियमात्तदुपस्थितप्राशस्त्यज्ञानादेव प्रवृत्तौ सेति द्रष्टव्यम् ॥ १ ॥

विधिर्वा ॥ औदुम्बरोयूपो भवत्यूर्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोऽवरुध्ये इत्याद्यर्थवादेषु न स्तुतिलक्षणा शक्त्यैव पशुरूपफलसम्बन्धविधायकत्वेन प्रामाण्योपपत्तेः। पशूनिति द्वितीयया ऊर्जोऽवरुध्या इति चतुर्थ्या वा पशूनां साध्यत्वेऽवगते

---

* योगादिति,— इति ख० ग० पुस्तकयोः पाठः।

साधनापेक्षत्वादौदुम्बरत्वं साधनं सन्निधानात् । ऊर्जेति तृतीया-श्रवणाच्च । भवतीत्याख्यातेन च लक्षणया यत्नेव वा भावना-ऽभिधानाद्भूधातोश्च यूपोत्पादकच्छेदनाद्यनुवादकत्वादप्राप्तार्थत्वेन च लेट्त्वनिश्चयात्* उभयविशिष्टभावनाविधायकत्वोपपत्तिरित्याक्षेपे प्राप्ते । यूपकर्तृकभवनाऽऽक्षिप्तायां भावनायां यूपस्यैव भाव्यत्वौचि-त्यात् सन्निधानाच्च यूपोद्देशेनैवौदुम्बरत्वविधिर्न तु फलोद्देशेन कामशब्दाद्यभावेन, फलत्वस्य तथाऽनुपस्थितेः । किञ्च भवन्मते गुणफलसम्बन्धोऽयम् । न चासौ सम्भवति, आश्रयालाभात् । सोमापौष्णं चैतमालभेत पशुकाम इति प्रकृतस्य यागस्याश्रयत्वे हि यूपग्रहणानुपपत्तिः । यूपस्य तु अप्रकृतत्वादेवाश्रयत्वानुप-पत्तिः । अतिदेशेन तस्योपस्थितिस्तु शुक्लादिपाचान्तरसाधारणेति तेषामप्याश्रयत्वे तथैव यूपग्रहणानर्थक्यम् । वाक्येनाश्रयदाने च वाक्यभेदः । तस्मादूर्ग्वा उदुम्बर इत्यादिरर्थवाद एवौदुम्बरत्वस्येति सिद्धम् । प्रयोजनं, यागफलात् फलान्तरकामनायामौदुम्बरो-यूप इतरथा खादिरः पूर्वपक्षे, सिद्धान्ते तु औदुम्बर एवेति ॥ २ ॥

हेतुर्वा ॥ चातुर्मास्येषु शूर्पेण जुहोतीति शूर्पकरणकं होमं विधाय श्रुतेन तेन ह्यन्नं क्रियते इत्यर्थवादेन न स्तुतिलक्षणा, अपि तु होमसाधनत्वे साध्ये अन्नकरणहेतुत्वं विधीयते । न चात्र पूर्ववत् भाव्यत्व इव किञ्चित् कल्पनीयमस्ति । हि शब्दश्रुत्यैव हेतुत्वाभिधानात् । हेतुश्च व्याप्तिमन्तरेणानुपपन्नोयद्यदन्नकरणं

---

* निर्णयात्,– इति ख० ग० पुस्तकयोः पाठः ।

तेन तेन होतव्यमिति व्याप्तिवचनं कल्पयति। ततश्च शूर्पादन्यस्यापि दर्विपिठरादेर्होमसाधनत्वप्रतीतेर्विधौ शूर्पपदमुपलक्षणमवयुत्यानुवादो वा। यद्वा तच्छब्देन शूर्पस्यैव परामर्शात्तद्गतमेवान्नकरणत्वं हेतुः। तेन विशिष्यैव व्याप्तिकल्पनादन्नकरणासमर्थशूर्पव्यावृत्तावपि न विधिस्थं शूर्पपदं अन्यथा नेयमिति पूर्वः पक्षः। सिद्धान्तस्तु क्रियत इति लडन्तनिर्देशाद्वर्त्तमानान्नकरणत्वस्य हेतुत्वं वाच्यम्। न च होमकाले अन्नकरणत्वं सम्भवति। अतो लटा भूतभविष्यत्कालान्तरलक्षणा विधौ तवाप्यावश्यकी*। यद्यपि चेयं प्राशस्त्यलक्षणोपयोगिगुणघटकतया ममाप्यावश्यकी, तथापि अनुवादस्थत्वात् प्राशस्त्यपोषकत्वाच्च† सा‡ न दोषः। वर्त्तमाननिर्देशं विना तदप्रतीतेः। किञ्चापेक्षितप्राशस्त्यपरत्वे सम्भवति नानपेक्षितहेतुपरत्वाङ्गीकारो युक्तः। अतः सिद्धं सर्वेषामर्थवादानां स्तावकत्वेन प्रामाण्यम् ॥ २ ॥

तदर्थशास्त्रात् ॥ मन्त्राणां धर्माधर्मयोः प्रमाण्यमस्ति न वेति§ चिन्तायां, न तावद्विधित्वेन प्रमाण्यम्। तस्य द्वितीये निराकरिष्यमाणत्वात्। नापि स्तावकत्वेनार्थवादवत्। तेषां हि सन्निहितेन विधिना पदैकवाक्यत्वाद्युक्तं स्वसमर्पितप्राशस्त्यान्वितभावनाविषयकशाब्दप्रमाजनकत्वम्। मन्त्राणां तु दूरस्थत्वेन पदैकवाक्यत्वा-

---

* इत्थमेव पाठ सर्व्वत्र। मम तु, तवावश्यकी,— इति पाठः प्रतिभाति।

† बोधकत्वाच्च,— इति क॰ पुस्तके पाठः।

‡ सा,— इति नास्ति ख॰ ग॰ पुस्तकयोः।

§ प्रामाण्यं न वेति,— ख॰ ग॰ पुस्तकयोः पाठः।

मुपपत्तेर्न तद्विधया प्रामाण्यसम्भवः । नापि प्राशस्त्यं स्वातन्त्र्येण वाक्यार्थः । पदार्थविधयोपस्थितत्वात् । नापि अर्थस्मारकत्वेन प्रामाण्यं अनधिगतार्थबोधकत्वाभावेन तदसम्भवात्(१) । साममन्त्राणामर्थाभावेन याथार्थ्यस्याप्यनुपपत्तेश्च(२) । न च प्रामाण्याभावेऽपि स्मारकत्वादिना प्रयोजनवत्त्वमात्राङ्गीकारः । ध्यानाद्युपायान्तरेणापि स्मृतिसिद्धेर्नियतमन्त्राम्नानवैयर्थ्यात् । प्रयोगासमवेतार्थस्मारकेषु स्मृतिवैयर्थ्याच्च । अतोऽधिकाराख्यप्रकरणादिनाऽवगततत्तत्क्रत्वङ्गभावानां मन्त्राणामुच्चारणमात्रमदृष्टार्थं विधीयते । स्वाध्यायविधिश्चोच्चारणोपयोगिप्रयोगप्राग्भावफलकतयैवाध्ययनं विधत्ते* इति न कश्चिद्दोषः इति प्राप्तेऽभिधीयते† ।

दृष्टे सम्भवत्यदृष्टकल्पनाऽनुपपत्तेः प्रयोगसमवेतार्थस्मृतिरेव सम्भवतां मन्त्राणां प्रयोजनम् । असम्भवतान्तु कामं भवत्वदृष्टं प्रयोजनम् । शक्यते तु तत्रापि मन्त्रा अर्थप्रकाशनार्थाः, प्रकाशनं परमदृष्टार्थमिति वक्तुम् । साम्नान्तु अक्षराभिव्यक्तिरेव दृष्टं प्रयोजनमर्थाभावेऽप्यव्याहतम् । अनृक्साम्नान्तु अदृष्टार्थत्वमेवेत्यन्यत्र विस्तरः । न त्वेतावता सर्वत्रैवादृष्टार्थत्वम् । न च मन्त्राणां नियमेन

---

* विधीयते,— इति ख० ग० पुस्तकयोः पाठः ।

† अभिधीयते,— इति नास्ति ख० ग० पुस्तकयोः ।

---

(१) अनधिगताबाधितार्थविषयकं ज्ञानं प्रमा, तज्जनकत्वं प्रामाण्यम्,— इति ख० ग० पुस्तकयोः टीका ।

(२) अबाधितार्थविषयकज्ञानजनकत्वं याथार्थ्यम्,— इति ख० ग० पुस्तकयोः टीका ।

पाठवैयर्थ्यम्। तद्बलेन मन्त्रैरेव स्मर्त्तव्यमिति नियमकल्पनात्। तस्य चादृष्टफलकत्वेऽपि न दोषः। न चैवं सामर्थ्यादेव तत्र तत्र मन्त्राणां विनियोगसिद्धौ पुनस्तेषां क्वचिद्विनियोगकरणं व्यर्थमिति वाच्यम्। गुणपरिसङ्ख्याद्यर्थत्वेन सार्थक्यात्। तथाहि। अर्थप्राप्ते अभ्र्यादाने विकल्पेन चतुर्णां मन्त्राणां* लिङ्गेन प्राप्यमाणानां प्रापकप्रमाणात् पूर्वमेव प्रवृत्तेन, 'तां चतुर्भिरादत्ते' इति वचनेन मन्त्रसङ्ख्योभय-विशिष्टादानभावनायां विहितायां एतद्वचनाभावेऽपि मन्त्राणा-मादानस्य च प्राप्तिसम्भवे एतद्वचनप्रवृत्तिफलजिज्ञासायां समुच्चय-फलकचतुःसङ्ख्यारूपगुणप्राप्तिरिति निर्णीयते। तथा लिङ्गादेवा-श्वचयनाङ्गभूताश्वरशनाऽऽदाने प्राप्यमाणस्य मन्त्रस्य ततः पूर्वप्रवृ-त्तेन, 'इमामगृभ्णन्नशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यनेन वचनेन† मन्त्रविशिष्टादाने अश्वरशनात्वेन विहिते पूर्ववत् फलजिज्ञासायां गर्दभरशनानिवृत्तिरूपा‡शेषिपरिसङ्ख्या फलम्।

न च फलतः परिसङ्ख्यायां स्वार्थहानिः परार्थकल्पना प्राप्तबाध-इति चेद्दोषत्रयम्। अश्वाभिधानीसम्बन्धरूपस्वार्थस्यैव विधेयत्वात्। अन्यनिवृत्तिरूपपरार्थस्यार्थसिद्धत्वेनाकल्पनीयत्वात्। प्रापकप्रमाण-स्याप्रवृत्ततया प्राप्तबाधाभावाच्च। अतएव यत्र प्रापकप्रमाणप्रवृत्त्यु-त्तरमेव परिसङ्ख्याशास्त्रस्य प्रवृत्तिः, यथा पञ्च पञ्चनखा भक्ष्या-इत्यादौ रागप्राप्तपञ्चनखभक्षणे पञ्चातिरिक्तपरिसङ्ख्याकरणे, तत्रैव

---

* मन्त्राणां नियमे,— इति क० पुस्तके पाठः।

† वचनेन,— इति नास्ति ख० ग० पुस्तकयोः।

‡ गर्दभरशनातोनिवृत्तिरूप,— इति क० पुस्तके पाठः।

तत्। यद्यपि च श्रौती परिसङ्ख्या, यथा नानृतं वदेदित्यादौ, तथापि न तत्। अतएव प्रवृत्तः फलतो वा यस्य शास्त्रस्यान्यनि-वृत्तिर्विषयः स परिसङ्ख्याविधिः। अत्र चैतद्विध्यभावे प्राथम्य-औत्सर्गिकी तत्र चान्यत्र च प्राप्तिर्न तु साऽपि लक्षणघटितेति ध्येयम्। अतएवैकस्मिन् कार्येऽनृतस्य सत्येन * सह पाक्षिकप्राप्तावपि नानृतं वदेदिति परिसङ्ख्यैवेयम्। न तु नियमविधिः। अतएव यस्य प्रवृत्तः फलतो वा पाक्षिकायोगव्यावृत्तिरूपो नियमः शास्त्रस्य विषयः स नियमविधिः। यथा सत्यमेव वदेत् व्रीहीनवहन्ती-त्यादौ। अत्र नियमस्यैवायोगव्यावृत्त्यर्थकेन एवकारेण विधेयत्वात्। आक्षेपतः पूर्वं† प्रवृत्तस्यावघातविधेर्नियमफलकत्वाच्च। नियमे पाक्षि-कायोगश्च तन्मात्रविध्यप्रवृत्तिनिमित्तको विध्यन्तराप्रवृत्तिसहितैत-द्विध्यप्रवृत्तिनिमित्तकश्चेत्यादिप्रकारेण बोध्यः। व्रीहीनवहन्ति उत्तरेहन्दिराचस्य गृह्णात इत्यादावाद्यः। एतद्विध्यभावे आक्षेपे-णातिदेशेन चावघातस्य षोडशिग्रहणस्य च पक्षप्राप्तत्वात्। व्रीहिभिर्यजेतेत्यादौ द्वितीयः। यवविध्यभावसहितैतद्विध्यभावे व्रीहीणामाक्षेपेण पक्षप्राप्तत्वात्। एवं विधभेदसत्त्वेऽपि चायोगव्या-वृत्तिमात्रस्यैव ‡ लक्षणे प्रवेशान्न कोऽपि दोषः।

यत्तु दृष्टार्थत्वं नियमविधिलक्षणं कैश्चिदुक्तम्। तदुत्तरेहन्दि-राचस्य गृह्णात इत्यादावव्याप्तत्वादुपेक्षितम्। षोडशिग्रहयागाभ्या-

* सत्येव,— इति ख॰ ग॰ पुस्तकयोः पाठः।

† पूर्वं,— इति क॰ पुस्तके पाठः।

‡ व्यावृत्तिमात्रस्य,— इति क॰ पुस्तके पाठः।

सखादृष्टार्थत्वात्। अतएव नियमपरिसङ्ख्याऽतिरिक्तफलकविधित्व-मपूर्वविधित्वमिति तल्लक्षणमपि सुस्थम्। एतेषाञ्चोपाधीनां क्वचि-दुदाहरणे साङ्कर्य्येऽपि न दोष इति न विधिरस्यायमोक्तलक्षणदूष-णावकाशः। विस्तरेण चैतदस्मत्कृते मीमांसाकौस्तुभे द्रष्टव्यम्। तदेवं मन्त्राणामर्थस्मारकत्वेऽपि न विनियोगवैयर्थ्यम्। न चैवमपि प्रामाण्यायोगः। याथार्थ्यलक्षणस्य तस्याविघातात्। सामादिसर्व-मन्त्रसाधारण्येन तु पदार्थविधया। यथा हि शाब्दबोधं प्रति-कारणीभूतज्ञानविषयत्वाच्छब्दः प्रमाणमिति सर्वदर्शनसम्मतं, तथा पदार्थज्ञानस्यापि कारणत्वात् पदार्थोऽपि तथेति शक्यते वक्तुम्। अतश्च मन्त्रविनियोगविधौ मन्त्राणामपि पदार्थत्वादयुक्तं प्रामाण्य-मिति। *अस्तु वा प्रामाण्याभावेऽपि प्रयोजनवत्त्वमात्रम्। ताव-तैवाध्ययनविधेरुपपत्तेः। प्रयोजनमर्थवादवदेव स्पष्टम्॥ ४॥

इति भाट्टदीपिकायां खण्डदेवकृतौ प्रथमाध्यायस्य
द्वितीयः पादः।

---

* प्रामाण्याभावेऽपि प्रयोजनवत्त्वलाभमात्रेण स्वाध्यायविध्युपपत्तेर्वा न कश्चिद्दोषः,– इति क० पुस्तके पाठः।

धर्मस्य॥ शिष्टत्रैवर्णिकपरिगृहीतानां मन्वादिप्रणीतस्मृतीनां धर्माधर्मयोः प्रामाण्यं न वेति सन्देहे, सन्मूलकलनिश्चायकाभावादप्रामाण्यम्। न ह्यत्र * प्रत्यक्षादि मूलं, तेषां धर्माधर्मयोरप्रवृत्तेः। वेदस्य च † प्रत्यक्षपठितस्यानुपलम्भात्। उपलम्भे वा स्मृतिप्रणयनवैयर्थ्यात्। प्रत्यक्ष ‡ पठितस्येदानीमुच्छेदस्य च वैदिकैर्यथापरिगणनं शाखानां मात्रामात्रापरित्यागेन(१) पाठ्यमानतया § कल्पयितुमशक्तेः। न च नित्यानुमेयो वेदो मूलम्। स्मृतेर्मूलसामान्यव्याप्तत्वेऽपि वेदव्याप्तत्वाभावेनानुमानानुपपत्तेः॥। मनोरप्यनुमेयत्वकल्पने अन्धपरम्परापत्तेश्च। अतश्च सन्मूलत्वासम्भवाद्भ्रान्त्यादिमूलत्वेनाप्रामाण्यमिति प्राप्ते।

शिष्टानामद्ययावदविगीतपरम्परया ज्योतिष्टोमादिष्विवाष्टकाकलञ्जभक्षणादिष्वपि धर्मत्वेनाधर्मत्वेन च परिग्रहान्मन्वादीनां त्रैवर्णिकत्वेन वेददर्शनसम्भवाच्च तन्मूलत्वमेव युक्तम्। न तु भ्रान्त्यादिमूलत्वम्। तत्कारणस्याद्ययावत्तदज्ञानस्य च कल्पने गौरवाच्च। श्रुतिश्च प्रत्यक्षपठितैव तन्मूलम् ¶। न च स्मृतिप्रणयनवैयर्थ्यं ** शा-

* न त्वत्र, — इति क० पुस्तके पाठः।
† वेदस्य, — इति ख० ग० पुस्तकयोः पाठः।
‡ प्रत्यक्षं, — इति क० पुस्तके पाठः।
§ पाठ्यमानतया, — इति क० पुस्तके पाठः।
|| व्याप्तत्वाभावेनानुपपत्तेः, — इति क० पुस्तके पाठः।
¶ मूलम्, — इति क० पुस्तके पाठः।
** नास्त्येतत् ख० ग० पुस्तकयोः।

(१) मात्रामात्रस्याप्यपरित्यागेनेत्यर्थः।

र्थान्तरोपसंहारेणार्थवादोपोद्धारेण न्यायसिद्धार्थकथनेन च स्मृति-प्रणयनसार्थक्यात्। अतो मूलश्रुत्युपस्थापकतयैव धर्म्माधर्मप्रमाप्रयोजकत्वं स्मृतीनामिति सिद्धम् ॥ १ ॥ ५ ॥

विरोधे ॥ श्रुतिविरुद्धानामपि औदुम्बरी सर्वा वेष्टितव्येत्यादिस्मृतीनां श्रुतिमूलकत्वाविशेषात् प्रामाण्यम्। न. औदुम्बरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिविरोधात्तदनुपपत्तिः। परस्परविरुद्धार्थकानामपि ग्रहणाग्रहणादिश्रुतीनां षड्भोदर्शनेन विरोधे सत्यपि तत्कल्पने बाधकाभावात्। तद्वदेव विकल्पेन विरोधस्य परिहर्त्तुं शक्यत्वाच्च। न ह्यत्र प्रत्यक्षश्रुत्या स्मृतेर्मूलाकाङ्क्षा निवर्त्तते, येन कल्पनामूलोच्छेदाद्विरुद्धप्रत्यक्षश्रुत्या लिङ्गस्येव स्मृतेर्बाधः स्यात्। न वा शैत्यौष्ण्ययोरिवात्र विषययोरत्यन्तविरोधः, येन औष्ण्यप्रत्यक्षेणेव शैत्यानुमानस्य प्रकृते प्रमेयापहारलक्षणोबाधः स्यात्। न त्वेतदस्ति, विकल्पेन द्वयोः सम्भवादिति प्राप्ते।

भाष्यकारेणैवं सिद्धान्तितम्। सर्वत्रानुमानेऽनुमेयजिज्ञासायाः कारणत्वात् प्रत्यक्षश्रुत्या च स्पर्शविधानेनावेष्टितत्वरूपेणौदुम्बर्याः परिच्छिन्नत्वाज्जिज्ञासाऽभावेन नौदुम्बरीवेष्टनविषयकश्रुत्यनुमानसम्भवः। तथा, प्रत्यक्षश्रुतिविरोधाभावेऽपि यत्र लोभादिदर्शनं, यथा वैसर्जन * होमीयं वासो ऽध्वर्युः परिगृह्णातीत्यादौ †; तत्रापि न श्रुतिकल्पनं क्लृप्तहेतोरेव मूलत्वोपपत्तेरिति।

---

* वैसर्जनीय, — इति ख० ग० पुस्तकयोः पाठः।

† प्रतिगृह्णात्यादौ, — इति ख० ग० पुस्तकयोः पाठः।

वार्त्तिककारस्तु न शिष्टाचाराद् अनुमित्युत्पत्तिः अन्याचारशिष्टाचारमपि तदुदयात्। सत्यपि वा तथा: कारणत्वे अनुमितिविषयश्रुतेर्निराकाङ्क्षितत्वाच्च। प्रत्यक्षश्रुतिविरोधाभावे वा * लोभादिमूलकत्वाङ्गीकारे † अष्टकादिस्मृतेरपि तदापत्तेः। अतश्च प्रत्यक्षश्रुतिविरोधेऽपि स्मृतेः शिष्टत्रैवर्णिकपरिग्रहाविशेषेण श्रुतिमूलत्वकल्पनोपपत्तेर्युक्तमेव प्रामाण्यम्। परन्तु यावच्छ्रुतिनिश्चयं वेष्टनं नानुष्ठेयम्। अर्थवादाद्युन्नीतविधिमूलकत्वस्यापि स्मृतिषु दर्शनेन प्रकृतेऽपि तन्मूलकत्वस्य सम्भावितत्वात्तस्य चोन्नयनस्य प्रत्यक्षश्रुतिविरोधे आभासत्वसम्भवात्। अतश्च यावच्छ्रुतिनिश्चयं अननुष्ठानलक्षणमप्रामाण्यमित्यभिप्रायं सूत्रमिति प्राह।

यद्वा शाक्यादीनामपि क्षत्रियत्वप्रसिद्धेर्वेददर्शनसम्भवेन तत्प्रणीतस्मृतीनामपि वेदमूलत्वम्। तन्मूलो वेदस्तेदानीं प्रलीन इति प्राप्ते। शिष्टत्रैवर्णिकानां धर्मत्वेन परिग्रहस्य पूर्वाधिकरणमुख्यहेतोरभावात् प्रत्युत अप्रमाणत्वेनैव तेषां स्मरणाद्वेदाप्रामाण्यवादिभिरेव च तत्प्रामाण्याङ्गीकाराद्वेदमूलत्व ‡ कल्पनानुपपत्तेरप्रामाण्यमिति § सूत्रार्थः॥ २॥ ६॥

शिष्टाकोपे॥ स्मार्त्तानामाचमनादीनां श्रौतैः क्रमकालपरिमाणादिभिर्विरोधे श्रौतत्वात्क्रमादीनामेव प्राबल्यात् तद्विषयस्य-

---

* भावेऽपि,— इति क० पुस्तके पाठः।

† कारे च, — इति ख० ग० पुस्तकयोः पाठः।

‡ मूल,— इति ख० ग० पुस्तकयोः पाठः।

§ रप्रामाण्यमेवेति, — इति ख० ग० पुस्तकयोः पाठः।

तीनामप्रामाण्यम् । न हि श्रुते आचामेदिति विहितस्य स्मार्त्ताचमनस्य वेदवेदिकरणमध्येऽनुष्ठाने वेदं कृत्वा वेदिं करोतीति श्रुतिबोधितः क्रमोऽनुष्ठातुं शक्यते । स्मार्त्तपदार्थानाञ्च बहुत्वात् पूर्वाह्णादिः कालः प्रयोगविध्यवगतश्च परिमाणं न शक्यतेऽनुपालयितुम् । न च श्रौतत्वेऽपि क्रमादेः पदार्थधर्मत्वात् पदार्थभूतेभ्यः आचमनादिभ्यो दौर्बल्यं, प्रमाणपूर्वकत्वात् प्रमेयावगमस्य प्रथमावगतप्रमाणबलापेक्षया प्रमेयबलाबलस्य दौर्बल्यादिति प्राप्ते ।

पदार्थप्राप्त्यपेक्षत्वात् क्रमादेरुत्तरकालिकस्य यावत्प्रमाणगम्यपदार्थाविरोधेनैव कल्पनीयत्वाच्च तावत्पदार्थविरोधित्वम् । परिमाणन्तु न कस्यचिच्छास्त्रस्यार्थ इति न तस्य श्रौतत्वम् । विरोधेऽपि आचमनादीनां पदार्थत्वात् प्राबल्यमेव । प्रमाणानां हि न स्वरूपतो विरोधोऽपि तु प्रमेयविरोधनिबन्धनः । तद्यदैव प्रमेयविरोध आलोच्यते तदैव तद्गतेन बलाबलेन निर्णीते शास्त्रार्थे न प्रमाण* बलाबलस्य नियामकत्वमिति प्रमाणमेव तत्स्मृतिः† ।

यदा यज्ञकथादिग्रन्थेषु वेदाविरुद्धं दानादिवचनं तस्य भवतु प्रमाणतेत्याशङ्क्य, स्वाध्यायोऽध्येतव्यः, वेदोऽखिलो धर्ममूलं, तद्विदाञ्च स्मृतिशीले ।

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

---

* प्रामाण्य, — इति क० ग० पुस्तकयोः पाठः ।

† स्मृतिः, — ख० ग० पुस्तकयोः पाठः ।

इत्यादिवचनैर्नियतप्रमाणप्रतिपाद्यानामेव धर्मत्वप्रमितेरन्यतः प्रमितस्य फलसाधनत्वाभावात् तेषामप्रामाण्यमिति ॥ २ ॥ ७ ॥

अपि वा कारणाग्रहणे ॥ अनिबद्धानां वसन्तोत्सवाद्याचाराणां प्रामाण्यं न वेति सन्देहे, एतेषां वेदमूलत्वे अष्टकादिवत्मन्वादिभिर्निबन्धनापत्तेः, सामान्यतस्तद्विदाञ्च स्मृतिशीले इत्यादिना निबन्धनेऽपि च विशेषतोऽनिबन्धनेन तेषां श्रुतिदर्शनाभावनिश्चयादप्रमाणमिति प्राप्ते । धर्मबुद्ध्या वैदिकैरनुष्ठीयमानत्वात् स्मृतिवदेव वैदिकत्वम् । विशेषतोऽनिबन्धनं तु गौरवभिया न दोषः । व्यतिक्रमसाहसदर्शनं तु धर्मबुद्ध्याऽननुष्ठीयमानत्वात् न वैदिकम् । न चैतावता सर्वस्याप्यवैदिकत्वम् । अत आचाराणामपि धर्माधर्मयोः प्रामाण्यम् ॥ ४ ॥ ८ ॥

तेष्वदर्शनात् ॥ अत्र शब्दप्रयोगरूपस्याचारस्य यवार्यम्लेच्छयोः परस्परमर्थविप्रतिपत्तिः, यथा पीलुशब्दस्य वृक्षविशेषे आर्याणां हस्तिन्यन्येषां, तत्र तयोस्तुल्यबलत्वम् । व्यवहारे आर्याणामिव म्लेच्छानामप्यभियुक्तत्वाविशेषात् * । अबन्ध्यस्मरणस्योभयत्रापि समानत्वाच्चेति प्राप्ते ।

शक्यतावच्छेदकभेदेनानेकशक्तिकल्पनप्रसङ्गात् एकत्रैव शक्तिर्नोभयत्र । न च विनिगमनाविरहः । आर्यप्रसिद्धेरेव नियामकत्वात् । आर्या हि शब्दैकसमधिगम्यधर्माधर्मयोरविप्लुतिलिप्सया शब्दार्थतत्त्वं विविच्य † परिपालयन्ति न म्लेच्छाः । दृष्टार्थव्यवहारस्य

---

* अभियुक्तत्वाविशेषो शक्तत्वाविशेषात्, — इति क॰ पुस्तके पाठः ।

† विविच्य, — इति नास्ति ख॰ ग॰ पुस्तकयोः ।

यथाकथञ्चिदपि सिद्धेः। अतस्तत्प्रसिद्ध्या दृष्टविशेषएव शक्तिः। गजप्रतीतिस्तु लक्षणया शक्तिभ्रमाद्वा। यत्र तु नियामकाभावस्ता-वागत्याऽर्थ्यादिशब्देषु उभयत्रापि शक्तिः। आर्याणामेवोभयत्र प्रयो-गात्। तत्रापि क्वचिद्वाक्यशेषस्य* नियामकता। यथा यत्रान्या-ओषधयो म्लायन्ते अथैते मोदमानाएवोत्तिष्ठन्तीत्यनेन यवशब्दस्य दीर्घशूकएव शक्तिः। प्रियङ्गुषु तु लक्षणादिनेति॥ ५॥ ९॥

एवं वा॥ यत्र मातुलकन्यापरिणयादौ स्मृत्याचारयोर्विरो-धस्तत्रोभयोरपि श्रुतिकल्पकत्वात्तुल्यबलत्वमिति प्राप्ते। स्मृतीनां सम्प्रत्ययप्रणीतत्वात् स्मृतिषु कर्त्तव्यतावाचिविधिप्रत्ययश्रवणाच्च बलीयस्त्वम्। आचारेषु तु आचरितृणां जनानां मन्वाद्यपेक्षया तथा प्रत्ययितत्वाभावादितस्ततो विप्रकीर्णपरप्रकरणादिगतश्रुत्यव-गमस्याशक्यत्वात् परकीयाचारमात्रदर्शनेन कर्त्तव्यतावाचिविधि-प्रत्ययस्यावश्यकल्पनीयत्वाच्च दौर्बल्यम्। अतएवेदानीन्तनाचारदर्श-नेन श्रुतिद्रष्टुः स्मृतिकारस्य स्मृतिं तदुपदेशं वा कल्पयित्वा श्रुति-कल्पनं स्मृतीनान्तु साक्षादेवेति विशेषः। अतः स्मृतिविरोधे आचारस्य यावच्छ्रुतिदर्शनं स्मृतिदर्शनं वा अननुष्ठानम्॥ ६॥ १०॥

एवं वा॥ पिकनेमतामरसादिशब्देषु यत्र लोकवाक्यशेषयो-रर्थविप्रतिपत्तिस्तत्र पदपदार्थसम्बन्धे लोकात् वेदस्याधिक्ये† प्रमा-णाभावात्तुल्य‡ बलत्वमिति प्राप्ते। विषयैक्याभावे विधिस्तुत्योरेक-

---

* कदाचिद्वाक्यशेषस्य, — इति क॰ पुस्तके पाठः।

† लोकवद्वेदस्याधिक्ये, — इति ख॰ ग॰ पुस्तकयोः पाठः।

‡ तेषु तुल्य, — इति ख॰ ग॰ पुस्तकयोः पाठः।

वाक्यताऽनुपपत्तेर्विधिर्वाक्यशेषस्यैव शक्तिग्राहकत्वमनुमन्यते। अतश्च लौकिकप्रमाणावगतेऽर्थे शक्ति*कल्पनाभिया न शक्तिरपि तु लक्षणादिनैव बोधः। अतएव यत्र वाक्यशेषोनास्ति तथापि त्रिवृदादिपदार्थोवैदिक एव ग्रहीतव्य इति वक्ष्यते। अतश्च त्रिवृच्छब्दस्य स्तोत्रगतस्तृन्नवकं शक्यं न तु तन्तुत्रैगुण्यम्। चरुशब्दस्योदनो न तु स्थाली। अश्ववालशब्दस्य काशाः नाश्वकेशाः। वाक्यशेषाश्च कौस्तुभे द्रष्टव्याः ॥ ७ ॥ १ १० ॥

चोदितन्तु ॥ यत्र पिकनेमसततामरसादिशब्दानां नार्याणामर्थविशेषप्रसिद्धिः, म्लेच्छेषु तु पिकः कोकिलः, नेमः अर्द्धं, सतं वृत्तपात्रं दारुमयं शतच्छिद्रं परिमण्डलं, तामरसङ्कमलं, इत्येवं प्रसिद्धिः। तत्र तत्प्रसिद्धार्थस्यैव ग्रहणं न तु निगम † निरुक्तादिना तत्कल्पनम्। न च म्लेच्छेषु शब्दार्थयोर्विप्लुतिदर्शनेन तत्प्रसिद्धेरविश्रम्भणीयता। पिकादिशब्दानां वेदएव दृश्यमानत्वेनाविप्लुतत्वात्। अतश्च तेषां वाच्याकाङ्क्षायां तत्प्रसिद्धेरपि क्लृप्ततया ग्राहकत्वम्। अतएव निगमादिप्रसिद्धेरपि तत्प्रसिद्धित्वेन प्राबल्येऽपि कल्प्यत्वेन दौर्बल्यम्। म्लेच्छप्रसिद्धेश्च म्लेच्छप्रसिद्धित्वेन दौर्बल्येऽपि क्लृप्तत्वेन प्राबल्यम्। प्रमाणबलाबलापेक्षया प्रमेयबलाबलस्य बलीयस्त्वस्य स्थापितत्वात्। अतएव नात्र विशेषतः पूर्वपक्षः कथितः ॥ ८ ॥ १ २ ॥

प्रयोगशास्त्रम् ॥ सर्वस्मृतीनां कल्पसूत्राणां वा षडङ्गानामेव

---

* अनेकशक्ति, — इति क० पुस्तके पाठः।

† निगम, — इति नास्ति क० पुस्तके।

वां शाक्यादिग्रन्थानां वा वेदत्वं वेदतुल्यत्वं वा भवतु । श्रुत्यादि-मूलकत्वे गौरवात् । नित्यग्रह्मयज्ञविधिविषयत्वानुपपत्तेश्च । षड़-ङ्गानां तु, षड़ङ्गमेके — इति स्मृतेरपि वेदत्वम् । वृद्धबोधायनमश-कादिभिस्तु समाख्या कठादिवत्प्रवचननिमित्तत्वेनाप्युपपन्नेति प्राप्ते । दृढकर्तृस्मरणात्कठादिवत्प्रवचननिमित्तत्वानुपपत्तेर्नैषां * वेदत्वं वेद-तुल्यत्वं वा । प्रतिमन्वन्तरञ्चैवंविधानां ग्रन्थानां सत्त्वान्नित्यग्रह्मयज्ञ-विधिविषयत्वोपपत्तिः । षडङ्गमेके इति तु परमतोपन्यासः । एकपदश्रवणात् । तस्मादेषां स्मृत्यधिकरणन्यायेन वेदमूलकत्वमेव । शाक्यादिग्रन्थानां तु तदसम्भवात् आभासत्वमेव ।

प्रयोजनं, कल्पादीनां वेदत्वे तत्तुल्यत्वे वा यत्र प्रत्यक्षश्रुतिविरोध-स्तत्र विकल्पः । यत्र वा प्रत्यक्षश्रुतिविरोधाभावेऽपि न्यायाभासो-पन्यासपूर्वकं वचनं, तत्रापि वचनत्वादेव तदनुष्ठानं, न्यायोपन्यासस्तु हेत्वधिकरणन्यायेनार्थवादः । सिद्धान्ते तु प्रत्यक्षश्रुतिविरोधे सन्न्यायविरोधे च यावन्मूलश्रुतिदर्शनमननुष्ठानलक्षणमप्रामाण्यम् † । श्रुतिदर्शनोत्तरन्तु विकल्पः ‡ । यत्र तु न्यायोपन्यासरहितं मी-मांसान्यायविरुद्धञ्च स्मृतेर्वचनं § तत्र श्रुतिमूलत्वसम्भवेन वचनविरोधे न्यायस्यैवाभासत्वात्तदर्थ एवानुष्ठेय इति । अत्र सर्वोदाहरणानि मूलोक्तोदाहरणदूषणानि चाऽस्मत्कृते कौस्तुभे द्रष्टव्यानि ॥ ९ ॥ १३ ॥

---

* नैतेषां, — इति ख० ग० पुस्तकयोः पाठः ।

† यावन्मूलश्रुतिदर्शनमप्रामाण्यम्, — ख० ग० पुस्तकयोः पाठः ।

‡ विकल्पादि, — क० पुस्तके पाठः ।

§ स्मृतिवचनं, — इति ख० ग० पुस्तकयोः पाठः ।

अनुमान ॥ अथ यत्र स्मृतिषु पाठव्यवस्था यथा गौतमीया छन्दोगैरेव, तथाऽऽचारेषु कर्तृव्यवस्था यथा होलाकादि प्राच्याद्य-भिमानिभिरेव। तत्र तदनुमेयश्रुतिरपि अनुमापकस्य नियत-विषयत्वान्नियताधिकारिकैवेति नान्यैस्तदनुष्ठेयमिति प्राप्ते। यद्यपि अनुमापकं नियतविषयं, तथापि नानुमेयश्रुतौ विशेषणं प्राच्यत्वादि दातुं शक्यम्। न हि प्राच्यत्वं नाम सर्वाचरित्रनुगतं जातिव्यक्ति-गुणसंस्थानादिभिर्निर्वक्तुं शक्यम्। तत्तद्देशगतानामप्यनाचरणात्। चिरविनिर्गतपुत्रपौत्राणामप्याचरणाच्च। अतो विशेषणाभावात् सर्वविषयत्वम्। गौतमीयादिस्मृतिषु तु न छन्दोगाधिकारिकत्व-स्मरणं, येन श्रुतावपि तत्सम्भाव्यते। पाठमात्रन्तु तेषां, स्मृतिकर्त्तुः तच्छाखीयत्वादप्युपपन्नम्। कर्त्ता हि छन्दोगः स्वशिष्यान् छन्दो-गान् स्वग्रन्थमध्यापयामास* तेऽप्यन्यान् इत्येवं पाठसम्मात्रे व्यवस्थित-इति तत्रापि सर्वविषयत्वमेव ॥१०॥१४॥

प्रयोग ॥ स्मृत्यधिकरणन्यायेन सिद्धमपि व्याकरणप्रामाण्य-माक्षिप्यते। नियमद्वयार्थं हि तत्। साधूनेव प्रयुञ्जीत नासाधून् इत्येको गवादय एव साधवो न गाव्यादय इत्यपरः। न च नियमद्वयस्य मूलं सम्भवति। प्रतिगवादिशब्दमनेकश्रुतिवाक्यपाठा-सम्भवात्। साधुत्वस्य पूर्ववन्निर्वचनासम्भवेनानुगतैकश्रुतिकल्पनाऽनुप-पत्तेश्च। न हि साधुत्वं नामार्थप्रत्यायकत्वम्, अनादित्वे सति वा-चकत्वं वा। गाव्यादिष्वपशब्देष्वपि सत्त्वात्। अपशब्दानां क्वचिद्वाच-

---

*स्वशिष्यानध्यापयामास, – इति क॰ पुस्तके पाठः।

कत्वाभावे गवादिषु गौणत्वस्याप्यसम्भवाच्च । अतो वाचकत्वाविशेषाच्च व्याकरणेन नियमः सम्भवतीति इति प्राप्ते ।

प्रयोगप्रत्यययोः साधुशब्दापभ्रंशजानां गाव्यादिशब्दानां मष्ट-शब्दोपस्थापनद्वारोपपत्तेर्न वाचकत्वकल्पना । अनेकशक्तिकल्पनापत्तेः । इदानीन्तनानाञ्च शक्तिभ्रमात्तौ । न च घटकलशादिपदवद्विनि-गमनाविरहः । पाणिन्यादिप्रणीतव्याकरणस्यैव नियामकत्वात् । न च निर्मूलत्वम् । प्रयोगनियमे साधूनेव प्रयुञ्जीतेत्येवंविधायाः एकस्या एव श्रुतेर्मूलत्वात् । साधुत्वञ्चानादिवाचकत्वं, अनपभ्रष्टत्वं वा, व्याकरणाभ्यासजनितसंस्कारव्यङ्ग्या जातिर्वा, प्रमितवृत्त्याऽर्थप्रति-पादकत्वं वेति कौस्तुभ एव स्फुटम् । तदभावश्चासाधुत्वम् । प्रत्यक्षैव च श्रुतिर्न म्लेच्छितवै म्लेच्छो ह वा एष यदपशब्द इति मूलम् । अयञ्च निषेधः प्रकरणाज्ज्योतिष्टोमाङ्गम् । यज्ञमात्रेऽपि च निषेधो-यान्ते कर्मणि नियमोऽन्यत्रानियम इति महाभाष्याद्यनुसारात्* । साधुप्रयोगनियमात् परं फलोदय इत्यपि, एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति वचनात् ।

अत हि प्रयोगाश्रितः साधुनियमः फलोद्देशेन विधीयते । रागप्राप्तस्यापि च साधुप्रयोगस्य, तस्माद्‌द्वेधा व्याहृता वागुद्यत इति वचनादाश्रयत्वसिद्धिरिति स्पष्टं कौस्तुभे । गवादय एव साधवो न गाव्यादय इति† साधुस्वरूपनियमस्य तु अनादिप्रयोगपरम्परैव मूलम् ।

---

* महाभाष्यानुसारात्, — इति ख० ग० पुस्तकयोः पाठः ।

† गवादय एव साधव इति, — इति ख० ग० पुस्तकयोः पाठः ।

अतः प्रमाणं व्याकरणम्। यत्तु न्यायमूलकं स्फोटादि तच्चोच्यते, श्रुतिविरुद्धञ्च, तन्न्यायश्रुतिविरोधे* कामं भवत्वप्रमाणम्॥ १। १। १५॥

प्रयोगचोदना॥ वाचकशब्दप्रसङ्गाद्वाच्यं किं घटत्वादिजातिः उत व्यक्तिरिति चिन्ता। तदर्थञ्च लोकवेदयोः शब्दानामन्यत्वमुत नेति चिन्तनीयम्। अन्यत्वे हि उपायाभावेन वैदिकशब्दशक्ति-ग्रहणासम्भवाद्वाच्या चिन्ताऽऽरम्भणीया। एकत्वे तु लोके† वृद्धव्यव-हारानुसारेण ग्रहीता शक्तिर्वेदे फलिष्यतीति युक्ता चिन्ता। तत्र वर्णाभेदेऽपि स्वरच्छान्दसवर्णागमलोपविकारानध्यायादिधर्म-भेदात्सरोरस इत्यादिपदयोरिव लोकवेदयोः पदानामन्यत्वमिति प्राप्ते। यत्रार्थभेदप्रतिपत्त्यनुकूलो धर्मभेदस्तत्रैव पदभेदः।(१) यथा

* न्यायादिविरोधे, — इति ख० ग० पुस्तकयोः पाठः।
† लोके, — इति नास्ति ख० ग० पुस्तकयोः।

(१) पदावधारणोपायान् बहूनिच्छन्ति सूरयः। क्रमन्यूनातिरिक्तत्वस्वर-वाक्यश्रुतिस्मृतीरिति वार्त्तिककारिकामनुसृत्य पदभेदावधारणोपा-यान् क्रमेणोदाहरति, यथेति। क्रमो विलक्षणानुपूर्व्वीरूपः। स्थूला-पृषतीत्यत्र कर्म्मधारयसमासे गोरेव स्थूलत्वं बिन्दुमत्त्वञ्च लभ्यते। यैव स्थूला सैव बिन्दुमतीत्यवगतेः। बहुव्रीहौ तु स्थूलबिन्दुयुक्तत्वं लभ्यते। एवञ्च स्थूलपृषतीमनड्वाहीमालभेतेत्यत्र बहुव्रीहिस्वरपाठादर्थनिर्णयः। पचते दक्षिणां देहीत्यत्र देहीति योगात् पचते इति चतुर्थ्यन्तं पदं, भोजनार्थं पचते इत्यत्र भोजनार्थमित्युपादानात् पचते इति तिङन्तं पदम्। यातः पुनरायातीत्यत्र यात इति प्रथमान्तं पदम्। यातो-देवदत्तयज्ञदत्तावित्यत्र तिङन्तम्। अश्वस्त्वमित्यत्र अश्व इति श्वि-धातोर्लुङि मध्यमपुरुषैकवचने रूपम्। तथा च घोटकवाचकाद-श्वपदादस्य भेदः। अर्थभेदादेव पदभेद इति तु फलितार्थः।

शरीरस्य इति क्रमात्। ब्रह्मब्राह्मणेति न्यूनातिरिक्तत्वात्। स्थूलपृषती-त्यत्र कर्मधारयबहुव्रीह्योः स्वरात् अन्तोदात्तत्वाद्युदात्तत्वरूपात्*। पचते दक्षिणां देहि, भोजनार्थं पचते, इत्यत्र व्यधिकरणपद-सन्निधिरूपाद्वाक्यात्। यातः पुनरायाति, यातो देवदत्तयज्ञदत्तौ, इत्यत्र समानाधिकरणपदसन्निधिरूपश्रुत्या। अश्व इति अगम-इत्यर्थे—व्याकरणस्मृत्या तद्भिन्नस्य पदभेदानुभवात्। यत्र तु नार्थभेदप्रतीतिस्तत्र सत्यपि धर्मभेदे दृढतरप्रत्यभिज्ञाबलेनैकत्वाव-धारणान्न पदान्यत्वं लोकवेदयोरिति युक्ता आद्या चिन्ता।

तत्रावघातादिक्रियाणां लिङ्गकारकसंख्यादीनां च जातावयोग्य-त्वात् गौः शुक्ल इत्यादिसमानाधिकरणनिर्देशाच्च व्यक्तिवाचित्व-मेव। न चैवं जातिबोधानापत्तिः। लक्षणया† तद्बोधोपपत्तेः। व्यक्तिशक्तिग्रहस्यैव‡ कार्य्यतावच्छेदकं जातिविशिष्टशाब्दबोधत्वम्। अतो न दोषः। न च विनिगमनाविरहः। लाघवस्यैव नियामक-त्वात्। तथा हि, न शक्तिग्रहस्य स्वातन्त्र्येण कारणत्वं, अपि तु लाघवाच्छक्यत्वादिसम्बन्धेन घटपदवत्ताज्ञानस्यैव। ततश्चास्मन्मते घटत्वं धर्मितावच्छेदकीकृत्य शक्यत्वसम्बन्धेन घटपदवत्ताज्ञानस्य घटो घटपदवानित्याकारकस्य विशेष्यतासम्बन्धेन विशिष्टशाब्द-बोधत्वावच्छिन्नं प्रति कारणत्वम्। भवन्मते तु घटत्वत्वं धर्मिता-वच्छेदकीकृत्य तदाश्यम्। अतश्च घटत्वत्वस्य घटेतरावृत्तित्वादि-

---

* अन्तोदात्तत्वाद्युदात्तत्वादिरूपात्,—इति ख॰ ग॰ पुस्तकयोः पाठः।

† लक्षणादिना,—इति क॰ पुस्तके पाठः।

‡ व्यक्तिशक्तिग्रहस्यैव वा,—इति भवितुमुचितम्।

रूपस्यानेकपदार्थघटितस्य प्रवेशात् तव कार्यकारणभावे गौरवं, न मम। न च शक्यानन्त्यादिदोषः। तस्य फलमुखत्वात्। अतश्च लाघवात् व्यक्तावेव शक्तिर्जातिविशिष्टव्यक्तौ वा न तु जातावेवेति प्राप्ते।

घटत्वं धर्मितावच्छेदकीकृत्य शक्यत्वसम्बन्धेन घटपदवत्तानिश्चयस्य कारणत्वं, पदत्वं धर्मितावच्छेदकीकृत्य शक्तत्वसम्बन्धेन घटवत्तानिश्चयस्य वा घटपदं घटवदित्याकारस्य कारणत्वमित्यत्र विनिगमनाविरहेणानन्तकार्यकारणभावप्रसङ्गात्। अस्मन्मतेतु घटपदत्वं धर्मितावच्छेदकीकृत्य शक्तत्वसम्बन्धेन घटत्ववत्तानिश्चयस्यैव घटपदं घटत्ववदित्याकारकस्य कारणत्वकल्पनाल्लाघवम्। न च ममापि विपरीतमापादयितुं शक्यम्। तथा सति घटत्वस्य धर्मित्वेन स्वरूपेण तस्य धर्मित्वायोगाद्धर्मितावच्छेदकत्वेन घटत्वत्वप्रवेशे गौरवस्य त्वयैवोक्तत्वात्। अतो न घटत्वत्वावच्छिन्नं घटत्वं शक्यत्वसम्बन्धेन घटपदवदित्याकारकं ज्ञानं कारणं, अपि तु घटपदं शक्तत्वसम्बन्धेन घटत्ववदित्याकारकमेव। जातेः स्वरूपेणैव प्रकारत्वोपपत्तौ घटत्वत्वस्याप्रवेशात्। * न च समवायेनैव जातेः स्वरूपेण प्रकारता न संबन्धान्तरेणेत्यत्र प्रमाणमस्ति। परैरपि तथाऽनभ्युपगमाच्च *। अतश्च कार्यकारणभावेऽपि लाघवात् घटत्वएव शक्तिः। शक्यानन्त्यादि च नास्मन्मते। अतः प्रथमोपस्थितत्वाज्जातावेव शक्तिः।

एवमरुणादिशब्देष्वपि गुणएव गुणत्वे वा। न तु तद्विशिष्टद्रव्ये। कथं तर्हि व्यक्तिबोधः। अभेदात्, उक्तविधकारणस्य जातिगुण-

* एतच्चिह्नान्तर्गतः पाठो नास्ति क॰ पुस्तके।

विशिष्टव्यक्तिशब्दत्वएवं कार्यतावच्छेदकत्वस्वीकारादोषपत्तेः । वस्तु-तस्तु जातिगुणशब्दत्वमेव लाघवेन कार्यतावच्छेदकम् । व्यक्तिस्तु तृतीयान्तस्थले * पशुना यजेत अरुणया क्रीणाति इत्यादौ नैव पदाज्ज्ञायते । जातिगुणयोरेव द्रव्यपरिच्छेदद्वारा करणत्वोपपत्तेः । लिङ्गसंख्ययोरपि पाशाधिकरणन्यायेन सामानाधिकरण्येन पार्ष्ठिको जातिगुणसंबन्धः(१) । अतः संबन्धविधयैव तत्र द्रव्यबोधः । द्वितीयान्तादिस्थले तु जातिगुणयोः कर्मत्वाद्यन्वयासम्भवाल्लक्षणया बोधः । तस्या एव कर्मत्वाद्यन्वयः । लिङ्गसङ्ख्याद्यन्वयस्य साक्षात्सम्बन्धेनैव, सामानाधिकरण्यस्य व्यक्तिद्वारकमिति सर्वं सुस्थम् । प्रयोजनं, पूर्वपक्षे रथन्तरादिशब्दानां ऋग्वाचित्वाद्रथन्तरमुत्तरयोर्गायति इत्यादौ उत्तरापदबचितोत्तराकार्ये योनिविधानं, सिद्धान्ते तु गीत्यतिदेशश्चत्तराखिति वक्ष्यते ॥ १२ ॥ १६ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
प्रथमस्य तृतीयः पादः ॥ ० ॥

---

* तृतीयादिस्थले, — इति क० पुस्तके पाठः ।

(१) लिङ्गसङ्ख्ययोरपि समानपदोपात्तत्वप्रत्यासत्त्या सामानाधिकरण्यसम्बन्धेन करणएवान्वयः पार्ष्ठिको जातिगुणसम्बन्धः,— इति भाट्टदीपिकाप्रभावती ।

उक्तं॥ इह गुणविधित्वेन नामधेयत्वेन वा संमतानां सर्वेषामेव फलपदातिरिक्तसुबन्तानां उद्भित्सोमादिपदानां प्रामाण्यमप्रामाण्यं वेति संशये, प्रमाण्यप्रकारासम्भवादप्रामाण्यम्। तथा हि, उद्भिदा यजेत पशुकामः, सोमेन यजेतेत्यादावुद्भिदादिपदेभ्यः स्तुतिबुद्धेरनुत्पत्तेर्न तावदर्थवादत्वम्। मन्त्रत्वप्रसिद्ध्यभावाच्च न तत्। एतेषां प्रयोगकालोच्चारणे चैतत्प्रतिपाद्यार्थस्य यागाङ्गताबोधकप्रमाणाभावेनैतेषां प्रयोगसमवेतार्थस्मारकत्वानुपपत्तेश्च। न च विध्यन्तर्भावः। कामशब्दाद्यभावेन साध्यानभिधायकत्वात्। एकपदगतेन यजिनैव करणप्रतिपादने एतेषां तत्प्रतिपादकत्वायोगात्। सिद्धरूपाणां सोमादीनां व्यापारमन्तरेण* भावनेतिकर्त्तव्यतात्वानुपपत्तेश्च। नामधेयत्वे तु अभिन्नत्वादेव करणानुग्राहकत्वादिरूपेतिकर्त्तव्यतात्वानुपपत्तिः। न च कथमपि भावनाऽन्वयासम्भवेऽपि यागएव कारणत्वेनान्वयो भवत्विति वाच्यम्। कारकाणां परस्परान्वयासम्भवात्†। अतः कथमपि क्रियाऽन्वयासम्भवादनाख्यातत्वेन च विधिभावनयोरनभिधानात् अन्यस्य च प्रकारस्य निर्वक्तुमशक्यत्वादप्रामाण्यमिति प्राप्ते। अध्ययनविध्यध्यापितस्य अप्रमाण्यासम्भवात्, प्रकारान्तरासम्भवेऽपि विध्यन्तर्भावस्य स्पष्टत्वेन तत्रैव गुणविधित्वेन नामधेयत्वेन वा वक्ष्यमाणरीत्या सर्वानुपपत्तिपरिहारेण प्रामाण्यमिति सिद्धम्॥ १॥ १७॥

---

* व्यापारान्तरमन्तरेण, — इति क॰ पुस्तके पाठः।

† परस्परसम्बन्धाभावात्, — इति क॰ पुस्तके पाठः।

अपि वा नामधेयम् ॥ अतः परं क गुणविधित्वं क वा नामधेयत्वमिति कोष्ठ्गोधिकार्यमारम्भः। तदिह गुणे कर्मणि च तुल्यवद्वृत्तिकानामुद्भिदादिपदानां विधेयगुणसमर्पकत्वं नामधेयत्वं वेति चिन्तायां, भिदिर् विदारणे इति स्मृत्या विदारणसमर्थखनित्रादिवचनत्वप्रसिद्धेर्नामधेयत्वे वैयर्थ्यप्रसङ्गाच्च गुणविधित्वमेव युक्तम्। तत्र च गुणविशिष्टं कर्मैव फलोद्देशेन विधीयतइत्येकः पक्षः। * प्रकृतसोमयागानुवादेन गुणमात्रविधानमित्यपरः।

न च विनिगमनाविरहः। इतिकर्त्तव्यतासन्निधिविशेषस्यैव कर्मविधिनियामकत्वात्। न चैवं फलपदानर्थक्यं, सर्वेभ्यो ज्योतिष्टोम इति वचनेन तस्य सर्वफलार्थत्वावगतेर्यजिपदस्य पशुफलोपधायकयागलक्षणायां † तात्पर्य्यग्राहकत्वात्। अत एव न विशिष्टोद्देशे वाक्यभेदः। न चोत्पत्तिशिष्टसोमप्राबल्यं, पशुकामप्रयोगविशेषपुरस्कारेण विहितस्य खनित्रादेः सामान्यविहितसोमादिबाधकत्वात्। वस्तुतस्तु प्रकृतसोमयागाश्रितः खनित्रादिगुण एव फलोद्देशेन विधीयते इति तृतीयः पक्षः। काम्यत्वादेव च नित्यसोमबाध इति प्राप्ते ब्रूमः ‡।

नायं गुणविधिर्गौरवात्। तथा हि, सर्वत्रैव तावच्छुद्धधात्वर्थकरणकभावनाविधानादाद्यो विधिप्रकारः। यथाऽग्निहोत्रं जुहो-

---

* अथवा, — इत्यधिकः पाठः क० पुस्तके।

† लक्षणा, — इति क० पुस्तके पाठः।

‡ ब्रूम, — इति नास्ति ख० ग० पुस्तकयोः।

तीति। अन्योद्देशेन तद्विधिरपरः। यथाऽग्निहोत्रं जुहुयात् स्वर्ग-काम इति। एतस्य चोद्देश्यवाचकपदान्तरसापेक्षत्वाद्दौर्बल्यम्। धात्वर्थोद्देशेनान्यकरणकभावनाविधिस्तृतीयः। यथा दध्ना जुहोतीति। अत्र विधेयताया धात्वर्थवृत्तित्वाभावात् पदान्तरार्थवृत्तित्वाच्च ततोऽपि दौर्बल्यम्। धातोः साधुत्वार्थत्वमङ्गीकृत्य अन्योद्देशेनान्यक-रणकभावनाविधिश्चतुर्थः। यथा दध्नेन्द्रियकामस्य जुहुयादिति। अत्र धात्वर्थस्योद्देश्यत्वेनाप्यसंबन्धात्ततोऽपि दौर्बल्यम्। गुणविशिष्टधात्वर्थ-करणकभावनाविधानात् पञ्चमः। यथा सोमेन यजेतेति। अत्र विशेषणविधिकल्पनादेराधिक्यात्ततोऽपि दौर्बल्यम्। अन्योद्देशेन पूर्वोक्तः षष्ठः। यथा सौर्य्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति। अयन्तु सर्वदुर्बलः।

तदेवं उद्भिद्गुणविशिष्टस्य यागस्य फलोद्देशेन विधाने षष्ठविधि-प्रकाराश्रयणादतिगौरवम्। गुणस्य यागे अन्वयान्मत्वर्थलक्षणाच्च। न हि भावनायां समानपदोपात्तधात्वर्थकरणकत्वावरुद्धायां गुणस्य करणत्वं सम्भवति। अतस्तस्य यागान्वयावश्यकत्वे यागस्य कारकत्वात् कारकाणां च परस्परं सम्बन्धानुपपत्तेः, सोमेन यजेतेतिवदुद्भिद्वता यागेनेति मत्वर्थलक्षणाऽऽवश्यकीति प्राञ्चः।

वस्तुतस्तु दृष्टान्तेऽपि सोमस्य करणत्वेनैव भावनायामेवान्वयस्तत्र * वक्ष्यते। युक्तञ्च, एककरणावरुद्धेऽपि करणान्तरस्य भिन्ननिरूपितस्य प्रकारतया भावनाऽन्वयोपपत्तेः। न हि यागकरणत्वं भावनानिरू-पितम्। अपि तु स्वर्गनिरूपितम्। अतश्च यथैवान्यनिरूपितमपि

* तत्र तत्र, — इति क० पुस्तके पाठः।

तत्करणत्वं प्रकारतया भावनायामन्वेति, तथैव सोमकरणत्वमपि यागनिरूपितम्। उभयच तत्तन्निरूपकत्वस्य पार्ष्टिकबोधसभ्यत्वाच्च न कोऽपि विरोध इति नास्मिन्नपि पक्षे यद्यपि मत्वर्थलक्षणा, तथापि विशेषणविधिकृत * गुणयागोभयविशिष्टभावनाविधिगौरवमापद्य-मानं नापक्नोतुं शक्यम्। यथा च प्राथमिकभावनासम्बन्धाङ्गी-कारेऽपि द्वितीयबोधवेलायां मत्वर्थकल्पना तथोक्तं कौस्तुभे।

एवं द्वितीय-तृतीययोरपि † अयन्यविधिप्रकाराङ्गीकरणं द्रोवाच। अगत्या च दधिहोमादावेव तदङ्गीकृतम्। तेषां तत्र ‡ अत्यन्तरूढ़त्वेन नामधेयत्वासम्भवात्। प्रकृते तु येनैव योगेन खनित्रे प्रवृत्तिस्तेनैव योगेनोद्भिद्यते उत्पाद्यते फलमिति व्युत्पत्त्या कर्मण्य-पीति नामत्वसम्भवेन द्वितीयविधिप्रकाराङ्गीकरणाल्लाघवम्। न च भिदो विदारणएव स्मृतेः शक्तिः। भिदिर्त्येव धातुपाठात् विदारण इत्यस्य शक्यार्थमात्रोपलक्षकत्वस्य वैयाकरणसिद्धत्वात्। अतो विदारण इवोत्पादनेऽपि प्रयोगात् तुल्यवदृत्तिकता। न च नामधेयानर्थक्यम्। संकल्पादौ सार्थकत्वात्। क्वचित् फलोप-बन्धश्च। यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। क्वचिच्च गुणोपबन्धः। यथा संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीति। प्रकृते च संज्ञया भेदसिद्धिरेव प्रयोजनम्। इतरथा हि प्रकृत एव

---

* विशेषणविधिकल्पनादिकृतं, — इति क॰ पुस्तके पाठः।

† द्वितीयतृतीयपूर्व्वपक्षयोरपि, — इति क॰ पुस्तके पाठः।

‡ गुणे, — इति ख॰ ग॰ पुस्तकयोः पाठः।

कर्मणि गुणफलसंबन्धापत्तेर्न कर्मान्तरत्वम्। न च योगस्य* फलो-च्छेदनकारित्वस्यातिप्रसक्तत्वादपूर्वे कर्मणि रूढिकल्पने सोमादिपदा-नामपि तदापत्तिः। सर्वत्र योगरूढिस्थले प्राचीनप्रयोगस्यैव का-रणतायाः क्लृप्तत्वेन प्रकृते तदकल्पनात्। प्रयोजनं स्पष्टम् ॥२॥१८॥

यस्मिन् ॥ अत्र गुण एव रूढानां, 'चित्रया यजेत पशुकामः, पञ्चदशान्याज्यानि, सप्तदशानि पृष्ठानि, त्रिवृद्बहिष्पवमानः, इत्यादौ चित्राऽऽज्यपृष्ठबहिष्पवमानशब्दानां गुणविधित्वं कर्मनामत्वं वेति चिन्तायां, दध्यादिवद् रूढेषु कर्मनामत्वासम्भवाद् गुणविधित्वमे-वैषाम्। तत्र चित्रापदे तावत्प्रातिपदिकेन चित्रत्वं स्त्रीप्रत्ययेन च स्त्रीत्वं विधीयते। विधेययोश्च परस्परसाहित्यावगतेर्विधेय-सामर्थ्यानुरोधेन प्राणिद्रव्यकयागस्योद्देश्यत्वावगतेः प्रकृतानामपि दधि मधु घृतं पयोधाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यमित्ये-तद्वाक्यविहितानां यागानामुद्देश्यत्वासम्भवेऽपि सर्वप्रकृतिभूताग्नीषो-मीययागोद्देशेन सर्वपशुयागोद्देशेन वा विधीयते। न चानेकगुण-विधाने वाक्यभेदः। धेनुर्वत्सिणेतिवदुभयविशिष्टैककारकविधानेना-वाक्यभेदात्। एवमाज्यपदेन घृतं, पृष्ठपदेन शरीरावयवः। स च सङ्ख्याविशिष्टः प्रकरणादाज्यैः स्तुवते पृष्ठैः स्तुवते इत्येतद्वाक्यविहित-स्तोत्राङ्गतया यथाक्रमं विधीयते। एवं त्रिवृच्छब्दवाच्यं त्रिभित्ति† द्रव्यं पवनक्रियाविशिष्टं तथैव तद्वाक्येन विधीयते। सर्वत्र द्रव्याणां

---

* यागस्य,—इति ख॰ ग॰ पुस्तकयोः पाठः।

† त्रिभित्ती,—इति क॰ पुस्तके पाठः।

स्तोत्रसमीपदेशे अदृष्टार्थं स्थापनेनैव स्तोत्रोपकारकता। उत्पत्ति-वाक्येषु तु आज्यादिपदं गुणवाक्यप्राप्तत्वादनुवादः। स्तोत्रमात्रन्तु विधीयते इति प्राप्ते।

प्राप्तकर्मानुवादेन चित्रत्वस्त्रीत्वरूपानेकगुणविधाने वाक्यभेदात्। करणत्वस्यापि फलगतस्य प्राप्तत्वेनाविधेयतयोभयविशिष्ट-कारकविध्ययोगात्, अग्नोऽग्नीषोमीयं इति वचनेन विहितप्राकर-णिकपुंस्त्वावरोधेन स्त्रीत्वस्य विध्ययोगाच्च न° गुणविधिः। अतः प्रकृतानामेव यागानां विचित्रद्रव्यकत्वेन लक्षणया चित्रापदं नामधेयम्। इत्यभिप्रायेण च स्त्रीप्रत्ययः। एवमाज्यादिपदेष्वपि असमस्तत्वेन विशिष्टस्याव्युत्पन्नत्वात् प्राप्तस्तोत्रानुवादेन द्रव्यसङ्ख्या-द्यनेकगुणविधौ वाक्यभेदः। न चोत्पत्तिवाक्यएव द्रव्यविशिष्टस्तोत्र-विधिरितरत्र तु सङ्ख्यामात्रविधिरस्त्विति वाच्यम्। घृतादीनां स्तोत्रे करणत्वासम्भवेन विशिष्टविध्ययोगात्। पञ्चदशानीत्यादि-श्रुतिगतत्वक्सङ्घातरूपस्तोमवाचि-डप्रत्ययस्य गुणविधित्वेऽनुपपत्तेश्च। अत आज्यादिपदं वाक्यद्वयेऽपि प्रकृत्यैव स्तोत्रनामधेयम्। आज्यादि-पदाभिधेयस्तोत्रानुवादेन च गुणवाक्ये सर्वत्र सङ्ख्यामात्रविधिः। आज्योत्पत्तिवाक्ये च तत्संज्ञकानि चत्वारि स्तोत्राणि, गमक-सदृक्तवक्तृवचनेन तावत्त्वावगमात्। एवं पृष्ठोत्पत्तिवाक्येऽपि षट्। अनुष्ठेयानि तु नियतानि चत्वारि। आद्ययोर्द्वयोरुत्तरद्वय-न्तरयोरन्ययोश्च नौधसश्यैतयोर्वचनेन विकल्पविधानात्। यथा चात्र तत्तद्दूषणानां निरासो मतान्तरदूषणानि च, तानि कौस्तुभे द्रष्टव्यानि ॥२॥१९॥

तत्प्रख्यं ॥ इह रूढ़ानां यौगिकानां च सम्भवत्प्राप्तिकानामग्निहोत्रं जुहोति, आघारमाघारयति, समिधो यजति, इत्यादौ अग्निहोत्रादिपदानां गुणविधित्वं कर्मनामत्वं वेति चिन्तायां, प्रसिद्धेर्गुणविधित्वमेव युक्तम्। न चात्र वाक्यभेदः, विधेयानेकत्वाभावात् । अतोऽग्निहोत्रपदे अग्नये होत्रमस्मिन्निति व्युत्पत्त्या उपसर्जनार्थोऽग्निर्देवता होमे विधीयते । न च यदग्नये च प्रजापतये च सायं जुहोति इत्यनेन तस्याः प्राप्तत्वादविधानम्। तत्रानेकगुणोपादानेन विशिष्टकर्मान्तरविधेरावश्यकतया एतद्वाक्यविहिते कर्मणि तत्प्राप्तेरभावात्। अतो यत्र दर्विहोमादावाग्नेयो मन्त्रः पठितः, तादृशदर्विहोमानुवादेन देवतामात्रमनेन विधीयते। वचनेन तत्प्राप्तिसम्भवे मान्त्रवर्णिकविधेरकल्पनीयत्वात् । विशिष्टकर्मान्तरं वा । आघारवाक्येऽपि द्वितीयान्ताघारपदेन क्षरणसमर्थमाज्यादिद्रवद्रव्यमभिधीयते। धातुना च क्षरणाख्यः संस्कारस्तदुद्देशेन विधीयते । अविनियुक्तस्य च संस्कारायोगात् प्रकरणकल्पितवाक्येनोपांशुयाजाङ्गतया द्रवद्रव्यं विधीयते। चतुर्गृहीतं वा एतदभूत् तस्याघारमाघार्य्येत्यनेन वा प्रयाजाङ्गभूतचतुर्गृहीतरूपविशेषसमर्पणम्। सर्वथाऽऽघारपदं द्रव्यपरं न नामधेयमिति प्राप्ते।

मन्त्रवर्णकल्प्यविधिनैव देवताप्राप्तिसम्भवे अस्य पूर्वप्रवृत्त्या विधिकल्पकत्वे वैफल्यापत्तेः* अभ्युदयशिरस्कत्वस्य च सम्भवति प्रथमविध्यापादकधात्वर्थविधावन्याय्यत्वाच्च तावद्दर्विहोमानुवादेन देवताविधिः। नापि विशिष्टकर्मान्तरविधिः। अग्निर्ज्योतिर्ज्योतिरग्निः

* वैयर्थ्यापत्तेः, — इति ख० ग० पुस्तकयोः पाठः ।

स्वाहेति सायं जुहोति सूर्य्योज्योतिर्ज्योतिः सूर्य्यः स्वाहेति प्रात-र्जुहोतीति वचनविनियुक्तमन्त्रवर्णेनैव देवताप्राप्तेः। यदग्नये च प्रजापतये च सायं जुहोति यत् सूर्य्याय च प्रजापतये च प्रात-रित्यत्र तु लाघवात् सायं प्रातःकालीनदेवतासमुच्चयविशिष्टप्रजा-पतिमात्रविधानम्। अतएव यथैव केवलदेवत्यमन्त्रलिङ्गवशेन केवल-योर्देवतात्वं, तथा अग्निर्ज्योतिर्ज्योतिः सूर्य्यः स्वाहेति सायं जुहोति सूर्य्योज्योतिर्ज्योतिरग्निः स्वाहेति प्रातरिति मिश्रलिङ्गकमन्त्रवर्णा-म्नातयोरपि तत्। अतश्च यदग्नये चेति वाक्यस्थाग्निसूर्य्यपदं सायं-प्रातःकालीनदेवतालक्षकं सायंप्रातःपदं च तात्पर्यग्राहकम्। चशब्दो-पस्थितसमुच्चयस्य च प्रजापतावन्वयस्य निपातोपसर्गार्थत्वेन व्युत्पन्नत्वाच्च विधेयानेकता। अतश्चाग्नेर्देवतात्वादिना अग्निहोत्रहोमे * प्राप्तत्वाद-ग्निहोत्रपदं अग्नेर्होम इत्येवं व्युत्पत्त्या नामधेयम्।

एवमाघारेऽपि उपांशुयाजे सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमित्यनेनैव द्रव्यस्य † प्राप्तत्वात् प्रयाजाऽऽज्योद्देशेन संस्कारविधानेऽपि ‡ द्वितीयविधिप्रकारापत्तेर्लाघवाद् भावव्युत्पन्न-माघारपदं नामधेयम्। विधेयस्तु धातुलभ्यो होम एव। इन्द्र-ऊर्द्ध्वो अध्वर इत्याघारमाघारयतीति मान्त्रवर्णिकेन्द्रदेवतायास्तु-र्गृहीतं वेत्यनेन द्रव्यस्य लाभात्। एवं समिदादिष्वपि वक्ष्यते। सर्वत्र द्वितीया करणत्वलक्षणार्थेति न विरोधः ॥४॥२४॥

---

* अस्मिन्नपि होमे, – इति ख० ग० पुस्तकयोः पाठः।

† द्रवद्रव्यस्य, – इति ख० पुस्तके पाठः।

‡ संस्कारविधावपि, – इति ख० ग० पुस्तकयोः पाठः।

तद्व्यपदेशाच्च ॥ श्येनेनाभिचरन् यजेतेत्यादौ पूर्वोक्तबाधकाभावात् प्रसिद्धेः श्येनादिपदानां गुणविधित्वमेव। प्रकृतसोमयागाश्रितो गुणः फलोद्देशेन विधीयते। विशिष्टकर्मान्तरं वा। न चैवं यथा वै श्येनो निपत्यादत्ते एवमयं भ्रातृव्यं निपत्यादत्ते इत्यर्थवादे स्वस्यैव स्वोपमानानुपपत्तिः। उपक्रमनिर्णीतविध्यनुरोधेनोपसंहारस्यार्थवादस्यान्यथा नेयत्वात्। ते तद्विलासा इव तद्विलासा इत्यादिवदनन्वयालङ्कारस्याभेदे अनुगुणत्वाच्चेति प्राप्ते।

नायमनन्वयालङ्कारस्तथात्वे सर्वेषामर्थवादपदानामुपमानान्तराभावलक्षकत्वापत्तेः। तद्वरं भूयोऽनुग्रहस्य न्याय्यत्वात् उपक्रमस्थ एवैकस्मिन् पदे रूपकविधया लुप्तोपमाविधया वा गौणीं वृत्तिमङ्गीकृत्य नामधेयत्वं द्वितीयविधिप्रकारापादकं युक्तमाश्रयितुम्। अर्थवादस्तु रूपकाद्यपेक्षितसादृश्योपपादनार्थः, स च* विनैव लक्षणां पूर्णोपमालङ्कारविधया विधेययागस्तुत्यर्थो न विरुध्यते। तत्सिद्धं चतुर्भिरेव प्रकारैः सर्वत्र नामत्वमिति ॥५॥२१॥

नामधेये ॥ पूर्व्वमुभयत्र विशिष्टविधिपूर्वपक्षे यानि दूषणानि मत्वर्थलक्षणादीनि दत्तानि, तानि इह आक्षिप्यन्ते। यदि हि यागस्य कारकत्वं स्यात्, ततः सोमादीनां कारकान्तराणां तदन्वयानुपपत्तेर्भवेन्मत्वर्थलक्षणा, उभयविशिष्टभावनाविधानं वा। न त्वेतदस्ति। यागस्य क्रियारूपत्वाङ्गीकारात्। अतश्च तस्मिन् सर्वकारकाणां भावनावदेव विनैव मत्वर्थलक्षणां विनैव च वैरूप्यं सम्बन्धोपपत्तिः। यागस्य च क्रियात्वेऽपि सम्बन्धसामान्येन भावनाऽन्वयो-

---

* सादृश्योपपादनार्थः सन्, — इति ख० ग० पुस्तकयोः पाठः।

न विरुध्यते । भावना वा वैयाकरणवदतिरिक्ता नैवाङ्गीक्रियते । अतश्चोद्भिदादिष्वपि सर्वत्र गुणविधित्वमेव । वाजपेयोदाहरणन्तु मूले * गुणसूत्रानुरोधेनेति प्राप्ते ।

पचतीत्यस्य पाकं करोति पाकेन करोतीति विवरणाद्धात्वर्थस्य कर्मत्वकरणत्वान्यतरकारकत्वेनैव भावनाऽन्वयः । भावना च यथाऽतिरिक्ता तथा वक्ष्यते । अतश्चेतरकारकाणां धात्वर्थान्वयानुपपत्तेरगत्योभयविशिष्टभावनाविधानं सोमादावङ्गीकृतम् । प्राचीनरीत्या वा मत्वर्थलक्षणा । अन्यथा श्रुत्यैव फलगुणयोर्यागान्वये फलान्वयार्थं यागस्योपादेयत्वविधेयत्वगुणत्वानि, गुणान्वये चोद्देश्यत्वानुवादत्वप्राधान्यानीति विरुद्धत्रिकद्वयापत्तेः । उपादेयत्वादिनिरुक्त्यादिकं च कौस्तुभे द्रष्टव्यम् । अतो मत्वर्थलक्षणादिभिया विशिष्टविध्यनुपपत्तेर्नामधेयत्वमेवोद्भिदादीनाम् ॥ ६ ॥ २ २ ॥

तद्गुणास्तु ॥ आग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीत्यादौ आग्नेयशब्दो गुणविधिः कर्मनामधेयमिति चिन्तायां, अग्नेर्मन्त्रवर्णादेव प्राप्तत्वादाग्नेयपदं नामधेयम् । इति प्राप्ते । पुरोडाशकर्मिकायां भावनायां मन्त्रापेक्षाऽभावान्मन्त्रस्य च तत्रायोग्यत्वाच्चोपांशुयाजइव मन्त्रस्य देवताकल्पकत्वम् । न चाघारवद्वाचनिको विनियोगो मन्त्रस्य, येन तत्कल्पकत्वं सम्भाव्येत । न च मन्त्रस्याष्टाकपालकर्मकभावनाऽङ्गत्वे प्रमाणमस्ति । प्रकरणस्य तूपांशुयाजादिष्वविशिष्टत्वात् । नापि क्रमः †, ब्राह्मणपाठक्रमापेक्षया मन्त्रपाठ-

---

* मूले, — इति नास्ति ख० ग० पुस्तकयोः ।

† क्रमात्, — इति क० पुस्तके पाठः ।

क्रमवैपरीत्यस्य पञ्चमे वक्ष्यमाणत्वात्। अतस्तत्प्रख्यन्यायाभावान्ना मत्वानुपपत्तेर्द्रव्यदेवतोभयविशिष्टभावनाविधिप्रतीतेस्तस्य च याग-मन्तरेणानुपपत्तेर्भूधातुना तल्लक्षणात् सकलविशेषणविशिष्टयाग-भावनाविधानेन अर्थाद्विशेषणानामपि विधिकल्पनात् गुणविधि-रेवाग्नेयशब्दः। प्रयोजनं, आग्नेयं पय इत्यादौ नामातिदेशेनाग्ने-यविध्यन्तः पूर्वपक्षे, सिद्धान्ते तु साम्नाय्यविध्यन्तः ॥७॥२३॥

बर्हि॥ बर्हिराज्यपुरोडाशादिशब्दानां संस्कृतेषु कुशादिषु शास्त्रस्थैः प्रयुज्यमानत्वाद्यूपादिशब्दवत्संस्कारमात्रवाचित्वे संस्कार-विशिष्टकुशादिवाचित्वे वा प्राप्ते। जातिं विहाय कैरप्यप्रयुज्यमान-त्वात्, संस्कारं विनाऽपि च लोके, बर्हिरादाय गावो गताः, आज्यं क्रय्यं, पुरोडाशेन मे माता प्रहेलकं ददातीत्यादौ प्रयुज्यमानत्वाद्-व्यभिचाराल्लाघवाच्च कुशत्वादिजातिवाचित्वमेव। प्रयोजनं, यूपावट-स्तरणार्थबर्हिरादौ पूर्वपक्षे संस्कारकरणं, सिद्धान्ते नेति ॥८॥२४॥

प्रोक्षणीषु॥ प्रोक्षणीशब्दस्यापि पूर्ववत्संस्कारवाचित्वे प्रोक्षणीभि-रुद्वेजिताः स्म इति लोके संस्कारं विहायापि जातिमात्रे प्रयोग-दर्शनात्, रूढ्या जलत्वजातिवाचित्वे वा प्राप्ते। कृत्स्नावयवयोगेनोप-पत्तौ रूढिकल्पने प्रमाणाभावः। अतएवाश्वकर्णादिशब्दे योगबाधे एव तत्कल्पनम्। न चासामौदासीन्यावस्थायां प्रकृष्टोक्षणसाधनत्व-रूपयोगाभावः, फलोपधानासम्भवेऽपि उक्षणस्वरूपयोग्यत्वस्य सम्भवात्। न चैवं रथकारपदेऽपि रथकर्तृत्वरूप*योगसम्भवेन जातिविशेषे शक्ति-

* स्वरूप, — इति क० पुस्तके पाठः।

कल्पनाऽनुपपत्तिः। अनुष्ठापनबलेन तत्कल्पनात्। कर्तृत्वस्वरूपयोग्य-त्वस्याव्यावर्त्तकत्वेन वर्षासु रथकारस्येत्यस्य वैयर्थ्यापत्तेश्च। प्रोक्षणी-शब्दे तु रूढ़िकल्पने प्रमाणाभावाद् यौगिकत्वमेव। प्रयोजनं, विकृतौ घृतं प्रोक्षणमित्यादौ प्रोक्षणीरासादयेत्यविकृतः प्रयोगः संस्कारवाचित्वपक्षे, घृतमासादयेति जातिवाचित्वे, प्रोक्षणमासादयेति यौगिकत्वे द्रष्टव्यम् ॥९॥२,५॥

तथा निर्मन्थ्ये ॥ निर्मन्थ्येनेष्टकाः पचन्तीत्यत्र निर्मन्थ्यशब्दस्य पूर्ववत् संस्कारवाचित्वे निर्मन्थ्यमानय पक्ष्याम इति लौकिकप्रयोगेण निरस्ते, मंथनकर्मत्वस्य पाकसाधनीभूतेऽग्नावभावेन मंथनप्रयो-ज्यत्वस्य च पाकनवनीतादावपि सत्त्वेनातिप्रसङ्गादरणिप्रयोज्याग्नि-त्वावान्तरव्याप्यजातिवाचित्वे प्राप्ते। मंथनप्रयोज्यत्वयोगेनैवोपपत्तौ उक्तरूढ़िकल्पने प्रमाणाभावादतिप्रसङ्गस्य च पाकादौ प्राचीन-प्रयोगाभावेनैवाबोधकत्वोपपत्तेर्निराकर्त्तुं शक्यत्वान्नवनीते च वा-च्यत्वस्यापि वक्तुं शक्यत्वाद् यौगिक एव निर्मन्थ्यशब्दः। एवञ्च निर्मन्थ्येष्टका इत्यत्राग्नेः पाकसामर्थ्यादेव प्राप्तत्वान्मन्थनमात्रविधि-रिति तस्यापि प्रयोगमध्ये करणं सिद्धान्तप्रयोजनम् ॥१०॥२६॥

वैश्वदेव ॥ चातुर्मास्येषु वैश्वदेवे प्रथमे पर्वणि आग्नेयादीनष्टौ यागान् विधाय वैश्वदेवेन यजेतेति श्रुतम्। तत्र वैश्वदेवशब्दो-गुणविधिः कर्मनामधेयं वेति चिन्तायां, नामत्वे समस्तवाक्यवैयर्थ्य-प्रसङ्गादगत्या * अग्नेयादिषु सप्तसु देवताविधिः, आमिक्षायागे

---

* वैयर्थ्यापत्तेरगत्या — इति ख० ग० पुस्तकयोः पाठः।

विश्वेदेवदेवतायाः प्राप्तत्वात् । देवताविशिष्टकर्मान्तरविधानं वा गुणात् । एतस्मिन्नेव वा कर्मणि आमिक्षावाक्येन द्रव्यमात्रविधानम् । एवञ्चाष्टौ हवींषि इति लिङ्गदर्शनस्याप्युपपत्तिरिति प्राप्ते । नाग्नेयादिषु गुणविधिः । उत्पत्तिशिष्टदेवताऽवरोधात् । नापि कर्मान्तरविधिः । भेदबोधकप्रमाणानां नामत्वेनोपपत्तौ विधिगौरवापादकभेदबोधकत्वानुपपत्तेः । अतएव नामिक्षावाक्येऽपि द्रव्यमात्रविधानम् । आग्नेयमष्टाकपालं निर्वपेदित्याग्नेयादिवाक्ये* निर्वपेदित्यस्य विशिष्टविधायकस्यामिक्षावाक्येऽनुषङ्गस्य द्रव्यमात्रविधायित्वे वैरूप्यापत्तेश्च । अत आग्नेयादीनामष्टानामपि यागानां नामधेयं वैश्वदेवशब्दः । उत्पत्तिशिष्टदेवताऽवरोधस्य हततत्प्रत्यभ्यायात् । प्रवृत्तिनिमित्तञ्च विश्वदेवदेवताजन्यामिक्षायागघटितसमुदायाश्रयत्वरूपम् । वाक्यञ्च समुदायसिद्ध्यर्थं समुदायिनामनुवादकम् । तत्प्रयोजनञ्चाष्टानामपि यागानां वसन्ते वैश्वदेवेन यजेतेति वसन्तादिसम्बन्धद्वारा चातुर्मास्यसंज्ञकत्वलाभेन फलसम्बन्धसिद्धिः । इतरथा आमिक्षायागस्यैव विश्वेदेवदेवताकत्वाद् वसन्तादिसम्बन्धद्वारा चातुर्मास्यसंज्ञकत्वलाभेन फलसम्बन्धापत्तेरितरेषामङ्गत्वापत्तिरिति कौस्तुभे स्पष्टम् ॥१।१॥२७॥

पूर्ववन्तः ॥ वैश्वानरं द्वादशकपालं निर्वत् पुत्रे जाते इत्यनेन यागं विधाय ,यदष्टाकपालो भवति गायत्र्यैवेनं ब्रह्मवर्चसेन पुनाति इत्यादिनाऽष्टाकपालनवकपालदशकपालैकादशकपालद्वादशकपाला-

---

* वाक्यस्य, — इति क० पुस्तके पाठः ।

त्वां फलान्यनुध्याते, यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीति श्रुतम्। तत्र द्वादशत्वे अष्टत्वादेः प्राप्तत्वादष्टाकपालादिशब्दा वैश्वानरयागनामधेयमित्याद्यः* पक्षः। स्वरूपेण प्राप्तावपि परिच्छेदकत्वेन प्राप्त्यभावाद्गुणविधय एव एते। अष्टत्वमष्टाकपालद्रव्यं वा पूर्वयागे विधीयते। उपक्रमोपसंहारैक्येन चैकवाक्यत्वप्रतीतेर्न द्वादशकपालस्योत्पत्तिशिष्टता। अथवा, अस्तु वाक्यनानात्वं, तथापि यद् द्वादशकपालो भवतीत्यनेनैव तद्विधिः। वैश्वानरवाक्ये तत्पदमनुवाद एवेति द्वितीयः। ब्रह्मवर्चसादिरूपफलोद्देशेन प्रकृतयागाश्रितगुणा एवाष्टाकपालाद्यो विधीयन्ते इति तृतीयः।

सिद्धान्तस्तु, सम्भवत्येकवाक्यत्वे तद्भेदस्यान्याय्यत्वात् प्रकृतयागस्यैवेयं सर्वा† स्तुतिः। यदङ्गभूतद्वादशकपालस्यावयवोऽष्टाकपालादिरप्येकैकफलसाधनं, तत्र सर्वावयवोपेतद्वादशकपालस्य सर्वफलप्रयोजकत्वे कः सन्देह इति यागस्तुतिः। अष्टाकपालपदं चाग्नेयाष्टाकपाले शक्तं गौण्या वृत्त्या अष्टत्वाश्रयकपालश्रपितत्वसादृश्येन द्वादशकपालावयवे गौणम्। तेन चावयवद्वाराऽवयवी द्वादशकपालो लक्ष्यते। तेन लक्षणया यागस्तुतिरिति। इदं चाधिकरणं चौदुम्बराधिकरणन्यायेन गतार्थमपि‡ शिष्यशिक्षार्थमुक्तमिति ध्येयम्॥१२॥१८॥

---

* मित्येकः — इति क० पुस्तके पाठः।

† सर्व्वापि, — इति ख० ग० पुस्तकयोः पाठः।

‡ पुनरुक्तमपि, — इति क० पुस्तके पाठः।

तत्सिद्धिः॥ यजमानः प्रस्तर इत्यादावपि सामानाधिकरण्या-देकमितरस्य नामधेयं, रूढ़त्वेन तदसम्भवाद्वा जघन्यप्रस्तरपदलक्षित-प्रस्तरकार्यस्रुग्धारणोद्देशेन यजमानोऽधिकरणत्वेन विधीयते इति प्राप्ते। प्रत्यक्षविध्यश्रवणात् प्रस्तरमुत्तरं बर्हिषः सादयतीति विध्य-न्तरैकवाक्यत्वाच्च तदर्थवादत्वमौदुम्बराधिकरणन्यायेन सिद्धमेव। यजमानपदन्तु गौण्या वृत्त्या प्रस्तरस्तावकम्।

ननु अध्यारोपितार्थवृत्तित्वे गौणत्वं लोके प्रसिद्धम्। सिंहत्वस्य देवदत्ते आहार्य्यारोपात्। न च तद्वेदे*, सम्भवति, आरोपकपुरुषा-भावादिति चेत्। विनाऽप्यारोपं सिंहशब्दस्य सादृश्यमात्रविवक्षया-देवदत्ते काव्यलोकयोः प्रयोगदर्शनात् स्वशक्यगुणसमानजातीयगुण-योगनिमित्तत्वं गौणत्वम्। सिंहनिष्ठक्रूरत्वसमानजातीयक्रूरत्वयोगाच्च सिंहपदस्य देवदत्ते प्रवृत्तेः सिंहो देवदत्त इत्यत्र लक्षणसमन्वयः। पुष्पादौ खसम्बन्धित्वाध्यारोपेण चारोपितं खपुष्पशब्दार्थमङ्गीकृत्य तद्वृत्तिगुणानामसत्त्वादीनां सिद्धान्ते सत्त्वाच्च न खपुष्पं भवत्सि-द्धान्त इत्यादावव्याप्तिः। अतस्त्वेतादृशगौणत्वस्य वेदेऽप्यस्त्येव सम्भवः।

यद्यपि च रूपकादिस्थले सौन्दर्य्यस्य तरङ्गिणीत्यादौ आरोपे-णापि गौणी वृत्तिर्दृष्टा, तथापि सादृश्यमात्रेणापि उपमालङ्कारस्थले साऽनुभूयमाना नापह्नोतुं शक्या। अतस्तूभयसाधारण्येन स्वशक्य-समवेतवत्ता गौणी वृत्तिः। समवेतत्वञ्च क्वचिदारोपितत्वसम्बन्धेन क्वचिच्च स्वसमानजातीयगुणवत्तासम्बन्धेनेति भेदः।

अत्र च सिंहपदेन शक्त्या सिंहोपस्थित्यनन्तरं लक्षणया क्रूरत्वो-

* तद्वद्वेदे, — इति ख० ग० पुस्तकयोः पाठः।

पस्थितिरिति प्राञ्चः । वस्तुतस्तु एकसम्बन्धिदर्शनेनापरसम्बन्धिस्मरण-मिति स्मारकविधयैव तदुपस्थितिः । गौणीज्ञानकार्य्यतावच्छेदकञ्च निरूक्तोभयविधसम्बन्धान्यतरसम्बन्धेन स्वशक्यसमवेतधर्म्मप्रकारकदेव-दत्तविशेष्यकशाब्दत्वमिति न क्रूरत्वादीनामशाब्दत्वप्रसङ्गः । न च गौण्या लक्षणातो न भेदः, स्वशक्यवृत्तिगुणानामेव यत्र सम्बन्धित्वेन रूपेण बोधस्तत्र लक्षणा, क्रूरत्वादिना बोधे तु गौणीति तयो-र्भेदात् । ते च गुणाः षड्विधाः । क्वचित्तत्सिद्धिः तत्कार्य्यकारि-त्वम् * यथा यजमानपदे । यजमानोयथा स्वकार्य्यकर्त्ता, तथा प्रस्तरोऽपीति । एवञ्च गौणीगर्भलक्षणया प्रस्तरस्तुतिः । एवमन्येऽपि पञ्च गुणा अग्रिमसूत्रैर्द्रष्टव्याः ॥१३॥२९॥

जातिः ॥ अग्निर्वै ब्राह्मण इत्यत्र पूर्ववदेवाग्निशब्दो ब्राह्मणे गौणः, द्वयोरप्यग्निब्राह्मणयोरेकमुखप्रभवत्वात्, अग्निजननसमान-जातीयजननमेवात्र गुणः ॥१४॥३०॥

सारूप्यम् ॥ आदित्यो यूप इत्यादौ तु सारूप्यं गौणीनि-मित्तम् । न च सर्वत्र तदेव निमित्तं, कोऽत्र विशेषः । चक्षुर्ग्राह्यं तेजस्वित्वादत्र निमित्तमिति प्राञ्चः । वस्तुतस्त्वन्यत्र शक्यनिष्ठगुण-स्यैव स्वसमानजातीयगुणवत्तासंसर्गेण प्रकारत्वान्निमित्तता । न तु सारूप्यस्य, तस्य संसर्गत्वात् । इह तु शक्यनिष्ठगुणसजातीयगुणवत्त्व-रूपस्य सारूप्यस्यैव समवायादिसंसर्गेण प्रकारत्वात्तदेव निमित्त-मिति विशेषः ॥१५॥३१॥

---

* कार्य्यकारित्वं, — इति ख॰ ग॰ पुस्तकयोः पाठः ।

प्रशंसा ॥ अपशवो वा अन्ये गो अश्वेभ्यः पशवो गोऽश्वा इत्य-जाजादीनां तत्र तत्र विहितत्वात्पशुकार्य्ये प्रतिषेधस्य पर्य्युदासस्य वाऽनुपपत्तेरर्थवादत्वम् । अपशुशब्दो घटादौ मुख्यो गवाश्वगत-प्राशस्त्याभावरूपगुणयोगादजादौ गौणः सन् लक्षणया गवाश्वस्तुत्यर्थः । प्राचां मते तु नञ्समासान्तर्गतपशुपदेन • गवाश्वगतं प्राशस्त्यं लक्ष-यित्वा नञा तदभावरूपो गुण 'उपस्थाप्यत इति विशेषः । सर्वथा प्रशंसा गौणीनिमित्तघटिकेति सिद्धम् ॥१६॥२२॥

भूमा ॥ सृष्टीरुपदधातीत्यत्र विध्यन्तरैकवाक्यत्वाभावात् प्रत्यक्ष-विधिश्रवणाच्च विधित्वम् । तत्र चोपधानमेवेष्टकासंस्कारार्थत्वेन * विधीयते । यद्यपि चेष्टकानां चयनाङ्गत्वान्यथानुपपत्त्यैवोपधानं प्राप्येत, तथापि ततः पूर्वमेव प्रत्यक्षविधिना विधीयते । तत्फलञ्च प्रत्येकोपाधानसिद्धिश्चयनसमानकर्तृकत्वसिद्धिश्च । अन्यथा समुदि-तोपधानमपि कदाचित् प्राप्नुयात् । आर्थिकत्वाच्च चयनभिन्नकर्तृ-कत्वमपि । सति त्वस्मिन्निष्टकासंस्कारद्वारा चयनाङ्गताबोधकविधौ प्रतिप्रधानावृत्तिन्यायादङ्गप्रधानयोरेककर्तृकत्वाच्च फलद्वयसिद्धिः । सृष्टिपदन्तु लिङ्गप्रकरणप्राप्तसृष्टसृष्टिमन्त्रमात्रस्य गौण्याऽनुवाद इति भाष्यकारः ।

वार्त्तिककारस्तु, नोपधानमात्रविधिः । तथा सति प्राणभृत उपदधातीत्याद्यनेकोपधानविधिवैयर्थ्यापत्तेः । अतो मन्त्रमात्रमुप-धानानुवादेन, मन्त्रविशिष्टं वोपधानमिष्टकासंस्कारार्थत्वेन विधी-

---

* संस्कारत्वेन, – इति क• पुस्तके पाठः ।

यते। तथोपधानविधिफलन्तु पूर्ववत्। मन्त्रविधिफलन्तु उपधाने तन्नियमः। मन्त्रा हि इष्टकामात्रप्रकाशकास्तद्ग्रहणादिष्वपि प्राप्ति-सम्भवान्नोपधाने नियमेन प्राप्नुवन्ति। अतस्तन्नियमो ग्रहणादिप-रिसङ्ख्यैव वा* फलम्। मध्यमचितिसम्बन्धस्य, यां वै काञ्चन-ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यादिति वचनेन प्रत्यक्षब्राह्मणवतीनामिष्टकानां मध्यमचितिसम्बन्धस्य विधा-नात्। अन्यथा तत्तच्चित्यवान्तरप्रकरणपाठस्थितानां मन्त्राणां चयनमहाप्रकरणेन सर्वचितिषु अन्तिमायामेव वा निवेशापत्तेः। अतो मध्यमचितिसम्बन्धार्थं मन्त्रविधिः। इष्टकानां प्रत्यक्षब्राह्मण-वत्त्वं चेष्टकावाचिप्रत्यक्षब्राह्मणपठितपदविधेयमन्त्रकत्वम्। स्तुतिपदं हि स्तुतिप्रकाशकमन्त्रोपधेयेष्टकापरम्। तत्र च विशेषणांशस्य मन्त्रस्य विधेयत्वात्तदिष्टकानां प्रत्यक्षब्राह्मणवत्त्वसिद्धिः। इतिकरण-विनियुक्तलोकंपृणामन्त्रस्यापि मध्यमचितिमात्रसम्बन्धापत्तेरिष्टकावा-चीतिपदविशेषणम्। अतश्च मन्त्रविशिष्टोपाधानमत्र विधीयते। स्तुतिपदं परं गौण्या वृत्त्या सप्तदशसङ्ख्याकस्तुत्यस्तुतिमन्त्रपरम्। यत् सप्तदशेष्टका उपदधातीत्यर्थवादानुसारात्। तत्र चतुर्दश स्तुतिमन्त्रास्त्रयोऽस्तुतिमन्त्रा इति स्तुतिबाहुल्यम्। गुणो गौणी-वृत्तिनिमित्तम् ॥१७॥२३॥

लिङ्गसमवायात् ॥ प्राणभृत उपदधातीत्यादौ तु अल्पत्व निमित्तम्। शेषं पूर्ववत्। एवं षट् गौणीवृत्तिप्रकाराः ॥१८॥२४॥

---

* परिसङ्ख्या वा,—इति ख॰ ग॰ पुस्तकयोः पाठः।

सन्दिग्धेषु ॥ अक्ताः शर्करा उपदधातीत्यत्र अक्ता इत्यनेनाविशेषाद् यत्किञ्चिदञ्जनसाधनद्रव्यस्य विधिना निर्णीतत्वादुपसंहारस्थेन तेजो वै घृतमित्यर्थवादेन सङ्कोचानुपपत्तेः नार्थवादस्य सन्दिग्धार्थनिर्णये प्रामाण्यमिति प्राप्ते । विधेरविशेषप्रवृत्तत्वेनैव घृतमात्रग्रहणेनाप्युपपत्तेरितराक्षेपकत्वे प्रमाणाभावादुपक्रमस्याविरोधेनोपपत्तौ च उपसंहारस्थस्यार्थवादस्योपलक्षणत्वे प्रमाणाभावाद्विध्यर्थवादयोरेकवाक्यत्वेनैकविषयकत्वस्यावश्यकत्वाच्च युक्तं वाक्यशेषस्य सन्दिग्धार्थनिर्णयेऽपि प्रामाण्यमिति घृतेनैवाञ्जनम् ॥१९॥२५॥

सामर्थ्याद्वा ॥ स्रुवेणावद्यति, स्वधितिनाऽवद्यति, हस्तेनावद्यति इत्यादौ विधेरवदेयद्रव्यविषये सन्दिग्धस्य सामर्थ्यान्निर्णयः । स्रुवेण द्रवमेवाज्यादि । स्वधितिना मांसादि । हस्तेन संहतं* पुरोडाशादि । अतश्च सामर्थ्यसहकृतावद्यतिपदेनैव लक्षणया द्रवाद्यवदानस्य उद्देश्यत्वात्तदनुवादेन स्रुवादिविधौ न किञ्चिद्बाधकम् । एवं अञ्जलिना सक्तून् जुहोतीत्यादावपि न संपुटाकारोऽञ्जलिः, अपि तु व्याकोशात्मक एव । सामर्थ्यात् । तदेवं विध्यर्थवादमन्त्रस्मृत्याचारनामधेयवाक्यशेषसामर्थ्यरूपाण्यष्टौ प्रमाणानि धर्माधर्मयोर्निरूपितानि । अतः परं भेदादिना तत्स्वरूपं निरूपयिष्यते ॥ २०॥२६॥ ग्रन्थसङ्ख्या ६५० ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां

प्रथमाध्यायस्य चतुर्थपादः ॥०॥

---

* हस्तेनासंहतं, — इति ख० ग० पुस्तकयोः पाठः ।

अथ द्वितीयोऽध्यायः ।

श्रीगणेशाय नमः ।

भावार्थाः ॥ एवं धर्माधर्मप्रमाणेषु निरूपितेषु अधुना तत्स्वरूपं निरूप्यते । यद्यपि च तदपि एतावत्प्रमाणप्रतिपाद्यत्वेन रूपेण बुद्धमेव, तथापि एकत्वानेकत्वादिरूपेणाबुद्धत्वादिह तेन रूपेण निरूप्यते । अत्र च शब्दान्तरादिषट्प्रमाणकभावनाभेद एवाध्यायार्थः । धात्वर्थभेदस्तु तत्सिद्ध्यर्थः क्वाचित्को निरूप्यते, अपूर्वभेदोऽपि फलत्वेनेति न तावध्यायार्थौ ।

फलीभूतापूर्वभेदोऽपि अपूर्वसाधनभेदाधीन इति तत्साधनजिज्ञासायां स्वर्गादिसाधनस्यैवावान्तरव्यापाररूपापूर्वं * प्रति साधनत्वात् स्वर्गादिफलं प्रति किं धात्वर्थस्य करणत्वं उतोपपदार्थस्य सोमादेरपीति चिन्तायां, प्राथमिकभावनान्वयस्य तावत् सिद्धान्तिनोऽपि सम्मतत्वादौत्तरकालिकः फलान्वयोऽपि सर्वेषामेवेति प्राप्ते। सर्वेषां करणत्वे अनेकादृष्टकल्पनाप्रसङ्गादेकस्यैव फलनिरूपिता करणता, अन्येषान्तु दृष्टविधयैव करणार्थत्वम् । तच्च धात्वर्थस्यैव करणत्वे सोमादीनां तज्जनकत्वेनैव दृष्टार्थता । सोमादीनां करणत्वे च धात्वर्थस्याश्रयविधयैव दृष्टार्थतेति नानेकादृष्टकल्पना ।

* व्यापारापूर्व्वं – इति ख० ग० पुस्तकयोः पाठः ।

एवं स्थिते विशेषजिज्ञासायां सोमादेरेव फलकरणत्वं* तस्य सिद्धत्वेन योग्यतारूपलिङ्गात्। तृतीयायाः करणत्वे शक्तत्वेन कारकश्रुतेरेकपदोपात्तत्वरूपपदश्रुत्यपेक्षया बलीयस्त्वाच्च। फलान्वये पदश्रुतेरप्यभावाच्च। अतएव यागादिधात्वर्थः सोमाद्यर्थ एव। न च तदर्थत्वे अदृष्टकल्पना। अग्निहोत्रहोमेन दधिनिष्ठकरणता†-सम्पादनवद्यागेनादृष्टमन्तरेणैव सोमनिष्ठकरणतासम्पादनेन यागस्य सोमाङ्गत्वोपपत्तेरिति प्राप्ते।

पदश्रुत्या यागस्यैव फलकरणत्वम्*। यद्यपि च फलान्वयेन सा, तथापि प्राथमिकभावनाऽन्वये यस्य यत् प्रमाणं तद्गतबलवत्त्वस्य तस्यामवस्थायामकिञ्चित्करत्वेऽपि पार्ष्ठिकफलान्वये तस्य निर्णायकत्वात्। अतश्च प्राथमिकभावनाऽन्वये विद्यमाना पदश्रुतिः फलान्वये निर्णायिका। न च तस्याः कारकश्रुत्यपेक्षया दौर्बल्यम्। लाक्षणिकत्वेऽपि यागकरणत्वस्य सोमकरणत्वान्वयात् प्राग्भावनायामन्वितत्वेन तदन्वयस्य प्राथम्यात्। अन्यथा तिङन्तपदस्य परिपूर्णत्वाभावेन तदुपस्थापितभावनायां सोमस्याप्यन्वयानुपपत्तेः। परिपूर्णं पदं पदान्तरेणान्वेतीति‡ न्यायात्। न च प्रथमावगतस्यापि कल्प्यस्य श्रौत्तरकालिकेन बाधः उपजीव्यत्वादिति यागः फलसाधनं सोमो यागार्थ इति सिद्धम्। प्रयोजनं, सोमापचारे न प्रतिनिध्युपादानं पूर्वपक्षे, सिद्धान्ते तु तत्॥

---

* करणत्वं, — इति ख॰ ग॰ पुस्तकयोः पाठः।

† दधिकरणता, — इति ख॰ ग॰ पुस्तकयोः पाठः।

‡ पदार्थान्तरेणान्वेतीति, — इति ख॰ ग॰ पुस्तकयोः पाठः।

नन्विदं धात्वर्थातिरिक्तभावनासत्त्वे* भवेन्न तु तस्यां प्रमाण-मस्ति, धातूनामेव विक्लृत्यादिफल इव† तत्प्रयोजकव्यापारमात्रे फूत्कारादौ यत्नादौ च शक्तत्वात् । अतो यत्नादिरूपभावनाया अपि धातुवाच्यत्वाद्धात्वर्थ एव क्रियारूपे सकलकारकान्वयो न तु यागस्य पदश्रुत्या फलकरणत्वमिति चेत् ।

पचति, पाकं करोति पाके यतत इति पाकात् पृथक् विज्ञीय-मानयत्नादेः पच्यर्थत्वानुपपत्तेः । न च घञन्तपाकशब्दस्य फल एव शक्तत्वात् पृथक् विवरणोपपत्तिः । व्यापारविगमेऽपि फलदशायां पाको विद्यते इति प्रयोगापत्तेस्तस्यापि व्यापारवाचित्वावश्यम्भा-वात् । अतो भासमानो यत्नादिर्लिङ्वाच्य एव । अतएव धातु-वाच्यमपि साक्षात् फलजनकफूत्कारादिव्यापारवृत्तिपाकत्वादिक-मेव । तच्च जातिरखण्डोपाधिर्वेत्यन्यदेतत् ।

तज्जनकयत्नादिकन्तु आख्यातवाच्यमेव । तच्च शक्ततावच्छेद-कन्तु करोतिविज्ञीयमानतिप्तादिकं, लाघवात् तिप्तादिकमेव वा । न तु स्थानित्वं, तदुपस्थापकादेशविशेषाणां पदज्ञाननिष्ठकारण-तावच्छेदककोटौ प्रवेशे गुरुभूतकारणतावच्छेदकघटितानन्तकार्य्य-कारणभावकल्पनापत्तेः । अप्रवेशे यथाकथञ्चिदुपस्थितलकारादपि भावनोपस्थित्यापत्तेः । शक्यतावच्छेदकन्तु फलोद्देश्यकधात्वर्थाति-रिक्तव्यापारत्वम् । फलञ्च क्वचिद्धात्वर्थः क्वचिच्च स्वर्गादीति यथा-विवेचम् ।

---

* सत्त्वे एव, — इति ख० ग० पुस्तकयोः पाठः ।

† विक्लियादिफलइव, — इति क० पुस्तके पाठः ।

एवञ्च रथो गच्छतीत्यादौ न लक्षणा, गमनानुकूलव्यापारस्यै-वाख्यातार्थत्वात् इति पार्थसारथिः । वस्तुतस्तु यत्नत्वमेव शक्यता-वच्छेदकं, लाघवात् । तद्बाधे तु सर्वत्राश्रयत्वे लक्षणा । यत्नस्यैव चाख्यातोपात्तस्य नित्यं कर्मसाकाङ्क्षत्वं, करोतिपर्यायत्वादेककर्मकत्वं, फलभावनानुकूलत्वाच्च अर्थभावनात्वं द्रष्टव्यम् ।

इयञ्चाख्यातोपात्ता भावनैव मुख्यविशेष्या । तद्व्यतिरेकेणेतरपदा-र्थान्वयापर्यवसानात् । तस्यामेव चाख्यातोपात्तायां क्त्वाप्रत्ययाद्युपा-त्तायां वा योग्यताद्यनुसारेण निपातोपसर्गप्रातिपदिकातिरिक्तशब्द-गम्यो यः सुबुपात्तलिङ्गसङ्ख्याव्यतिरिक्तोऽर्थस्तस्य सर्वस्यापि प्रकारतया अन्वयः। निपातोपसर्गयोस्तु क्रियासमभिव्याहारादौ सति तयाऽन्वयो-ऽन्यसमभिव्याहारादावन्येनापि । प्रातिपदिकार्थोऽपि सुवर्णे करण-त्वादौ । तद्धितसमासादिसखण्डप्रातिपदिकावयवार्थानान्तु यत्र कार-कतासम्बन्धेन तद्धितसमासादिवृत्तिर्यथा आग्नेय इत्यादौ, तत्राग्नेर्दे-वतात्वाद्भावनायामेवान्वयो न तु तद्धितोपात्ते द्रव्ये । स तु पार्ष्णिक-एव । यत्र तु कारकातिरिक्तसम्बन्धेन सा, तत्र परस्परान्वयोऽपि । यथाऽश्वाभिधानीमित्यादौ । एवं सुबुपात्तलिङ्गसङ्ख्ययोः समानाभि-धानश्रुत्या सुवर्णे करणत्वादावेवान्वयः । तद्व्यतिरिक्तपदार्थमात्रस्य तु सुवर्णकरणत्वादेर्धात्वर्थस्य कर्त्तुस्तदेकत्वादेश्च कालादेर्लडाद्यर्थस्य विध्यादेर्लिङाद्यर्थस्य च सर्वस्यैव लिङ्गानन्वयिभावनावाचिपदोप-स्थाप्यायां भावनायामेवान्वयः । अतएव भावनादिपदोपस्थापितायां तस्यां नान्वयः । आख्यातेन क्त्वादिना वोपस्थितायान्तु भवत्ये-वान्वयः प्रकारतया । प्रकारताघटकाः सम्बन्धाश्च सर्वे यथायथं

पार्ष्टिकान्वयबोधवेलायामवगम्यमानाः कौस्तुभ एव द्रष्टव्याः। तस्मात् सिद्धमाख्यातवाच्या आर्थी भावना, तस्याश्च स्वर्गादि भाव्यम्, धात्वर्थश्च करणम्, सोमादिकन्तु करणानुग्राहकत्वादिति-कर्त्तव्यतेति ॥१॥

चोदना ॥ धात्वर्थादेवापूर्वमिति स्थिते ऽपूर्वमेवास्ति न वेति चिन्तायां, कृतयागध्वंसद्वारेणैव क्षणिकस्यापि यागस्य स्वर्गसाधनत्वोपपत्तौ नापूर्वकल्पनं, गौरवापत्तेः। न च नित्यत्वाद्ध्वंसस्य,

'————धर्मः क्षरति कीर्त्तनात्।'

प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपि ॥

इति कीर्त्तनप्रायश्चित्तनाश्यत्वानुपपत्तिः। कीर्त्तनादेः फलोत्पत्तिप्रतिबन्धकत्वाङ्गीकारेण तद्नाशकत्वात्। कीर्त्तनात्यन्ताभावविशिष्टज्योतिष्टोमध्वंसत्वेन कारणत्वकल्पनाद्वा न कश्चिद्दोषः। अतोनापूर्वं किञ्चित् प्रमाणमस्ति इति प्राप्ते।

क्षरतिनश्यत्योर्नाशवाचिन्योर्भवन्मते लक्षणापत्तेर्नाशयोग्यमपूर्वमेव कल्प्यते। गौरवस्य फलमुखत्वेनादोषत्वात्। अतश्च प्रधानेन स्वर्गादिफले जननीये अपूर्वं तदवान्तरव्यापारः *। स च फलवशादात्मनिष्ठः। अवान्तरव्यापारत्वादेव च न यागादेरन्यथासिद्धिः।

तच† यत्रैकमेव प्रधानं, तत्र पूर्वोक्तराङ्गसहितात् तस्मादपूर्वोत्पत्तेः प्रधानाव्यवहितमेकमुत्पत्त्यपूर्वं, तेन च सर्वाङ्गान्ते परमापूर्व-

---

* अपूर्व्वमवान्तरव्यापारः, — इति क॰ पुस्तके पाठः।

† तदत्र, — इति ख॰ ग॰ पुस्तकयोः पाठः।

मपरमिति द्वे अपूर्वे । एवं प्रधानभेदेऽपि प्रतिप्रधानं उत्पत्त्य-
पूर्वभेदः परमापूर्वं त्वेकमिति ज्ञेयम् * । दर्शपूर्णमासयोस्तु पौर्ण-
मास्यां पौर्णमास्या यजेत अमावास्यायाममावास्यया यजेतेति
वाक्यद्वयेन यागत्रयकरणतानां चिकान्तरनिरपेक्षाणां साहित्याव-
गतेः साहित्यस्य चैककार्यनिरूपितत्वं विनाऽनुपपत्तेः प्रतिसमुदायं
समुदायापूर्वमपरं तेन च परमापूर्वमिति † नवापूर्वसिद्धिः । एव-
मन्यत्रापि चातुर्मास्यद्वादशाहादिषु अपूर्वकल्पना ज्ञेया ।

अङ्गेषु तु सन्निपत्योपकारकाङ्गजन्यापूर्वाणां प्रधान एवोत्पत्त्य-
पूर्वजननानुकूलयोग्यताजनने उपयोगः । अन्तिमप्रधानगतयोग्यतया
च नाशः । आरादुपकारकजन्यानां तु उत्पत्त्यपूर्वनिष्ठतदव्यवहित-
कार्यजननानुकूलयोग्यताजनने उपयोगः । अव्यवहितञ्च कार्यं समु-
दायापूर्वसत्त्वे तदेव, तदभावे परमापूर्वं स्वर्गादेव वेति ज्ञेयम् ।
अन्तिमयोग्यतोत्पत्तौ च नाशः । यदि तु परमापूर्वे न तथा
किञ्चित्प्रमाणमित्याशङ्क्येत, ततो माऽस्तु तत् । अङ्गानां तु आरा-
दुपकारकाणामुत्पत्त्यपूर्वे एव समुदायापूर्वाभावे फलानुकूलयोग्यता-
जननमेव कार्यमस्तु । सर्वथा सिद्धमपूर्वम् ॥२॥

तानि द्वैधम् ॥ व्रीहीनवहन्तीत्यादौ पूर्ववदेवावघातस्य फल-
भावनाकरणत्वमविवादम् । तच्च फलं न व्रीहयः । अजन्यत्वात् ।
नापि वैतुष्यम् । तज्जनकत्वस्य लोकसिद्धत्वेनाविधेयत्वात् । नापि

---

* स्थितम्, – इति ख० ग० पुस्तकयोः पाठः ।

† प्रतिसमुदायं परमापूर्व्वमपरं तेन च परमापूर्व्वमपरमिति, – इति ख० ग० पुस्तकयो पाठः ।

पक्षे दलनादेरप्यर्थप्राप्तत्वेन तद्व्यावृत्तिफलको नियमः। तस्यापि वैफल्यात्। न च तस्यादृष्टार्थत्वम्। अदृष्टस्यावश्यकल्पनीयत्वे प्राप्तावघातादेव तत्कल्पनौचित्यात्। अतोऽदृष्टार्थमेवावघातः। तदपि चादृष्टं न ब्रीहिनिष्ठम्। तत्त्वावच्छिन्नं प्रति आत्मत्वेन समवायिकारणत्वात्। अतः पूर्ववदेव ब्रीहय एवावघातार्था इति ब्रीहिविशिष्टावघात एवादृष्टार्थमाराद्दुपकारकत्वेन विधीयते इति प्राप्ते।

दृष्टसम्भवे अदृष्टस्यान्याय्यत्वाद्वितुषीभाव एवावघातफलम्। न च तस्याक्षेपादेव प्राप्तत्वेन विधिवैयर्थ्यम्। दलनाद्युपायान्तरव्यावृत्तिफलकनियमस्यैवावघाताश्रितस्यादृष्टार्थं विधेयत्वात्। अत एव कृष्णलचरौ अवघाताभावेन* तस्य लोपः। वस्तुतस्तु श्रौतस्यावघातस्यैवाक्षेपतः पूर्वप्रवृत्त्या वितुषीभावार्थं विधेयत्वम्। अतस्याक्षेपप्रतिबन्धाद्दलनादिव्यावृत्तिफलको नियमः फलम्। वैतुष्यस्य च दलनेनापि जायमानत्वाद्वैयर्थ्यशङ्का तु, अवघातादेव ब्रीहिनिष्ठादृष्टस्याप्युत्पत्तिकल्पनान्निराकर्त्तव्या। तददृष्टस्य च अन्यत्वमात्रं लाघवात् कल्प्यते न प्रयोजकत्वमपि। दृष्टरूपे वैतुष्य एव तत्कल्पनात्। अतः कृष्णलचरौ वैतुष्याभावेऽपि तल्लोपः। आर्थिकविध्यन्तरकल्पनाच्च नानेकोद्देश्यता। तत्तददृष्टस्य च द्वितीयादिधर्मिग्राहकप्रमाणेन ब्रीह्यादिनिष्ठत्वस्यैवावगतेस्तत्त्वेनैव समवायिकारणता नात्मत्वेन। अतस्यावघातस्यादृष्टवितुषीभावोभयद्वारा अपूर्वसाधनीभूतब्रीह्युद्देशेन विधानात् सिद्धं संस्कारकर्मत्वम्। प्रयोजनं, यागार्थब्रीह्यपेक्षया ब्रीह्यन्तरमवघातार्थमुपादेयं पूर्वपक्षे, सिद्धान्ते नेति ॥१॥

---

* अवघाताभावे, — इति क॰ पुस्तके पाठः।

धर्ममात्रे ॥ व्रीहीन् प्रोक्षति, स्रुचः संमार्ष्टीत्यादौ दृष्टोपकारकत्वासम्भवात् द्वितीयायाश्च साध्यत्ववत्करणत्वेऽपि सक्तून् जुहोति, वत्सजान् शिखण्डकान् कुर्वित्यादौ प्रयोगदर्शनात् पूर्वाधिकरणपूर्वपक्षवदर्थकर्मत्वमेव । वत्सजानां हि करोतेर्द्विकर्मकत्वापत्तेर्न* साध्यत्वम् । अतः करणत्वमपि द्वितीयार्थः । अतश्च व्रीहिकरणकं प्रोक्षणमेवादृष्टार्थत्वेन विधीयते इति प्राप्ते ।

कर्मणि द्वितीयेत्यनुशासनाद् घटं करोतीत्यादिप्रयोगाच्च साध्यत्वमेव द्वितीयार्थो न करणत्वम् । अनेकशक्तिकल्पनप्रसङ्गात् । कर्मत्वञ्च कर्त्तुरीप्सिततमं कर्मेतिसूत्रात्नेप्सितत्वरूपमेव । अपि तु तथायुक्तञ्चानीप्सितमिति सूत्रादीप्सितानीप्सितसाधारणं साध्यत्वमेव । यथा चैवं सति न सूत्रद्वयवैयर्थ्यं तथा कौस्तुभ एव प्रदर्शितम् । अतश्च व्रीहीणां द्वितीयया साध्यत्वाभिधानात् यागाङ्गत्वावगमेन चेप्सितत्वप्रतीतेस्तदुद्देशेन प्रोक्षणं विधीयते । दृष्टद्वारासम्भवेऽपि चादृष्टमेव द्वारं व्रीहिनिष्ठं कल्प्यते । अतएव यत्र नोपयोगः कृप्तः, न वा कल्पयितुं शक्यः, यथा सक्तुषु, तत्र द्वितीयया करणत्वलक्षणामङ्गीकृत्य सक्तुविशिष्टहोमस्यैव अदृष्टार्थं विधानम् । न चानीप्सितकर्मत्वेनाप्यन्वयोपपत्तेर्न करणत्वलक्षणेति वाच्यम् । तथा सति अदृष्टोपकारस्यापि भावनायां कर्मत्वेनान्वयावश्यम्भावे तस्य द्विकर्मकत्वापत्त्योद्देश्यानेकत्वनिमित्तकवाक्यभेदापत्तेः । अतः सक्तुकरणकहोमस्यारादुपकारकत्वेऽपि प्रोक्षणादेः सन्निपत्योपकारकत्वमेव । प्रयोजनं पूर्ववत् ॥ ४ ॥

---

* करोतेर्द्विकर्मकत्वावगतेर्न, — इति ख॰ ग॰ पुस्तकयोः पाठः ।

स्तुतशस्त्रयोः ॥ आज्यैः स्तुवते, प्रउगं शंसतीत्यादिस्तोत्रशस्त्राणां यागीयदेवतादिप्रकाशकतयाऽन्यमन्त्रवदेव दृष्टार्थत्वादवघातादिवदेव सन्निपत्योपकारकत्वमिति प्राप्ते। लोके गुणिनिष्ठगुणतात्पर्यकाभिधानस्यैव स्तुतिपदवाच्यत्वेन प्रसिद्धत्वात् प्रगीताप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणतात्पर्यकाभिधानस्य च स्तोत्रशस्त्रपदवाच्यत्वात् तेषां गुणिप्रकाशनतात्पर्यकत्वासम्भवेन नैषां मन्त्राणां गुणिप्रकाशनार्थत्वम्। अपि तु गुणप्रकाशनरूपाणां स्तोत्रशस्त्राणामात्मनिष्ठादृष्टार्थतया आरादुपकारत्वमेव। न च प्रयाजशेषाभिघारणन्यायेन दृष्टार्थत्वानुरोधेन लक्षणया गुणिप्रकाशनरूपत्वम्। लिङ्गादेव तादृक्त्वोपपत्तौ विधिवैयर्थ्यात्। एवञ्च माहेन्द्रयागसन्निधौ ऐन्द्री स्तुतिरुपपन्ना भवति। इतरथा शब्दसमवायिनी देवता विधिगतशब्देनैव निगमेषु वक्तव्येति महेन्द्रो नेन्द्रशब्देन शक्यते प्रकाशयितुम्। अतो यथेन्द्र एव देवता तथोत्कर्षापत्तिः। सामान्यसम्बन्धबोधकप्रमाणाभावेन वा मनोताश्वाग्निशब्दवल्लक्षणया इन्द्रपदेन महेन्द्रस्यैव प्रकाशनापत्तिः। तस्मात् प्रधानकर्मणी स्तोत्रशस्त्रे ॥५॥

विधिमन्त्रयोः ॥ गुणकर्मप्रधानकर्मविधायकाख्यातद्वये निरूपिते प्रसङ्गादभिधायकं तृतीयमाख्यातं निरूप्यते। मन्त्रगतानां ब्राह्मणगतानाञ्च यत्तच्छब्दादिसमभिव्याहृतानामाख्यातानामपि विधायकत्वम्। सत्यामपि च प्रमाणान्तरेण प्राप्तौ अभ्यासात् कर्मभेद इति प्राप्ते। देवांश्च याभिर्यजते, यस्योभयं हविरार्त्तिमार्च्छेदित्यादौ यच्छब्दस्य* प्राप्तिद्योतकत्वेन स्वविषये अज्ञातज्ञापनरूप-

* यत्तच्छब्दस्य,—इति ख॰ ग॰ पुस्तकयोः पाठः।

विधिप्रतिबन्धकत्वं स्पष्टम्। एवं अग्नीदग्नीन् विहरेत्यादौ सम्बोधन-विभक्तेरभिमुखस्त्रीत्वमात्रविषयाया अभिमुखानभिमुखसाधारणविधि-विरोधित्वम्। दासीत्यादेरुत्तमपुरुषस्य च परप्रवर्त्तनारूपविधि-विरोधित्वम्। अतो विधायकत्वासम्भवात् मन्त्रगतानां स्मारकत्वं, ब्राह्मणगतानां निमित्तप्रतिपादकत्वं चाचष्टेति द्रष्टव्यम् ॥६॥

तच्चोदकेषु ॥ मन्त्रप्रसङ्गादङ्घेवुश्रिय मन्त्रं मे गोपायेति वेद-प्रयुक्तमन्त्रशब्दार्थनिर्णयाय तल्लक्षणमुच्यते। यत्राभियुक्तानां मन्त्र-पदवाच्यत्वप्रकारिकोपस्थितिर्विशेष्यतासम्बन्धेन, स मन्त्रः। वाच्यता-वच्छेदकश्च मन्त्रत्वमखण्डोपाधिर्वेत्यन्यदेतत् ॥७॥

. शेषे ॥ एतद्ब्राह्मणानि पंच हवींषीति वेदप्रयुक्तब्राह्मणश-ब्दार्थपरिज्ञानार्थं*तल्लक्षणमपि प्रसङ्गादेव। मन्त्रातिरिक्तवेदत्वमेव ब्राह्मणत्वम् ॥८॥

अनाम्नातेषु ॥ ऊहप्रवरनामधेयानां सत्यपि प्रयोगकाले अर्थस्मरणार्थमुच्चार्यत्वे मन्त्रपदैकवाच्यत्वे च स्वरूपेण वेदे ऽपठितत्वा-दभियुक्तप्रसिद्ध्यविषयत्वेन नैषां मन्त्रत्वम्। अतश्च नैषां भ्रेषे मन्त्र-भ्रेषनिमित्तं प्रायश्चित्तम्। अपि तु अङ्गभ्रेषनिमित्तकमेव ॥९॥

तेषामृक् ॥ मन्त्रत्वाद्यौ व्यापकधर्मे निरूपिते तत्प्रसङ्गादेव तदवान्तरधर्मो ऋक्त्वादिः, ऋचः सामानि यजूंषीति वेदप्रयुक्त-ऋगादिपदार्थपरिज्ञानार्थं निरूप्यते। पादव्यवस्थावन्मन्त्रत्वं ऋक्-त्वम् ॥१०॥

गीतिषु ॥ मन्त्रत्वसमानाधिकरणगीतित्वं सामत्वम् ॥११॥

---

* ब्राह्मणपदार्थनिर्णयाय, — इति ख० ग० पुस्तकयोः पाठः।

शेषे॥ ऋक्सामभिन्नमन्त्रत्वं यजुष्ट्वम्। स्तोभाद्यक्षरेष्वपि तच्चा-त्रातिव्याप्तिः॥१२॥

निगदो वा॥ निगदसञ्ज्ञकानां मन्त्राणां सञ्ज्ञाभेदादुपांशु यजुषा उच्चैर्निगदेनेति विप्रतिषिद्धधर्मभेदाच्च भेदो यजुर्भ्य इति प्राप्ते। ऋचः सामानि यजूंषीति वेदे त्रयाणामेव मन्त्रभेदानां सङ्कीर्तनान्मन्त्र एव स्वरूपं निगदभूतो भवति। तस्माद्यजुरिति च लिङ्गान्निगदानां यजुष्ट्वमेव। सञ्ज्ञा तु ब्राह्मणपरिव्राजकन्याये-नाभेदेऽप्युपपन्ना।

निगदत्वञ्च यजुष्ट्वावान्तरधर्मो न तु नितरां उपांशुस्वराति-रिक्तस्वरेण गद्यमानत्वम्। नमः प्रवक्त्रे इत्यादिनिगदेषु उपांशु-पद्यमानेष्वव्याप्तेः। न च धर्मभेदाद्भेदः। विशेषविहितेनोच्चैष्ट्वेन सामान्यविहितस्योपांशुत्वस्यान्यपरत्वावधायात्। उपांशु यजुषेत्यस्य वेदोपक्रमानुरोधेन यजुर्वेदविहितकर्ममात्रे उपांशुत्वविधायकत्वस्य वक्ष्यमाणत्वेन भवन्मतेऽपि सङ्कोचस्यावश्यकत्वाच्च। न चैवमुपक्रम-वशेन यजुःपदे वेदलक्षणावन्निगदपदेऽपि यजुर्वेदलक्षणापत्ते-रेकस्मिन् कर्मणि धर्मद्वयविकल्पापत्तिः। वायोर्यजुर्वेद इत्युपक्रमस्य यजुःपद एव लक्षणातात्पर्यग्राहकत्वात्। अन्यथा वायोर्निगदवेद इत्यपि किमावक्ष्यत्। अतस्तोच्चैर्निगदेनेति स्वतन्त्र एव निरर्थवाद-कोऽयमुच्चैष्ट्वनियमविधिर्विशेषविहितातिरिक्तनिगदोद्देशेन। तेषु हि परप्रत्यायनरूपकार्यवशेनोपांशुत्वनिवृत्तावपि मन्द्राद्यनेकस्वर-प्राप्तौ उच्चैष्ट्वनियमो नानुपपन्नः। अतो निगदभ्रेषे यजुर्भ्रेष-प्रायश्चित्तम्, आश्विनादौ पारिप्लवशंसनं वा॥१३॥

अर्थैकत्वात्॥ यदुक्तं यावत्सु पदेषु वाक्यत्वं पर्याप्तं तावत्सु पर्याप्तं* न तु वाक्यसमूहे, तस्य विनियोगानर्हत्वात्। वाक्यत्वञ्च यत्रार्थैकत्वं विभज्यमानसाकाङ्क्षत्वञ्च तावत्सु। अर्थैकत्वञ्च भिन्नप्रतीतिविषयाऽनेकमुख्यविशेष्यराहित्यम्†। अन्यस्य दुर्वचत्वात्। अस्ति च गामानयेत्यादौ मुख्यविशेष्यभूताया भावनाया एकत्वात्। दर्शपूर्णमासाभ्यामग्निहोत्रादिवाक्येषु च भावनानामनेकासामपि भिन्नप्रतीतिविषयत्वाभावात्, व्रीहियववाक्ययोर्भगोवां विभजत्वित्यादौ च सत्यपि भिन्नप्रतीतिविषयत्वे मुख्यविशेष्याया भावनाया एकत्वादर्थैकत्वम्। अतस्तच्चैकवाक्यत्वव्यावृत्त्यर्थं द्वितीयं अन्वीयमानयोः पदार्थयोरनन्वये अनिवृत्ताकाङ्क्षत्वरूपं विशेषणम्। स्योनं ते सदनं कृणोमि, तस्मिन् सीदेत्यत्रानन्वये साकाङ्क्षत्वेऽपि भिन्नवाक्यत्वादाद्यं विशेषणम्॥१४॥

समेषु॥ यत्र तु नोक्तविधं विभज्यमानसाकाङ्क्षत्वं, यथेषे त्वा ऊर्जे त्वेत्यनयोः, यथा वा आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामित्यादौ, तत्र सत्यप्यर्थैकत्वे भगोवामित्यादिवन्मन्त्रभेदः। किमुत यदा विनियोगानुसारेणार्थभेद एव प्रमाणवान्, तदा मन्त्रैकत्वे प्रमाणाभाव एव। अत्र हि इषे त्वेति शाखां छिनत्ति, ऊर्जे त्वेत्युनाष्टीति विनियोगभेदादिषे त्वा छिनद्मीति क्रियापदाध्याहारेण भिन्नमेव मुख्यविशेष्यम्। एवमूर्जे त्वोन्माज्मीति। एवं कृषी-

---

* पर्य्याप्तं,—इति नास्ति ख० ग० पुस्तकयोः।

† विशेषराहित्यम्,—इति ख० ग० पुस्तकयोः पाठः।

वांचयतीति बहुवचनात् कृप्तिभेदावगमेनार्थभेदः। अतश्चाच यजुर्भेद इति पूर्वोक्तप्रत्युदाहरणमाचम् ॥१५॥

अनुषङ्गे ॥ यत्र बहूनां शेषापेक्षिणामाद्यस्यानन्तरं शेषः समाम्नायते, यथा याते अग्ने अयाशयेत्यस्यानन्तरं तनूर्वर्षिष्ठेत्यादिः शेषः। उत्तरौ मन्त्रौ, याते अग्ने रजाशया, याते अग्ने हराशयेति। तयोरुत्तरयोः शेषापेक्षिणोरयमेव शेषोऽनुषज्यते, न तु लौकिकोऽध्याह्रियते, अकृप्तत्वात्।

न चासावेकत्र निबद्धोऽन्यत्र नेतुं न शक्यः। सर्वार्थत्वेनाम्नानात्। न चाद्यस्यानन्तरमपेक्षितदेशे पठितत्वात् तदर्थमाम्नानं शक्यम्। आकाङ्क्षायोग्यतयोरविशिष्टत्वादासत्तेरपि असम्बन्धिपदाव्यवधानरूपायाः सर्वत्राविशिष्टत्वाच्च। न हि आनन्तर्यमेव सम्बन्धकारणं, तदभावेऽपि शाब्दबोधस्यासम्बन्धिपदव्यवधानाभावे आनुभविकत्वात्। सर्वाव्यवधानस्य सकृत् पाठे अशक्यतया आकाङ्क्षादित्रयेणैव च सर्वार्थत्वज्ञानोपपत्तेरावृत्तपाठस्य सर्वान्तपाठस्य चापादयितुमशक्यत्वादपेक्षितदेशपाठस्य च लिङ्गेनैव ज्ञातुं शक्यत्वादाम्नानस्य सर्वार्थत्वावगतेरनुषङ्ग एव। न चैवं अव्यवधानस्याकारणत्वे पदश्रुत्या वाक्यस्यैव करणत्वानुपपत्तिः*। तस्याकारणत्वेऽपि सन्देहे नियामकत्वमाचाङ्गीकारात्। प्रकृते तु आकाङ्क्षादिवशेन सर्वार्थत्वस्यैव प्रतीतेर्नियामकाकाङ्क्षाऽभावेनानुषङ्ग एव युक्तः। अतश्च तद्भ्रेषेऽपि यजुर्भ्रेषप्रायश्चित्तम् ॥

---

* करणत्वानापत्तिः, — इति ख॰ ग॰ पुस्तकयोः पाठः।

एवं यत्र निराकाङ्क्षाणामेव शेषिणां बहूनामन्ते सापेक्षः शेषः समाम्नातो यथा चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वित्येतेषामन्ते, अच्छिद्रेण पवित्रेणेति। तत्रापि सन्निधियोग्यत्वयोरविशेषात् सर्वत्रानुषङ्गः। न चोत्थाप्याकाङ्क्षाया-एकसम्बन्धेनैव चरितार्थत्वादानन्तर्य्यस्य नियामकत्वोपपत्तिः। शेषा-काङ्क्षया आकाङ्क्षोत्थापनेऽपि प्रधानत्वाच्छेषिणां विनिगमना-विरहेण सर्व्वेषामेव शेषत्वावगतेरानन्तर्य्यस्यानियामकत्वात्। अतएव अनेकहविष्कविकृतिसन्निधिपठितोपहोमानां सर्वार्थत्वमेव। अतश्च मुखनाभिगुल्फप्रदेशपावनार्थेषु एतेषु मन्त्रेषु शेषोऽनुषज्यते प्रतिप्रधानावृत्तिन्यायात्॥१६॥

व्यवायात्॥ यत्र तु असम्बन्धिपदव्यवधानं, यथा सं ते वायुर्वातेन गच्छतां सं यजत्रैरङ्गानि सं यज्ञपतिराशिषेति। अत्र गच्छतामि-त्यस्याशिषेत्यत्र नानुषङ्गः। अङ्गानीत्यत्र एकवचनान्तस्यानन्वयेन बहुवचनान्तस्यैव गच्छन्तामित्यस्याध्याहारावश्यम्भावात्। वस्तुतस्तु बहुवचनस्यैवाध्याहारेण गमिधातोरनुषङ्ग एवेति एकवचनस्यैवानु-षङ्गप्रत्युदाहरणमिदम्॥१७॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां द्वितीय-स्याध्यायस्य प्रथमः पादः॥०॥

शब्दान्तरे ॥ भावनाभेदफलीभूतापूर्वभेदोपयोगिभावार्थाधि-करणरूपोपोद्घातप्रसक्तानुप्रसक्तादौ समाप्तेऽधुना शब्दान्तराद्भेदोऽभि-धीयते । ज्योतिष्टोमादिप्रकरणस्थानां, सोमेन यजेत, हिरण्यमात्रे-याय ददाति, दाक्षिणानि जुहोतीत्यादीनां विभिन्नधात्वर्थानां भावनाभेदबोधकत्वमस्ति न वेति चिन्तायां, ज्योतिष्टोमेन स्वर्ग-कामो यजेतेत्यनेन स्वर्गकर्मकभावनामात्रे लाघवाद् विहिते तदनु-वादेन सोमादिवाक्यैः सोमादिविशिष्टयागादिविधानात् सर्वेषां चोत्पन्नशिष्टत्वेन गुणान्यायाभावाच्च भावनाभेदः ।

न चानेकधात्वर्थानामेकजातीययत्नजन्यत्वासम्भवः । बाधका-भावात् । न च प्रकृत्यर्थान्वितस्वार्थाभिधायकत्वात् प्रत्ययानां फल-वाक्यस्थेनाख्यातेन धात्वर्थानवच्छिन्नशुद्धभावनाविधानानुपपत्तिः । आख्यातेन धात्वर्थावच्छिन्नभावनाभिधानेऽपि तदंशे विधिव्यापारा-भावात् । अतएव गुणफलसम्बन्धस्थले धात्वर्थानुवादेऽपि भावना-मात्रविधानम् । अतएव च फलवाक्ये यजिः प्रकृतसर्वधात्वर्थोपलक्ष-णम् । ज्योतिष्टोमपदञ्च कृचिन्यायेन सर्वनामधेयमिति प्राप्ते ।

कार्यमात्रवृत्तिधर्मस्य विजातीययागत्वादेः किञ्चिन् प्रति कार्यतावच्छेदकत्वावश्यकत्वेन तदवच्छिन्नं प्रति उपस्थितस्य यत्नस्यैव वैजात्यपरिकल्पनया विजातीययत्नत्वेनैव कारणत्वम् । अतश्च प्रति-धात्वर्थवैजात्यं भावनावैजात्यसिद्धिः । विभिन्नधात्वर्थकत्वमेव च शब्दान्तरत्वम् । अतएव तिस्र आहुतीर्जुहोतीत्यत्र सङ्ख्यया होम-भेदे सिद्धे शब्दान्तरादेवोक्तविधाद्भावनाभेदः । न तु सूत्रोक्तादिति ध्येयम् ।

किञ्च प्राप्तभावनाऽनुवादेन सोमयागाद्यनेकविधाने वाक्यभेदा-पत्तेस्तत्तद्गुणधात्वर्थोभयविशिष्टभावनाविधानमेव तत्तद्वाक्ये अङ्गी-कर्त्तव्यम्।

तत्र च चातुर्थिकन्यायेन ज्योतिष्टोमपदाभिधेयस्य सोमयागस्यैव स्वर्गवाक्येन फलसम्बन्धोऽन्येषान्तु तदङ्गत्वम्। न च स्वर्गवाक्य एव यागभावनोत्पत्तिपूर्वकं फलसम्बन्धः सोमवाक्येन च सोममात्रवि-धानमिति वाच्यम्। स्वर्गवाक्ये राजसूयन्यायेनेष्टिपश्वादियागानामेव फलसम्बन्धापत्तौ यागान्तरविधने प्रमाणाभावात्। ततश्च पश्वाद्य-वरुद्धे सोमविध्यनुपपत्तेः सोमवाक्ये कर्मान्तरविध्यवश्यम्भावः। प्रयो-जनं सोमयागमात्रप्राधान्यम् ॥१॥१८॥

एकस्यैवम् ॥ दर्शपूर्णमासप्रकरणस्थे, समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति, इत्यादौ याग-स्यापि प्रत्यभिज्ञायमानत्वेनाभेदान्न भावनाभेदः। न चाभ्यासाद्भेदः, यागस्याभ्यासस्यैकत्वसाधकत्वेन विरुद्धत्वात्। न च विधिपुनःश्रवण-रूपस्याभ्यासस्य विधेययागादिभेदकत्वम्। दध्ना जुहोतीतिवद्विधेर्दे-वतारूपगुणसङ्क्रान्तशक्तिकत्वेन यागविषयत्वाभावात्। न च यागो-त्पत्तिवाक्यस्थगुणावरोधान्नोत्पन्नवाक्येन गुणविधिः। अगत्या प्राथ-मिकवाक्यस्थसमित्पदस्य तत्प्रख्यन्यायेन नामधेयत्वाङ्गीरात्।

वस्तुतस्तु यदि याज्यामन्त्रवर्णात् समित्प्राप्तिस्तदा सा तनून-पादादीनामप्यविशिष्टा। अत उपांशुयाजानुवादेन विद्वद्वाक्यवि-हितकर्मानुवादेन वा पञ्चस्वपि देवताविधिः। न च सम्भवत्प्राप्ति-कता, याज्यामन्त्रवर्णवदनुमन्त्रणमन्त्रेभ्योऽपि विकल्पेन वसन्तादि-

देवताप्राप्तिसम्भवेनैतेषां नियमविधित्वोपपत्तेः । अतस्तासामन्यपरपुनः-श्रवणाभावान्न कर्मभेद इति प्राप्ते ।

उभयाकाङ्क्षाबललभ्ययाज्यामन्त्राणामेव देवताकल्पकत्वस्य पुरः-स्फूर्त्तिकत्वेनान्यतराकाङ्क्षाबललभ्यानुमन्त्रणमन्त्रेभ्यो देवताकल्पनानुपपत्तेर्न समिदादिपदानां देवतानियामकत्वम् । अतस्तोपपदार्थस्य सम्भवत्प्राप्तिकत्वात् पदश्रुत्यादिना "विधेर्धात्वर्थभावनाविषयत्वप्रतीतेर्विहितविधानायोगाद्विधेयतावच्छेदकतया नैजात्यसिद्धिः । न चैवं तत्प्रख्यन्यायेन समिदादिपदानां नामधेयत्वात् सञ्ज्ञयैव भेदसिद्धिः । तत्प्रख्यन्यायेन गुणविधित्वनिराकरणेऽपि नामधेयत्वस्यैकेनैवैकस्मिन् कर्मणि सिद्धेरनेकेषां नामधेयानां वैयर्थ्यप्रसङ्गेन समिदादिपदानां गुणानुवादकत्वेनैवोपपत्तेर्नामत्वानिर्णयात् । सिद्धे तु अभ्यासेन कर्मभेदे एकैकस्य कर्मण एकैकं नामधेयं सार्थकमिति नामत्वनिर्णयः । प्रयोजनमुत्तराधिकरणप्रयोजनम् । प्रयोजनान्तराणि कौस्तुभे स्पष्टानि ॥२॥१९॥

प्रकरणन्तु ॥ तत्रत्य एव य एवं विद्वान् पौर्णमासीं यजते स यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति य एवं विद्वानमावास्यां यजते स यावदतिरात्रेणेत्यादिवाक्येऽपि अभ्यासात् कर्मभेदः । न चायं लट्, लेट्त्वेऽपि वा यच्छब्देन विधिप्रतिबन्धाद्विधिपुनःश्रुत्यभावः । समिधो यजतीतिवल्लेट्त्वावगतेर्यच्छब्दस्य योदीक्षित इति वदेदन्क्रियामात्रविधिप्रतिबन्धकत्वात् । अतएव पौर्णमास्यमावास्यापदमपि नामधेयम् । पौर्णमास्यां पौर्णमास्येति वाक्यद्वयेनैतद्वाक्यविहितकर्मणोरेव कालविधानात् । न च रूपाभावः । वार्त्रघ्नी

पौर्णमास्यामनूच्येते वृधन्वतीममावास्यायामिति वचनेन आज्यभागक्रमाम्नातानामपि ऋचां क्रमं बाधित्वा एतद्वाक्यविहितकर्माङ्गत्वेन विधानान्मान्त्रवर्णिकाग्नीषोमदेवतायाः सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमितिवचनेन च द्रव्यस्य प्राप्तत्वात्।

अथवा, आग्नेयादिवाक्यैरेव पौर्णमास्यमावास्यादिपदोपस्थापितैतद्वाक्यविहितकर्मानुवादेन द्रव्यदेवताविधानाद्रूपलाभोपपत्तिः। न चानेकविधानाद्वाक्यभेदः। तद्धितेन देवताविशिष्टद्रव्यवाचिना परस्परान्वयस्य व्युत्पन्नत्वेन विशिष्टविध्युपपत्तेः। प्रकारान्तरेण रूपलाभस्तु कौस्तुभ एव द्रष्टव्यः। सर्वथा विद्वद्वाक्ये कर्मान्तरविधिः।

एवं च दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति फलवाक्येन प्रयाजादिसाधारणेन सर्वेषामाग्नेयादीनां एतद्वाक्यविहितकर्मणोश्च प्रथमपक्षे फलसम्बन्धो द्वितीये तु तत्साधारणेन तयोरेव। दर्शपूर्णमासप्रातिपदिकस्य कालयोगिषु प्रसिद्धत्वेऽपि द्विवचनस्याप्रसिद्धत्वात्। आज्यभागादिषु तस्य प्रसिद्धत्वेऽपि प्रातिपदिकस्याप्रसिद्धेः। अतो राजसूयन्यायेन नाम्नः सङ्कोचकत्वानुपपत्तेः प्रकरणात् सर्वेषामेव यागानां फलसम्बन्धः। पाशाधिकरणन्यायेन द्विवचनस्याप्रसिद्धत्वेऽपि प्रातिपदिकमात्रप्रसिद्ध्या कालयोगिनामेव वा अनयोरेव वा द्वित्वस्यापि कथञ्चिदुपपत्तेः फलसम्बन्धः। न तु षण्णामेवाग्नेयादीनामिति प्राप्ते।

जिघृक्षमाभ्यामाज्यभागाङ्गत्वेन वार्त्रघ्नीवृधन्वतीमन्त्राणां प्राप्तानामपेक्षितव्यवस्थाविधायकत्वेन वार्त्रघ्नीवाक्यस्योपपत्तौ नानपे-

ष्टितगौरवापादकविदद्वाक्यविहितकर्माङ्गताबोधकत्वम् । अतएव च कालद्वारेण कर्मद्वारेण वा व्यवस्थापरमेव तदिति वक्ष्यते । अतश्च न तावदनेन देवताप्राप्तिः। नाप्याग्नेयादिवाक्येन। प्राप्तकर्मानुवादेनानेकगुणविधाने वाक्यभेदात् । विधिफलस्य हि अज्ञातज्ञापनस्यैकविषयत्वमेव सर्वत्र क्लृप्तम्। तस्यानेकविषयत्वे बाधप्रसङ्गः। न च विशिष्टविधानादवाक्यभेदः, विशिष्टस्याव्युत्पन्नत्वात् । उक्तं ह्येतत्। कारकतासम्बन्धेन यत्र तद्धितादिवृत्तिर्न तत्र परस्परान्वयोऽपि तु यत्रास्याभिधानीमित्यादौ तदतिरिक्तसम्बन्धेन वृत्तिस्तत्रैव स इति। अतश्च प्रकृते देवतात्वस्य सम्प्रदानकारकत्वात् परस्परसम्बन्धानुपपत्तेरुभयविशिष्टकर्मान्तरविधानमेवावश्यकम्। अतश्च रूपाभावस्तदवस्थ एव ।

अस्तु वा कथञ्चिद्रूपलाभस्तथापि न विदद्वाक्ये कर्मविधिः। यच्छब्देन विधिशक्तिप्रतिबन्धेन विधिपुनःश्रवणस्यैवाभावात् । न च तस्य वेदनक्रियामात्रविधिप्रतिबन्धकत्वम् । यच्छब्दादेस्तच्छब्दावधिकप्रतिबन्धकत्वस्यैव व्युत्पत्तिसिद्धत्वात् । किञ्च अन्यपरत्वादपि नाभ्यासस्वरूपसिद्धिः । तथाहि तत्तद्विदद्वाक्यस्थत्वन्तयजिना प्रकृतत्वादाग्नेयादयस्त्रय एव तत्तत्कालयोगिनस्तत्तन्नामधेयवशादनूद्यन्ते । तत्प्रयोजनञ्च तन्त्रेण यजिनाऽनेकोपादानात् समुदायद्वयसिद्धिः। तस्या अपि प्रयोजनं फलवाक्ये तयोरेव फलसम्बन्धसिद्धिः। प्रातिपदिकस्य षट्सु कालयोगेन प्रसिद्धत्वात्। द्विवचनस्य च त्र्यवयवाश्रयसमुदायघटकसमुदायि वृत्तित्वसम्बन्धेन बहुत्वलक्षणार्थं त् । लक्षणातात्पर्यग्राहकमेव च प्रकृतसम्बन्धघटकसमुदाय-

सिद्धिद्वारा विद्वद्वाक्यद्वयम् । अन्यथा हि विद्वद्वाक्याभावे चाग्नेय-द्वयस्यैवैकवाक्योपादानावगतद्वित्वयोगिनः कालद्वययुक्तस्य च फल-सम्बन्धापत्तिः । यथा च यदाग्नेयोऽष्टाकपाल इत्यत्राग्नेयद्वयसिद्धि-स्तथा कौस्तुभ एव प्रपञ्चितम् । अतः षष्ठ्यां फलसम्बन्धसिद्धिरेवो-क्तविधया विद्वद्वाक्यप्रयोजनमित्यन्यपरत्वादर्थ्यपि न वैश्वदेवेन यजे-तेतिवदभ्यासरूपसिद्धिः । न चैवं पौर्णमास्यां पौर्णमास्येति वाक्य-द्वयवैयर्थ्यापत्तिः । तस्य समुदितयागत्रिकप्रयोगविधित्वेन सार्थक्य-स्यैकादशे वक्ष्यमाणत्वात् । अन्यथा ह्युत्पत्तिवाक्येषु प्रत्येककालयो-गात् प्रत्येकमेव पूर्वोत्तराङ्गसंहितैकैकप्रधानप्रयोगाभवेयुः । एव-ञ्चोत्पत्तिवाक्ये कालश्रवणमपि विद्वद्वाक्याधिकारवाक्यस्थयजिपद*सङ्कोचार्थमेवेति समुदायसिद्ध्यर्थं समुदायिनामनुवादकत्वादेवैतौ न कर्मान्तरविधिः— इति सिद्धम् ॥२।२०॥

पौर्णमासीवत् ॥ तत्रैव, जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशुयाजमन्तरा यजति विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वायाग्नीषोमावुपांशु यष्टव्यावजामि-त्वायेति श्रुते अन्तरावाक्ये पूर्ववदेव न कर्मान्तरविधिः । अपि तु तव्यप्रत्ययान्तवाक्यैर्विहितानां देवतोपांशुत्वविशिष्टयागानां समुदाय-सिद्ध्यर्थमनुवाद एव तत्प्रयोजनमान्तरालकालविधिः । तथाप्येतेषां तावद्भूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्तीति का-लसम्बन्धात् तात्पर्य्यपदद्वाराफलसम्बन्धसिद्धिर्वा । अन्यथा ह्यग्नीषो-मदेवत्यस्यैव कालसम्बन्धात् फलसम्बन्धः स्यादिति प्राप्ते ।

* यदिपद, – इति ख० ग० पुस्तकयोः पाठः ।

उपक्रमोपसंहारयोरेकविषयत्वेनैकवाक्यत्वप्रतीतेर्न तव्यप्रत्ययान्तवाक्ये: कर्मविधि: । अन्तरावाक्यएव तु कालोपांशुत्वविशिष्टैककर्मविधि: । तदर्थवादस्त्वायं पूर्वोत्तरभावेन सर्वोऽपि । अन्यथा वाक्यभेदापत्तेः । अतएव तव्यप्रत्ययान्तैर्देवतामात्रविधिरन्तरालवाक्यस्यकर्मणीत्यप्यपास्तम् । न च तत्र देवताऽलाभः । शाखाभेदेन वैष्णवप्राजापत्याग्नीषोमीयया ज्यानुवाक्यायुगलाना*मेतद्यागक्रमे समाम्नातानां विकल्पेन तत्तद्देवताकल्पकत्वोपपत्तेः । तस्य च तावभूतामित्यनेन कालसम्बन्धात् फलसम्बन्धः ।

न चोत्पत्तिशिष्टकालसम्बन्धानामेवाग्नेयादीनां झटित्युपस्थितत्वेन फलसम्बन्धापत्तेरुत्पन्नशिष्टकालसम्बन्धस्योपांशुयाजस्य फलसम्बन्धानापत्तिः । अन्यथा पुरोडाशान्तरालकालसम्बन्धान्यथानुपपत्त्यैव पौर्णमास्यादिकाललाभेनोपांशुयाजस्य फलसम्बन्धापत्तौ तावभूतेत्यस्यापि तत्फलत्वानुपपत्तेरिति वाच्यम् । तावभूतामित्येतदनन्तरमेवोपांशुयाजमन्तरा यजतीति पठितमिति वार्त्तिकदर्शनादस्यापि कालस्योत्पत्तिवाक्येनैव विधेयतया भिन्नवाक्यत्वाभावेन तुल्यबलत्वात्‡ फलसम्बन्धोपपत्तेः । अतो नायं समुदायानुवादः इति सिद्धम्† । प्रयोजनं स्पष्टम् ॥४॥२१॥

आघारा ॥ तत्रैवाघारमाघारयतीति श्रुते अग्निहोत्रं जुहोतीत्यत्र च पूर्ववद्वाक्यभेदस्य दूषकत्वाभावादृजुमाघारयति, सन्त-

* पुरोडाशाना, — इति क० पुस्तके पाठः ।

† सिद्ध, — इति ख० ग० पुस्तकयोः पाठः ।

‡ तुल्यत्वात्, — इति क० पुस्तके पाठः ।

तमाघारयति, दध्ना जुहोति, पयसा जुहोतीत्यादि*वाक्यविहित-कर्मणां यथायोगं समुदायानुवादकत्वोपपत्तिः। दध्यादिवाक्यानां निर्व्यापारे गुणमात्रे विध्यन्वयासम्भवेनावश्यं गुणविशिष्टकर्मविधायकत्वात्। अतश्च रूपाभावाद्भेदकप्रमाणाभावाच्चाग्निहोत्रवाक्ये आघारवाक्ये वा न कर्मान्तरम्। अपि तु तेषामेव समुदायसिद्ध्यर्थमनुवादः। तत्प्रयोजनञ्च सर्वेषामेवाग्निहोत्रसञ्ज्ञकत्वेन फलसम्बन्धसिद्धिः। इतरथा अग्निदेवत्यहोमस्यैव तदापत्तिः। आघारवाक्ये समुदायानुवादप्रयोजनन्तु कौस्तुभे द्रष्टव्यम्। न च दध्यादिहोमेषु देवताद्यभावः। समुदायानुवादबलेनैकप्रयोगविधिपरिग्रहावगतेः सकृदनुष्ठानेनाग्न्यादिहोमाङ्गभूतदेवतायाः प्रसङ्गेन दध्यादिहोमोपकारकत्वोपपत्तेरिति प्राप्ते।

सर्वत्र गुणमात्रविधानेन तृतीयविधिप्रकारोपपत्तौ पञ्चमविधिप्रकाराङ्गीकरणस्यान्याय्यत्वान्न दध्यादिवाक्येषु विशिष्टकर्मविधानम्। न च गुणे विध्यन्वयानुपपत्तिः। होमकर्मकगुणकरणकभावनायामेव विध्यन्वयेऽपि प्राप्ताप्राप्तविवेकेन विधिफलस्याज्ञातज्ञापनरूपस्य भावनायाः स्वरूपेण प्राप्ततया गुणमात्रविषयत्वोपपत्तेः। अतएव सर्वत्र प्रातीतिके विशिष्टभावनाविधानेऽपि फलमादायैव षड्विधिप्रकारास्तेषां चोत्तरोत्तरस्य दौर्बल्यं पूर्वमुक्तम्। अतश्च प्राप्त्यभावादेव समुदायानुवादत्वासम्भवादाद्यविधिविधया कर्मविधी एवाघाराग्निहोत्रवाक्ये। न च रूपज्ञानाभावात्कर्मविध्यनुपपत्तिः। तस्यानुष्ठानं प्रति कारणत्वेऽपि शाब्दबोधं प्रत्यकारणत्वात्। अतश्च

---

* दध्ना जुहोतीत्यादि, — इति ख° ग° पुस्तकयोः पाठः।

विजातीयहोमत्वावच्छिन्नस्य विधानेऽवगते वाक्यान्तरेण रूपलाभेऽपि न काचित् क्षतिः । प्रयोजनं दध्यादिद्रव्यसमुच्चयविकल्पाभ्यां स्पष्टम् ॥५॥२१॥

द्रव्यसंयोगात् ॥ अग्नीषोमीयं पशुमालभेतेति श्रुतम् । तथा, सोमेन यजेतेति च । तत्राद्यविधिप्रकारस्यासम्भवान्न पूर्ववत् कर्मविधित्वम् । अपि तु समुदायानुवादत्वमेव । कर्मप्राप्तिस्तु पशौ हृदयस्याग्रेऽवद्यति अथ जिह्वाया इत्यादिभिः । उत्पत्तिशिष्टपशुसाध्ये यागे हृदयादीनां साधनत्वानुपपत्तेर्न तदुद्देशेनावदानाख्यसंस्कारविधिः । अतो विहितानां हृदयाद्यवदानानां पशुप्रभवद्रव्यकृत्यवदानत्वसादृश्यात् सान्नाय्यावदानप्रकृतिकत्वावगतेः सान्नाय्यवदेव हृदयादीनां यागसाधनत्वस्य पूतीकवदनुमानाद्यावद्धृदयादियागा एव विधीयन्ते । तांश्च लक्षणया आलभतिना अनूद्याग्नीषोमौ देवता विधीयते । पशुपदञ्च हृदयादीनां छागप्रकृतिकत्वस्य मन्त्रवर्णप्राप्तत्वाल्लक्षणया हृदयादिपरम् ।

अथवा, हृदयादिवाक्यविहितावदानाच्छिन्नस्पर्शनेवालभतिना* स्पर्शनेवानूद्य पशुपदलक्षितहृदयादीनां प्रत्येकं देवतासम्बन्धे ज्ञाते तावन्तो यागा देवतासम्बन्धकल्पितास्तेनैव विधिना विधीयन्ते । सर्वथा पशुपदं समुदायानुवादः ।

तथा सोमेऽपि, ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णातीत्यादिवाक्यैर्द्रव्यदेवतासम्बन्धानुमितयागविधानम् । ग्रहणे देवतान्वयानुप-

* स्पर्शमेवालभतिना, – इति ख॰ ग॰ पुस्तकयोः पाठः ।

† पशुशब्द, – इति क॰ पुस्तके पाठः ।

पत्तेः । द्रव्यं धारापव्या धारया गृह्णातीति प्रकृतं धारासमर्थं द्रव्यं तद्धितोपात्तम् । सोमवाक्ये तु तत्प्रकृतित्वेन सोमलताविधिर्व्रीहिविधिवत् । सोमं अभिषुणोतीत्यादिसंस्कारविध्यन्यथानुपपत्त्यैव वा अध्वर्युं वृणीत इतिवत्सोमप्राप्तेः सोमपदं नामधेयम् । सर्वथा यजिः समुदायानुवादः । तत्प्रयोजनं चास्मिन् पक्षे सोमद्रव्यकयागमात्रानुवादादस्तुतशस्त्राणामपि फलसम्बन्धः । ज्योतिष्टोमपदस्य वैश्वदेववद्गौणम् । समुदायानुवादाभावे हि तद्ग्रहात् सस्तुतशस्त्राणामेव यागानां फलसम्बन्धापत्तिः । तेषामेव ज्योतीरूपस्तोमसम्बन्धात् । सिद्धान्ते तु यागस्यैकत्वात् फलवाक्यस्थयजिनाऽभ्यासलक्षणापत्तेर्विजातीययागत्वावच्छिन्नस्यैव फलसम्बन्धः । ज्योतिष्टोमपदे बहुव्रीह्यर्थस्तु स्वसम्बन्ध्यभ्यासघटितसमुदायाश्रयत्वरूपः । अतः समुदानुवादावेव ताविति प्राप्ते ।

पशुपदे हृदयादिलक्षणायां प्रमाणाभावात् तत्रैव विशिष्टयागविधिः । हृदयादिवाक्येषु हृदयाद्युद्देशेन संस्कारमात्रम् । पशोश्च न साक्षाद्धविष्ट्वेन विधानम् । किन्तु विशसनावदानादिविधिरूपतात्पर्यग्राहकानुरोधेन हृदयादिप्रकृतित्वेनैव । करणत्वस्य* साक्षादिव परम्परयाऽपि तात्पर्यग्राहके सत्युपपत्तेः । अतएवातिदेशप्राप्तावदानसम्बन्धोऽपि हृदयादीनां हविष्ट्वसिद्ध्यर्थस्तदितराङ्गानां हविष्परिसङ्ख्यार्थस्येत्यादि कौस्तुभे द्रष्टव्यम् ।

---

* कारणत्वस्य, — इति क॰ पुस्तके पाठः ।

† सिद्ध्यर्थः सन्, — इति ख॰ ग॰ पुस्तकयोः पाठः ।

सोमेऽपि नैन्द्रवायवादिवाक्यैर्यागविधिर्गौरवात् । किन्तु देवता-विशिष्टग्रहणस्यैव तद्धितोपात्तद्रव्योद्देशेन विधिः । सम्भवति च देव-तात्वस्य निरूपकतासम्बन्धेन ग्रहणवैशिष्ट्यायोगेऽपि ग्रहणकालीनो-च्चारणकर्मीभूतवृत्तित्वसम्बन्धेन ग्रहणे वैशिष्ट्यम् । अतश्च देवतायाः ग्रहणाङ्गभूताया अपि . यागापेक्षायां सोमवाक्यविहितयागस्यैव देवतापेक्षोपपादकत्वमात्रकल्पनाल्लाघवम् । सोमपदन्तु संस्कार-विध्यन्यथानुपपत्त्या सम्भवत्प्राप्तिकत्वेऽपि सकृद्यागवृत्तिफलकसोमनिय-मार्थं न विरुध्यते । यथा चैवं सति ग्रहणानां समुच्चयो यागस्य च प्रतिग्रहणमावृत्तिस्तथा सर्वं कौस्तुभ एव निरूपितम् । प्रयोजनं पशुविकारे हृदयादियागेष्वन्यतमप्रकृतिकत्वान्नैकादशावदानगण-प्राप्तिः पूर्वपक्षे । सिद्धान्ते तु सेति द्रष्टव्यम् । सोमे चाव्यक्तत्वसिद्धि-रेव ॥६॥२२॥

पृथक्त्वनिवेशात् ॥ आमनमस्यामनमस्य देवा इति तिस्र आ-हुतीर्जुहोति, आज्यभागौ यजतीत्यादौ एकत्वातिरिक्तसङ्ख्यायाः स्वाश्रयप्रतियोगिक-स्वाश्रयवृत्तिभेदव्याप्तत्वेन न तावत् साक्षाद्भावना-भेदबोधकत्वम् । तस्या उक्तसङ्ख्याश्रयत्वाप्रतीतेः * । नापि धात्वर्थ-भेदबोधकत्वम् । तस्य पूर्वप्रमितैकत्वसङ्ख्याऽवरुद्धत्वेनैकादश प्रयाजान् यजति विराट्सम्पन्नमग्निहोत्रं जुहोतीत्यादिवत्सङ्ख्यान्तरसम्बन्धानुप-पत्तेरेतत्सङ्ख्याया अभ्यासविषयत्वप्रतीतेरकर्मान्तरत्वमिति प्राप्ते ।

नात्र सङ्ख्यान्तरावरोधः । सा हि न तावत्तिङुपात्ता । तस्याः

---

* तस्या उक्तसङ्ख्याश्रयत्वातिरिक्तसङ्ख्यायाः प्रतीतेः, — इति क॰ पुस्तके पाठः ।

कर्त्तृत्वानितत्वात्। न चानवच्छिन्नस्यान्यथानुपपत्तेः प्रथमातिक्रमे च कारणाभावाद्बालत्वे एकत्वसङ्ख्यानुमानमिति वाच्यम्। श्रुतसङ्ख्यासत्त्वे कारणाभावस्यासिद्धत्वेनानुमानाप्रसरात्। अतएव प्रयाजैकादशत्व-स्थले यच प्रकृतौ अनुमानप्रसरस्तत्राभ्यासविषयत्वम्। न चैवं विराट्सम्पत्तिवाक्यादावपि उत्पत्तिवाक्ये एकत्वानुमानापत्तिः। तादृशस्थले स्वोपजीव्योत्पत्तिवाक्यजन्यशाब्दबोधनिर्वाहार्थं पूर्व्वप्रवृ-त्तस्यनुमानस्योत्तरकालिकेन सङ्ख्याश्रवणेन बाधायोगात्तत्राभ्यास-विषयत्वप्रतीतेः। प्रकृते तु शाब्दबोधात् पूर्व्वमेवेतरपदार्थवत्सङ्ख्याया-अपि प्रतीतेर्युक्तः शाब्दबोधोत्तरकालीनानुमानप्रतिबन्ध इति कौस्तुभे विस्तरः। अतस्य सिद्धमुत्पत्तिवाक्यगतकर्मसमानाधिकरण-विधेयसङ्ख्यायाः कर्मभेदकत्वम्। भावनाभेदस्तु शब्दान्तरादेव। प्रयोजनं, वेदिप्रोक्षणमन्त्रवत् पूर्वपक्षे सकृन्मन्त्रः, सिद्धान्ते तु तदा-वृत्तिरिति।

भाष्यकारेण तु सप्तदश प्राजापत्यान् पशूनालभेतेति वाक्ये यागभेदाभेदचिन्ता कृता। तत्र यद्यपि देवतात्वविशिष्टद्रव्यविशेष-वाची तद्धितः, यद्यपि च प्राजापत्यपद एवैकशेषस्तथापि तदुत्तर-विभक्त्युपात्तायाः सङ्ख्यायाः प्रकृत्यर्थे विशेष्यएवान्वयः* न तु विशिष्टे। द्वौ चरू इत्यादौ तथैव व्युत्पत्तेरिति तावदविवादम्। सोऽपि च न द्रव्ये देवतात्वान्यथोत्तरम्। तथा सति देवतात्वप्रतिसम्बन्धिनि द्रव्ये साहित्यानवगमेन प्रत्येकवृत्तिपशुत्वावच्छिन्न एव तत्सम्बन्ध-प्रतीतेरनेकत्वावगमात् सम्बन्धभेदेनानेकयागादिकल्पनागौरवापत्तेः।

---

* प्रकृत्यर्थविशेष्यएवान्वयः, — इति क॰ पुस्तके पाठः।

अतो लाघवाद् देवतात्वान्वयात् पूर्वमेव सङ्ख्यान्वयः । तदा हि बहुत्वावच्छिन्न एवैकदेवतासम्बन्धादेकयागादिकल्पनालाघवम् ।

न च प्रकृतिप्राप्तैकपशुनिष्पन्नैकादशावदानगतैकत्वानुरोधेन सङ्ख्याया देवतात्वान्वयोत्तरमन्वयः । पशुगतैकत्वस्य श्रुतसप्तदशत्वेन बाधात् । अवदानगतैकत्वस्य च प्रकृतावार्थिकत्वेनेहानतिदेशात् । अतो देवतासम्बन्धभेदे प्रमाणाभावान्न यागभेदः ।

अस्तु वा समानाभिधानश्रुत्या बहुत्वान्वयात् प्राग् देवतात्वान्वयेन सम्बन्धभेदस्तथापि लाघवाद् यागैकत्वम् । यथैव हि सिद्धान्तेऽनेके यागाः सकृदनुष्ठानेनोपपाद्यन्ते, तथा मन्मतेऽप्येकेन यागेनानेके देवतासम्बन्धा इति प्राप्ते ।

समानाभिधानश्रुत्या देवतात्वस्यान्तरङ्गत्वात् सङ्ख्यान्वयात् पूर्वान्वयित्वम् । पशूनां प्रत्येकं स्वत्वाश्रयत्वेन स्वत्वध्वंसानुकूलव्यापारात्मकयागकरणत्वरूपहविष्ट्वस्य प्रत्येकवृत्तितया सूक्तहविषोरित्यादिन्यायानुसारेण हविष्ट्वावच्छेदकपशुत्वावच्छेदेनैव देवतासम्बन्धौचित्याच्च । अतश्च बहुत्वानवच्छिन्नस्यैव प्रतिसम्बन्धित्वात् प्रतिसम्बन्धितावच्छेदकस्य प्रत्येकवृत्तित्वेन प्रतिसम्बन्धिभेदप्रतीतेस्तद्भेदेन सम्बन्धभेदसिद्धिः । न च सम्बन्धभेदेऽपि यागैकत्वम् । सम्बन्धानां यागैकत्वानेकत्वाभ्यामुभयथाऽप्युपपत्तौ लाघवापेक्षया पश्वेकत्वप्रापिचोदकस्य शास्त्रतया बलवत्त्वेन नियामकत्वात् । अतस्तदनुरोधेनैव सर्व्वत्र यागभेदो भावनाभेदश्चेति सिद्धम् । प्रयोजनं, यागैकत्वे एकपशुविस्मरणेऽपि तस्य ज्ञातत्वान्न पुनर्यागकरणं, सिद्धान्ते तु तदिति ॥७॥१४॥

सञ्ज्ञा च ॥ ज्योतिष्टोमं प्रकृत्याथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति श्रुतेषु ज्योतिरादिपदानां गुणविशेषे प्रसिद्ध्यभावात् द्योतनात्मकत्वेन प्रसिद्ध्युपपादने कर्म्मण्यपि तदापत्तेरेतच्छब्देन च तद्विधाने वाक्यभेदाद्यापत्तेस्तेषां नामत्वं तावदविवादम्। तच्च न प्रकृतस्य, यागस्य। ज्योतिष्टोमसंज्ञावरोधात्। सञ्ज्ञाकार्यस्य व्यवहारस्यैकेनैव सिद्धेरितरवैयर्थ्याच्च। न च विनिगमकाभावाद्विकल्पः। अथ शब्दस्य पूर्वकर्माधिकारविच्छेदकस्य नियामकत्वात्। अतएव वसन्ते वसन्ते ज्योतिषेतिवक्ष्याविकारत्वाशङ्का। तस्याविच्छिन्नेऽधिकारे समाम्नानेन तथाऽङ्गीकारात्। न चैवमधिकारविच्छेदाभावे उद्भिदादिसञ्ज्ञातो भेदानापत्तिः, ज्योतिष्टोमसञ्ज्ञाया उत्पत्तिशिष्टत्वाभावेन द्वयोरपि विकल्पो वैपरीत्यं वा किं न स्यादिति वाच्यम्। सोमयागे क्लृप्तप्रवृत्तिनिमित्तकज्योतिष्टोमसञ्ज्ञाऽवरुद्धे उद्भित्सञ्ज्ञायाः कथमपि निवेशानुपपत्तेस्तस्या भेदकत्वात्। अतएव यत्र न किञ्चिन्नियामकमस्ति तत्र सङ्कल्पादौ सञ्ज्ञयोर्विकल्प एव। प्रकृते तु अथशब्देन विच्छेदाद्भेदकत्वमेव सञ्ज्ञायाः। सहस्रदक्षिणेन यजेतेत्येतावतैव प्रकृतयागानुवादेन गुणविध्युपपत्तौ एतच्छब्दान्तस्य ज्योतिरादिवाक्यस्य वैयर्थ्यप्रसङ्गाच्च। अतो द्योतनादियोगेन ज्योतिरादिसञ्ज्ञं कर्मत्रयं सोमयागप्रकृतिकं तत्तद्वाक्येषूत्पन्नं सहस्रदक्षिणाकं, य एतेन क्षुद्धिकामो यजेतेति वाक्येन फले विधीयते इति सञ्ज्ञया कर्म्मभेदः ॥८॥२५॥

गुणश्च ॥ वैश्वदेव्यामिक्षेत्यत्र द्रव्यदेवताविशिष्टे यागे विहिते

तदनुवादेन वाजिभ्यो वाजिनमित्यत्र न गुणमात्रविधिः। प्राप्त-कर्मानुवादेनानेकगुणविधाने वाक्यभेदापत्तेः। न च वाजममन्नमा-मिक्षारूपं विद्यते येषामिति व्युत्पत्त्या विश्वदेवान् तद्विशिष्टयागं वोद्दिश्य वाजिनमात्रस्य विकल्पेन समुच्चयेन वा विधिरस्त्विति वाच्यम्। वाजिशब्दस्य रूढ़त्वेन विश्वदेवानुवादानुपपत्तेः। उत्पत्ति-शिष्टद्रव्यावरोधे द्रव्यान्तरस्य निवेशानुपपत्तेश्च। एतेनामिक्षाऽनु-निष्पन्नवाजिनसम्बन्धप्राप्त्या वाजिनपदं* आमिक्षायागनामधेयम-ङ्गीकृत्य तदुद्देशेन वाजिदेवताविधिरित्यप्यपास्तम्। उत्पत्तिशिष्ट-देवताऽवरोधे देवतान्तरस्य निवेशानुपपत्तेः। किञ्चामिक्षायाः पार्ष्टिको देवतासम्बन्धः पदश्रुत्या, वाजिनस्य तु वाक्येनेति दौर्ब-ल्यम्। तद्धितस्य हि देवतात्वविशिष्टे द्रव्यविशेषे शक्तिः आमिक्षा-पदस्य तात्पर्यग्राहकमिति प्राञ्चः।

आमिक्षादौ द्रव्ये देवतात्वे च भिन्ना शक्तिर्निरूपकत्वन्तु संसर्गः। देवतात्व एव वा शक्तिर्द्रव्ये लक्षणा। द्रव्यविशेषे एव वा शक्तिर्देवतात्वे लक्षणा। द्रव्यसामान्य एव वा शक्तिरामिक्षापदेन तु विशेषनिर्णयः। इत्येते पक्षाः कौस्तुभ एवोपपादिताः। सर्वथा आमिक्षाद्रव्यस्य देवतासम्बन्धः पदश्रुत्येति सिद्धम्।

किञ्च विश्वेषां देवानां तद्धितेन देवतात्वं शक्त्योक्तम्। अनु-शासनसत्त्वात्। वाजिनान्तु सम्प्रदानत्ववाचिन्या चतुर्थ्या साम्प्रतिक-लक्षणया। त्यज्यमानद्रव्योद्देश्यत्वविशिष्टप्रतिपत्तृत्वरूपसम्प्रदानत्वे-

---

* वाजिनपदे, – इति ख० ग० पुस्तकयोः पाठः।

कदेशत्वाद्देवतात्वस्य । तस्याः प्रतियद्दीतृत्वाभावात् । निरूढधर्म-समनियतसम्प्रदानत्वव्यापकदेवतात्वरूपाखण्डोपाधिस्वीकारे * तु सु-तरां लघवा । अतोऽपि दुर्बलत्वम् । तस्माद्वाजिनवाक्येऽपि गुणात् द्रव्यदेवताविशिष्टं कर्मान्तरमेव वाजिनप्रतिपत्त्यर्थमामिक्षायागाङ्ग-त्वेन विधीयते । गुणस्य च पूर्ववाक्यानिविश्यमानत्वेन भेदकता । सा च कचिद्वाक्यभेदापत्त्या कचित् 'प्रबलगुणावरोधात् कचिदेकप्रसर-ताभङ्गादित्यनेकप्रकारिकेति ध्येयम् ॥९॥२६॥

अगुणे तु ॥ यत्र तु नोत्पत्तौ गुणश्रवणं, यथाऽग्निहोत्रं जुहो-तीति । तत्र तदनुवादेन दध्ना जुहोति, पयसा जुहोतीत्यादिभिः सर्वैरेव गुणविधानं विकल्पेन । तत्र खलेकपोतन्यायेन सर्वेषामेव युगपत् प्रवृत्तेरेकावरुद्धत्वाभावादिति प्रत्युदाहरणमात्रम् ॥ १०॥ ॥२७॥

फलश्रुतेः ॥ अग्निहोत्रं प्रकृत्य दध्नेन्द्रियकामस्य जुहुयादिति श्रुते, स एव होमो दधिविशिष्टः फलोद्देशेन विधीयते । न च प्राप्तकर्मानुवादेन गुणसम्बन्धः फलसम्बन्धश्चेति वाक्यभेदः । प्राप्ता-नामपि कर्मणां राजकर्तृविशिष्टानां फलोद्देशेन राजसूयवाक्ये विधानवदिहापि तदुपपत्तेरिति प्रथमः पक्षः ।

द्वितीयस्तु नात्र राजसूयन्यायः । कर्तुर्हि प्रयोगान्वयित्वात् फलस्य च विनियोगान्वयित्वादुत्पन्नस्यापि कर्मणः प्रयोगविधौ फलविशिष्टविनियोगस्य कर्तुश्च वैशिष्ट्योपपत्तिः । प्रकृते तु दध्न-

* देवतात्वरूपाखण्डधर्म्मस्वीकारे, – इति ख० ग० पुस्तकयोः पाठः ।

उत्पत्त्यन्वयित्वेन प्राप्तोत्पत्त्यनुवादेन गुणविधिः फलविशिष्टविनि-योगविधिश्चेति वैशिष्ट्याभावाद्वाक्यभेदः । अतो गुणात् कर्मभेदः । दधिविशिष्टञ्च तत् फलोद्देशेन विधीयते । न दधिमात्रम् । भावार्थाधिकरणविरोधापत्तेः । सत्यपि दर्विहोमत्वे दधिद्रव्यकहोमत्व-सादृश्याच * अग्निहोत्रहोमातिदेशेन रूपलाभः ।

सिद्धान्तस्तु यत्र द्वयोरपि धात्वर्थगुणयोरप्राप्तिः सम्भवत्प्राप्तिः प्राप्तिरेव वा धात्वर्थस्यैव वा अप्राप्तिः, यथा सोमेन यजेत, उरु-प्रथा उरुप्रथस्वेति पुरोडाशं प्रथयति, ऐन्द्रवायवाग्रान् ग्रहान् गृह्णी-यात्‌ यः कामयेत यथा पूर्वं प्रजाः कल्पेरन्, अग्निहोत्रं जुहोती-त्यादौ, तत्र भावार्थाधिकरणन्यायः । यत्र तु गुणस्यैवाप्राप्तत्वा-द्विधेयत्वं, तत्र तस्यैव फलसम्बन्धः । न च दध्नोऽपि नियता प्राप्तिरपि तु विकल्पेन । अतः पाक्षिकानुवादत्वपरिहाराय तस्यैव विधेयत्वात् फलसम्बन्धः । कारणीभूतगुणसत्त्वेन वचनं विनाऽपि फलोत्पत्ति-सम्भवाद्वचनवैयर्थ्यप्रसङ्गेन स्वकृतिसाध्यधात्वर्थस्य दृष्टविधया गुण-सम्बन्धिन आश्रयस्यापेक्षायां प्रकरणाद्धोमस्याश्रयत्वलाभाज्जुहोतिः साधुत्वार्थमनुवादः । दधिकरणकं भावनान्तरमेव तु फलोद्देशेन वि-धीयते । प्राप्तभावनानुवादेनोभयकरणे वाक्यभेदात् ।

केचित्तु करणत्वविशिष्टं दधि, दधिकरणत्वं वा तृतीयोपात्तं फलकरणत्वेन विधीयते । तृतीयार्थकरणत्वस्य निरूपकापेक्षैव ना-श्रयापेक्षेत्याहुः । तन्न यागवैषम्ये प्रमाणाभावात् । सर्वथा सिद्धो-

* दधिद्रव्यकहोमत्वस्यासादृश्याच, – इति ख० ग० पुस्तकयोः पाठः ।

गुणफलसम्बन्धः। प्रयोजनं, दृष्टो न प्रतिनिधिरुल्लेखविशेषो वा सिद्धान्ते द्रष्टव्यम् ॥११॥२८॥

समेषु ॥ त्रिवृदग्निष्टुदग्निष्टोम इत्यनेन विहितस्याग्निष्टुद्यागस्य फलसम्बन्धे, तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामोऽनेतेन यजेतेत्यनेन कृते पश्चादाम्नातम्। एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामोऽनेतेन यजेतेति।

तत्रापि पूर्ववदाद्यः पूर्वपक्षः। राजसूयन्यायेन स्वकारकविशिष्टाग्निष्टोमस्तोत्रभावनाविशिष्टक्त्वाप्रत्ययार्थभूतकालकर्त्रादिरूपप्रयोगान्वयिगुणसत्त्वेन विनियोगविशिष्टप्रयोगविधिसम्भवात्। दृश्यते चायमेव प्रकारोवायव्यवाक्ये * सिद्धान्तिनाऽपि।

द्वितीयस्तु नात्र राजसूयन्यायः। प्रयोगस्य अग्निष्टोमस्तोत्रोत्तरकालत्वस्य च वायव्यवाक्येनैव प्राप्ततया तदनुवादेन रेवतीविधिः फलोद्देशेन अग्निष्टुद्विनियोगविधिश्चेति वाक्यभेदात्। वायव्यवाक्ये हि अतिदेशेन सम्भवत्प्राप्तिकमप्यग्निष्टोमस्तोत्रोत्तरकालतादि ततः पूर्वप्रवृत्त्यङ्गीकारेण प्रयोगविशेषणतया विहितम्। न त्वत्र। वायव्यवाक्यस्यापि क्लृप्तत्वेनास्य पूर्वप्रवृत्त्यङ्गीकारानुपपत्तेः। न च विनिगमनाविरहः। प्राथम्यस्यैव नियामकत्वात्। अतोलाघवाद्गुण एव रेवत्यधिकरणकवारवन्तीयाख्योरेवत्याख्य एव वा अप्राप्तत्वात् फलोद्देशेन विधीयते। वारवन्तीयमग्निष्टोमसाम कार्यमिति प्राकरणिकेन वाक्येन वारवन्तीयस्यापि प्राप्तत्वात्। न चास्यपक्षे हतीयान्तेनैतच्छब्देन विशिष्टसङ्गत्वाद्रेवतीमात्रनिर्देशानुपपत्तिः।

* वायव्यावाक्ये, — इति क० पुस्तक पाठः।

तेन रेवतीविशिष्टवारवन्तीयनिर्देशेऽपि दाचायणयन्यायेनाप्राप्तरेवतीमात्रस्यैव फलसम्बन्धोपपत्तेः । अतो दधिन्यायेन गुणफलसम्बन्ध एव युक्तः ।

सिद्धान्तस्तु नाचाश्रयलाभः शक्यते वक्तुम् । यागस्य तावत्प्रकृतत्वेऽपि अग्निष्टोमसामेत्यनुवादानुपपत्तेर्न साचादाश्रयत्वम् । अग्निष्टोमस्तोत्रद्वारा तस्यैव वा साचादाश्रयत्वं तु अग्निष्टोमस्तोत्रस्यातिदेशतः स्तोत्रान्तरसाधारण्येनोपस्थितत्वादनाशङ्क्यम् । न च वाक्यव्यवायेन तस्यौपदेशिकी विशिष्योपस्थितिः । आतिदेशिकगुणबाधसम्भवे औपदेशिकतद्बाधस्यान्याय्यत्वेन विशिष्योपस्थितेराश्रयत्वासाधकत्वात् । न च साम्नो गायतिधातुवाच्यत्वेन क्रियारूपत्वाद्द्रव्याश्रयालाभेऽपि न चतिः । साम्नोध्वन्यात्मकस्वरसमाहाररूपत्वेन वाक्यशेषादौ प्रसिद्धस्य सिद्धरूपतया धातुवाच्यत्वस्याप्रयोजकत्वात् । अन्यथा सौभरस्यापि स्तोत्राश्रयत्वानुपपत्तेः । वारवन्तीयसाम्न आश्रयानपेक्षणे अग्निष्टोमसामेत्याद्यनुवादानुपपत्तेश्च ।

अतः साम्न आश्रयसापेक्षत्वाच्च तावत्प्रकरणेनाश्रयलाभः । न च वारवन्तीयमग्निष्टोमसाम कार्यमिति प्राकरणिकेन वाक्येनैव गौरवभिया अङ्गत्वाविधानादाश्रयसमर्पणमिति वाच्यम् । साम्नोगुणत्वपक्षे तल्लाभोपपत्तावपि रेवतीमात्रस्य गुणत्वे तदयोगात् । साम्नोगुणत्वं तु विधेरप्राप्तरेवतीमात्रसङ्क्रमादेवासम्भवि । फलपदाभावे हि विधिर्यद्विषये अप्राप्ततया व्याप्रियते तस्यैव प्रयोजनाकाङ्क्षया फलसम्बन्धो यथा गोदोहनादेः ।

तदत्र पशुपदाभावे वारवन्तीयस्य प्राकरणिकवाक्येनैव प्राप्त-

त्वाद्विधिरप्राप्तरेवतीमात्रविषयः सम्पद्यत इति तत्रैव फलसम्ब-न्धोवाच्यः। न चास्याश्रयः केनापि प्रकारेण लब्धुं शक्यः। न च प्रकारान्तरेणालाभेऽपि अनेनैव वाक्येन आश्रयविशिष्टगुणवि-धानाद्वाश्रयगुणोभयविशिष्टभावनाविधानाद्वा तल्लाभोपपत्तिः, क्लृप्त-प्रयोजनत्वालाघवेनाश्रयतासम्बन्धेनैव वैशिष्ट्याङ्गीकाराच्च न गुणान्त-रतापत्तिरिति वाच्यम्। आश्रयस्य गुणान्वयाव्युत्पत्तेः। कर्मत्वा-तिरिक्तस्याश्रयत्वस्य 'दुर्वचत्वेन भावनायाः फलाश्रयरूपोभयकर्मक-त्वाङ्गीकारे एककर्मकत्वभङ्गापत्तेश्च।

न च क्त्वाशब्दोक्तायामाश्रयस्य अग्निष्टोमस्तोत्रस्य कर्मत्वा-त्तदुत्तरकालताविशिष्टगुणभावनाया आख्यातोपात्तायाः पशुकर्मक-त्वान्नैकस्याभावनाया द्विकर्मकतापत्तिरिति वाच्यम्। गुणभावनाया-अवच्छेदकीभूतधात्वर्थापेक्षायां यागस्यावच्छेदकत्वाङ्गीकारे रेवतीनां यागकरणत्वापत्त्या स्तोत्रं प्रति करणत्वानापत्तेः। स्तोत्रस्यैवावच्छेद-कत्वाङ्गीकारे तु धात्वर्थद्वयावच्छिन्नभावनाद्वयाभावात् क्त्वाप्रत्यया-नुपपत्तिः।

न च रेवतीविशिष्टाग्निष्टोमस्तोत्रभावनोत्तरकालविशिष्टरेव-तीकरणकयागाश्रयिकभावनैव फलोद्देशेन विधीयतामिति वाच्यम्। आख्यातोपात्तभावनाया द्विकर्मकत्वापत्तेस्तदवस्थत्वात्। न च प्रकर-णाद्यागस्याश्रयत्वोपपत्तेर्न द्विकर्मकत्वम्। तथात्वेऽपि तृतीयान्तेन-च्छन्दस्य धातुपारार्थ्यभयेन यागपरामर्शित्वस्यैवापत्तौ रेवत्यादिप-रामर्शकत्व एव प्रमाणाभावात्।

अतस्तदपेक्षया लघुभूतकर्मान्तरविधानमेव न्याय्यः। तदा हि

विकारि*त्वेनैतस्याग्निष्टुद्यागविकारत्वाद्वारवन्तीयं प्राप्तमेवानूद्यते। केवलं रेवतीविशिष्टस्तोत्रभावनोत्तरकालता विशिष्टयागान्तरभावनैव फलोद्देशेन विधीयते। षष्ठ्यन्तैतच्छब्दः प्रकृतिविकारभावानुवादकः। तृतीयान्तैतच्छब्दः प्रस्तोष्यमाणकर्मवचनो न दुष्यति। उत्तरकाललक्षणोगुणस्य प्रयोगान्वयित्वाद्वेष्टिवद्यद्यपि तद्भेदमेवापादयेत्, तथापि कालस्यात्र सम्भवत्प्रासिकतया वाक्यभेदपरिहारार्थं विधेयत्वेऽपि तात्पर्यगत्या यागे परम्परासम्बन्धेन विधेयस्य रेवत्याख्यस्य गुणस्योत्पत्त्यन्वयित्वात्कर्मभेदबोधकत्वाविघातः॥१२॥२८॥

सौभरे॥ ब्रह्मसामाख्यस्तोत्रं प्रकृत्य समाम्नातैर्योवृष्टिकामोयोऽन्नाद्यकामोयः स्वर्गकामः स सौभरेण स्तुवीतेत्येतैर्वाक्यैस्तत्स्तोत्राश्रितं सौभरं साम फलत्रयोद्देशेन विधीयते। उद्देश्यानेकत्वेन स्तुवीतेत्यस्यानुषङ्गेण वाक्यभेदप्रतीतेः। सौभरे च शाखाभेदेन निधनाख्यान्तिमसामावयवाधारतया हीष् ऊ ऊर्क् इत्यादीन्यक्षराण्याम्नातानि।

तदेवं सौभरं प्रकृत्य हीषिति वृष्टिकामाय निधनं कुर्यात्, ऊ इति स्वर्गकामाय, ऊर्गित्यन्नाद्यकामायेति श्रुतम्। तत्र वृष्टिकामादिशब्दानां फलपरत्वात्तदुद्देशेनैव हीषादयो गुणा विधीयन्ते। सौभरस्य प्रकृतत्वाद्यूपादिवदाश्रयः। निधनाधारतया हीषादिपाठस्यैव नियामकत्वाद्भागान्तरे स्तोभाद्यक्षरान्तरबाधापत्तेश्च न निधनातिरिक्तभागस्याश्रयत्वापत्तिः। न च लाघवाद्वृष्टिसाधनसौभरी-

---

* शिकायि, — इति ख० ग० पुस्तकयोः पाठः।

यन्निधने अनियमेन प्राप्तानां ह्रीषादीनां नियममात्रकरणाद्धव-स्थार्थत्वं शङ्क्यम्। तथात्वे वृष्टिकामादिपदैः तत्तत्साधनीभूत-सौभरलक्षणापत्तेः *। तस्य च निधनविशेषणत्वे विशिष्टोद्देशापत्तेश्च। अतः सौभरफलात् फलान्तरार्थानि ह्रीषादीनीति प्राप्ते।

नियमविधिलाघवानुरोधाद्वृष्टिकामादिपदैर्वृष्टिसाधनसौभर-लक्षणामङ्गीकृत्यापि ह्रीषादिनियमविधिरेवाश्रीयते। पक्षप्राप्तिश्च पाठान्निधनस्थान एवेति नियमस्यापि तत्स्थानकत्वलाभः। वस्तु-तस्तु नियमविधिलाघवानुरोधेन ह्रीषादेर्वृष्ट्याद्यर्थतैव स्वसाधनसौ-भराधारत्वसम्बन्धेनाश्रीयत इति न लक्षणाऽपि। सम्बन्धघटकीभू-तञ्च सौभरं न सौभरत्वावच्छिन्नम्। अपि तु सौभरविशेष एव। शाखाभेदेन हि कचिद्विजातीयानि सौभराणि निधनान्तरयुक्तानि समाम्नातानि। तत्र च ह्रीषः पक्षेऽप्यप्राप्तत्वान्न तस्य सौभरस्य सम्बन्धघटकत्वम्। अपि तु यज्जातीयसौभरे ह्रीषादीन्यनियमेन समाम्नातानि तज्जातीयस्यैव तत्। अतश्च वृष्ट्यर्थं निरुक्तसम्बन्धेन ह्रीषेवेति नियमकरणात् सम्बन्धघटकीभूतसौभरे निधनान्तर-व्यावृत्तिवद्विजातीयसौभरान्तरस्यापि वृष्ट्याद्यर्थत्वव्यावृत्तिसिद्धिः। अतश्च तन्नित्यप्रयोगविषयस्यैव सम्पद्यते इति विवेकः॥१२॥३०॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
द्वितीयस्य द्वितीयः पादः॥०॥

---

* तत्तत्साधनीभूतलक्षणापत्तेः, — इति ख॰ ग॰ पुस्तकयोः पाठः।

अथ तृतीयः पादः ।

श्रीगणेशाय नमः ।

गुणस्तु ॥ ज्योतिष्टोमे, यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्, यदि बृहत्सामा शुक्राग्रानिति श्रुतम् । तत्र यदि-शब्दोपात्तस्य निमित्तत्वस्य न तावद्रथन्तरे बृहति वाऽन्वयः । तस्य विशेषणत्वेन वृत्त्यनर्हत्वात् । नाप्यन्यपदार्थे, तस्य कादाचित्कत्वाभावात् । नापि विशिष्टे ज्योतिष्टोमे, सामान्तराणामपि नियतत्वेन बृहद्रथन्तरयोरन्ययोगव्यावृत्त्या विशेषणत्वासम्भवात् । ज्योतिष्टोमत्वावच्छेदेनायोगस्यापि व्यावर्त्तयितुमशक्यत्वाच्च । अतः समासार्थस्य केवलरथन्तरसामकत्वस्य प्रकृते कर्मणि ग्रहाग्रतानिमित्तत्वेन निवेशायोगादुभयशिष्टं कर्मान्तरमेव विधीयते । यदि-शब्दस्त्वविवक्षितार्थ इति प्राप्ते ।

बृहद्रथन्तरयोर्ज्योतिष्टोमे पाक्षिकत्वात्त्वायोगव्यावृत्त्या परस्परयोगव्यावृत्त्या वा विशेषणत्वोपपत्तिः । न च ज्योतिष्टोमत्वावच्छेदेन तदभावः । स्तावान्तरकार्य-पृष्ठस्तोत्रत्वावच्छेदेन तदुपपत्तेः । अन्यथा, तवापि साद्याग्रे प्रोक्षणावघातादौ तदसम्भवावश्यम्भावात् । अतोयुक्तैव रथन्तरविशिष्टस्य क्रतोर्निमित्तता ।

वस्तुतस्तु न क्रतोर्निमित्तान्तर्भावः । प्रयोजनाभावात् । प्रकरणावगतक्रत्वङ्गत्वबलेनान्यपदार्थसम्बन्धस्यानुवादत्वात् । अन्यथा ज्यो-

तिष्टोमरूपान्यपदार्थस्य विकृतावभावेन शुक्लाग्रतादेरनापत्तेः। अतो-लक्षणयाऽपि रथन्तरमेव निमित्तम्। नैमित्तिकन्तु अग्रताविशेषः प्रकृतापूर्वसाधनीभूतग्रहोद्देशेन विधीयते। न च पाठादैन्द्रवाय-वाग्रत्वनियमस्य प्राप्तेस्तद्विधिवैयर्थ्यम्। ततः पूर्वमेव नैमित्तिकतया विधानात्। तत्प्रयोजनञ्च, निमित्ताभावे प्रकृतौ विकृतौ च लोपः। यद्यपि च सर्वत्र निमित्तस्य सत्त्वे नैमित्तिकावश्यकत्वमात्रं प्रमेयं, तथापि तस्यात्र पाठादेव सिद्धेस्तदभावे तदभाव एव प्रमेयं बोध्यम्*। तस्मान्न कर्मान्तरविधिः॥१॥२१॥

अवेष्टौ॥ राजसूये राजकर्तृके प्रत्येकदक्षिणाम्नानादवेष्टिसंज्ञकाः पञ्चेष्टयः पृथक्प्रयोगाः समाम्नाताः। तद्वान्तरप्रकरणे, यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाऽभिघार-येत्, यदि राजन्य ऐन्द्रं, यदि वैश्यो वैश्वदेवमिति श्रुतम्।

तत्रापि पूर्ववद् ब्राह्मणकर्तृकत्वादि निमित्तमेव, यदि-शब्द-श्रुतेः। राजसूयस्य त्रैवर्णिककर्तृकत्वेन ब्राह्मणादेः प्राप्तत्वाच्च। राज-शब्दस्य प्रजापालनकर्त्तरि सर्वलोकप्रसिद्धेः। क्षत्रियमात्रे द्रविड† प्रसिद्धेस्तु म्लेच्छदेशस्य प्रसिद्धित्वेनासाधकत्वात्। व्याकरणप्रसिद्धे-स्तन्मूलकत्वेनानियामकत्वाच्च। सर्वलोकप्रसिद्धेः श्रौत-यदि-शब्दमूल-कत्वाच्च।

अतो ब्राह्मणादिकर्तृकत्वे निमित्ते मध्येनिधानपूर्वकप्रत्याहु-त्यभिघारणविशिष्टपञ्चहविष्कैकेष्टिप्रयोगो राजसूयान्तर्गतो विधीयते।

---

* बोधः, – इति क० पुस्तके पाठः।

† द्रमिड़, – इति क० पुस्तके पाठः। एवं परत्र।

प्रत्येकप्रयोगाश्च पञ्चानुलोमविषया * इति बोध्यम्। एतयाऽन्नाद्य-कामं याजयेदित्यनेन चोभयोरपि नित्यनैमित्तिकप्रयोगयोः फलार्थं बहिःक्रत्वनुष्ठानमिति न ब्राह्मणादिगुणस्य भेदकत्वमिति प्राप्ते।

राजानमभिषिञ्चेदिति श्रुतौ † राजोद्देशेनाभिषेकविधानादभि-षेकाधिकारिकराज्ययोगात् प्रागेव राजशब्दस्य क्षत्रियवाचित्व-प्रतीतेस्तस्य कर्मणीत्यधिकृत्य पत्यन्तपुरोहितादिभ्यो यक् इति स्मृत्या पुरोहितादिगणपठिताद्राजशब्दाद्यगादिविधानेन च रा-ज्यशब्दस्य राजशब्दप्रसिद्धिपूर्वकत्वावगतेः इत्थंप्रयोगानुसारेण राजशब्दः क्षत्रियवचन एव।

अतश्चावेष्टौ ब्राह्मणादीनां प्राप्त्यभावाद्विधेयत्वावगतेः कर्तृरू-पाद्गुणादवेष्टिप्रयोगान्तरमेव पञ्चहविष्कैकेष्टिरूपं समस्तगुणविशिष्टं बहिःक्रतु विधीयते। तस्य चोक्तवचनेनान्नाद्यं फलम्। अतः क्रतुप्रत्येकं पञ्च प्रयोगा एव। यद्यपि च पूर्वपक्षसिद्धान्तयोः पञ्च-हविष्कैकेष्टिप्रयोगस्तुल्यस्तथापि ब्राह्मणादिगुणस्य पूर्वपक्षे न भेदकत्वं सिद्धान्ते तु तदिति विशेषः। तत्प्रयोजनञ्च, पक्षद्वयोपपादनेनै-वोक्तम्।

न चैवं राजन्यवाक्ये तस्य प्राप्तत्वाद्विधेयत्वाभावेन भेदकत्वाना-पत्तिः। राजन्यपदस्याभिषिक्तक्षत्रियमात्रवाचित्वेन राजसूये अप्राप्त-स्यैव तस्य विधेयतया भेदकत्वोपपत्तेः। राजसूये हि राजपदस्य क्षत्रियमात्रशक्तस्यापि, राजेत्येतानभिषिक्तानाचक्षत इति निरुक्त-

* विषया एव, — इति ख॰ ग॰ पुस्तकयोः पाठः।

† क्रतौ, — इति ख॰ ग॰ पुस्तकयोः पाठः।

वणतात्पर्य्यग्राहकाल्लिङ्गादभिधिनश्चत्रियमाचस्यैवाधिकारः । अतः सिद्धं त्रिष्वपि वाक्येषु कर्तृरूपस्य गुणस्य प्रयोगभेदकत्वम् । यदि-शब्दस्याभिघारयेदिति लिङः प्रयोज्यत्वापरपर्यायहेतुमदर्थकत्वे आख्यातद्वयैकवाक्यत्वे च तात्पर्य्यग्राहकः । तेन मध्ये निधानपूर्वक-प्रत्याकृत्यभिघारणप्रयोजकीभूतैर्ब्राह्मणादिकर्तृकैर्यागैरिष्टं भावये-दिति वाक्यार्थो बोध्यः ॥२॥२९॥

आधाने ॥ वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति श्रुतम् । तथा, वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति च । तत्र सर्ववर्णसाधारणानां क्रतूनामग्निविद्या-साध्यत्वादग्नेश्च उपायभूतस्याधानस्य, य एवं विद्वानग्निमाधत्ते इत्यनेनानन्याक्षिप्तशक्तिकेनाभ्युदयेनाधानविधायिना प्राप्तत्वादाधाने ब्राह्मणादीनां प्राप्तेर्निमित्तार्थं श्रवणम् । ब्राह्मणकर्तृकत्वे निमित्ते वसन्तः काल आधानाङ्गत्वेन विधीयते । अथ वा ऽस्त्वेतस्याथ सम्भारान् सम्भरतीति विध्यन्तरशेषस्य वर्त्तमानापदेशता, तथापि सम्भारेष्वग्निमादधातीत्ययमाधानप्रापको विधिः । अत्र हि न सम्भा-राविधेयाः, प्रमाणान्तरप्राप्तत्वात् । नापि तदधिकरणत्वं, तस्मि-न्नाधीयतामयमिति मन्त्रवर्णादेव प्राप्तत्वात् । अत आधानमात्र-विधिरयम् ।

अथ वा, प्राप्ताधानानुवादेन कालविधिरात्मनेपदार्थस्यानाधा-तुराहवनीयत्वाभावरूपस्य च विधिरिति वाक्यभेदापत्तेः जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्ययमाधानप्रापको विधिः । उक्तवाक्ये तु अभ्यु-दयशिरस्कतया मन्त्रवर्णात् पूर्वमेवाधिकरणत्वविधिः । एवञ्च जात-

पुत्रवाक्ये वयोऽवस्थाविशेषलक्षणाऽपि नापद्यते । सर्वथा आधान-प्राप्तेर्निमित्तार्थानि ब्राह्मणादिश्रवणानि न भेदकानि । तथा विद्यासाधनतया अध्ययनं तत्साधनत्वेनोपनयनस्यार्थप्राप्तम् । अध्ययनस्य तु स्वाध्यायोऽध्येतव्य इत्यनेन नियमोऽपि । अतः सर्वसाधारण्येन * प्राप्तोपनयनोद्देशेन ब्राह्मणकर्तृकत्वे निमित्ते वसन्तः कालो-विधीयत इति प्राप्ते ।

सर्वकर्तृकत्ववत् सर्वकालकत्वस्यापि आधानादौ प्राप्तिसम्भवेन ब्राह्मणकर्तृकत्वे निमित्ते कालविधिः काले वा निमित्ते कर्तृविधिरित्यत्र विनिगमनाविरहादुभयविशिष्टाधानादिविधिरेव । उपनयनस्य च पक्षे सम्भवत्प्राप्तिकत्वेन सुतरां विध्युपपत्तिः । अतएव विनिगमनाविरहात् कर्तृकालादिरूपस्य प्रयोगान्वयिगुणस्य प्रयोगविध्यापादकत्वावश्यम्भावे एतद्विधिविहितप्रयोगानुवादेनैव जातपुत्रादिवाक्येषु वयोऽवस्थाविशिष्टकर्तृविधिः । आत्मनेपदार्थस्य चोत्पत्त्याद्यन्वयिनो गुणस्य श्रवणादुत्पत्त्यादिकमप्यत्रैव, न तु जातपुत्रादिवाक्ये, वाक्यभेदापत्तेः । प्राथम्याद्वा ब्राह्मणवाक्ये एवोत्पत्त्यादि, इतरयोस्तु प्रयोगमात्रम् । तेन सिद्धोऽत्रापि गुणात्प्रयोगभेदः । एनयोश्चाधानोपनयनयोरग्निविद्याफलत्वेऽपि अकरणे प्रत्यवायादिश्रवणान्नित्यत्वमपि । एवञ्च स्वविधिप्रयुक्ताधानोपनयनजन्याग्निविद्यालाभे क्रतुविधयोनाग्निविद्ये तदुपायान्वा प्रयुञ्जत इति तद्रहितस्य शूद्रादेरनधिकार इति प्रयोजनं षष्ठे वक्ष्यते ॥२॥३ २॥

अयनेषु ॥ दर्शपूर्णमासयोर्दाक्षायणयज्ञेन स्वर्गकामो यजेतेति

---

* साधारण्येन, — इति ख० ग० पुस्तकयोः पाठः ।

श्रुतम्। तथा साकं प्रस्थायीयेन यजेतपशुकाम इति श्रुतम्। लोके अप्रसिद्धत्वादुद्भिदादिवन्नामधेयत्वावगतेः सञ्ज्ञया अभ्यासाद्वा कर्मान्तरं विधीयते। फलसम्बन्धस्यापि सार्वकाम्यवाक्यवशादेव प्राप्तत्वेनान्यपरत्वाभावादिति प्राप्ते।

यद्यपि लोके गुणो न प्रसिद्धस्तथापि दक्षस्य यजमानस्येमे दाक्षा ऋत्विजस्तत्कर्तृकमयनं प्रयोगावृत्तिर्यस्य यज्ञस्येति व्युत्पत्त्याऽऽवृत्तिपरत्वावगतेः साकं सह प्रस्थानं यत्रेति व्युत्पत्त्या च सहत्वपरत्वावगतेर्नातिरिक्तशक्तिकल्पनया नामधेयपरत्वाध्यवसानम्। अतोऽप्राप्त आवृत्तिरूपः सहत्वरूपश्च गुण एव फलोद्देशेन विधीयते। आवृत्तिश्च कियतीत्यपेक्षायां द्वे पौर्णमास्यौ द्वे अमावास्ये यजेतेति वाक्येन विशेषविधानाद्द्विरावृत्तिरेव। सहत्वञ्च प्रस्थाने केनेत्यपेक्षायां सह कुम्भीभिरभिक्रामेदिति वचनात् कुम्भीभ्याम्। अनेनैव च वचनेन सहत्वाश्रयत्वं अभिक्रमणस्य विदधता अवान्तर-प्रकरणाभावेऽपि तस्याश्रयत्वसिद्धिः। आवृत्तेस्तु प्रकरणाद्दर्शपूर्ण-मासावेवाश्रयः। अतोऽत्र सञ्ज्ञात्वाभावाद्गुणफलसम्बन्धपरत्वेन चा-भ्यासाभावान्न कर्मान्तरम्। वस्तुतस्तु पूर्वपदात् सञ्ज्ञायामग इति सूत्या संज्ञात्वाभावे णत्वानापत्तेर्दाक्षायणपदे संज्ञात्ववश्यंभावेऽपि अवयवार्थप्रतीत्या योगरूढिस्वीकारादवयवार्थरूपावृत्तिरप्राप्तत्वात् फलोद्देशेन विधीयत इति न विरोधः॥४॥२३॥

संस्कारस्य॥ ईषामालभेत, चतुरोमुष्टीन्निर्वपतीत्येताभ्यां विहि-तयोर्दर्शपूर्णमासिकयो*रीषालम्भचतुर्मुष्टिनिर्वापयोरनुवादेन अना-

---

* विहितयोर्दर्शपूर्णमासयो, — इति ख॰ ग॰ पुस्तकयोः पाठः।

रभ्याधीताभ्यां, वायव्यं श्वेतमालभेत भूतिकामः, सौर्य्यं चरुं निर्वपेद्-ब्रह्मवर्चसकाम इत्येताभ्यां श्वेतचरू गुणौ विधीयेते। आलम्भकर्मीभूता ईषा श्वेता कर्त्तव्येति। निर्वापस्य चरुशब्दलक्षस्थाल्यां कर्त्तव्य-इति। सर्वत्रवाणाच्च वायुसम्बन्धाद्वायव्यमित्यनुवादः। सौर्य्यमिति चाग्नेयस्येव। तेजोदेवत्यत्वसामान्यात्। न तु देवताविधिर्यागा-श्रवणात्। उभयत्रापि फलपदं सार्वकाम्यवाक्यप्राप्तफल*प्रयोजक-त्वानुवाद इति प्रथमः पक्षः। द्वितीयस्तु फलपदवैयर्थ्यप्रसङ्गात् प्राकरणिकाश्रयालाभेन च गुणफलसम्बन्धानुपपत्तेः गुणविशिष्टं यावदुक्तं आलम्भनिर्वापाख्यं कर्मान्तरमेव फलोद्देशेन विधीयते इति।

सिद्धान्तस्तु। वायव्यं सौर्य्यमित्यादितद्धितान्तपदवैयर्थ्या-पत्तेर्द्रव्यदेवतासम्बन्धानुमितोयागएवालभति-निर्वपति-धातुलक्षितो-द्रव्यदेवताविशिष्टः फलोद्देशेन विधीयत इति। अतिदेशप्राप्तौ चालम्भनिर्वापौ न विधीयेते ॥५॥२४॥

विशये॥ यत्र तु न देवताश्रवणं तत्र न यागकल्पना, अपि तु संस्कारमात्रविधानम्। यथाऽग्निहोत्रे वत्समालभेतेत्यत्रालम्भमात्रं वत्ससंस्कारत्वेन विधीयते। आलभतेः स्पर्शमात्रवाचित्वात् ॥६॥२५॥

संयुक्तस्तु॥ अग्नौ श्रुते चरुमुपदधाति बृहस्पतेर्वा एतदन्नं यन्नीवारा इत्यत्र यजमानस्यान्नं बृहस्पतेः कथं स्याद् यदि न बृहस्पतिर्देवतेत्यर्थाद् बृहस्पतेर्देवतात्वावगतेस्तैत्तिरीयशाखायां बार्हस्पत्यो भवतीति तद्धितपदयुक्तवाक्यशेषश्रवणाच्च द्रव्यदेवतासम्ब-

* प्राप्त, — इति ख० ग० पुस्तकयोः पाठः।

न्यानुमितयागविधानमेवेदम् । तस्य चौषधद्रव्यकत्वेनाग्नेयातिदेशतः स्विष्टकृदादिप्रतिपत्तिप्राप्तौ चरुमुपदधातीत्यनेनोपधानं प्रतिपत्ति-त्वेन विधीयत इति प्राप्ते ।

यद्यपि तैत्तिरीयशाखायान्तद्धितश्रवणं, तथापि विध्यभावाद्वि-च्छन्तरैकवाक्यत्वभङ्गापत्तेश्च नायं देवतातद्धितः । चरुमुपदधाती-त्यनेन च स्थण्डिलनिष्पादकचरुसंस्कारकतयोपधानविधानात् देव-तानाकाङ्क्षतया नार्थवादोन्नीतस्यापि देवताविधेः कल्पनम् । अत-एव सर्वपेक्षितप्रकृतिद्रव्यस्यैव नीवाररूपस्य विधिकल्पनम् । अतश्च बृहस्पतेर्ब्राह्मणस्यान्नं नीवारा इत्येवं स्तुत्युपपत्तेर्न बृहस्पतेर्वा इत्ययं देवताकल्पनद्वारा यागकल्पक इति सिद्धम् ॥७॥३६॥

पात्नीवते ॥ त्वाष्ट्रं पात्नीवतमालभेतेत्यनेन द्रव्यदेवताविशिष्टं यागं विधाय पर्यग्निकृतं पात्नीवतमुत्सृजन्तीति श्रुतम् । तच्चो-भयदेवत्यस्य पूर्वयागस्य आग्नेयं चतुर्धा करोतीतिवत् केवलपात्नी-वतपदेनानुवादायोगात्पर्यग्निकरणादेश्च विधेयस्य गुणस्यातिदेशेनैव प्राप्तत्वादितराङ्गपरिसङ्ख्यायाञ्च त्रैदोष्यापत्तेः पर्यग्निकृतपदस्यानुवाद-त्वमङ्गीकृत्य कर्मान्तरविधिरेवायमिति प्राप्ते ।

प्रत्यभिज्ञानान्न कर्मान्तरम् । न चानुवादानुपपत्तिः । सत्य-प्यग्नीषोमादिवत्त्वष्टृपत्नीवतोर्व्यासज्यवृत्तिदेवतात्वे मनोतास्थाग्निशब्द-वल्लक्षणयाऽभिधानोपपत्तेः । वस्तुतस्तु पृथक्तद्धितश्रवणाद्देवताद्वय-मेवेदम् । एकवाक्योपादानाच्च समुच्चयः । अतोऽदित्यऽवित्ययो-र्माता अदित्यस्य मातेतिवदुच्यत एव केवलेन पात्नीवतपदेनानुवा-दः । अतः पूर्वकर्मानुवादेन गुण एव विधीयते । न च विधेया-

भाव:। वृत्तपर्यग्निकरणस्यैव क्तप्रत्ययान्तार्थस्य विधेयत्वात्। तस्य च गृहमेधीयाज्यभागन्यायेन प्राकृतस्यैवातिदेशतः पूर्वप्रवृत्त्या विधेयत्वात् कृत्स्नोपकारकत्वेन च तेनैव नैराकाङ्क्ष्यादतिदेशकल्पनेनोत्तराङ्गानामर्थादेव निवृत्तौ चैदोष्यानापत्तेः। वृत्तपर्यग्निकरणत्वस्य च पूर्वाङ्गेष्वकृतेष्वसम्भवात्तान्यप्याक्षिप्यन्ते। न च क्तप्रत्ययबलेन प्रमाणान्तरप्रमितत्वावगमादतिदेशाप्रतिबन्धकत्वम्। प्रोक्षिताभ्यामुलूखलमुसलाभ्यामित्यादाविव प्रमाणान्तराभावेऽपि एतद्विधिविधेयस्यापि क्तप्रत्ययोपात्तत्वेन बाधकाभावात् ॥८।१७॥

अद्रव्यत्वात् ॥ अनारभ्य श्रुतं, एष वै हविषाऽऽहविर्यजति योऽदाभ्यं गृहीत्वा सोमाय यजते इति। तथा, परा वा एतस्यायुः प्राणएति योऽंशुं गृह्णातीति। अत्र हविः सोमः स एव देवता स एव द्रव्यमिति प्रथमार्थवादस्यार्थः। प्राण आयुर्मर्यादामभिवर्द्धतइति द्वितीयस्य। तत्र न तावदत्र ग्रहणमेव ज्योतिष्टोमे विधीयते। संस्काररूपस्य ग्रहणस्यावघातादिवदंश्वदाभ्यनामकत्वानुपपत्तेः। द्वितीयान्तयोस्तयोः संस्कार्यद्रव्यनामत्वाङ्गीकारे तु अव्यभिचरितक्रतुसम्बन्धाभावान्न द्रव्यमात्रोद्देशेन ग्रहणविधिसम्भवः। अतो द्रव्यदेवताविशिष्टयागान्तरविधानमेवेदम्। अदाभ्यपदेन हिंसाऽनर्हसोमाख्यद्रव्यास्यांशुपदेन च निर्यासद्रव्यस्याभिधानात्। द्वितीया चोभयत्र सक्तुन्यायेन। देवता त्वेकत्र सोमोऽन्यत्र प्रजापतये स्वाहेति मन्त्रवर्णात् प्रजापतिः। गृह्णातिश्चाद्येऽनुवादो द्वितीये यागलक्षकः। तयोश्च यागयोः प्राकरणिकैतत्समानजातीयतैत्तिरीयशाखास्थवाक्याज्ज्योतिष्टोमाङ्गत्वमिति प्राप्ते।

गृह्णाती यागलक्षणायां प्रमाणाभावादाद्यवाक्ये गुणवक्त्र्यन्तग्र-क्षिना विधिना ग्रहणस्यैव विधेयत्वावगमात्तोभयत्रापि ग्रहणमेवोक्त-सम्बन्धकं उक्तसम्बन्धकद्रव्यसंस्कारकत्वेन वा विधीयते । एवं च विनि-योगभङ्गोऽपि द्वितीयाया न कल्पितोभवति । देवता तु सोमरूपा आद्यवाक्ये ग्रहणे एवान्वेतीति देवताविशिष्टं ग्रहणमेव तत्र विधी-यते । द्वितीये तु उपयाम गृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णा-मीतिमन्त्रवर्णाद् ग्रहणाङ्गतया देवताप्राप्तिर्द्रष्टव्या । होममन्त्रस्तूत्त-रभावियागोपकारकत्वमादाय नेयः । देवताविशिष्टग्रहणद्वये च प्राकरणिकवाक्येन ज्योतिष्टोमाङ्गत्वस्य तदुपपाद्यत्वस्य च बोधोप-पत्तेर्न कश्चिद्विरोधः । प्रयोजनं, पूर्वपक्षे यागस्याङ्गत्वाद्यथाशक्ति-न्यायविषयत्वं, सिद्धान्ते प्रधानत्वान्नेति ॥९॥२८॥

अग्निस्तु ॥ अनारभ्यैवं श्रुतम् । य एवं विद्वानग्निं चिनोतीति । तत्र चिनोतिना नाग्निसंस्कारार्थत्वेन चयनविधिरपि तु अग्निसंज्ञ-कस्य यागस्यैव विधिः । अथातोऽग्निमग्निष्टोमेनानुयजन्ति, तमुक्थ्ये-न, तमतिरात्रेण, तं द्विरात्रेणेत्याद्युत्तरवाक्येषु अग्निष्टोमादियज्ञा-नामग्न्यनुयजनत्वरूपगुणाम्नानात् । न हि अग्न्यनुयजनत्वमग्नेरया-गत्वेऽवकल्पते । देवदत्तमनुगच्छति यज्ञदत्त इत्यादौ तुल्यक्रिया-योगे एवानुशब्ददर्शनात् । अतस्याग्निसंज्ञकस्य यागस्य तस्मिन्नेव वाक्ये विधौ गौरवापत्तेर्विद्वद्वाक्य एव चिनोतिना लक्षणया तद्वि-धानम् । स चाव्यक्तत्वाज् ज्योतिष्टोमविकारः । उत्तरवाक्येषु तद्ध-र्मत्वकल्पसिद्धिः । इष्टकाभिरग्निं चिनुते इत्यनेन चयनस्य प्राप्तत्वा-च्चिनोतिर्निर्वपतिवदनुवादश्चयनस्येति प्राप्ते ।

पाकमनुभुङ्क्ते इत्यादौ तुल्यक्रियायोगाभावेऽप्यनुशब्ददर्शनाच्च तदनुरोधेनाग्निशब्दस्य चयनशब्दस्य च यागपरत्वकल्पना युक्ता । अतोविदद्वाक्ये चयनमेवाग्निसंस्काराथं विधीयते । अग्निशब्देन च यद्यपि शक्त्या ज्वलन एवाभिधीयते, तथापि तदर्थत्वे वैयर्थ्यापत्ते-र्निरूढलक्षणया आहवनीयादिपरत्वावगमात्तदुद्देशेनैव चयनं संस्कारकतया विधीयते । *संस्कारस्य सामर्थ्याच्चयननिष्पादितस्थण्डिलस्थापनरूपः । स्थापितस्याग्नेरुपयोगापेक्षायामथात इति वाक्येन तस्य ज्योतिष्टोमाङ्गत्वेन विधानम् । तत्र हि अग्निशब्देन चयननिष्पादितस्थण्डिलस्थापितोऽग्निश्चयनमेव वा लक्षणयाऽभिधीयते* । अग्निष्टोमशब्दस्य जातिन्यायेन संस्थावचनोऽपि व्यक्तिन्यायेन ज्योतिष्टोममेव प्रचुरप्रयोगादभिधत्ते । पार्थशब्द इवार्जुनम् । अतश्च ज्योतिष्टोमत्वमेव लाघवादुद्देश्यतावच्छेदकं न त्वग्निष्टोमसंस्थावत्त्वमपि ।

यद्यपि च चयनस्य ज्योतिष्टोमप्रयोगसम्बन्धित्वादनुष्ठानसादेश्यादेव तदङ्गत्वसिद्धिस्तथापि पशुकामश्चिन्वीतेत्यादिवाक्यैरग्नेः काम्यत्वावगमात् क्रत्वङ्गत्वप्रतिप्रसवार्थं तन्न विरुध्यते । अयञ्चाग्निः प्रकृतौ अग्निं सोमांगं वेष्ठतामित्यादिवचनादैकल्पिकः । अग्निपक्षे चोत्तरवेद्यां ह्यग्निश्चीयत इति वचनादुत्तरवेद्या समुच्चयः । तद्-

---

** एतच्चिह्नान्तर्वर्त्तिपाठस्थले, संस्कारस्य सामर्थ्याच्चयननिष्पादितस्थण्डिलस्थापितोऽग्निश्चयनमेव वा लक्षणयाऽभिधीयते,— इति ख॰ ग॰ पुस्तकयोः पाठः ।

भावे चोत्तरवेदिमाचम् । उत्तरवेद्यामग्निं निदधातीति वचनात् । अतश्च तमुकथ्येनेत्यादिवाक्यानि वैकल्पिकत्वात् विकृतिविशेषे तन्नियमार्थानि, चयनाश्रितश्येनाकारतादिफलार्थगुणानां प्राप्त्यर्थानि चेति दशमे वक्ष्यते ॥ १० ॥ ३९ ॥

प्रकरणान्तरे ॥ कौण्डपायिनामयने उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति मासं दर्शपूर्णमासाभ्यामित्यादि श्रुतम् । तत्र जुहोतिना अग्निहोत्रादिपदैश्च दूरस्थस्यापि कर्मण उपस्थितत्वात् तदनुवादेन यदाहवनीये जुहोतीतिवन्मासादिरूपगुणविधिः । उपादेयवदनुपादेयस्यापि दूरस्थकर्मानुवादेन विधाने बाधकाभावात् । कर्त्तृत्वकालाद्यनेकगुणविशिष्टप्रयोगविधानाच्च न वाक्यभेदः । अतो न कर्मान्तरविधिः इति प्राप्ते ।

सर्वत्र प्रवर्त्तकस्य विधेः ज्ञातिविषयत्वापरपर्यायं उपादेयत्वं प्रमाणत्वाद्याज्ञातज्ञाप्यत्वाख्यं विधेयत्वं च प्रमेयम् । तदुभयमप्येकवृत्ति । समानाभिधानश्रुत्यादिना च धात्वर्थभावनावृत्तीत्युत्सर्गः । योग्योपपदसत्त्वे तु विशिष्टविधिगौरवभिया तन्मात्रवृत्ति । यथा-यदाहवनीये जुहोतीत्यत्राहवनीयस्योपादेयत्वविधेयत्वोभयाश्रयत्वाद् योग्यत्वम् । अतएव तत्र धात्वर्थानुवादापेक्षायां दूरस्थानामपि सर्वहोमानां कथञ्चिदनुवादः ।

प्रकृते तु मासस्यानुपादेयत्वादुपादेयत्वं धात्वर्थ एव वाच्यम् । अतस्तत्सामानाधिकरण्येन विधेयत्वमपि तत्रैवेति विहितस्य विधानायोगाद्भेदः । एवं सत्यपि, यदि सायंजुहोतीत्यादिवत् प्रत्यभिज्ञापकं सन्निध्यादि प्रमाणं भवेत्ततोऽगत्या कालादौ विधेयत्वं

कर्मणि च प्राप्तेऽप्युपादेयत्वमिति वैयधिकरण्यमप्याश्रीयेत। न लेतदस्ति। न च सन्निध्याद्यभावेऽपि नाम्न एव पूर्वकर्मोपस्थापकता। अग्निहोत्रं जुहोतीत्यनेन जुहोतिना हि यादृशी विजातीयहोमत्व-प्रकारिका होमोपस्थितिस्तादृश्येव सन्निधिनोपनीता। युक्तं यत्तस्यां जुहोतीत्येतद्वाक्यस्थजुहोतेरपि स्वविषयविषयत्वमापादयन्ती भवति तद्गतविधेयार्थकत्वप्रतिबन्धिका।

अग्निहोत्रादि नाम तु अग्निदेवताकहोमत्वप्रकारकहोमविशेष्य-कबोधं जनयत् जुहोतेर्न पूर्वकर्मोपस्थापकत्वमापादयितुं क्षमम्। न हि अग्निदेवताकं पूर्वं कर्मैवेत्यत्र प्रमाणमस्ति। विजातीयहोमत्वस्य नाम्नाऽनुपस्थितेः। अन्यथा पर्यायत्वेन सह प्रयोगानापत्तेः। अति-प्रसङ्गनिराकरणस्य प्राचीनप्रयोगाभावेनैवोद्भिदधिकरणे स्थापितत्वेन योगरूढ्यनङ्गीकाराच्च। अन्यथा मत्वर्थलक्षणादिभिया अतिप्रसङ्ग-भङ्गार्थमपि रूढ्यङ्गीकारे सोमादावपि तदापत्तेः। अतो न नाम्ना तदुपस्थितिः। अतएव यत्र नामैवानुपादेयगुणयोगेन श्रुतं न तु धातुः यथा सर्वेभ्यो दर्शपूर्णमासावित्यादौ, तत्र नामार्थस्यैवोपादेय-त्वसामानाधिकरण्येन विधेयत्वप्रसक्तौ नामजन्योपस्थित्या तत्प्रति-बन्धात्र कर्मान्तरम्। अस्तु वा तद्वाक्यस्य प्राकरणिकत्वादकर्मान्तर-त्वम्। अतः प्रकृते नाम्ना विधेयार्थकत्वस्य जुहोतौ प्रतिबन्धायोगा-दनुपादेयगुणयुक्तानुपस्थितिरूपप्रकरणान्तरात् सिद्धं कर्मान्तरत्वम्।

अत्र चानुपादेयगुणयोगस्य स्ववृत्त्युपादेयतापनयनद्वारा पारि-शेष्याद्धात्वर्थवृत्त्युपादेयत्वापादनं व्यापारः। अनुपस्थितेरुपादेय-त्वसामानाधिकरण्येन विधेयत्वाप्रतिबन्धः सः। अतएव न प्राची-

नोक्तत्वा * अनुपादेयगुणयोग एव प्रयोजकोऽपि तु उपादेयगुण-सामान्याभाव एवेति ध्येयम् । अतः सिद्धं कालविशिष्टकर्मान्तर-विधानमेवेदम् । एवं सरस्वत्या दक्षिणेन तीरेणाग्नेयोऽष्टाकपाल इति देशरूपानुपादेयस्य आग्नेयपदस्य साधारणत्वेन पूर्वकर्मोपस्थापकत्वाभावात् । निमित्तस्य तु सत्रायागूर्य विश्वजिता यजेतेति । आगूरणं सङ्कल्पः । तदुत्तरं सत्रमकुर्वतोऽयं विश्वजित्, विश्वजिता यजेतेत्यस्मात्कर्मान्तरम् । न चानेन विनियुक्तस्य प्रयुक्तस्य वा तेनोत्पत्तिः । विनियोगादिसामानाधिकरण्येनावगतायां उत्पत्तेः सन्निधिं विना बाधे प्रमाणाभावात् ॥११॥४०॥

फलस्य ॥ फलस्याग्नेयमष्टाकपालं निर्वपेद्रुक्काम इति । संस्कारस्य तु औदुम्बरीं प्रोक्षतीति व्रीहिप्रोक्षणात् कर्मान्तरम् । पञ्चैव यथाऽनुपादेयानि † तथा वाजपेयाधिकरणे कौस्तुभे प्रपञ्चितम् ॥१२॥४१॥

सन्निधौ ॥ पञ्चानामनुपादेयानां सन्निधौ प्रत्युदाहरणानि । दर्शपूर्णमासप्रकरणे पौर्णमास्यां पौर्णमास्या यजेत, सभे दर्शपूर्णमासाभ्यां यजेत, यावज्जीवं दर्शपूर्णमासाभ्यां यजेत, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति चतुर्णाम् । स्विष्टकृतं प्रकृत्य शेषात् स्विष्टकृतं यजतीति शेषरूपसंस्कार्यस्य ।

अत्र सर्वत्र सन्निधिना स्वविषयवृत्तिविधेयत्वप्रतिबन्धात् प्राप्त-

---

* प्राचीनोक्तः, — इति ख० पुस्तके पाठः ।

† यथाऽनुपदेयाः, — इति ख० ग० पुस्तकयोः पाठः ।

स्यैव कर्मणः कालदेशविशिष्टप्रयोगविधिमात्रं विधिवाक्यमवश्यमनु-मन्यते न तु कर्मोत्पत्तिमपि विधत्ते। यत्र तु प्रयोगोऽपि प्राप्तो-यथा च दृष्टेत्यादौ, तत्र प्राप्तप्रयोगानुवादेन कालादिमात्रविधिः। सम्भवति देशकालयोरुपादेयत्वासम्भवेऽपि यागाङ्गत्वेन विनियोग-विधिः। निमित्तस्थले तु मिथोनिमित्तनैमित्तिकयोराकाङ्क्षा-सम्भवात् प्राप्तस्यापि कर्मणोनिमित्तसम्बन्धानुमितपापक्षयान्वर्थत्वेन विनियोगविधिरिति वक्ष्यते। फलसंस्कारार्थयोस्तु तदुद्देशेन प्राप्त-कर्मविनियोगविधिः स्पष्ट एव। अतो न सन्निधिसत्त्वेऽनुपादेय-गुणयोगेऽपि कर्मान्तरम्॥१ २॥४ २॥

आग्नेयस्तु* ॥ कालद्वययोगेनाग्नेयं विधाय, यदाग्नेयोऽष्टाकपा-लोऽमावास्यायां भवतीति श्रुतम्। तत्र कालाद्वययुक्तादाग्ने-यात् कर्मान्तरविधानमिदम्। प्रकरणान्तरादभ्यासाद्वा भेदोपपत्तेः। अनेनैव विहितस्येतरेण पौर्णमासीमात्रविधिस्तु उत्पत्तिशिष्टका-लावरोधान्निराकर्त्तव्यः। न चैकस्यैव कर्मणोऽभ्युदयशिरस्कतया विधिद्वयेन विधानं पिङ्गाक्ष्यैकहायनीशब्दाभ्यामिव द्रव्यविशेषस्येति वाच्यम्। पिङ्गाक्ष्येकहायनीशब्दाभ्यामुपस्थितस्याप्येकस्यैकेन विधिना विधाने बाधकाभावात्। प्रकृते तु एकेन विहितस्य नेतरेण विधि-सम्भव इति कर्मान्तरमेव। अतएवामावास्यायामाग्नेयद्वयकरणं पूर्वपक्षप्रयोजनमिति प्राप्ते।

---

* आग्नेयस्तु इति भवितुं युक्तम्। आग्नेयस्तु हेतुत्वादभ्यासेन प्रतीयेत इति हि सूत्रम्।

एतस्यैन्द्राग्नविधिशेषत्वाच्च स्वातन्त्र्येण विधायकत्वम् । प्रशस्ताग्ने-यथाविहितत्वेन चैन्द्राग्नप्रशंसा । अतो न कर्मान्तरम् ॥१४॥४७॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
द्वितीयस्य तृतीयपादः ॥

अथ चतुर्थः पादः ।

यावज्जीविकः ॥ यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्यच काम्ये एव स्वर्गाद्यर्थे दर्शपूर्णमासकर्मणि जीवनपर्याप्तकालविधिः । न च पौर्णमास्यादिकालविरोधः । व्याप्यव्यापकभावेन अमावास्यापराह्णादिवदुभयोरप्युपपत्तेः । अतएव विनिगमनाविरहात् कालद्वयविधावपि प्रयोगद्वयविधिः । जीवनपर्य्याप्तकालविधिसामर्थ्यादेव च पौर्णमास्याद्यर्थाद्दर्शपूर्णमासावृत्तिः । अतश्च तावद्व्याप्यप्रयोगव्यासक्तव्यापकैकप्रयोगादेव स्वर्गादिफलमिति प्राप्ते ।

काललक्षणापत्तेर्नायङ्कालविधिः । अतोधातुसम्बन्धाधिकारविहितणमुल्प्रत्ययेन जीवनस्य कर्मसम्बन्धावगतेः, स्वावच्छिन्नकालकलादिरूपसम्बन्धाश्रयणे च गुणभूतकालानुरोधेन प्रधानावृत्तेर्न्यायलभ्यत्वाभावेन यावच्छब्दार्थस्यापि विधेयत्वापत्तेर्लाघवान्निमित्तत्वमेव सम्बन्धः प्रतीयते । तदा हि प्रतिनिमित्तं नैमित्तिकावृत्तेर्न्यायलभ्यत्वाद्यावच्छब्दार्थोऽनुवादः । निमित्तत्वं च स्वान्वयव्यतिरेकानुविधाय्यवश्यानुष्ठानकवत्त्वम् । यथा राहूपरागान्वयव्यतिरेकानुविधायि अवश्यानुष्ठानं यस्य स्नानस्य तद्वत्त्वं राहूपरागे ।

अत्र च व्यतिरेकानुविधानस्य सर्वत्र प्रापकप्रमाणाभावादेव सिद्धेरन्वयानुविधान एव विधेस्तात्पर्यम् । अतश्च निमित्तसत्त्वे नैमित्तिकस्यावश्यानुष्ठानबोधनादकरणे प्रत्यवायोऽनुमीयते । करणे

च धर्मेण पापमपनुदतीत्यादिवाक्यशेषाद्रात्रिसत्रन्यायेन पापक्षय-
एवानुषङ्गिकोनित्यनैमित्तिकस्थले फलम्।

यत्र तु रथन्तरसामत्वादिनिमित्तसत्त्वे नैमित्तिकस्य पाठादेव
प्राप्तिसम्भवेनान्वयानुविधानस्य प्रमाणान्तरेण प्राप्तिस्तत्र व्यतिरेकानु-
विधान एव विधेस्तात्पर्यम्। अतएव रथन्तराभावे ऐन्द्रवायवाग्र-
त्वस्याभावः। अतश्च यावज्जीवपदे लाघवाद्यनुरोधेन जीवनस्य
निमित्तत्वावगतेस्तदनुरोधेन पापक्षयार्थं विनियोगान्तरमेवेदमिति
सिद्धम्॥२॥४ ४॥

नामरूप॥ शाखाभेदेनाम्नातेऽग्निहोत्रादौ सत्स्वपि भेदकप्रमा-
णेषु न कर्मभेदः। भेदकप्रमाणैर्हि स्ववाक्यस्य कर्मोत्पत्तिपरत्वावगते-
रुत्पन्नस्योत्पत्त्ययोगात् कर्मान्तरत्वसिद्धिः। प्रकृते तु उक्तप्रमाणैः
उत्पत्तिपरत्वावगमेऽपि पुरुषभेदात्तत्तच्छाखाध्यायिपुरुषान् प्रत्येक-
स्यैव कर्मणः सर्वत्रोत्पत्तिसम्भवान्न कर्मभेदः। न हि सर्वाः शाखाः सर्व-
पुरुषैरध्येयाः। स्वाध्यायविधावध्वर्युं वृणीत इतिवत् स्वीयत्वैकत्वयो-
र्विवक्षितत्वेनानेकशाखाऽध्ययनानुपपत्तेः। न चैवं वेदान्तरस्य* शाखा-
ध्ययनस्याप्ययनापत्तिः। वेदानधीत्येत्यादिवचनान्तरानुरोधेन वेदत्रय-
गतैकैकशाखाध्ययनस्यैवावश्यकत्वावगतेः।

अतएव वेदभेदे पुरुषाभेदादेकत्रैवोत्पत्तिरपरत्र गुणार्थं श्रवण-
मित्यत्र नियामकं वक्ष्यते। वेदैकत्वे तु प्रतिशाखं पुरुषभेदात्
सत्यपि सर्वेषामुत्पत्तिपरत्वे न कर्मभेदः। अतएवैकस्मिन् कर्मणि

---

* वेदान्तरस्य, — इति क० पुस्तके पाठः।

विरुद्धानां नानाशाखागताङ्गानां विकल्पः। स च न तत्तत्पुरुष-भेदेन व्यवस्थितः। तत्तदङ्गानां तत्तदध्येत्रर्थत्वे प्रमाणाभावेन प्रकरणात्क्रतुकलर्थत्वावगतेः। अविरुद्धाङ्गेषु तु समुच्चयः। शाखा-न्तरीयाङ्गज्ञानं च कल्पसूत्रादिभिः सुलभम्। यत्तु बह्वृच्यं वा स्वगृह्योक्तमित्यादि वचनं, तत्सर्वाङ्गोपसंहारासम्भवेऽनुकल्पविधा-नार्थमिति कौस्तुभे द्रष्टव्यम्। तदेवं शब्दान्तराभ्याससङ्ख्यासञ्ज्ञा-गुणप्रकरणान्तरैर्निरूपितः कर्मणां भेदः। अतः परं तेषां विनि-योगो निरूपयिष्यते ॥२॥४५॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
द्वितीयाध्यायस्य चतुर्थः पादः॥

श्रीगणेशाय नमः ।

तृतीयोऽध्यायः ।

प्रथमः पादः ।

अथातः ॥ तदेवं षट्प्रमाणके कर्मभेदे निरूपिते सम्प्रति शेषिनिरूपितं शेषत्वापरपर्यायमङ्गत्वं निरूप्यते । भिन्नानां हि तत् सम्भवति नाभिन्नानामिति तन्निरूपणस्य तत्र हेतुत्वम् । यद्यपि च द्रव्यकर्मणोर्मिथोऽङ्गाङ्गिभावे न पूर्वोक्तनिरूपणस्य हेतुता । तथापि अङ्गत्वसामानाधिकरण्येन हेतुतामादायैव सङ्गत्युपपत्ताववच्छेदकावच्छेदेन तदसत्त्वेऽपि न कश्चिद्विरोधः । अंशएव हेतुत्वं, अंशान्तरस्य तु तत्प्रसङ्गान्निरूपणमित्यपि बोध्यम् । अङ्गत्वमेव वाऽध्यायार्थोऽङ्गित्वं त्वर्थात् । तदपि च श्रुत्यादिषट्प्रमाणकं, अतिदेशप्रमाणकस्येहाविचार्यत्वात् । तच्चानेकप्रकारकं विचार्यते । अङ्गत्वलक्षणम्, शेषपद-शक्यतावच्छेदकम्, अङ्गाङ्गितयोरवच्छेदकम्, श्रुत्यादीनि च षट् अङ्गत्वे प्रमाणानि, तयोर्विरोधे बलाबलम्, विरोधस्य क्वास्ति क्व नास्तीत्यादि ॥ ३ ॥ १ ॥

शेषः ॥ इहाद्यं प्रकारद्वयं निरूप्यते । यदेव हि अङ्गत्वलक्षणं तदेव शेषपदशक्यतावच्छेदकं नान्यत् । तच्चाङ्गत्वं नाम पारार्थ्यम् । तच्च यदुद्देशप्रवृत्तकृतिकारकत्वेन विहितं यत्तत्त्वं तदङ्गत्वम् । स्वर्गोद्देशप्रवृत्तपुरुषकृतौ यागानुकूलायां कारकत्वेन विध्यन्वयात् यागे लक्षणसमन्वयः । प्रधानोद्देशप्रवृत्तपुरुषकृतौ प्रयाजाद्यनुकूलायां

प्रयाजादेः कारकत्वेन विध्यन्वयाच्च प्रयाजादावपि सः । द्रव्यगुण-कालकर्त्तृदेशादौ च यागाद्युद्दिश्य यागानुकूलकृतौ करणत्वकर्त्तृत्वाधिकरणत्वादिकारकत्वेन विधेयत्वाद्यागाङ्गत्वाविघातः । षष्ठीस्थले च सम्बन्धसामान्याभिधानेऽपि कारकत्व एव पर्यवसानान्नाव्याप्तिः । निमित्तस्य च क्रियान्वयिनीऽपि कारकत्वाभावान्नाङ्गत्वापत्तिः । निमित्तस्यानुष्ठापकत्वाख्योद्देश्यत्वेऽपि ईप्सितत्वाख्योद्देश्यत्वाभावाच्च न यागस्य निमित्ताङ्गत्वम् । लक्षणे तादृश्या एवोद्देश्यताया विवक्षितत्वात् । उद्देश्यतापदेनैव च कर्मकारकत्वाभात् कारकपदन्तदतिरिक्तपरम् । कृत्यादेरपि यागकृतिकारकत्वादङ्गत्वप्रसक्तौ विधेयत्वान्नम्* । यथा चास्य न क्वाप्यव्याप्त्यतिव्याप्ती, तथा कौस्तुभे विस्तरः ।

एवं च यत्रेदं न लक्षणं, यथा यागादेर्भावनादि प्रति, तत्र भाक्तोऽङ्गत्वव्यवहारः शास्त्रे । यद्यपि च नेदृशमङ्गत्वं श्रुत्यादिप्रमाणकं, कारकत्वमात्राभिधायित्वात् तृतीयादेः । तथापि यत्पदार्थः स्वर्गादिपदात्, तदुद्देश्यकत्वं संसर्गादिना, कृतिराख्यातात्, कारकत्वं तृतीयादेः, विध्यन्वयित्वं विधिपदसमभिव्याहारात् । विधिर्हि विशिष्टभावनां विदधन्नर्थाद्विशेषणान्यपि विधत्त इति सर्वेषामुद्देश्यत्वेन विधेयत्वेन वा विध्यन्वयः । अतएवाङ्गत्वाघटकीभुतपदार्थान्तराणां प्रमाणान्तरेण प्रसिद्धावपि तद्घटककारकत्वस्य श्रुत्यादिगम्यत्वात्तेषामङ्गत्वप्रामाण्यव्यवहारः ॥३॥२॥

---

* इत्थमेव पाठः सर्व्वत्र । विहितत्वान्नमिति तु भवितुमुचितम् ।

द्रव्यगुणः॥ यद्यपि पारार्थ्यमङ्गत्वं तथापि न यागादेर्लक्ष्यता। समानपदश्रुत्या यागादेरेव भावनाभाव्यत्वेन तस्य स्वर्गोद्देशेन विधितत्वाभावात्। विधेः स्वरूपयोग्यत्वेनैव लिङर्थतया इष्टसाधनत्वानाक्षेपकत्वात्। आक्षेपकत्वेऽपि भ्रमप्रमासाधारणेनेष्टसाधनत्वज्ञानस्यैव कारणतयेष्टसाधनत्वसिद्धौ प्रमाणाभावाच्च। स्वर्गकामपदस्य तु स्त्रीकामः प्रायश्चित्तं कुर्यादितिवत् कर्तृपरत्वादिनाऽप्युपपत्तेर्न भाव्यपरत्वावश्यकता। अतो न यागादेर्लक्ष्यत्वम्। वस्तुतस्तु। उपकारकत्वमेव शेषत्वम्। तदर्थेऽप्यपकारके शेषत्वव्यवहाराभावात्। तच्च श्रुतिलिङ्गवाक्यरूपप्रमाणत्रयगम्यमेव। अतएव व्रीह्यादेर्द्रव्यस्यारुण्यादेर्गुणस्यावघातादेः संस्कारस्य चोपकारकत्वदर्शनाच्छेषत्वम्। प्रोक्षणादिसंस्कारस्य तु लिङ्गेनाङ्गत्वासम्भवेऽपि श्रुतिवाक्याभ्यामङ्गत्वप्रतीतेस्तद्वत्त्वेनैव उपकारकल्पनया शेषत्वोपपत्तिरिति तेषामेव लक्ष्यत्वमिति प्राप्ते।

नोपकारकत्वं शेषत्वं, गोदोहनदध्यानयनादेरपि प्रणयनवाजिनयागाङ्गत्वापत्तेः। अपि तु पारार्थ्यमेव। अपकारकस्थले तु तदपकारस्यैवेष्टत्वेनोद्देश्यता न तु तस्येति न तदर्थेऽप्यपकारके शेषत्वव्यवहारः। तदपि श्रुत्यादिषट्प्रमाणगम्यमिति वक्ष्यते। अतस्त्र वाक्याद्यागोऽपि फलम्। तथाहि। यद्यपि विधेः स्वरूपयोग्यतयैव प्रवृत्त्यनुकूलत्वं लिङाऽवगम्यते, तथापि कदाचित् प्रवृत्त्यभावे विधिवैयर्थ्यापत्तेरवश्यं कदाचित्तया भवितव्यम्। तदा चेष्टसाधनताज्ञानं विना तदसम्भवात्तस्य च बाधकाभावे भ्रमत्वायोगादिष्टसाधनत्वं तावद्यागस्य विधिबलादवगम्यते, इष्टविशेषसाधनत्वं च

स्वर्गकामादिपदसमभिव्याहारादिति यागस्य स्वर्गाङ्गत्वसिद्धिः। एवं फलस्यापि भोक्तृपुरुषाङ्गत्वम्। भोक्ता चोत्सर्गतो विधिवशात्कामनावशादात्मनेपदवशाच्च कर्तैव। प्रमाणत्वे लन्वयः। अत्राङ्गत्वव्यवहारो भाक्त इति तु ध्येयम्। पुरुषः पुनः कर्तृत्वादिना यागाद्युद्देश्यकृतिकारकत्वाद्वाक्यादेव तदङ्गं इत्यविवादमेव ॥२॥२॥

तेषाम्॥ तदेवमङ्गत्वे निरूपितेऽङ्गत्वे श्रुत्यादीनि षट् प्रमाणानीत्युक्तम्। तत्र श्रुतिर्नामाङ्गत्वघटकीभूतोद्देश्यता-कृतिकारकत्वयोरन्यतरस्य प्राधान्येन वाचकः शब्दः। स च द्वितीयातृतीयादिविभक्तिरूपः। कृन्निष्ठातृजादिव्यावृत्त्यर्थं प्राधान्येनेति। तस्य कारकत्वविशिष्टद्रव्यवाचित्वेन प्राधान्येन कारकत्ववाचित्वाभावात्। अतएव प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति, वारणो यज्ञावचर इत्यादौ वाक्यीय एव विनियोगो न तु श्रौतः।

तत्र द्वितीया उद्देश्यत्वपरा सती प्रोक्षणादेरङ्गत्वे हेतुः। वस्तुतस्तु। ईप्सितत्वाख्याया उद्देश्यतायाः साध्यतामात्रवाचिद्वितीयावाच्यत्वाभावात्तत्रापि न मुख्या श्रुतिः। अपि तु भाक्त एव श्रुतिव्यवहारः। ईप्सितत्वांशे लक्षणाऽङ्गीकारात्। अतस्योद्देश्यतापदमपि नैव लक्षणे देयम्। एवं षष्ठ्यादावपि कारकत्वशक्तत्वाभावात् श्रुतित्वव्यवहारो भाक्त एव। एवं यत्रापि विभक्त्या लक्षणयैव कारकान्तरप्रतिपादनं, तत्रापि वाक्यीय एव विनियोगो न श्रौतः। एवं समानपदश्रुत्यादिष्वपि द्रष्टव्यम्।

तदेवं श्रुतेर्विनियोजकत्वे तद्भूताधिकरणेनैव सिद्धेऽधुना गौणमुख्यसाधारणश्रुतिविनियोगोपयोग्यङ्गाङ्गितयोरवच्छेदकविचारः

क्रियते। दर्शपूर्णमासयोर्व्रीहीनवहन्ति, आज्यमुत्पुनाति, गां दोग्धीत्यादय आज्यौषधसान्नाय्यसम्बन्धिनः संस्काराः श्रुताः। तेषु किं सर्वसाधारणमवघातविधावुद्देश्यतावच्छेदकं उताज्यादिष्वावृत्तं, एवमन्यत्रापीति विचारः। तत्र न तावच्छ्रुतं व्रीहित्वादिकमेवोद्देश्यतावच्छेदकम्। आनर्थक्यापत्तेः। अवघातप्रोक्षणादिव्यतिरेकेणापि व्रीहित्वावच्छिन्नादेर्ज्ञायमानत्वात्। यवेष्वनापत्तेश्च। अतो नवमाधिकरणन्यायेन व्रीहित्वाविवक्षयाऽपूर्वसाधनत्वलक्षणाया आवश्यकत्वात्तच्च फलप्रत्यासन्नत्वादेकत्वादारादुपकारकेषु क्लृप्तप्रयोजकशक्तिमत्त्वाच्च परमापूर्वस्य तत्साधनत्वमेव प्रदेयघटकत्वसम्बन्धेन लक्ष्यते। अस्ति चाग्नेयादेस्तत् प्रत्यपि साधनता। अतएव न वाङ्नियमन्यायोऽपि। अतस्तोद्देश्यतावच्छेदकस्य सर्वसाधारणत्वादाज्यादिष्वप्यवघातादेः सङ्करः। न च प्रतिनियतनिर्देशाद्व्यवस्था। तथात्वे व्रीहित्वादिविवक्षाया आवश्यकत्वे नीवारादिष्वनापत्तेरिति प्राप्ते।

यद्यपि विधिरविशेषप्रवृत्तः स्यात्, तथापि दृष्टार्थत्वनियमविधिलाघवानुरोधेन विशेषे व्यवस्थाप्येत, किमुत यदा सोऽपि विशेषप्रवृत्त एव। व्रीह्यादिपदे प्रत्यासत्त्या आग्नेयाद्युत्पत्त्यपूर्वसाधनत्वस्यैव लक्ष्यत्वात्। तस्याप्यनिर्ज्ञातप्रकारत्वेन धर्मप्रयोजकत्वोपपत्तेरानर्थक्याभावेन तदतिक्रमकारणाभावात्। परम्परया फलवत्त्वाच्च। अतो व्रीहिपदेन व्रीहिसाध्यानि यानि आग्नेयाग्नीषोमीयैन्द्राग्न्युत्पत्त्यपूर्वाणि तन्निष्ठकार्यतानिरूपितयागादिनिष्ठकारणतासमानाधिकरणकार्यतानिरूपितप्रदेयप्रकृतिभूततण्डुलरूपव्यापारकसाधनतासामान्याश्रयत्वस्यैव चोद्देश्यतावच्छेदकत्वेन विवक्षितत्वादाज्यादिषु

प्रसङ्गः। अत्र च पूर्वत्रयस्यैकानुगमकाभावेऽपि एकपदोपादानाद्वाक्यभेदः। तत्तद्व्यापारकसाधनता एव च विवक्ष्यन्ते न तु साधनतावच्छेदकादीन्यपि। तेन यागत्वपुरोडाशत्वव्रीहित्वाद्यभावेऽपि न क्षतिः। यथा च व्रीहियवयोः कारणताभेदेऽपि यवसाधारण्यं, तथा कौस्तुभे विस्तरः। तत्र तत्र नवमादौ चोपपादयिष्यते ॥ ३ ॥ ४ ॥

द्रव्यम् ॥ दर्शपूर्णमासयोः, स्फ्यश्च कपालानि चेति दश द्रव्याण्यनुक्रम्यैतानि वै दश यज्ञायुधानीति श्रुतेन वाक्येन दशानामपि द्रव्याणां यज्ञसाधनत्वेन विधानादुत्पत्तिशिष्टपुरोडाशाद्यवरोधेन च साक्षाद्यागसाधनत्वायोगादङ्गेष्ववतारात् प्रकृतापूर्वसाधनीभूतद्रव्यसाकाङ्क्षक्रियात्वावच्छिन्नोद्देशेन द्रव्याणि विधीयन्ते। स्फ्येनोद्धन्तीत्यादिविशेषविनियोगास्त्वयुत्यानुवादा इति प्राप्ते।

तेन तेन प्रत्यक्षविधिना तृतीयाश्रुतिसहकृतेन स्फ्यादीनां विशिष्य विनियोगाद् यज्ञायुधवाक्यमेवैकमश्रुतविधिकं वै-शब्दोपबद्धमनुवादकम्। बहूनामनुवादानां वैयर्थ्यात्। अस्य च यज्ञायुधानि सम्भरन्तीत्येतद्विध्यर्थवादत्वेन सार्थकत्वात्। तस्मादुद्धननमात्रजन्यव्यापारकप्रकृतापूर्वसाधनत्वमेवोद्धननपदेन लक्षयित्वा तदुद्देशेनैव स्फ्यादिविधिः ॥ ३ ॥ ५ ॥

अर्थैकत्वे ॥ ज्योतिष्टोमे, अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीति श्रुतम्। तत्रारुणशब्दोऽरुणवचनोऽरुणत्वजातिवचनोवा न तु विशिष्टव्यक्तिवचनः। तृतीयया च शक्यस्यैव करणत्वमुच्यते, न तु तदर्थं द्रव्यलक्षणा। टावाद्यर्थोऽपि तत्रैव सामानाधिकरण्येनान्वीयते। न तु तदर्थमपि व्यक्तिलक्षणा। अव्युत्पत्त्यापत्तेः।

यथा चैवं सति, गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्तीत्या-द्यनुशासनोपपत्तिस्तथा कौस्तुभे द्रष्टव्यम्।

एकहायन्यादिपदानां तु बहुव्रीहित्वाद्वयवार्थविशिष्टान्यपदार्थ-रूपे द्रव्यएव शक्तिरिति प्राञ्चः। अन्यपदार्थे पदद्वयस्य लक्षणेति तु बहवः। न च द्रव्यस्यैकेनैव पदेन विधिसम्भवे इतरेण विध्यनुप-पत्तिर्वैय्यर्थ्यं चेति वाच्यम्। उभयोर्युगपत्प्रवृत्तेर्विहितविधानाभावात् गुणान्तरपरत्वेन सार्थक्याच्च। शक्यते लक्षापि आरुण्यन्यायेन लक्षणाऽपि नेति वक्तुम्। समासानुशासनस्य मतुबाद्यनुशासनवदुप-पत्तेः। द्रव्ये पार्ष्ठिकगुणसम्बन्धोपपादनस्य प्रमाणान्तरप्रमितद्रव्य-मादायोपपादनीयमिति न कश्चित् विरोधः। तदित्थमारुण्यस्य योग्यत्वेऽपि कारकत्वेनाव्युत्पन्नस्य वाक्यीयद्रव्याद्यन्वयस्यायोगाद्युत्पन्न-त्वेऽपि* चामूर्त्तत्वेनायोग्यस्य वाक्यीयक्रियान्वयायोगात्ततो विच्छिन्नस्य प्रकरणकल्पितश्रुतानुमितैकदेशनिष्पन्नेन वाक्येनारुणया प्रकृतापूर्व-साधनीभूतद्रव्यपरिच्छेदं भावयेदित्याकरेण प्राकरणिकसर्वद्रव्याङ्ग-त्वमिति प्राप्ते।

न योग्यताज्ञानं शाब्दबोधहेतुरपि तु अयोग्यतानिश्चयस्य प्रतिबन्धकतामात्रम्। अतश्च प्रतिबन्धकताभावसत्त्वे आरुण्यस्यापि क्रियान्वयबोधोपपत्तेः। पश्चाच्च योग्यतागवेषणायामारुण्यस्य पार्ष्ठिक-द्रव्यसम्बन्धबोधोपपत्तेर्न ततो विच्छेदाशङ्का। अतएव प्रथमतः सोम-

---

* इत्थमेव पाठः सर्व्वत्र। द्रव्याद्यन्वयस्यायोगादुत्पन्नत्वेऽपि,—इति तु प्रतिभाति।

क्रयारुण्यादिसकलकारकविशिष्टभावनाविधानोत्तरं क्रयस्य सोमसम्बन्धवेलायामारुण्यादित्रिकस्य मत्वर्थलक्षणया क्रयसम्बन्धावगतौ पश्चाद्विशेषणविधित्रयकल्पनया तेषां क्रयाङ्गत्वावगमे जाते पश्चात्परिच्छेदकीभूतद्रव्याद्यपेक्षायां पार्ष्टिकोऽरुणैकहायन्योः परस्परं विशेषणविशेष्यभावमात्रेण संबन्धोद्रव्यविशेषसम्बन्धश्चेति द्रष्टव्यम् । ततश्च युक्तं क्रयसाधनीभूतैकहायन्यामेव निवेश आरुण्यस्य, न तु वासःप्रभृतिषु क्रयद्रव्यान्तरेषु ।

न च यवेष्विव सोमप्राप्तिसाधनक्रयद्रव्यत्वाविशेषात् प्राप्त्याशङ्का । तेषां क्रयान्तरद्रव्यत्वात् । भिन्ना हि गुणाद्यक्रियाः । न च विक्रेत्रानतिवशादुत्पत्तिशिष्टद्रव्यावरोधेऽपि द्रव्यान्तरनिवेशसम्भवः । एकद्रव्यानतस्यैव विक्रेतुः सम्पादनीयत्वात् । अन्यथा दक्षिणानामपि प्रसङ्गबाधानापत्तेः । न च दशभिः क्रीणातीति वचनमेव निवेशतात्पर्यग्राहकम् । तस्य क्रयसमुच्चयपरत्वेनाप्युपपत्तौ गुणन्यायसिद्धभेदापवादकत्वायोगात् । न च क्रमभेदेऽपि एकसोमप्राप्त्यर्थत्वाविशेषात् क्रयान्तरद्रव्येऽपि आरुण्यस्य निवेशाशङ्का । आरुण्यविशिष्टविजातीयक्रयविध्यन्यथानुपपत्तिकल्पितस्य विशेषणविधेः पार्ष्टिकान्वयस्य वाऽनतिप्रसक्तस्यैव कल्पनीयतया विजातीयक्रयजन्यानतिविशेषस्य विजातीयक्रयत्वस्यैव वा विवक्षितत्वेनातिप्रसङ्गशङ्कानुपपत्तेः । यथा चैवं सति त्रिवत्से सर्वक्रयद्रव्यस्थानापन्ने निवेशस्तथा कौस्तुभे द्रष्टव्यम् ॥२॥६॥

एकत्वयुक्त ॥ ज्योतिष्टोमादिषु ग्रहं सम्मार्ष्टीत्यादि श्रुतम् । तत्र सम्मार्गादि प्रति ग्रहत्ववदेकत्वस्यापि उद्देश्यतावच्छेदकता, उत तस्यैव

सा, एकत्वं तु कथमपि विध्यन्वयासम्भवादविवक्षितमिति चिन्तायाम्। पश्वेकत्ववद्ग्रहैकत्वस्यापि अविवक्षाकारणाभावादुद्देश्यतावच्छेदकता। अतस्त्वेकस्यैव ग्रहस्य सम्मार्ग इति प्राप्ते।

यत्र हि समासादौ परस्परान्वयो व्युत्पन्नो यथाऽस्याभिधानीं यत्किञ्चित्सोमलिप्तमित्यादौ, तत्र भवत्येव विशिष्टोद्देशः। यत्र तु स न व्युत्पन्नस्तत्र परस्परान्वयेन विशिष्टोद्देशे अव्युत्पन्नान्वयिनिबन्धनवाक्यभेदापत्तेर्न विशिष्टोद्देशः। यथा यस्योभयं हविरार्त्तिमार्च्छेद्‌ग्रहमिति च, द्वयोः सुबन्तयोर्भावनान्वयस्यैव व्युत्पन्नत्वेन परस्परान्वयस्याव्युत्पन्नत्वात्। अन्यथा पञ्चदशान्याज्यानीत्यत्रापि विशिष्टविधानापत्तिः। एकवचनाद्युपात्तसङ्ख्यादेस्तु समानाभिधानश्रुत्या करणत्वकर्मत्वादिरूपे प्रत्ययार्थ एवान्वितस्य पदश्रुत्या प्रातिपदिकार्थान्वयो नैव व्युत्पन्नः। एवं सर्वेभ्यो दर्शपूर्णमासावित्यादौ एकपदाद्यत्रानेकार्थप्रतीत्युत्तरं लक्षणया प्रातिपदिकादेव साहित्यप्रतीतिस्तत्रापि साहित्यस्य प्रत्ययार्थ एवान्वयो न प्रातिपदिकार्थ इति कौस्तुभे स्पष्टम्। अतश्च नैतादृशस्थले विशिष्टोद्देशसम्भवः।

अथ विशिष्टोद्देशासम्भवेऽपि उभयोरपि प्रातिपदिकवचनार्थयोः प्रत्ययार्थे कर्मत्वादावन्वयेन तद्द्वारा भावनान्वयोपपत्तेः सम्मार्गस्य पार्ष्ठिकोद्देश्यद्वयसम्बन्धे बाधकाभावः। न चोद्देश्यानेकत्वे वाक्यभेदः। भावनायामनेककारकसम्बन्धवदनेकोद्देश्यसम्बन्धे बाधकाभावात्। न च तस्यामेकोद्देश्यतावच्छेदकनियमः। सर्वेभ्यो दर्शपूर्णमासावित्यादौ पुत्रत्वपशुत्वादेरनेकस्यापि तस्य दर्शनात्। विधेस्त्वनेकोद्देश्यकत्वे नैव काचित् क्षतिः। न चैकत्वावच्छिन्नस्य विनियोगाभावादसंस्का-

र्थता । पशुत्वेन विनियुक्तस्यापि लोहितादेः संस्कार्यत्ववद् बहुत्वा-वच्छेदेन विनियुक्तस्यापि ग्रहस्यैकत्वावच्छेदेन संस्कार्यत्वोपपत्तेः । न चैवमपि द्वयोरुद्देश्ययोरेकप्रधानक्रियावशीकाराभावात्कथं परस्प-रान्वयनियम इति वाच्यम् । वैकृताङ्गवद्गुणानुरोधेनापि पदश्रुत्यैव वा प्रधानयोरप्याकाङ्क्षां प्रकल्प्य तदुपपत्तेः । दृश्यते च यत्र भिन्न-वाक्यस्थले आग्नेयं चतुर्धा करोति, पुरोडाशं चतुर्धा करोतीत्यादौ गुणानुरोधेन प्रधानयोरभेदान्वयस्तत्रैकवाक्यस्थले सुतरां शाब्दबोधे मुख्यविशेष्यभूतक्रियया वशीकारः । एकत्वाविवक्षापेक्षया च वशी-कारकल्पनायां न कोऽपि दोषः । अत एकत्वादेरपि स्वातंत्र्येणो-द्देश्यतावच्छेदकत्वोपपत्तिरिति चेत् ।

भावनायाः करोतिपर्यायत्वेनैककर्मत्वावसायादुद्देश्यानेकत्वे तद्व-ङ्गनिबन्धनवाक्यभेदापत्तेः । एककर्मकत्वञ्चैकबोधविषयकर्मत्वपर्या-प्त्यधिकरणतावच्छेदकधर्मवत्त्वम् । अत्र सर्वेभ्यो दर्शपूर्णमासावित्यादौ यद्यपि पुत्रत्वपशुत्वादीनां कर्मत्वपर्याप्त्यधिकरणतावच्छेदकानां धर्माणां भेदे एकेनैव सर्वपदेन युगपद्बोधान्नैककर्मकत्वहानिरि-त्याद्यं विषयेत्यन्तम् । पर्याप्तिपदकृत्यं तु कौस्तुभे द्रष्टव्यम् । अ-तस्य फलद्वये संस्कार्यद्वये फलसंस्कार्यद्वये वा तावद्वाक्यभेदापत्तिः स्पष्टा । निमित्तद्वयस्थलेऽपि यावज्जीवाधिकरणन्यायेन निमित्त-द्वयस्य फलद्वयाक्षेपकत्वाद्वाक्यभेदापत्तिर्द्रष्टव्या । यथा चयननिमि-त्तद्वयेनैकस्यैव फलस्य आक्षेपस्तथा कौस्तुभे स्पष्टम् । अतएव निमित्तफलस्थले निमित्तसंस्कार्यस्थले वा एककर्मकत्वभङ्गाभावान्न वाक्यभेदः । न वा कालदेशाद्युद्देश्यानेकत्वे सः । यथा च फलादि-

साहित्यस्य नैकबोधविषयता तथा कौस्तुभे स्पष्टम्। अतस्तु तत्सा-
हित्यविवक्षायां वाक्यभेदोदुष्परिहर एवेत्याद्यन्यत्र विस्तरः।

ननु तथापि नैकत्वादीनामविवक्षा सम्मार्गभावनायां गुणत्वेन विवक्षोपपत्तेः। न चैवमेकत्वांशे द्वितीयया करणत्वलक्षणाद्ग्रहांशे च प्राधान्याभिधानाद्वैरूप्यापत्तिः युगपद्वृत्तिद्वयविरोधापत्तिश्चेति वाच्यम्। ईप्सितानीप्सितसाधारणकर्मत्वमात्रे द्वितीयायाः शक्तत्वेन प्रमाणान्तरादिष्टयाकर्मेऽपि ऐकरूप्येणोभयोरप्यन्वयोपपत्तेः। न चैवमपि सम्मार्गाङ्गभूतस्यैकत्वस्य तदनङ्गभूतग्रहद्वारकत्वासम्भवः। अङ्गत्वाद्यभावेऽपि सम्बन्धितामात्रेणागन्मेति मन्त्रे स्वर्गस्येव ग्रहस्यापि द्वारत्वोपपत्तेः। अतस्तु विवक्षितमेकत्वमिति चेत्।

गुणभूतैकवचनाद्यनुरोधेन प्रत्यये करणत्वलक्षणाङ्गीकारस्य युग-पद्वृत्तिद्वयविरोधवैरूप्यादेश्चान्याय्यत्वात्। तद्वरमनुवादके तस्मिन्नेव पाशाधिकरणन्यायेन लक्षणामात्रम्। न चेप्सितानीप्सितसाधारण-कर्मत्वमात्राभिधानान्नोक्तदोषप्रसङ्गः। तथात्वे निरुक्तैककर्मकत्वभङ्ग-प्रसङ्गेन वाक्यभेदापत्तेः। अतस्तु गुणत्वसिद्ध्यर्थं लक्षणाश्रयणे पूर्वोक्त-दोषापत्तेरेकवचनं बहुत्वलक्षणार्थं सत्साधुत्वार्थमनुवादोऽविवक्षितम्। यथा चैवं सत्यष्टवर्षं ब्राह्मणमुपनयीतेत्यादौ अष्टवर्षत्वादेर्विवक्षा, तथा कौस्तुभ एवोपपादितम् ॥२॥७॥

संस्काराद्वा ॥ एकत्ववद्ग्रहत्वस्यापि अविवक्षा, लिङ्गादेव सम्मा-र्गस्य सोमावसेकनिर्हरणप्रयोजनत्वावगमेन सोमपात्रमात्रस्य संस्का-र्यत्वावगतेः। उभयोरपि ग्रहचमसयोरेकज्योतिष्टोमापूर्वसाधनत्वेन यवेष्विव चमसेष्वपि सम्मार्गापत्तेश्चेति प्राप्ते। ग्रहत्वविवक्षायां

वाक्यभेदाद्यभावात्सत्यपि ज्योतिष्टोमैक्ये तत्तदभ्यासापूर्वाणां भेदात् पयसा मैत्रावरुणं श्रीणातीति वद्ग्रहजन्यापूर्वसाधनत्वस्यैव लक्षणो-पपत्तेर्न चमसेषु सम्मार्गः ॥२॥८॥

आनर्थक्यात् ॥ सप्तदशारत्निर्वाजपेयस्य यूप इत्यत्राव्यवहितत्वात् प्रधानत्वात् प्रकरणानुग्रहाच्च सप्तदशारत्नित्वं वाजपेयोद्देशेन षष्ठीश्रुत्या विधीयते । न यूपोद्देशेन, अतिप्रसङ्गापत्तेः । वाजपेयेन विशेषणे विशिष्टोद्देशाच्च । अतः सप्तदशारत्नित्वं वाजपेयोद्देशेन विधीयमानं तदीयोर्ध्वपात्रद्वारेण निविशते । यूपपदं सादृश्याद्गौणं इति प्राप्ते ।

यूपपदस्य गौणत्वे प्रमाणाभावाद्यूपपदेन स्वर्गकार्यं लक्षयित्वा तदुद्देशेन सप्तदशारत्निद्रव्यं विधीयते । यद्यपि च द्रव्यं अरत्नि-परिमाणस्यातिदेशतः सम्भवत्प्राप्तिकं, तथापि तदनुवादेन सङ्ख्या-विधाने एकप्रसरताभङ्गापत्तेस्ततः पूर्वप्रवृत्त्यङ्गीकारेण विशिष्टं द्रव्य-मेव सङ्ख्याविधिफलकं लोहितोष्णीषा* इत्यादिवद्विधीयते । यूप-कार्यं स्वरूपे चानर्थक्यात् प्रकरणात् वाजपेयापूर्वसाधनत्वलक्षणया वाजपेयापूर्वसम्बन्धियूपलाभात् वाजपेयस्येत्यनुवादः । षष्ठी च पर-म्परासम्बन्धेऽप्युपपन्ना नप्तरि देवदत्तस्यायमिति वत् । व्यवहितत्वादि च गौणत्वापेक्षया न दोषः ॥२॥९॥

कर्त्तृगुणे ॥ दर्शपूर्णमासयोः प्रयाजसमीपे श्रुतमभिक्रामं जुहो-तीति । तत्राभिक्रमणस्यामूर्त्तत्वाज्जुहोत्युपात्ते प्रयाजहोमेऽन्वयानुप-पत्तेराहवनीयवदेव कर्त्तृरूपस्य द्रव्यस्यानुपात्तत्वात्तद्द्वाराऽप्यन्वयानुपप-

---

* इत्थमेव पाठः सर्व्वत्र । लोहितोष्णीषा इति ग्रन्थान्तरे पाठः ।

त्तेस्ततोविच्छिन्नस्य प्राकरणिकसर्वहोमाङ्गत्वं तदीयकर्त्तुराहवनीय-प्रत्यासत्तिरूपदृष्टकार्यद्वारेति प्राप्ते।

अनुपात्तस्यापि आख्यातगम्यस्य सद्भावात्तद्द्वारैव जुहोत्यन्वयोप-पत्तेः प्रयाजहोमाङ्गत्वमेवेति भाष्यकारेण सिद्धान्तितम्। तत् णमुलन्तस्य पूर्वकालतादिसम्बन्धेन जुहोत्यनन्वयेनैवाकाङ्क्षाभावात् जुहोतेश्च प्रयाजहोममात्रवाचित्वे प्रमाणाभावाद्दर्शाधिकरणेन गत-प्रायत्वाच्च वार्त्तिककारेणान्यथा व्याख्यातम्।

सत्यपि वाक्यीयहोमसम्बन्धे सङ्कोचे प्रमाणाभावाद्देवां हवींषी-तिवत्प्राकरणिकसर्वहोमाङ्गत्वम्। वाचनिकाङ्गसन्दंशरूपावान्तराधि-कारस्य वाक्यसङ्कोचकत्वानुपपत्तेः। यदि हि तादृशसन्दंशमध्ये अभिक्रामतीत्येवं श्रूयेत, ततोऽवान्तरप्रकरणेन स्यादपि प्रयाजाङ्गत्वम्। वस्तुतस्तु नाङ्गेष्वितिकर्त्तव्यताऽऽकाङ्क्षालक्षणं प्रकरणं, फलाभावात्। अन्यथा प्रयाजाभिक्रमणादीनामप्यनुयाजाद्यङ्गत्वापत्तेः। वाचनिका-ङ्गसम्बन्धसिद्ध्यर्थञ्च कल्पिताया आकाङ्क्षायास्तन्मात्रग्राहकत्वेनाभि-क्रमणग्राहकत्वानुपपत्तेरिति प्राप्ते।

भावनाख्याभाव्येनाङ्गभवनास्वपि क्रतूपकारभाव्यकाङ्क्षितिकर्त्तव्य-ताकाङ्क्षोपपत्तेरङ्गानामप्यस्त्येव सा। सा परं प्रधानगतफलवत्त्वेन प्रति-बध्यते सन्निध्याम्नातविषये। अतो न परस्पराङ्गत्वप्रसङ्गः। तदा तन्नि-वृत्तिरतिदेशेनाक्षेपलभ्यत्वसम्पादनेन साधारणैर्वा आचमनादिभिः। यत्र तु वाचनिकाङ्गसन्दंशस्तत्राद्येनाङ्गाकाङ्क्षोज्जीवनं अन्तिमेन च तन्नाशः। न तु मण्यादाविव वाचनिकाङ्गानां प्रत्येकमुत्तेजकता। तावदभावकूटप्रवेशे गौरवात्। तद्वदिह व्यभिचाराभावाच्च। अतो-

वाचनिकसम्बन्धे श्रुतानामवान्तरप्रकरणेन बलवताऽङ्गाङ्गत्वमेव। प्रकृते तु होमानुवादेन विहितेऽभिक्रमणे होमस्वरूपे आनर्थक्यप्रसक्तौ अपूर्वसाधनत्वलक्षणातात्पर्यग्राहकतया वाचनिकाङ्गसम्बन्धरूपावान्तराधिकार एव तत्त्वेनाश्रीयते, न तु प्रधानाधिकारोऽङ्गप्रधानाधिकारो वा वेद्यामिव। अस्ति चात्र समानयते जुह्वामौपभृतमित्याद्युपक्रम्य मध्येऽभिक्रमणं विधाय प्रयाजशेषेण हवींष्यभिघारयति इति श्रवणात्सः। अतोऽभिक्रमणं प्रयाजहोमाङ्गमेव। न च प्रयाजेषु होमाभावः। प्रक्षेपाङ्गकस्यैव त्यागस्य वृद्धव्यवहारेण यजिपदार्थत्वावसायादाक्षेपेण श्रूयमाणयजिमात्रे होमप्राप्त्युपपत्तेः॥३॥१०॥

सन्दिग्धे तु॥ दर्शपूर्णमासयोः पञ्चदश सामिधेनीरनुब्रूयादित्यनेन सामिधेनीर्विधाय तासां वाचनिकागुणाविहिताः। ततो निविदोनाम मन्त्रा देवेद्ध इत्यादयः। तत एकविंशतिरनुब्रूयात् प्रतिष्ठाकामस्येत्यादयः काम्याः सामिधेनीकल्पाः। ततः, उपवीतं उपव्ययते देवलक्ष्ममेव तत्कुरुत इति। ततः पुनः सामिधेनीगुणा अन्तरानूच्यं स देवत्वायेत्यादयः।

तत्रोपवीतं सामिधेन्यङ्गन्तदवान्तरप्रकरणात्। न च तदवान्तरप्रकरणस्य काम्यकल्पैर्निविन्मन्त्रैर्वा विच्छेदः। गोदोहनादीनां दर्शपूर्णमासप्रकरणाविच्छेदकत्ववत् काम्यानामपि तद्विच्छेदकत्वानुपपत्तेः। पूषानुमन्त्रणमन्त्रवन्निविन्मन्त्रस्यापि तदनुपपत्तेश्च। वस्तुतस्तु लिङ्गादग्निसमिद्धत्वरूपसामिधेनीफलप्रकाशकानामपि अवान्तरप्रकरणात् सामिधेन्यङ्गत्वोपपत्तेर्न विच्छेदशङ्का। इष्यत एव अगन्मेति मन्त्रस्य यागजन्यफलप्रकाशकत्वेन यागाङ्गत्वमिति प्राप्ते।

निविद्विधिर्थवधानान्नोपवीतस्य सामिधेन्यङ्गता। न च पूषानुमन्त्रणमन्त्रन्यायः। यत्र ह्युत्तरकालं बहूनि वाचनिकान्यङ्गानि तत्रैवैकस्य पूषानुमन्त्रणमन्त्रादेः परप्रकरणस्थत्वकल्पना। यत्र तु विच्छेदकानि बहूनि उत्तरकालञ्च वाचनिकाङ्गं स्वल्पं, तत्र वाचनिकाङ्गस्यैवानारभ्याधीतन्यायेनाङ्गत्वोपपत्तेर्न प्रकरणानुवृत्तिकल्पना। अन्यथा विश्वविदादेरपि दर्शाङ्गत्वापत्तेः। प्रकृते च निविन्मन्त्राणां बहुत्वाद्वाचनिकोत्तराङ्गानां स्वल्पत्वेन न प्रकरणानुवृत्तिकल्पना।

वस्तुतस्तु। नान्तरानूच्यमित्यादीनां सामिधेनीमात्रोद्देशेन विधाने प्रमाणाभावादपि तु अनुवचनसामान्योद्देशेन। अतश्च सामिधेनीनां विधिमध्योपस्थित्यभावान्न प्रकरणानुवृत्तिः। यत्त्वन्ते देवा वै सामिधेनीरनूच्येत्यादिसङ्कीर्त्तनम्। तदाधारार्थवादत्वादसाधकम्। अत एवान्ते वाचनिकाङ्गाभावादेव न निविदां सामिधेन्यङ्गत्वशङ्का। सन्निधिमात्रेण तदङ्गत्वशङ्का तु परस्पराङ्गत्वानुपपत्तेः प्रकरणेन बाधाच्चायुक्ता। न चैवं आश्रयाभावात्काम्येषु गुणफलसम्बन्धानुपपत्तिः। तत्रानुवचनान्तरस्यैव फलोद्देशेन विहितत्वात्तस्य च सङ्ख्यायुक्तानुवचनसामान्यात् पञ्चदशसङ्ख्याकनित्यानुवचनप्रकृतिकत्वावगतेस्तदीयधर्माणां त्रिरभ्यासादीनां तदीयर्चाञ्च प्राप्तेर्धर्मकत्वम्। न चर्चामनुवचनं प्रति प्राधान्यात्कथमतिदेशः। प्रकृतौ त्रिरभ्यासयुक्तपाठादेव तावत्सङ्ख्याकर्चामर्थाच्चानुवचनस्य च प्राप्त्युपपत्तेः। पञ्चदश सामिधेनीरनुब्रूयादिति वचनवैयर्थ्यापत्तेरगत्या सक्तुन्यायेन विनियोगभङ्गं प्रकल्प्य मन्त्रविशिष्टानुवचनस्यैव विधेयत्वेन तदङ्गभूतानामृचां प्राप्त्युपपत्तेः। गुणत्वमपि चर्चां नानु-

वचनफलप्रकाशकतयैव अपि त्वनुवचनजनकतया लाघवात्। अतश्च न द्वारलोपाद्बाध ऊहो वा। अनुशब्देन दर्शपूर्णमासाङ्गभूतपदार्थानन्तर्यस्य उक्तत्वात्तस्य च परप्रयुक्तत्वेन बहिःक्रतु प्रयोगेऽनुष्ठातुमशक्तेः क्रतुमध्यप्रयोगसिद्धिः। वैकृतानुवचनेनैव च प्रसङ्गात् प्राकृतानुवचनकार्यसिद्धेर्न तस्य पृथगनुष्ठानम्। अतस्तेष्वपि न सामिधेनीप्रकरणानुवृत्तिः। न च तर्हि तदङ्गत्वमेवोपवीतस्य किं न स्यात्। तेषां विकृतित्वेन प्राकृताङ्गैर्निराकाङ्क्षाणां प्रकरणाभावात्। वार्त्तिकाङ्गसम्बन्धाभावाच्च। अतो महाप्रकरणाद्दर्शपूर्णमासाङ्गं उपवीतं तत्कर्तृसंस्कारकतया तत्कर्तृभिः सर्वप्रयोगारम्भे कार्यमिति सिद्धम् ॥३॥११॥

गुणानाम् ॥ आधाने पवमानेष्टितः प्रदेशान्तरे वारणोयज्ञावचरोवैकङ्कतोयज्ञावचर इति श्रुतम्। तत्र यज्ञसाधनत्वेन श्रुतानां वारणादीनां साक्षाद्यज्ञरूपाधाने निवेशासम्भवादानर्थक्यतदङ्गन्यायेन पवमानेष्टिरूपे यज्ञ एव निवेश इति प्राप्ते, भाष्यकारेण तावदेवं सिद्धान्तितम्।

आधानप्रकरणे पठितेन यदाहवनीये जुहोतीति वाक्येन पवमानहविषामप्यङ्गत्वावगतेराधानाङ्गत्वाभावेनानर्थक्यतदङ्गन्यायासम्भवात् स्वरूपेण च पवमानेष्टीनामसन्निहितत्वाद्वारणवैकङ्कतादीनां सर्वप्रकृतियज्ञाङ्गत्वं सर्वयज्ञाङ्गत्वं वेति।

वार्त्तिककारस्तु न तावदनारभ्यवाक्येन पवमानहविषामप्यङ्गत्वेन सर्वहोमानुवादेनाहवनीयविधानात्। पवमानेष्टीनामेव विशिष्योपस्थित्यभावे सप्तम्या प्राधान्यलक्षणायां प्रमाणाभावात्। नापि

पवमानेष्टिप्रकरणे वाक्यान्तरकल्पना। तदभावेऽपि वारणादीनां सर्वयज्ञार्थत्वोपपत्तेः। अस्तु वा आधानप्रकरणे तत्तथापि तेनाधानाङ्गभूतहोमानामाहवनीयाधिकरणत्वसिद्धिरेव न त्वग्न्यङ्गत्वसिद्धिः। सप्तम्या लाक्षणिकत्वापत्तेः। अत एव तत्रत्यमाहवनीयपदं आधानजन्योत्पत्त्यपूर्वविशिष्टाग्निलक्षकमेव। परमापूर्वविशिष्टाग्निरूपमुख्याहवनीयस्य तदानीमसत्त्वात्। न चैवं पवमानेष्टिहविःश्रपणादौ गार्हपत्यादिप्रापकाभावः। तत्र मुख्यगार्हपत्याद्यधिकरणत्वबाधेऽपि सतिं सम्भवे प्रकृतिदृष्टगौणगार्हपत्यादिबाधे प्रमाणाभावात्। अतस्स सत्यपि वचनान्तरे पवमानेष्टीनामग्न्यङ्गत्वे प्रमाणाभावादाधानाङ्गत्वेऽपि वारणादीनां सर्वयज्ञार्थतैवमुपपादनीया सर्वत्र स्वोद्देश्यस्यापूर्वव्यभिचारेऽपूर्वसाधनत्वलक्षणार्थं प्रकरणानुप्रवेशो यथा व्रीहीत्यादौ। अत एव तादृशस्थले आनर्थक्यतदङ्गन्यायः। प्रकृते तु यज्ञपदेनैवाव्यभिचारितापूर्वसाधनत्वोपस्थितौ तदर्थं प्रकरणानुप्रवेशाभावात् प्रधानसम्बन्धस्यैवाप्रसक्तौ क्व तदङ्गावतारः। एवं सत्यपि यदि पवमानेष्टिसन्निधौ पात्राणि श्रूयेरन्, तदाऽनुवादस्य सति सम्भवे सन्निहितगामित्वाद्व्रीहिभिर्यजेतेत्यादिवद्भवेत् प्रकृतमात्रविषयत्वम्। न त्वेतदपि, पवमानेष्टीनां प्रदेशान्तरस्थत्वात्। अतो वारणादीनां सर्वयज्ञार्थत्वमेव। प्रयोजनं, पवमानेष्ट्यनन्तरं पात्राणां नाशे दर्शाद्यर्थं अनियतानामुत्पत्तिः। सिद्धान्ते वारणादीनामेवेति ॥३॥१२॥

मिथश्च ॥ आज्यभागक्रमे श्रुतानां वार्त्रघ्नीवृधन्वतीमन्त्राणां लिङ्गक्रमौ बाधित्वा वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमा-

वास्यायामिति वाक्याभ्यां प्रधानाङ्गत्वम् । दृश्यते च लिङ्गस्यापि मन्त्रगतस्य वाक्येनापि ब्राह्मणगतेन बाधो यद्यप्यन्यदेवत्य इत्यादिनेति प्राप्ते ।

अबाधेनोपपत्तौ बाधायोगान्न प्रधानाङ्गत्वम् । न हि सोमदेवत्यस्य मन्त्रस्य लिङ्गाविरोधः सम्भवति, सोमस्य देवतात्वाभावात् । अमावास्यायामधिष्ठानत्वस्याप्यसम्भवाच्च । वस्तुतस्तु वाक्यस्यास्य व्यवस्थामात्रकरणे लाघवान्न प्रधानाङ्गताबोधकत्वम् । व्यवस्था च, पौर्णमास्यां यौ आज्यभागौ तत्र वार्त्रघ्नौत्यादिरूपेण कालकृता, पौर्णमासीसंज्ञकप्रधानाङ्गभूताज्यभागयोर्वार्त्रघ्नौत्येवं कर्मकृता वेत्यादि विशेषः कौस्तुभे द्रष्टव्यः ॥ ३ ॥ १३ ॥

आनन्तर्यम् ॥ दर्शपूर्णमासयोर्हस्ताववनेनिक्ते, उलपराजीं स्तृणातीति, तथा ज्योतिष्टोमे मुष्टीकरोति वाचं यच्छति दीक्षितमावेदयतीति श्रुतम् । तत्र हस्तावनेजनं हस्तसंस्कारार्थं मुष्टीकरणवाग्यमौ च मनःप्रणिधानार्थौ । अतस्तत् त्रयमपि तावत्करिष्यमाणकर्मार्थमित्यसन्दिग्धम् । तत्र करिष्यमाणं कर्मानन्तर्यादेकवाक्यत्वाद्वा उलपराजिस्तरणदीक्षितावेदनरूपमेवेति प्राप्ते ।

आनन्तर्यस्यावर्जनीयत्वादङ्गताग्राहकत्वानुपपत्तेर्ग्राहकत्वेऽपि वा प्रकरणेन बाधात् पश्य मृगो धावतीतिवदाकाङ्क्षाविरहेण चाख्यातद्वयस्य यच्छब्दाद्युपबन्धाभावे एकवाक्यत्वानुपपत्तेः कर्तृसंस्कारस्यास्य प्रकरणादङ्गप्रधानसाधारणस्योत्तरपदार्थाङ्गत्वं हस्तावनेजने । मुष्टीकरणवाग्यमयोस्तु अङ्गुलीवाग्विसर्गप्राक्कालीनपदार्थमात्राङ्गत्वम् ॥ ३ ॥ १४ ॥

शेषस्तु॥ दर्शपूर्णमासयोराग्नेयं चतुर्धा करोतीत्यत्र नाग्निदेवताकहविष्ट्वमुद्देश्यतावच्छेदकं, विशिष्टोद्देशे वाक्यभेदापत्तेः। अपि तु तद्धितोपात्तहविष्ट्वमेव। कथञ्चिदा अग्निसम्बन्धिहविष्ट्वं तथा। अस्ति चाग्निसम्बन्धोऽग्नीषोमीयादावपि। अपि वा पुरोडाशं चतुर्धाकरोतीत्यनेनोपसंहारादग्निसम्बन्धिपुरोडाशस्यैव तत्, न त्वाज्यस्यापीति। अस्तु वा देवतात्वस्यापि कथञ्चिद्विवक्षा, तथापि द्विदेवत्येऽप्यग्नेरस्त्येव देवतात्वम्। द्वन्द्वान्ते श्रूयमाणस्य तद्धितस्य प्रत्येकमभिसम्बन्धात्। अतः सर्वेषां चतुर्धाकरणमिति प्राप्ते।

प्रचुरप्रयोगात्तद्धितस्य देवतात्व एव शक्तस्य सम्बन्धमात्रलक्षकत्वानुपपत्तेर्न तावदग्निसम्बन्धित्वस्य विवक्षा। न च देवतात्वं द्विदेवत्ये प्रत्येकवृत्ति। इतरेतरयोगरूप-चार्थविहितद्वन्द्वेन साहित्यस्य विवक्षितत्वात् सहितयोरेव व्यासज्यवृत्त्यखण्डोपाधिरूपदेवतात्वस्वीकारात्। अत एव द्वन्द्वान्त इत्यादिप्रवादस्तु यत्रोद्देश्यत्वेन साहित्याविवक्षा तत्रेति ध्येयम्। अतः केवलाग्निपदादुत्पन्नस्तद्धितो नान्यसापेक्षस्य देवतात्वमभिवदितुं क्षमः। सामर्थ्यविघातापत्तेः।

यत्तु अग्निदेवताकत्वमविवक्षितमिति। तन्न। तथात्वे, न तावत् प्रकृतद्रव्यत्वमात्रं अपूर्वसाधनलक्षकम्। तस्य देवतातद्धितेनानुक्तेः। नापि हविष्ट्वम्। तत्परत्वस्य देवतावाचित्वप्रतीतिं विनाऽनुपपत्तेः। न हि हविषि वाच्ये देवतातद्धितएवेति स्मृत्या नियम्यते। तद्वाचित्वेऽपि सम्बन्धसामान्यतद्धितस्य सत्त्वात्। अतः प्रथमावगतस्य देवतात्वस्यैवोद्देश्यतावच्छेदकत्वम्। तस्य चानुयोगिप्रतियोगिसापेक्षत्वात्, हविरार्त्तिन्यायेनार्धमन्तर्वेदीतिवदग्निदेवताकहविष्ट्वस्यैव लक्ष-

चयोद्देश्यतावच्छेदकत्वसिद्धिः । तेन च पुरोडाशं चतुर्धा करोतीति सामान्यवचनस्योपसंहारः । तस्मादाग्नेयस्यैव पुरोडाशस्य चतुर्धाकरणम् ॥२॥१५॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां तृतीयाध्यायस्य प्रथमः पादः ॥१॥

अथ द्वितीयः पादः ।

अर्थाभिधान ॥ एवं श्रुत्युपयोगिविचारे वृत्तेऽधुना लिङ्गोपयोगिविचारः प्रस्तूयते । तत्र लिङ्गं नामाङ्गत्वघटकीभूतपरोद्देश्यता इतिकारकत्ववाचकपदकल्पनाऽनुकूला क्लृप्तपदार्थनिष्ठा योग्यता । यथा स्रुवेणावद्यतीत्यत्र स्रुवनिष्ठा द्रवपदकल्पनाऽनुकूला । एवं मन्त्रेषु स्वार्थवृत्त्युद्देश्यतावाचिपदकल्पनाऽनुकूला स्वष्टत्निकारकत्ववाचिपदकल्पनाऽनुकूला च योग्यता लिङ्गम् । सा च पदरूपश्रुतिकल्पकत्वात्तद्द्वारा तदर्थविनियोगे प्रमाणम् ।

तत्र वस्तुसामर्थ्यरूपस्य लिङ्गस्य विशेषविचारासम्भवात् मन्त्रसामर्थ्यस्य किं शक्य एवार्थे विनियोजकत्वमुत जघन्यवृत्तिप्रतिपाद्येऽपीति सन्देहे, क्रतुप्रकरणाम्नातमन्त्रस्य बर्हिर्देवसदनं दामीत्यादेर्मुख्य इव जघन्येऽपि उलपराज्यादौ स्मारकाकाङ्क्षादिरूपसामर्थ्याविशेषात् तत्साधारण्येनैव विनियोगः । प्रवेशयेत्यादिवदाकाङ्क्षादिरूपतात्पर्यग्राहकसत्त्वे मुख्यार्थबाधस्याकिञ्चित्करत्वादिति प्राप्ते ।

शक्यसम्बन्धग्रहणसापेक्षत्वेन जघन्यार्थप्रतीतेर्विलम्बितत्वात् प्रथमप्रतीतमुख्यविनियोगेन चरितार्थस्य मन्त्रादेर्जघन्यार्थविनियोजकत्वानुपपत्तिः । अत एव तत्स्मारकाङ्क्षाया ध्यानाद्युपायान्तरेणैव निवृत्तिः । अत एव यत्र प्रकरणे मुख्यार्थोपयोगो न क्लृप्तस्तत्र मन्त्राम्नानबलादेव तत्कल्पना । यत्र तु विरोधिगुणान्तरावरोधः

प्रकरणे, तत्र सामान्यसम्बन्धबोधकप्रमाणसत्त्वे उत्कर्षः। यथा दर्श-पूर्णमासप्रकरणाम्नातपूषानुमन्त्रणमन्त्रादेः। यागानुमन्त्रणसमाख्या-यामेव सामान्यसम्बन्धबोधकत्वात् उत्कर्षस्याप्यसम्भवे प्रकरण एव जघन्यार्थे विनियोगः। यथा मनोतादौ। अप्रयुक्तलक्षणादिना तस्या-प्यसम्भवे तदर्थाभिधानस्यैवादृष्टार्थत्वम्। यथा जपादौ ॥२॥१६॥

वचनात् ॥ यत्र तु गौणार्थे तात्पर्यग्राहकं वचनं विद्यते। यथा अग्नौ, कदाचनस्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यादौ। तत्र गौण एव गार्हपत्ये विनियोगः। अथैन्द्र्येत्युपक्रमस्थतद्धितश्रुत्या मुख्यसामर्थ्योज्जीवनाज्जघन्यद्वितीयाया एव तदनुरोधेन प्रतियोगित्वे लक्षणा। गार्हपत्यसमीपे स्थित्वेति। गुणभूतप्रातिपदिक एव वा यज्ञसाधनत्वसादृश्याद्गौण्या गृहपतित्वयोगेन वेन्द्रप्रकाशत्वम्। अस्तु वा रूढत्वादग्नेरेव धातुवाच्यसमीपस्थितिं प्रति कर्मत्वम्। न तु मन्त्रसाध्याभिधानं प्रति तस्या शब्दत्वात्।

न चोपान्मन्त्रकरण इति स्मृत्या आत्मनेपदविधानेन धातो-र्मन्त्रकरणत्वावगतेस्तस्याभिधानलक्षकत्वावगतिः। आत्मनेपदबलेन समीपस्थितेरभिधानप्रयोजनकत्वावगतेर्मन्त्रस्य स्वसाध्याभिधानाङ्गत्व-सम्बन्धेन समीपस्थितिविशेषणत्वोपपत्तेरभिधानलक्षणायां प्रमाणा-भावात्। अतश्च शक्यार्थ एव समीपस्थितौ गार्हपत्यस्य कर्मत्वम्। इन्द्रस्य त्वार्थिकेऽभिधाने इति न विरोधः। यथा चास्य धातोः सकर्मकत्वं तथा कौस्तुभ एव प्रपञ्चितम्।

कथं मन्त्रस्य गौणेऽर्थे विनियोग इति चेन्न। ऐन्द्र्येति तद्धि-तेनैकपदे विशेष्यतया प्रतिपाद्यमानस्य मन्त्रस्य चयनानुपयोगीन्द्रा-

ङ्गत्वबोधकत्वानुपपत्तेः। अतस्तस्य शक्यबोधकालीनेन्द्रप्रकाशकत्वानुवादत्वेनाप्युपपत्तेर्न द्वितीयादौ तद्वत्वेन लक्षणाऽऽश्रयणं रूढ़ित्यागोवा। न च समीपस्थितिं प्रति अग्नेः कर्मत्वम्। तथात्वे तस्याभिधानं प्रत्ययपृथक्त्वे उद्देश्यानेकत्वकृतवाक्यभेदापत्तेरात्मनेपदविरोधेन च धातुनैव स्वशक्यार्थविशिष्टाभिधानेलक्षणाऽवश्यम्भावादिशेष्यभूतेऽभिधान एव मन्त्रस्य करणत्वप्रतीतेर्गार्हपत्यस्य च चयनसंस्कार्यस्य कर्मत्वप्रतीतेरर्थाच्च सामीप्यप्रतियोगित्वेन तस्यैव ग्रहणोपपत्तेस्तात्पर्यग्राहकब्राह्मणानुरोधेन मन्त्रस्यैव गौण्या वृत्त्या गार्हपत्ये विनियोग इति सिद्धम् ॥३॥१७॥

तथा॥ दर्शपूर्णमासयोः हविष्कृदेहीतित्रिरवघ्नन्नाह्वयति इति श्रुतम्। तत्र नायं मन्त्र आह्वानाङ्गम्। तस्य पत्न्येव हविष्कृदुपतिष्ठति सा देवानभिद्रुत्यावहन्तीति वचनानुसारेणाभावप्रतीतेः। अत इति-करणेन अवघाताङ्गमेव। अतस्तास्मिन्वाक्ये त्रिरभ्यासपुंस्त्वमन्त्रविशिष्टावघातविधिरेव। पत्नीवाक्ये च गुणादेव कर्मान्तरविधिः। तयोस्त्ववघातयोर्व्रीहीनवहन्तीत्यनेन संस्कार्यसम्बन्धोऽपि। दृष्टार्थत्वाद्विकल्पः। पत्नीकर्तृकेऽवघाते चावरुणोदिव इति मन्त्रः। अतस्तानेन वाक्येनावघाते गौण एवायं मन्त्रो विनियुज्यते। गौणत्वोपपादनं कौस्तुभे द्रष्टव्यम्। आह्वयतिस्तु तदाचष्टे इत्येवं शक्यार्थबोधकालीनाह्वानप्रकाशनानुवाद इति प्राप्ते।

मुख्य एवाह्वाने विनियोगसम्भवे मन्त्रस्याह्वयतिपदस्य च गौणत्वकल्पनायां प्रमाणाभावात्। मान्त्रवर्णिकविनियोगविधिकल्पनया वध्यासमित्यादिना ग्रहणादेरिवाह्वानस्यापि नियमेन

प्राप्तत्वात्। पत्न्येवेत्यस्य तु नायमर्थो यत्त्वयमेवोत्तिष्ठति न त्वाङ्ग-नेति, अपि तु पत्न्येव नान्येति। अतो नेदमपि तदभावबोधकम्। अतश्चाक्राने मन्त्रस्य लिङ्गादेव प्राप्तत्वादाक्रानस्य च सहायार्थत्वेना-वघातकाल एव प्राप्तेरवघ्नन्नित्यस्याप्यनुवादकत्वात् केवलं चिरभ्याम-मात्रं विधीयते, चिरभ्यामपुंस्त्वविशिष्टावघातसमानकालतैव वाऽऽक्रा-मोद्देशेन विधीयत इति न गौणेऽवघाते विनियोगः ॥३॥१८॥

तथोत्थान॥ सोमे, उत्तिष्ठन्नन्वाहाग्नीदग्नीन्विहरेति। तथा व्रतं कृणुतेति वाचं विसृजति। दर्शपूर्णमासयोः, प्रणीताः प्रणेष्यन्वाचं यच्छति तां स-हविष्कृता विसृजतीति श्रुतम्। तत्रापि पूर्ववदेव मन्त्राणां मुख्येऽर्थे विनियोगो न तु गौणयोरुत्थानवाग्विसर्गयोः। प्रबलस्यापि ब्राह्मणवाक्यस्य कालविधायित्वेनाप्युपपत्तौ गौणत्व-तात्पर्यग्राहकत्वाभावात्। न च लक्षणा। शतृप्रत्ययस्य कालिक-सम्बन्धेनोपलक्षणार्थत्वमङ्गीकृत्य श्रुत्यैवान्वयोपपत्तेः। अतश्चोत्थान-काले विहरणमन्त्रः पठनीय इति कालविधिरेवायम्। व्रतं कृणु-तेत्यत्रेतिकरणस्यापि मन्त्रस्वरूपमात्रपरत्वात् कालिकसम्बन्धस्यैव संसर्गविधया भानोपपत्तेर्न लक्षणा। हविष्कृद्वाक्ये तृतीयायास्तु वाग्यमापेक्षितावधिसमर्पकत्वेन तदेकवाक्यतोपपत्तौ वाक्यभेदे प्रमा-णाभावादित्थंभूतलक्षणार्थतामङ्गीकृत्य कालविधिपरत्वम्। अतश्च तद्वाक्ययोः पाठक्रमावगततत्तन्मन्त्रपाठकाले वाग्विसर्गः कर्त्तव्य इति सोऽपि तत्र कालविधिरेव ॥३॥१९॥

सूक्तवाके॥ दर्शपूर्णमासयोः सूक्तवाकेन प्रस्तरं प्रहरतीति श्रुतम्। तत्र सूक्तवाकपदवाच्यस्य मन्त्रस्य इष्टदेवताप्रकाशनेन

कृतार्थत्वात् प्रस्तरप्रहरणस्य चोपयुक्तप्रस्तरप्रतिपत्तित्वेन कृतार्थत्वात् दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेतिवत्कालार्थः सम्बन्धः। तृतीया चेत्थंभूतलक्षणपरा सती सूक्तवाकस्य कालिकसम्बन्धेन प्रहरणो-पलक्षणत्वेनान्वयं बोधयन्ती नानुपपन्ना। न चैवं लक्षणा, तस्या-अपि आनुशासनिकत्वेन शक्यत्वात्। 'अतश्चानुयाजोत्तरं सूक्तवाक-पाठात्कालविशिष्टं प्रस्तरोद्देशेन 'प्रहरणमेव विधीयते, न सूक्त-वाकस्य प्रहरणाङ्गत्वमिति प्राप्ते।

प्रचुरप्रयोगाल्लाघवाच्च करणत्व एव तृतीयायाः शक्तिर्न तु इत्थंभूतलक्षणे, तस्यानुशासनिकत्वेऽपि लाक्षणिकत्वेनाप्युपपत्तेः। अतश्च श्रुत्या प्रहरणाङ्गत्वस्याप्यवगतेः प्रहरतिर्मान्त्रवर्णिकदेवता-कल्पनया आश्रयिकर्मरूपहोमलक्षको न विरुध्यते। अत एव सूक्तवाक एव याज्येति यागलिङ्गमपि सङ्गच्छते। यद्यपि च नास्य मन्त्रत्वादिवदभियुक्तप्रसिद्धिविषयत्वाख्यं मुख्यं याज्यात्वं सम्भवति। एवकारोपबद्धत्वेनैव लिङ्गस्य याज्यात्वासाधकत्वात्। तथापि याग-साधनत्वमात्रेण याज्यात्वव्यपदेशात् यागलिङ्गत्वम्। अतश्च श्रुत्या मन्त्रस्य प्रहरणाङ्गत्वेऽपि मुख्यसामर्थ्यस्य नात्र बाधः, प्रहरणेऽपि तदुपपत्तेः॥३॥२०॥

कृत्स्नोपदेशात्॥ श्रुत्या लिङ्गोपबद्धया प्रहरणाङ्गत्वावगमाच्च लिङ्गमात्रेण सूक्तवाकस्येष्टदेवतास्मरणार्थत्वम्। न चात्राविरोधोऽपि। अध्येतृप्रसिद्धा समस्तानुवाके सूक्तवाकशब्दस्य रूढत्वेनावयवशो-विभज्य विनियोगेऽवयवलक्षणापत्त्या श्रुतिविरोधापत्तेः। न चासौ सुष्टूक्तं वक्तीति व्युत्पत्त्येष्टदेवतावाचिपदसमवाये यौगिकः। पारा-

यथाऽध्ययनादौ कतिपयपदप्रयोगेणापि सूक्तवाकपदार्थसम्पत्तिप्रसङ्गेन समस्तानुवाके रूढेरवश्यम्भावात् । अस्तु चेष्टदेवताप्रकाशनमानुषङ्गिकं फलम् । प्रहरणमेव तु श्रुतिविनियोगात् सर्वानुवाकप्रयोजकं इति दर्शे पौर्णमासे च सर्वः प्रयोक्तव्य इति प्राप्ते ।

प्रबलतयाऽपि श्रुत्या लिङ्गस्य बाधे प्रहरतिलक्ष्यहोमान्तर्गतदेवतोद्देशस्यारादुपकारकत्वापत्तेरदृष्टविधया सन्निपत्योपकारकत्वलाभार्थं श्रुतिरेव लैङ्गिकेष्टदेवताप्रकाशनार्थत्वं मन्त्रस्यानुमन्यते । अत एव श्रुतिबलीयस्त्वात् प्रहरणप्रयुक्तः सूक्तवाकः प्रहरणाभावे अननुष्ठीयमानोऽपि विभज्य विनियोगांशे इष्टदेवताप्रकाशनरूपलैङ्गिककार्यस्यैव प्रयोजकत्वमनुमन्यते ।

न चैवं सूक्तवाकशब्दस्यावयवलक्षणार्थत्वापत्तिः । सूक्तवाकपदस्य सुष्ठु उक्तं वक्तीति व्युत्पत्त्या इष्टदेवताप्रकाशकमन्त्रविशेषे योगरूढत्वात् । तेन यत्र यावत्यो देवता इष्टाः प्राकृत्यो वैकृत्यो वा, तत्र तावानेव सूक्तवाकः । अतश्च सूक्तवाकप्रातिपदिकश्रुत्यनुरोधेनापि लिङ्गाबाधः । न चाध्ययनादौ योगबाधात् रूढिमात्रकल्पना । तत्र तदानीन्तनवैदिकप्रसिद्ध्यनुरोधेन दार्शपूर्णमासिकदेवतापदसमुदाययुक्त एव मन्त्रे निरूढलक्षणाऽङ्गीकारात् । अश्वकर्णादौ तु शक्यसम्बन्धप्रतीत्यभावात् क्लृप्तावयवशक्तिबाधेनाप्यतिरिक्तशक्तिकल्पनमिति विशेषः । प्रयोजनं विभज्य विनियोगः ॥३॥२१॥

लिङ्ग ॥ काम्येष्टिकाण्डे इन्द्राग्न्यादिदेवत्याः काम्येष्टयः समाम्नाताः । तेनैव क्रमेण मन्त्रकाण्डे तत्तल्लिङ्गा एव काम्ययाज्यानुवाक्याकाण्डमित्येवंसमाख्याता याज्यानुवाक्यामन्त्राः समाम्नाताः । ते

लिङ्गादिन्द्राग्न्यादिदेवत्यकर्ममात्राङ्गं, न तु दुर्बलक्रमसमाख्याऽनुरोधेन काम्येष्टिमात्राङ्गम्। न च सामान्यसम्बन्धबोधकप्रमाणाभावे लिङ्गमात्रेण विनियोगायोगः। मन्त्रगतप्रयोजनाकाङ्क्षासहकृतलिङ्गेन सामान्यसम्बन्धबोधकप्रमाणाभावेऽपि इन्द्राग्न्यादिदेवताप्रकाशने मन्त्रविनियोगोपपत्तेः। न चेन्द्राग्निस्वरूपे आनर्थक्यादपूर्वसाधनत्वलक्षणार्थं क्रमाद्यपेक्षेति वाच्यम्।' इन्द्राग्न्यादिदेवतानां शुद्धवत्कालव्यभिचारित्वेन लक्षणोपपत्तेः। व्यभिचारित्वेऽपि वा लौकिकस्याग्न्यादेर्वैयर्थ्यादेव वारणोपपत्तौ परिशेषादेवापूर्वीयत्वोपस्थितेः। अतो लिङ्गमात्रेण क्रतुसमाख्ययोर्बाधात् सर्वार्थत्वमिति प्राप्ते।

आकाङ्क्षाऽभावे योग्यतारूपस्य लिङ्गस्य विनियोजकत्वानुपपत्तेर्मन्त्रगतप्रयोजनाकाङ्क्षायाश्च सर्वमन्त्राणां वाचस्तोमे विनियोगेन निराकाङ्क्षतया अभावाच्च लिङ्गमात्रात् सर्वार्थत्वोपपत्तिः। अतश्च वाक्यप्रकरणक्रमादिना सामान्यसम्बन्धबोधकप्रमाणेन तत्तदाकाङ्क्षोत्थापनाच्च क्रतुसम्बन्धेऽवगते द्वारविशेष एव लिङ्गादवगम्यते। न च वाचस्तोमीयवाक्येन प्रकरणादिबाधः। मन्त्रविशेषविषयाणां तेषां मन्त्रपाठकालोत्पन्नमन्त्रप्रयोजनाकाङ्क्षावेलायामनुपस्थितेन तेन वाक्येन बाधायोगात्। न चैवं प्रबलेन विनियुक्तस्यापि दुर्बलेन विनियोगे उत्कृष्टस्यापि पूषानुमन्त्रणमन्त्रस्य प्रकरणेन गौणेऽर्थे विनियोगापत्तिः। प्रमाणद्वयस्याप्येकविषयत्वान्मन्त्रप्रयोजनाकाङ्क्षावेलायां प्रबलप्रमाणस्योपस्थितत्वाच्च बाधकत्वोपपत्तेः। अतश्च प्रकृते बाधायोगात्क्रमसमाख्याऽनुरोधात् काम्येष्टिविषयत्वमेव मन्त्राणाम्। न चान्यथाकाङ्क्षोत्थापकं किञ्चिदस्ति। अव्यभिचरितक्रतुसम्बन्धादेराकाङ्क्षोत्थापकत्वे प्रमाणाभावात्।

वस्तुतस्तु नात्राव्यभिचारोऽपि। जुह्वादीनां हि न तत्त्वेनान्यत्र कारणतेति तस्या युक्तः क्रतुनाऽव्यभिचारितः सम्बन्धः। देवतारूपस्याग्न्यादिशब्दस्य तु आनुपूर्वीविशिष्टवर्णत्वेन क्रतुं वर्णं प्रति च स्वार्थप्रतिपादनं प्रति कारणत्वान्नाव्यभिचारितक्रतुसम्बन्ध इति वैषम्यम्। अतश्च व्यभिचारात्। अव्यभिचारेऽपि वाऽऽकाङ्क्षोत्थापकत्वानुपपत्तेर्नान्यत्र विनियोगः। अत एव स्वारसिकी आकाङ्क्षा यत्र न निवर्त्तते यथाऽर्थज्ञाने उपनिषज्जन्यात्मज्ञाने वा, तत्र आकाङ्क्षोत्थापनप्रयोजनाभावात् सामान्यसम्बन्धबोधकप्रमाणं विनाऽपि भवत्येव लिङ्गमात्रादिनियोगः। प्रकृते तु स्वारसिकाकाङ्क्षानिवृत्तेः आकाङ्क्षोत्थापकसामान्यसम्बन्धबोधकप्रमाणापेक्षेति वैषम्यम्।

न चैवं प्रबलक्रमसमाख्येनैव तदुपपत्तेः समाख्यावैयर्थ्यम्। यत्र सान्नाय्यवदग्निदेवत्यकर्मक्रमे आग्नेयमन्त्रद्वयाम्नानं तत्र प्रथमातिक्रमे कारणाभावात् क्रमाविरोधाच्च सामिधेनीषु निवेशे प्राप्ते समाख्यया याज्यानुवाक्याकार्ये निवेशः। सामिधेनीषु तु अन्यासामागमः। न चैवं क्रमोपन्यासवैयर्थ्यम्। यत्रान्यदेवत्यपूर्वेष्टियाज्याऽऽम्नानानन्तरं उत्तरेष्टियाज्यातः पूर्वमाग्नेय्यृचः पठितास्तत्र तल्लिङ्गकमन्त्रेण याज्याकार्ये निवेशासम्भवात् समाख्याबाधेऽपि क्रममात्रेणोत्तरेष्टिसामिधेनीकार्ये विनिवेशः। तत्सामिधेनीस्थानपठितत्वात्। अतः सिद्धं काम्येष्टिष्वेव विनियोग इति ॥२॥२२॥

अधिकारे ॥ ज्योतिष्टोमे आग्नेय्याऽऽग्नीध्रमुपतिष्ठत इत्यत्र किं अप्रकृतसाधारण्येन ऋङ्मात्रमाग्नीध्रोपस्थानाङ्गं उत प्रकृता एव याः स्तोत्रादौ अपि विनियुक्तास्ता एवेति चिन्तायां, आग्नेयीपदस्या-

विशेषेण सर्वपरत्वात् प्रकरणस्य तत्सङ्कोचकत्वानुपपत्तेरग्निदेवत्य-मन्त्रमात्रस्यैव विशिष्टविध्युत्तरकालीनविशेषणविधिना आग्नीध्रोप-स्थानाङ्गत्वेन विधानम्। न त्वत्राग्नेयी उद्देश्या येनानर्थक्यभिया व्रीहिवत्प्रकरणेन सङ्कोच्येत। तृतीययोपादेयत्वावगमात्। यत्र चोप-स्थानस्वरूपे आनर्थक्याशङ्का, तत्र प्रकरणानुप्रवेशेऽपि नाग्नेयीपदस्य प्रकृतपरत्वापत्तिः।

न चाग्नेयीपदस्य यौगिकत्वात्तद्धितान्तत्वाद्वा सन्निहितपरत्वम्। यौगिकानामवयवार्थविशिष्टव्यक्तिमात्रवाचित्वेन सन्निहितवाचित्वे प्रमाणाभावात्। तद्धितस्य तद्वाचित्वेऽपि प्रकृतानामृचामेकप्रकरण-स्थत्वेऽपि प्रदेशान्तरस्थत्वेन सन्निहितत्वाभावात्। अस्तु वा प्रकरण-सन्निहितस्यैव तद्धितेन ग्रहणं, तथापि यत्र न तद्धितश्रवणं यथा ब्रह्मौदनप्राशनादौ चतुरोब्राह्मणान्भोजयेदित्यादौ, तत्र प्रकृतलिङ्-ग्रहणे प्रमाणाभावः। न च प्रकृतानामपूर्वार्थत्वस्य क्लृप्तत्वात् केवलं द्वाररूपाग्नीध्रोपस्थापनसम्बन्धकरणे लाघवादप्रकृतानाञ्चोभयकरणे गौरवापत्तेः प्रकृतनियम इति वाच्यम्। प्रकृतग्रहणेऽप्युपस्थानस्व-रूपस्य द्वारत्वे तत्कार्यापन्ने ऊहाद्यनापत्तेरपूर्वसाधनत्वलक्षणाया-आवश्यकत्वात्। न हि प्रकृतविषयेऽपि प्रकरणेन वाक्यान्तर-कल्पनया अपूर्वार्थत्वबोधः। तथात्वे व्रीहीणां स्वरूपेण द्वारत्वा-पत्तौ यवानां तदनापत्तेः।

अतो लाघवादपूर्वसाधनीभूतस्तोत्रत्वेनैवोद्देश्यता। तावता चा-पूर्वसाधनीभूतोपस्थानार्थत्वस्यालाभादस्यैव प्रकृतग्रहणेऽपि तद्विधा-वपूर्वसाधनलक्षणा। अपि च स्तोत्रापूर्वसाधनत्वक्लृप्तावपि नोपस्थान-

जन्यज्योतिष्टोमापूर्वसाधनत्वलाभः प्रकृतानाम्। अतः सर्वासामेव ग्रहणम्। अप्रकृतानामेव वा, कार्यसाकाङ्क्षत्वादिति प्राप्ते।

अप्रकृतग्रहणे तासामपूर्वसाधनीभूतोपस्थानार्थत्वान्यथानुपपत्त्या अपूर्वार्थत्वस्यापि प्रोक्षणादिवत्कल्पनीयत्वापत्तेः। प्रकृतानां च कार्यान्तरसम्बन्धबोधकविधाक्वेवापूर्वार्थत्वस्य क्लृप्तत्वाल्लाघवोपजीविना प्रकृतनियमः। सम्भवति च प्रकृतानामप्याग्नेयीनां वाङ्नियमन्यायेन स्तोत्रद्वारा ज्योतिष्टोमापूर्वसम्बन्धासम्भवेऽपि कार्यान्तरद्वारा सः। आग्नेयीनां स्तोत्रादौ विनियोगेऽपि पार्थक्येन ज्योतिष्टमप्रकरणे पाठादेव वा तदपूर्वसम्बन्धावगमः। अयमेव च ब्रह्मौदनप्राशने ऋत्विक्त्वनियामकन्यायः। न चैवमात्रेयाय हिरण्यं ददाति इत्यत्रापि तन्नियमापत्तिः। ऋत्विक्षु आत्रेयत्वस्य नियमेनाप्राप्तेः। अत एव चाग्निमुपनिधाय स्तुवीतेत्यादावाचेपणीयस्तोत्रापूर्वसम्बन्धस्याहवनीयादावप्राप्तत्वान्न तन्नियमोऽपि तु विना वचनं आयतनबहिर्भावायोगाल्लौकिकस्यैवेति वक्ष्यते। अतः सिद्धं लाघवानुरोधेन प्रकृतस्यैव ग्रहणम् ॥३॥२३॥

लिङ्गसमाख्यानाभ्याम् ॥ सोमे, भक्षे हि माविक्षेत्यादिर्भक्षानुवाक इत्येवं समाख्यातो मन्त्रः श्रुतः। तत्र यस्तावदस्यांशो भक्षणमेव प्रतिपादयति स तत्रैव विनियुज्यते। ग्रहणावेक्षणसम्यग्जरणप्रतिपादकानां त्वंशानां किं ग्रहणादावेव विनियोगोऽथवा भक्षणमन्त्रैकवाक्यतया भक्षण एवेति चिन्तायां, ग्रहणादेरविहितत्वेनापूर्वं प्रत्यङ्गत्वव्यञ्जकत्वस्याप्यभावाद्ग्रहणस्यार्थाद्भक्षणजनकत्वेन पक्षप्राप्तावपि वाङ्भ्यां सध्यासमित्यनेनोक्तस्य बाङ्द्वयकरणकस्य ग्रहणस्य कथ-

भक्ष्यप्राप्तेरवेक्षणस्य च भक्षाजनकत्वेनैवाप्राप्तेः सम्यग्जरणस्य तदनुकूल-व्यापारस्य वा भक्षोत्तरभावितया भक्षाजनकत्वेन तेषामपूर्वप्रयोज-कत्वस्याप्यभावाद्ग्रहणाद्यर्थत्वे आनर्थक्यापत्तेः भक्षणमन्त्रैकवाक्यतया भक्षणार्थत्वमेवैषाम्। एवं च समाख्याऽप्युपपन्ना भवतीति प्राप्ते।

ग्रहणादिप्रत्यक्षविध्यभावेऽपि समाख्यासहकृतावान्तरप्रकरणेन भक्षसम्बन्धे तत्तन्मन्त्राणामवगते लिङ्गबलेन मान्त्रवर्णिकग्रहणादि-विधिकल्पनया तत्प्राप्त्युपपत्तेस्तदर्थत्वेनैव मन्त्रविनियोगोपपत्तौ न स्वतो निराकाङ्क्षयोर्द्वयोराख्यातपदयोः कथञ्चिदेकवाक्यतां परि-कल्प्य गौण्या भक्षार्थत्वकल्पनम्। अतएव वा भक्षविशेषणत्वेन ग्रह-णादिप्रकाशकत्वकल्पनमुपपत्तिमत्। न चैवमपि सम्यग्जरणस्य कृत्यसाध्यत्वान्न विधिसम्भवः। सम्यग्जरणानुकूलव्यापारस्यासनविशेष-स्यैवानुष्ठेयस्य विधेयत्वात्। वमनविरेकनिमित्तप्रायश्चित्ताम्नानाच्च सम्यग्जरणपर्यन्तमेव भक्षणं प्रतिपत्तिरिति तस्य भक्षोपयोगिता। गुणाभिधानात्।

तस्मिन्नेवानुवाके मन्द्राभिभूतिरित्यादिस्तृप्यत्वित्यन्तस्तृप्तौ विनि-योक्तव्यो ग्रहणादाविवेति प्राप्ते।

ग्रहणादिवदनुष्ठेयत्वाभावात् तृप्तेरप्रकाश्यत्वम्। न च सम्यग्-जरणवत् तृप्त्यनुकूलव्यापाररूपभक्षणवाक्यस्याक्षेपकत्वम्। अस्त्वं भक्षय-तीति वचनविरोधेन तत्कल्पनाऽनुपपत्तेः। अत एव तृप्तेर्भक्षणेना-जननाच्च तस्याः स्वर्गवज्जन्यत्वमात्रेण प्रकाश्यत्वोपपत्तिः। अतश्च लिङ्गविनियोगासम्भवात् सत्यपि आख्यातद्वयस्य स्वतो निराकाङ्क्षत्वे इतिकरणाध्याहारेण तृप्यत्वित्येतदर्थं भक्षयामीत्येवं भक्षमन्त्रैक-

वाक्यतां प्रकल्प्य स्वार्थविशिष्ट*भक्षणप्रकाशकत्वमेवाङ्गीकर्त्तव्यम् । स्वार्थस्य श्रुत्या दृष्टिरेव । तत्प्रकाशनांशे चादृष्टार्थत्वम् । अथवा लक्षणया भक्षणस्तुतिः । सर्वथा न लिङ्गादिविनियोगः ॥३॥२४॥

लिङ्गविशेषनिर्देशात् ॥ भक्षमन्त्रः किं इन्द्रदेवत्याभ्यास एवाङ्गं तद्भिन्नाभ्यासेष्वमन्त्रकं भक्षणं उत तेषूहेनोतानूहेन वेति चिन्तायां, प्रकरणाद्भक्षमन्त्रस्य सर्वप्रदानार्थत्वावगमेऽपि इन्द्रपीतस्येति लिङ्गेनेन्द्रदेवत्यप्रदानमात्राङ्गत्वम् । न चेन्द्रेण यस्मिन् सवने पीत इति बहुव्रीहिस्वीकारेण सोमसम्बन्धिसवनविशेषणत्वाङ्गीकारान्लिङ्गविरोध इति वाच्यम् । पदद्वयलक्षणापादक-लक्षणाननुगत-व्यधिकरणबहुव्रीह्यपेक्षया पूर्वपद एव सम्बन्धिलक्षणापादकस्य लक्षणानुगतस्येन्द्रेण पीतः स्वीकृत इत्येवं तत्पुरुषस्यैव लघुभूतत्वात् । विद्यते च देवतायाः प्रतिग्रहाभावेऽपि देवस्वं न गृह्णीयादित्यादिवचनबलेन सम्बन्धविशेषरूपः स्वीकारः । न च स्थूलपृषतीपदवत्स्वरादेव बहुव्रीहित्वनिर्णयः । तद्वदिह समासस्य लक्षणानुगतत्वाभावेन स्वरस्यैव बाध्यमानत्वात् । यथा च तत्पुरुषपक्षेऽपि स्वराविरोधस्तथा कौस्तुभ एवोपपादितम् ।

अतश्च लिङ्गादिन्द्रदेवत्यप्रदान एव मन्त्रस्याङ्गत्वावगमादनैन्द्राणां च कर्मण एकत्वेन प्रकृतिविकारभावाभावादूहानुपपत्तेर्व्रीहीणां मेध इति वदनैन्द्राणाममन्त्रकं भक्षणमित्याद्यः पक्षः । द्वितीयस्तु सत्यपि कर्मैकत्वे प्रदानानां भिन्नत्वादविरुद्धः प्रकृतिविकारभावः । इन्द्राय त्वा वसुमत इत्यादिमानग्रहणमन्त्राणां च लिङ्गादिन्द्रमात्रविषय-

* विशिष्टा,— इति ख० पुस्तके पाठः ।

त्वात् तदनुरोधेन च तत्प्रकाश्ययोर्मानग्रहणयोस्तत्संस्कार्यस्य सोमस्य तत्संस्काराणां चाभिषवादीनां तन्निश्राणां चाङ्गान्तराणामैन्द्रमात्र-विषयत्वप्रतीतेरितरेषामधर्मकाणां युक्तोऽतिदेशः। भवति चाङ्ग-वशेनापि प्रधानसंकोचः। अग्न्याद्यनुरोधेन क्रतूनामाहिताग्निविषय-त्वात्। अतश्च प्रकृतापूर्वीयदेवताप्रकाशकस्य भक्षमन्त्रस्य कार्य-मुखेन विकृतावागतस्य भवत्येव यथादैवतमूह इति। एवं स्थिते-ऽन्तरा चिन्ता ॥ ३॥ २ ५॥

पुनरभ्युन्नीतेषु॥ सवनमुखीयेषु चमसेष्वैन्द्रेषु सर्वेषु हुतेषु ये होत्रकाणां मैत्रावरुणादीनां चमसास्तेष्वभक्षितेष्वेव पुनः सोमोऽभ्यु-न्नीय देवतान्तरेभ्यो मित्रावरुणादिभ्यो हुत्वा भक्ष्यते। तत्र पूर्व-प्रदानदेवताभूत इन्द्रोऽप्युपलक्षणीयो न वेति चिन्तायां, उन्नयन-काले न देवतान्तरोद्देशः। येनोन्नीतस्यैव तत्सम्बन्धात् पूर्वशेषस्य पूर्व-देवतासम्बन्धो नापैयात्। प्रदानकाले तु संसृष्टस्यैव देवतान्तर-सम्बन्धात् पूर्वदेवतासम्बन्धापनयप्रतीतेर्नोपलक्षणमिति प्राप्ते।

उन्नयनकाले देवतासङ्कल्पाभावेऽपि सामर्थ्यादेवोन्नयनस्य करि-ष्यमाणकर्मार्थत्वप्रतीतेः पूर्वशेषस्य संसृष्टत्वेऽप्येतदर्थत्वे प्रमाणाभावा-दनपनीतसम्बन्धा पूर्वदेवताऽप्युपलक्षणीया ३॥२६॥

पात्नीवते तु॥ द्विदेवत्यानामैन्द्रवायवादीनां शेषा आदित्य-स्थाल्यामागत्य ततोऽप्याग्रयणस्थालीमागच्छन्ति। पात्नीवतश्चाग्रयणात् गृह्यते, तस्मिन्भक्ष्यमाणे द्विदेवत्या अपि उपलक्षणीयाः। पूर्ववदा-ग्रयणस्यैव पत्नीवद्देवतासम्बन्धादिति प्राप्ते।

पात्नीवतमाग्रयणाद् गृह्णातीत्यपादानत्वश्रवणात् तस्मादपेतस्य

पात्नीवतत्वं न त्वाग्रयणस्यैव । आग्रयणवत्त्वानाग्रयणमपि संसृष्टत्वात् तस्मादपेतमिति द्विदेवत्यस्यापि देवतान्तरसम्बन्धेन पूर्वदेवतासम्बन्धापायात् । भूतपूर्वगत्या च प्रकृतावनुपलक्षणान्नोपलक्षणीयाः ॥ ३॥२७॥

त्वष्टारम् ॥ पात्नीवत एवाम्नाद पत्नीवाः सजूर्देवेन त्वष्ट्रा सोमं पिबेति मन्त्रात् त्वष्टुरपि देवतात्वम् । अतः सोऽप्यग्निवदुपलक्षणीयइति प्राप्ते ।

युक्तमग्नौ पत्नीवच्छब्दस्य यौगिकत्वेन विशेष्यसाकाङ्क्षस्य सामानाधिकरण्येन विशेष्यग्राहकत्वात् । त्वष्टुस्तु तृतीयया सहभावमात्रं प्रतीयते । न चासौ पानक्रियाऽन्वयाव्यभिचारी । सहैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यादौ व्यभिचारात् । सत्यपि पाने देवतात्वस्याप्रामाणिकत्वाच्च । अतः पात्नीवतमिति निरपेक्षतद्धितेन पत्नीवतोऽग्नेरेव देवतात्वमिति स एवोपलक्षणीयो न त्वष्टा ॥३॥२८॥

त्रिंशच्च ॥ तस्मिन्नेव याज्यामन्त्रे, एभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः । पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमावह मादयस्वेत्यत्र त्रयस्त्रिंशतां देवतानां पत्नीवच्छब्दसामानाधिकरण्यादग्निवद्विशेष्यत्वोपपत्तेर्मदश्रवणाच्च पानोपपत्तेर्देवतात्वावगमात्तेषामप्युपलक्षणं मन्यते । अग्नेर्मादयितृत्वश्रवणात् तेऽग्निदत्तेन कामं माद्यन्तु यजमानस्त्वग्नय एव ददातीत्यवगमात् तस्यैव देवतात्वं न त्रयस्त्रिंशताम् । एवञ्च पात्नीवतमिति तद्धितोऽप्यसति बहुवचनग्राहकप्रमाणे एकवचनेनैव विगृहीतो भवतीत्यपि लाघवम् । अतो नोपलक्षणीयास्ते ॥३॥२९॥

वषट्कारश्च ॥ अनुवषट्कारयागदेवताया अग्नेर्देवतात्वस्य निः-सन्दिग्धत्वादुपलक्षणम्। प्रकृतौ त्वसौ विद्यमानाऽपि नोपलक्षिता। अनुवषट्कारयागस्य सोमयागात्कर्मान्तररूपस्य पूर्वयागीयसोमप्रति-पत्तिभूतस्य कृत्स्नविधानत्वेनातिदेशाकल्पनात्। उपदेशेन कथ-ञ्चिल्लक्षणप्राप्तावपि श्रीहीणां मेध इति त्वदैन्द्रमन्त्रस्य प्राप्त्यनुप-पत्तेश्च। अतश्च विकृतावपि प्रधानदेवतैव तत्कार्यापन्नोपलक्षणीया नानुवषट्कारदेवता ॥३॥२०॥

छन्दः ॥ एवमूहं विचार्याधुनाऽऽद्यपूर्वपक्षवादी पुनस्तं दूषयति। नोहः कर्मण एकत्वात्। अभ्यासानामपि फलचमसवदसमानविधा-नत्वे प्रमाणाभावाच्च। न हि मानग्रहणमन्त्रानुरोधेन तदुद्देश्यानां सङ्कोचो युक्तः। अग्निविद्ययोस्तु स्वस्वविधिप्रयुक्तत्वेन क्रतुविधि-प्रयुक्तत्वाभावाद्युक्तः परप्रयुक्ताग्निविद्योपजीवकतया क्रत्वधिकार-सङ्कोचः। अतो मानग्रहणमन्त्रावेव कामं ऐन्द्रमात्रप्रदानविषयौ भवेतां न तु मानाद्यपि। वस्तुतस्तु वसुमत इत्यनेन देवतान्तर-स्याप्यभिधानात् तयोरपि सर्वार्थत्वमेव। अतो भक्षमन्त्रस्यैवैन्द्र-प्रदानविषयत्वादनैन्द्राणाममन्त्रकं भक्षणम् ॥३॥२१॥

ऐन्द्राग्ने ॥ एवं स्थिते पुनश्चिन्ता। ऐन्द्राग्नेऽप्यभ्यासे इन्द्रपीतस्ये-त्येव समन्त्रकं भक्षणम्। त्यागस्य व्यासज्यवृत्तित्वेऽपि पानस्य पीत-पदलक्षितस्वीकारस्य वा प्रत्येकवृत्तित्वेन डित्थमात्रवदेकेन व्यपदेष्टुं शक्यत्वात्। यागस्य च कृताकृतसमुदायविषयत्वेन भक्ष्यमाणकृतात्र-यवमात्रविषयत्वाभावान्न पीतपदे तद्युक्तत्वलक्षणा। अतस्तत्तुर्धा-करणाधिकरणविषयत्वाभावात् तस्यापि समन्त्रकं भक्षणमिति प्राप्ते।

सत्यं पीतपदेन स्वीकारलक्षणा । पानस्य नवमे निषेध्यमानत्वात् । त्यागस्य त्वदुक्तरीत्या लक्षयितुमशक्यत्वाच्च । स्वीकारस्य तु देवत्वादिपदालम्बनतया कल्प्यमानस्य कृतावशिष्ट एव कल्पनीयत्वाद्युक्ता लक्षणा । तथापि तस्य लाघवेन व्यासज्यवृत्तित्व एव कल्पने प्रत्येकवृत्तित्वे प्रमाणाभावाच्चतुर्धाकरणाधिकरणविषयत्वोपपत्तेर्न तस्य समन्त्रकभक्षणम् ॥२॥३ २॥

छन्दसश्च ॥ तत्रैव मन्त्रे गायत्रछन्दस इत्यादि श्रुतम् । तच्चेदं सोमविशेषणमेवास्मिन् पूर्वपक्षे । अतश्च केवलमेव यत्रैन्द्रप्रदाने गायत्रच्छन्दो यथा वृहस्पतिसवादौ, गायत्रमेतदहर्भवतीति श्रुतेः, तत्रैवास्योत्कर्षो न तु ज्योतिष्टोमे निवेशः । केवलगायत्रच्छन्दस्कप्रदानाभावात् । न च सामान्यसम्बन्धबोधकप्रमाणाभावः । इन्द्रदेवत्यत्वप्रातःसवनादीनामन्यत्र लोकादावभावेन पारिशेष्यादेव वृहस्पतिसवोपस्थितिसम्भवादिति प्राप्ते ।

वृहस्पतिसवेऽपि सवनमुखीये ऋगन्तरस्य पठितत्वाद्गायत्रमेतदित्यादेश्च भूम्नाऽपि व्याख्यानोपपत्तेः, प्रकृतौ विकृतौ वा केवलगायत्रच्छन्दस्कत्वाभावान्नित्यसापेक्षत्वेन समासोपपत्तेः प्रकृतावेव निवेशः । वस्तुतस्तु गायत्र्याः प्रत्येकमेव साधनत्वात् सत्यपि ऋगन्तरे न समासभङ्गाशङ्काऽपि ॥२॥३ ३॥

सर्वेषां ॥ स्थितादुत्तरम् । नेन्द्रपीतपदे तत्पुरुषोऽपि तु बहुव्रीहिरेव । तत्पुरुषेऽपि पूर्वपदे तावदेका सम्बन्धिलक्षणा पीतपदे च स्वीकृतावयवलक्षणा । यद्यपि चेयं सिद्धान्तिनोऽपि तुल्या, तथापि अवयवस्वीकारस्यावयविस्वीकारसापेक्षत्वेन विलम्बोपस्थिति-

कत्वाञ्च तुल्यत्वम् । ततश्च पीतपदे अर्शआद्यच्प्रत्ययं मत्वर्थीयं पाधातुना चावयविगतमेव तत्सम्बन्धिस्वीकारं लक्षयित्वा इन्द्रः पीतः स्वीकारकर्त्ता यस्मिन् सवन इति व्युत्पत्त्या समानाधिकरणबहुव्रीहिरङ्गीक्रियते । प्रकरणाविशेषाच्च निर्णयः । अतः सर्वस्यैव सोमस्योक्तविधप्रातःसवनादिसम्बन्धित्वादैन्द्राणामपि समन्त्रकमेवाविकारेण भक्षणम् ।

यदि तु पीतपदस्य पूर्वं निपातापत्तिराशङ्क्यते, तदाऽस्तु इन्द्रे पीतं पानमस्मिन्निति सप्तमीबहुव्रीहिः । यदि तत्रापि निष्ठान्तत्वेन पूर्वनिपातापत्तिरविशिष्टेति विभाव्यते, तदाऽस्त्वयं तत्पुरुष एव । तदापि तु लक्षणया सोमसम्बन्धिसवनपरत्वम् । न च तस्यां प्रमाणाभावः । तैत्तिरीयशाखायां प्रातःसवनादिभेदेन इन्द्रपीत-नराशंसपीत-पितृपीतानां त्रिवारं पाठस्यैव प्रमाणत्वात् । सोममात्रपरत्वे हि तत्तत्प्रदानेषु लिङ्गादेवेन्द्रपीतादिपदानां सकृत्पठितानामेव पाठोपपत्तौ तत्र योग्यतयैव प्रातःसवनादिपदानां विभागेन विशेषणत्वोपपत्तिः । अतस्तेषां प्रातःसवनादिभेदेन त्रिवारं पाठ एव वैयर्थ्यभिया सवनपरत्वलक्षणातात्पर्यग्राहकः । अतस्त्वेन्द्रपीतादिविशेषणत्रययुक्तस्य तत्तत्सवनस्य सम्बन्धिनं सोमं अन्यदेवत्यमपि भक्षयामीति मन्त्रार्थावगतेः सर्वत्रैकमंत्रम् । विभागोऽपि तैत्तिरीयशाखाऽऽम्नातक्रमेणैव बोध्यः । कल्पसूत्रकारास्त्विदमेवामनन्ति* ॥ ३ । २ ४ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
तृतीयाध्यायस्य द्वितीयः पादः ॥

---

* कल्पसूत्रकारास्त्विह एवामनन्ति,— इति ख० ग० पुस्तकयोः पाठः ।

अथ तृतीयः पादः ।

श्रुतेः ॥ इदानीं वाक्यादिविनियोगो निरूप्यते । तत्र वाक्यं नाम अङ्गत्वघटकीभूतपरोद्देश्यताकृतिकारकत्वान्यतरपदार्थकल्पनाऽनुकूलश्रुतपदसन्निधिः । अस्ति चेदं धेनुर्दक्षिणा, उच्चैर्ऋचा क्रियते, प्रयाजशेषेणेत्यादौ । अत्र कल्पनाशब्देन कर्मत्वकरणत्वादिविषयकं संसर्गविधया लक्षणादिसाधारणेन शक्तिजन्यपदार्थोपस्थितिभिन्नबोधमात्रं विवक्षितं । तेन धेनुर्दक्षिणेत्यादौ संसर्गविधया भासमानकरणताके नाव्याप्तिः ।

वस्तुतस्तु सुबन्तपदयोः परस्परान्वयस्याव्युत्पन्नत्वादवश्यकल्प्यभावनान्वयानुरोधेन धेनुरिति प्रथमया करणत्वलक्षणाद्दक्षिणापदेन च तत्कार्यवृत्तिकर्मत्वलक्षणात्कल्पनापदेन लक्षणाजन्योपस्थितिरेवाभिप्रेता । उच्चैरित्यादौ लुप्तविभक्त्यर्थस्य करणत्वस्य प्रातिपदिकेनैव लक्षणान्नाऽव्याप्तिः । अथवोच्चैरित्यादौ करणत्वस्य संसर्गविधयैव भानोपपत्तेः कल्पनापदेनोभयं विवक्षितम् । प्रयाजशेषेणेत्यादौ तृतीयया कर्मत्वस्य धातुना करणत्वस्य लक्षणात्कल्पना स्फुटैव ।

श्रुतपदसन्निधेश्च योग्यताज्ञानं विना कर्मत्वादिकल्पकत्वानुपपत्तेर्योग्यतारूपलिङ्गानुमापकत्वम् । श्रुतस्यैव पदस्य, कर्मत्वादिलक्षकत्वाङ्गीकारेण तद्वाचकपदरूपश्रुतिकल्पकत्वाभावेऽपि च श्रुतपदस्य तत्तात्पर्यकत्वरूपधर्मवैशिष्ट्यरूपेण कल्पनात् श्रुतिकल्पकत्वोपपत्तिः । अतश्च वाक्यं, लिङ्गं श्रुतिं च कल्पयित्वाऽङ्गत्वे प्रमाणम् । तदिह

ज्योतिष्टोमे श्रुतेनोपर्यंचा क्रियत इत्यादिना वाक्येन विधीयमान-स्योचैष्ट्वादेरुद्देश्यसमर्पकेन ऋगादिपदेन किं ऋगादीनां मन्त्राणा-मेवोद्देश्यत्वं प्रतिपाद्यते, उत त्रयो वेदा अजायन्तेत्याद्युपक्रमस्थार्थ-वादवशेन लक्षणया ऋग्वेदादिविहितकर्म्माङ्गभूतमन्त्रमात्रस्येति चिन्तायाम्।

उपक्रमस्थस्यापि वेदपदस्य गुणभूतान्यपदार्थवादस्थत्वेन प्रधान-भूतविध्युद्देशस्थऋगादिपदे निःसन्दिग्धेऽङ्गगुणविरोधन्यायेन लक्षणा-तात्पर्य्यग्राहकत्वायोगाद्वेदपद एव तदेकदेशऋगादिलक्षणा। वस्तु-तस्तु वेदशब्दस्यावयवेऽपि न लक्षणा। वेदत्वस्य प्रत्येकवृत्तित्वादि-तरथा शूद्रस्यैकवाक्यश्रवणे दोषानापत्तेरिति प्राप्ते।

उपक्रमे वेदपदश्रवणे एवैतावदवगम्यते नूनमत्र वेदस्य स्तूयमा-नत्वादुद्देश्यत्वं विधेयत्वं वा तस्यावश्यं वाक्ये* विवक्षितमिति। तत्र च विधेयस्य उच्चैष्ट्वादेर्लाभात्परिशेषादेव तस्योद्देश्यत्वावगतेर्वस्तुतो-ऋगादिपदमनुवाद एव यदुद्देश्यपरम्। अतस्तावदज्ञातविरोधिन-उपक्रमस्थस्य वेदपदस्यैव तात्पर्य्यग्राहकस्य सत्त्वात् ऋगादिपदे तत्प्र-चुरत्वेन ऋग्वेदादिविहितकर्म्माङ्गभूतमन्त्रलक्षणा।

न चोपक्रमावगतस्यापि अपच्छेदाधिकरणन्यायेन परेण बाधः। तस्येह विधेः स्तुतिसापेक्षत्वेनार्थवादैकवाक्यताया आवश्यकत्वात् पूर्व-विरोधे परस्यानुत्पन्नत्वादेवाप्रवृत्तेः। न च वेदत्वस्य ऋगादिष्वपि पर्य्याप्तत्वादुपक्रमोऽविरोधः। वेदत्वस्य मन्त्रब्राह्मणसमुदायात्मके ग्रन्थ-विशेषे एव पर्य्याप्तत्वेनावयवपर्य्याप्तत्वाभावात्। इतरथा एकवाक्या-

* वाक्येन,—इति ग० पुस्तके पाठः।

ध्ययनेनानपि अध्ययनविध्यर्थसम्पत्त्यापत्तेः। शूद्रस्यैकपदश्रवणनिषेधस्तु वृन्ताकावयवादिनिषेधवन्नानुपपन्नः। तथा* चैतादृशविषये निषेधस्य विध्यपेक्षया वैलक्षण्यं, तथा कौस्तुभे द्रष्टव्यम्। तस्मादुपक्रमानुसारेण ऋग्वेदविहितकर्माङ्गभूतमन्त्राङ्गत्वमेवोच्चैस्त्वादीनाम्। एवञ्च वेदत्वस्य प्रकरणस्थवाक्यमात्रेषु अपर्याप्तत्वात्प्रकरणेन वाक्यस्य स्वविषये उपसंहारानुपपत्तेर्वेदत्वावच्छिन्नविहितकर्ममात्रोद्देशेन वाक्येन स्वरविधानावगतेः प्रकरणबाधेऽपि न क्षतिः॥३॥२५॥

गुणमुख्य॥ याजुर्वैदिके आधाने सामवेदपठितानि वारवन्तीयादीनि सामान्यङ्गत्वेन श्रुतानि। तेषु सामवैदिकः स्वरः स्ववेदनिबन्धनत्वाच्छीघ्रमुपस्थितो न तु प्रधानविधिनिबन्धनो याजुर्वैदिकः, प्रधानैकवाक्यतापेक्षत्वेन विलम्बोपस्थितिकत्वादिति प्राप्ते।

साङ्गस्यैवाधानस्य यजुर्वेदेन विधानादङ्गेषु विलम्बोपस्थितिरप्ययं प्रधानाश्रितत्वाद्बलीयान्। अतस्तेषु याजुर्वैदिक एव स्वर उपांशुत्वमिति भाष्यकारः।

वार्त्तिककारस्तु प्रयोगविध्याश्रितस्वरस्य प्रधाने श्रुतस्याप्यङ्गकल्प्यत्वेन दौर्बल्यमेव। इतरथा ज्योतिष्टोमाङ्गभूतस्तोत्रादेरप्याध्वर्युकर्तृकत्वापत्तेः। वारवन्तीयस्यापि यजुर्वेदे वारवन्तीयं गायतीति विनियोगविधेराम्नानाच्चैवश्चिन्तनीयम्। यत्र वेदान्तरे उत्पत्तिर्वेदान्तरे च विनियोगस्तत्र वारवन्तीयादौ कः स्वर इति चिन्तायाम्। उत्पत्तेः पूर्वभावित्वादसञ्जातविरोधित्वेन तन्निबन्धनएव स्वरो बलीयान्। अतश्च ऋचा ऋग्वेदेन क्रियते उत्पाद्यत इति श्रुत्यर्थ इति प्राप्ते।

---

* यथा,– इति भवितुमुचितम्।

आम्नानमात्रेण मन्त्रस्य प्रयोजनानवगमेन प्रयोज्यत्वानवगतेः स्वरानपेक्षत्वादिनियोगोत्तरकालमेव स्वरसम्बन्धाक्रियत इत्यस्य प्रयुज्यत इत्यर्थावगतेः प्रयोगस्य च विनियोगाधीनत्वेन विनियोगस्यैवाव्यवहितपूर्वं पुरःस्फूर्त्तिकत्वात्तद्विधिनिबन्धन एव स्वरोऽसति बाधकेऽनुष्ठेय इत्याह ॥३॥३६॥

भूयस्त्वेन ॥ यत्रैकमेव कर्मानेकेषु श्रुतं, तत्र क्वोत्पत्तिः क्व च तदनुवादेन गुणार्थं श्रवणमिति जिज्ञासायां, यत्राङ्गबाहुल्यं तत्रोत्पत्तिः। सेवकबाहुल्येन राजावस्थाननिर्णयवत्। वस्तुतस्तु कर्मस्वरूपपरिचायकद्रव्यदेवतादिसाकल्यस्यैव निर्णायकत्वम्। तत्रापि द्वैविध्ये, बहिरङ्गत्वेऽव्यभिचाराद्देवताया एव, न तु द्रव्यस्येत्यादूह्यम्। अतस्त्वेवंविधनिश्चायकसत्त्वे तत्रैवोत्पत्तिः। अन्यत्र तदनुवादेनाविरोधिगुणान्तरविधानम्। विरोधिनि तु गुणाद्भेद एव। एवं यत्र कस्यचिदपि नियामकस्याभावस्तत्राप्यभ्यासाद्भेदः। न त्वत्र शाखान्तरन्यायेन सत्यपि सर्वेषामुत्पत्तिपरत्वे कर्मैकत्वम्। तद्वद्विशाध्येत्वभेदाभावात्। अतो नियामकबलेन यत्रैवोत्पत्तिस्तद्विधिनिबन्धन एव स्वर इति सिद्धम् ॥३॥३७॥

असंयुक्तम् ॥ एवं वाक्ये निरूपिते प्रकरणमिदानीं निरूप्यते। ननु किमिदं प्रकरणं नाम? न तावत्सन्निधिमात्रं, गोदोहनादेरपि दर्शाङ्गत्वापत्तेः। अथ* साकाङ्क्षत्वमात्रम्। विकृतेरपि प्राकृताङ्गविषये तदापत्तेः। नापि साकाङ्क्षत्वे सति सन्निधिपठितत्वम्। उपहोमादावपि तदापत्तेः। अथोभयाकाङ्क्षत्वविशिष्टं तत्। सिद्धरूपाणां

* न च,– इति भवितुमुचितम्। एवं परत्र।

मन्त्रादीनामपि तदापत्तेः । प्रयाजादीनामनाकाङ्क्षितत्वेन तदनापत्तेश्च । अथ दर्शपूर्णमासयोः प्रकारान्तरेण प्रयाजानाकाङ्क्षत्वेऽपि इतिकर्त्तव्यतात्वेन तदाकाङ्क्षोपपत्तेर्युक्तं प्रकरणमिति चेत् । किमिदमितिकर्त्तव्यतात्वं नाम ? न तावत्फले अपूर्वे वा सहकारित्वम् । प्राधान्यापत्तेः । प्रयाजादिवदाग्नेयस्यापि विकृतावतिदेशापत्तेश्च । नापि करणजनकत्वम् । प्रयाजादिषु बाधादिति चेत् ।

न । सन्निहितस्य फलवतोऽनवगताङ्गताकपदार्थविषये इतिकर्त्तव्यतात्वेनापेक्षणस्यैव प्रकरणपदार्थत्वात् । अत्रासन्निहितज्योतिष्टोमाद्यङ्गत्वस्य प्रयाजादौ वारणायाद्यं विशेषणम् । अनूयाजाद्यङ्गत्ववारणाय फलवत इति द्वितीयम् । प्रोक्षणादेः श्रुत्यादित्रयविनियुक्तस्य प्रकरणविषयत्ववारणाय तृतीयम् । पिष्टरूपस्य लिङ्गाविनियुक्तमन्त्रादेः प्रकरणाविषयत्वसिद्ध्यर्थमितिकर्त्तव्यतात्वेनेति चतुर्थम् ।

इतिकर्त्तव्यतात्वञ्च करणानुग्राहकत्वम् । सर्वत्र हि अग्रमस्य करणत्वायोगाच्छक्तिः कारणनिष्ठा समस्तीति निर्विवादम् । सा च कारणतावच्छेदिका कारणरूपा वेत्यन्यदेतत् । तस्याश्च जन्यवृत्तित्वे जन्यतैवेत्युत्सर्गः । सामग्र्यलाभे परमनादितेत्यपवादः । तत्र तत्सामग्र्यपेक्षैवेतिकर्त्तव्यताऽपेक्षा । तथा च सन्निहितप्रयाजादेरङ्गत्वबोधः । प्रयाजादेस्तत्सामग्रीत्वात् । पिष्टरूपस्य च द्रव्यादेर्व्यापारावेशं विना तत्सामग्रीत्वासम्भवात्तथा अग्रहणम् ।

अत्र च प्रधानगतेतिकर्त्तव्यताऽऽकाङ्क्षायाः प्रयाजादिगतप्रयोजनाकाङ्क्षासहकृतायास्तत्तदाक्यस्य स्वस्वावान्तरवाक्यार्थं समाप्तस्यापि महावाक्यैकदेशत्वरूपपारिभाषिकपदसन्निध्याख्यवाक्यकल्पनया, नि-

रुक्तपदानाञ्च स्वार्थोपस्थितिद्वारा तन्निष्ठाश्रुतपदान्तरकल्पनाऽनु-कूलयोग्यतारूपलिङ्गकल्पनया च, समिधो यजति इत्थं दर्शपूर्ण-मासाभ्यां स्वर्गकामो यजेतेत्यश्रुतेतिकर्त्तव्यतात्ववाचिपदरूपश्रुति-कल्पनया चेतिकर्त्तव्यतात्वरूपशक्तिकारकत्वे प्रामाण्यम् । सम्भवति हि प्रयाजादीनामपि उक्तशक्तिजनकत्वेन भावनायामन्वयः । तस्मा-त्सिद्धं प्रकरणं नाम चतुर्थप्रमाणम् ।

यत्तु पार्थसारथिना, अननुगृहीतस्यापि कर्मादेः संयोग-विभागारम्भकत्वदर्शनान्नेदं प्रकरणम् । अपि तु व्यापारसामान्य-स्याख्यातार्थतामङ्गीकृत्य तद्विशेषापेक्षैवेतिकर्त्तव्यताऽपेक्षा । तयैव च प्रयाजादीनां तत्त्वेनान्वय इति तदेव च प्रकरणमित्युक्तम् । तन्न-तथात्वे निरुक्तप्रकरणस्य तदघटिताङ्गत्वबोधकत्वानुपपत्तेः । प्रयाजा-देर्भावनात्वे तस्यैव फलसम्बन्धापत्तेश्च । अस्मन्मते तु यजस्यैव भावना-त्वात्तस्य च यागजनकत्वेनैव कृतार्थत्वाच्च तदापत्तिरिति वैषम्यम् । न चैवं प्रधानस्य स्वतो निराकाङ्क्षत्वान्यतराकाङ्क्षयैव प्रकृतौ प्रया-जाद्यङ्गत्वापत्तिः, विकृतौ च भावनायाविशेषापेक्षायां अक्लृप्तोप-कारैरपि सन्निहितैरुपहोमैरेव निराकाङ्क्षत्वोपपत्तेर्नातिदेशकल्पना-पत्तिरित्यादि कौस्तुभे विस्तरः ॥ ३ ॥ ३ ८ ॥

क्रमस्तु ॥ स्थानसंज्ञकत्वे पञ्चमं प्रकरणम् । तच्चेतिकर्त्तव्यता-त्वेनायोग्ययोस्सम्बन्धयोर्वाक्यार्थयोः सन्निधिः । इतिकर्त्तव्यतात्वेनायो-ग्यत्वं द्वेधा । क्वचिदाकाङ्क्षाविरहात् । यथा विकृतेरुपहोमादि-विषये, क्लृप्तोपकारप्राकृताङ्गैरेव निराकाङ्क्षत्वात् । क्वचिद्व्यापारा-त्मकत्वात् । यथा जपादिमन्त्रादौ । अत्र चैकवाक्योपात्तत्रीहि-

यागादिसन्निधेरपि तथात्वापत्तेर्वाक्यार्थत्युक्तम्। प्रयाजादीनां स्थान-विषयत्वापत्तिनिरासार्थमाद्यं विशेषणम् ।

तस्मादेश्यापरपर्यायं द्विविधं, पाठसादेश्यमनुष्ठानसादेश्यञ्च । आद्यञ्च द्विविधम् । यथाक्रमं पाठः सन्निधौ पाठश्च । अयमपीदमुभयाकाङ्क्षयाऽन्यतराकाङ्क्षया चेति । अत्रोभयाकाङ्क्षाघटकप्रधानाकाङ्क्षा चेतिकर्त्तव्यताऽऽकाङ्क्षाभिन्ना द्रष्टव्या । तत्र पाठक्रमात्काम्ययाज्यानुवाक्यामन्त्राणां काम्येष्ट्यङ्गत्वम् । सन्निधेस्तु, सान्नाय्यपात्रशुन्धनविधिसन्निधौ समाम्नातस्य शुन्धध्वमिति मन्त्रस्य तदङ्गत्वम् । अनुष्ठानसादेश्यात्तु पशुधर्माणां दैक्षपश्वङ्गत्वम् ।

यद्यपि चैषां लिङ्गादिप्रमाणान्तरेणैव विनियोगात्क्रमादीनाञ्च क्वचिदपूर्वसाधनत्वलक्षणातात्पर्यग्राहकत्वमात्राङ्गत्वे प्रामाण्यम्। तथापि षड्विधस्यापि क्रमस्यासङ्कीर्णोदाहरणानि कौस्तुभोक्तरीत्योहनीयानि ।

अत्र षड्विधेऽपि क्रमे आरादुपकारकस्थले तावदितिकर्त्तव्यताऽऽकाङ्क्षायाः कल्पनीयत्वात्प्रकरणकल्पकत्वम् । मन्त्रादिरूपसन्निपत्योपकारकस्थलेऽपि मन्त्रादेः स्वरूपेण यागाजनकत्वेऽपि तत्तन्नियमादृष्टोपहितस्य तद्जनकत्वात्करणनिष्ठयोग्यताजनकत्वरूपेतिकर्त्तव्यतात्वात्मकप्रकरणकल्पनावश्यकैव। अत एव तदपेक्षया तस्य दौर्बल्यम् । षड्विधे तु क्रमे उभयाकाङ्क्षालक्षणादन्यतराकाङ्क्षालक्षणस्य । तत्रापि पाठक्रमादनुष्ठानसादेश्यस्य । विधिसन्निधानस्य पुरः स्फूर्त्तिकत्वात् । तयोस्तु मध्ये सन्निधानस्य प्राबल्यम् । एकग्रन्थस्थत्वादित्यादि कौस्तुभे द्रष्टव्यम् ॥ ३ ॥ २९ ॥

आख्या चैवम् ॥ ऋग्वेदादिविहितपदार्थेषु हौत्राध्वर्यवादि-समाख्या वेदे याज्ञिकैश्च प्रयुज्यते। साऽप्यङ्गत्वे प्रमाणम्। तथा हि। सर्वत्र क्लृप्तावयवशक्तिकं द्विविधं पदं प्रकृतविधौ वाक्यार्थान्वय्यर्थकं तद्भिन्नञ्चेति। तत्राद्यं निर्मन्थ्येनेष्टकाः पचति, प्रोक्षिताभ्यामुलूखल-मुसलाभ्यामवहन्तीत्यादौ निर्मन्थ्यादिपदम्। तत्र वाक्येनैव मन्त्रना-दीनां पाकाद्यङ्गत्वात् सामाख्यानिको विनियोगः। द्वितीयन्तु आध्वर्यवमधीते प्रैतु होतुश्चमस इत्यादौ। तत्र विशेष्यस्य काण्डस्यैव प्रकृतविधावन्वये जाते विशेषणस्याध्वर्युकर्तृकत्वादेः सिद्धवन्निर्देशान्य-थाऽनुपपत्त्या विनियोगः कल्प्यत इति तत्र समाख्यया विनियोगः।

अत्र समाख्ययाऽवयवार्थयोः सम्बन्धे संसर्गमर्यादया बुद्धे न तन्निर्देशान्यथाऽनुपपत्त्या स्वतन्त्रविधिकल्पना, गौरवापत्तेः। किन्त्वग्न्याधानादिवाक्यस्याध्वर्युं वृणीत इति वाक्यस्य चैकवाक्यता-सम्पादकपदमात्रं, यमध्वर्युं वृणीते सोऽग्नीनन्वादधातीति। तत्र द्वयोर्विध्योः कथञ्चिदप्येकबुद्धिस्थतेत्येवंविधस्थलकल्पनापूर्वकमध्व-र्योरितिकर्त्तव्यतात्वबोधकाकाङ्क्षारूपप्रकरणकल्पनया तद्विध्योर्महा-वाक्यैकदेशत्वाख्यपदसन्निधिरूपं वाक्यं कल्प्यते। तेन चाध्वर्युमात्र-निष्ठयोग्यतारूपलिङ्गकल्पनया एकवाक्यतासम्पादकपदरूपश्रुति-कल्पनाद्युक्रमस्याः षष्ठप्रमाणत्वम् ॥ १ ॥ ४ ० ॥

श्रुतिलिङ्ग ॥ तदेवं षट्सु प्रमाणेषु निरूपितेषु अधुना विरोधे बलाबलं निरूप्यते। विरोधश्चैकस्य शेषस्य शेषिद्वये प्रमाणद्वयसत्त्वे। यथैन्द्रीमन्त्रस्य श्रुत्या गार्हपत्याङ्गत्वे लिङ्गाच्चेन्द्राङ्गत्वे। यथा वा एक-स्मिन् शेषिणि शेषद्वयविनियोजकप्रमाणद्वये। यथा गार्हपत्ये श्रुत्यै-

न्द्रीमन्त्रो लिङ्गादाग्नेयः। अयञ्च शेषद्वयविनियोगो द्वारैक्ये सत्येव बलाबलप्रयोजको न तु तद्भेदेऽपि। वाक्यप्रकरणाभ्यां वैमृधप्रयाजादीनामेकशेष्यर्थत्वे तदभावात्।

यत्र तु एकस्य शेषस्य एकस्मिन्नेव शेषिणि प्रमाणद्वयं, तत्र वैषम्ये प्रबलस्यैव प्रयोजनार्थं विनियोजकत्वं, साम्ये त्वेकस्य विनियोजकत्वं इतरस्य पुनःश्रुतित्वेन प्रयोजनान्तरकल्पनम्। नियामकाभावे द्वयोरभ्युदयशिरस्कत्वकल्पनं कर्मान्तरबोधकत्वं वा।

एवं यथारुणया क्रीणातीत्यादौ आरुण्यस्यापूर्वसाधनीभूतक्रयार्थत्वे प्रमाणत्रयं, तत्रापि श्रुतेरेव विनियोजकत्वं न त्वन्यस्य वाक्यस्योद्देश्यसमर्पकमात्रत्वात्। अत एव नैन्द्र्येत्यत्र लिङ्गवाक्यविरोधः, वाक्यस्योद्देश्यमात्रसमर्पकत्वेन श्रुतिसहकारित्वेऽपि इतिकारकत्वबोधरूपविनियोजकत्वाभावात्। प्रकरणं त्वपूर्वसाधनत्वलक्षणातात्पर्यग्राहकमात्रं न तु तदपि विनियोजकं गौरवात्। अत एव विनियोजकप्रमाणबलाबलवत्तात्पर्यग्राहकप्रमाणबलाबलमपि निरूप्यमेव।

तदिह श्रुत्योर्विरोधे ऐन्द्रीमन्त्रस्य तृतीयया गार्हपत्याङ्गत्वमेव न तु तद्धितश्रुत्या इन्द्राद्यङ्गत्वम्। तस्य सूक्ततद्धितत्वेन प्राधान्येन इतिकारकत्ववाचित्वाभावात्। अतश्च तस्य मुख्यश्रुतित्वाभावाद् दुर्बलत्वम्। एवं नैतस्य मन्त्रस्य लिङ्गादिन्द्राङ्गत्वमिति श्रुतिलिङ्गविरोधेऽप्येतदेवोदाहरणम्।

अत्र हि सर्वत्रोत्तरोत्तरस्य पूर्वपूर्वकल्पकत्वेन प्रामाण्यस्य तत्तन्निरूपणावसरे स्थापितत्वादुत्तरस्य श्रुतिकल्पनं यावदवगतस्यैव पूर्वपूर्वेण शेषशेषिणोर्निराकाङ्क्षत्वापादनेन बाधः। न चाङ्गानां प्रक-

त्यर्थत्वेन निराकाङ्क्षाणामपि विकृत्याकाङ्क्षयैवातिदेशकल्पनवदिन्द्रा-द्याकाङ्क्षयैव लिङ्गस्य श्रुतिकल्पकत्वोपपत्तिः। तस्य ध्यानाद्युपायान्तरे-णापि स्मृतिसिद्धेर्नियमेन विकृतिवदनाकाङ्क्षत्वात्। अतः श्रुत्या-गार्हपत्याङ्गत्वमेव। न च श्रुतेः करणत्वमात्राभिधायित्वेन गार्हपत्य-निरूपितत्वस्य वाक्याधीनत्वान्नायं श्रुतिलिङ्गविरोध इति वाच्यम्। तथात्वेऽपि ब्राह्मणवाक्यत्वेन मन्त्रलिङ्गापेक्षया* यद्यप्यन्यदेवत्यः पशुरितिवत्प्रबलत्वोपपत्तेः। वस्तुतस्तु यथा न केवलया श्रुत्या विरोधो नैवं वाक्येनापि। गार्हपत्यसमीपे इत्येवमुपपत्तेः। अत-स्तोभयविरोधत्वेऽपि प्रधानेन व्यपदेशा भवन्तीति न्यायेन श्रुति-लिङ्गविरोधोदाहरणत्वम्।

लिङ्गयोर्विरोधे मुख्यसामर्थ्येन गौणस्य बाधः। लिङ्गवाक्ययोस्तु स्योनन्ते इति सदनकरणप्रकाशकस्य पूर्वार्धस्य तस्मिन्सीदेत्युत्तरार्धेन सादनप्रकाशकेन तस्मिन्कस्मिन्निति विभागे साकाङ्क्षैकवाक्यत्वात्स-कलस्य मन्त्रस्य सदनसादनयोरन्यतरत्रोभयत्र वा प्रतिष्ठापन एव वाऽस्य तस्मिन्निति पदसन्निधिरूपेण वाक्येन विनियोगे प्राप्ते-पिते, ततः पूर्वप्रवृत्तेन लिङ्गेन तत्तदाख्यातस्य मुख्यविशेष्यत्वेन स्वार्थबोधकस्य परोपसर्जनकत्वकल्पने प्रमाणाभावात्तच्छब्दस्य च सा वैश्वदेवीतिवद्वाक्यान्तरोपस्थितार्थपरामर्शकत्वेनापि चरितार्थत्वात्प्रत्ये-कमेव विनियोग इति।

वाक्ययोर्विरोधे उपांशुत्वस्य एवा एषा यज्ञस्येति व्यपेतयज्ञ-पदैकवाक्यत्वाद्यज्ञभागधर्मत्वं, तस्माद्यत्किञ्चित्प्राचीनमग्नीषोमीयात्ते-

---

* लिङ्गाद्यपेक्षया,— इति ग॰ पुस्तके पाठः।

नोपांशु चरन्तीत्यनेन सन्निहितयत्किञ्चित्पदैकवाक्यतयाऽवगत-
पदार्थधर्मत्वेन बाध्यते ।

वाक्यप्रकरणविरोधे च वेदधस्य वाक्यावगतेन पौर्णमास्यङ्गत्वेन
प्रकरणावगतदर्शाङ्गत्वबाधः ।

यत्तु अग्नीषोमादिपदैकवाक्यतापन्नानां इदं हविरित्यादि-
पदानाममावास्याङ्गदेवताप्रकाशनार्थत्वं प्राकरणिकं वाक्येन बाध्यत
इत्युदाहरणमुक्तम् मूले । तच्छ्रुतिलिङ्गविनियुक्तस्य सिद्धरूपत्वेन
प्रकरणाविषयस्य च सूक्तवाकस्य मुख्यप्रकरणविनियोज्यत्वप्रसक्त्यभावे-
ऽपि अधिकाराख्यगौणप्रकरणस्यापूर्वसाधनत्वलक्षणातात्पर्यग्राहकस्य
प्रसक्तत्वात्तद्बाधाभिप्रायेण द्रष्टव्यम् । प्रकरणयोर्विरोधे महाप्रकरण-
मवान्तरप्रकरणेन ।

प्रकरणक्रमयोर्विरोधे अक्षैर्दीव्यतीत्यादिविदेवनादीनां सन्नि-
धानादभिषेचनीयाख्यसोमयागाङ्गत्वप्रसक्तौ प्रकरणाद्राजसूयाङ्गत्वम् ।
न चाभिषेचनीयस्यापि फलवत्त्वेन प्रकरणग्रहः । तस्य विकृतित्वेन
क्लृप्तोपकारप्राकृताङ्गनिराकाङ्क्षस्य तदभावात् ।

न च विकृतावपि यत्प्राकृताङ्गानुवादेन वैकृतमङ्गं वाचनिकं
विधीयते यथा शृपणादि, तस्यापि विकृतिगताङ्गाकाङ्क्षायामनि-
वृत्तायामेव विधेयत्वात्तत्सन्दष्टस्य तत्पूर्वभावित्वे सति प्रधानोत्तर-
भाविनोऽपूर्वाङ्गस्य वा प्रकरणेनैव ग्रहणोपपत्तेः विदेवनादीनामप्य-
भिषेचनीयोत्तरमुक्तविधाभिषेकपूर्वभावित्वेन पाठात्प्रकरणग्रहणोप-
पत्तिरिति वाच्यम् । प्राकृताङ्गानुवादेन विहितस्याप्यपूर्वाङ्गस्योप-
होमवद्विकृत्याकाङ्क्षायां निवृत्तायामेव विधानात् । यस्य हि

प्राकृतकार्यापपन्नतया वैकृताङ्गस्य विधानं यथौदुम्बरत्वप्ररादेस्तस्यै-वानिवृत्ताकाङ्क्षायां विधानम्। तत्सन्दष्टस्यैव च तत्पूर्वभाविनो वा प्रधानोत्तराङ्गस्य विकृतिप्रकरणेन ग्रहणम्। अभिषेकस्य तु प्राकृत-कार्यापन्नत्वाभावान्न तत्पूर्वपठितानां विदेवनादीनामभिषेचनीय-प्रकरणग्राह्यत्वोपपत्तिः।

वस्तुतस्तु अभिषेकस्यापि स्वतन्त्रोत्पन्नस्य प्रकरणाद्राजसूयाङ्गत्वा-वगतेर्माहेन्द्रस्तोत्रं प्रत्यभिषिच्यत इत्यत्र प्रतिशब्दयोगेन कालार्थः संयोग इति वक्ष्यते। अतो विदेवनाद्यभिषेकान्तानां सर्वेषामेव सन्नि-धानादिनाऽभिषेचनीयाङ्गत्वप्रसक्तौ प्रकरणेन तद्बाधः। न च राजसूय-स्यापि प्रत्येकं विकृतित्वात्प्रकरणाभावः। पवित्राद्दारभ्य क्षत्रस्य धृतिं यावद्राजसूयत्वधर्मपुरस्कारेण　वाचनिकाङ्गाम्नानात्तत्सन्दष्टविदेव-नादीनां प्रकरणग्राह्यत्वोपपत्तेः। एवं प्रकरणस्य क्रमान्तरैरपि उदा-हरणान्यूह्यानि। एवं क्रमयोर्विरोधे सन्निधानेन याज्यादयस्य काम्ये-ष्ट्याग्नेयाङ्गत्वे अनियमेन प्रसक्ते यथाक्रमं पाठादाद्यस्याद्याङ्गत्वम्।

क्रमसमाख्ययोर्विरोधे पौरोडाशिकसमाख्याते काण्डे समाम्ना-तस्य शुन्धध्वमिति मन्त्रादेः सन्निधानात्साम्नाय्याङ्गत्वम्। न च महाधिकारेण सन्निधिबाधः। तस्यापि वाचनिकाङ्गसन्दष्टत्वेन बलवत्त्वात्। न चैवं तस्य प्रकरणत्वापत्तिः। मन्त्रस्य सिद्धरूपत्वेन लिङ्गविनियोज्यत्वेन च प्रकरणाविषयत्वात्। सन्निधानस्यापि समा-ख्यावदपूर्वसाधनत्वलक्षणातात्पर्यग्राहकत्व एव बलाबलं न तु विनि-योगे। तच्च तूदाहरणान्तरं मृग्यम्। एवं समाख्ययोर्विरोधे आध्वर्यवमिति सामान्यसमाख्याया याजमानमिति विशेषसमा-

स्यथा बाधः। एवं छन्दरितब्यन्तरितादिप्रमाणस्य पूर्वैः सह विरोधे शेषानेकत्वे च उदाहरणानि कौस्तुभे द्रष्टव्यानि।

स चायं श्रुतिलिङ्गादिबाधोऽप्राप्तबाधः। तत्त्वं चाङ्गताबोधकलिङ्गादिकल्प्यप्रमाणप्रतिबन्धकत्वम्। पूर्वपूर्वप्रकारेण हि अङ्गत्वेऽवधारिते निराकाङ्क्षत्वादुत्तरोत्तरतः पूर्वपूर्वप्रमाणकल्पनैव नोदेतीति। सोऽयमप्राप्तबाधः। एवं गृहमेधीये आज्यभागौ यजतीत्यादावपि। अन्यच्च सामान्यविशेषनित्यनैमित्तिकभावादौ प्राप्तबाधः। तत्त्वञ्च क्लृप्तस्य बोधकस्य विशेषविषयताप्रतिबन्धकत्वम्। सामान्यशास्त्रादेर्हि विशेषशास्त्रादिना पदहोमादिविषयतामात्रं प्रतिबध्यते। न तु सामान्यशास्त्रमपि। तस्य क्लृप्तत्वेनाकल्पनीयत्वात्। होमान्तरेष्वप्याहवनीयाभावापत्त्या मिथ्यात्वस्यापि कल्पयितुमशक्यत्वाच्च।

अतएव येन सामान्यशास्त्रमेव पूर्वमालोचितं, तस्य विशेषादर्शनजनितभ्रम एव विशेषविषयविषयको विशेषशास्त्रेण बाध्यते। एवं यत्रापि न तौ पशौ प्रकरोतीत्यादौ शास्त्रप्राप्तस्य निषेधस्तत्रापि प्रापकशास्त्रस्य यद्यपि निषेधस्य प्राप्तिसापेक्षत्वेनोपजीव्यत्वादत्यन्तबाधानुपपत्तेर्विशेषविषयत्वमवश्यकम्, तथापि तत्र विकल्पाङ्गीकारात्तदभावपक्षे विशेषविषयत्वप्रतिबन्धात्रोक्तलक्षणाव्याप्तिः। यथा च तत्र रागप्राप्तनिषेधवत् भ्रान्तिप्राप्तस्य बाधमङ्गीकृत्य न विकल्पस्तथा कौस्तुभे द्रष्टव्यम्। वक्ष्यते चात्रापि दशमे। अतः सिद्धं बाधस्य द्वैविध्यम्॥३॥४१॥

अहीने वा॥ एवं विरोधे बलाबलं निरूप्याधुना विरोध एव

क्वास्ति क्व नास्तीति चिन्तार्थं उत्तरः प्रपञ्चो यावदध्यायसमाप्ति । ज्योतिष्टोमे उपसदो विधाय तिस्र एव साह्नस्योपदो द्वादशाहीनस्येति श्रुतम् ।

तत्र द्वादशत्वम् किं द्वादशाहे निविशते प्रकरण एवेति चिन्तायां, त्रित्वस्य तावदुपसदनुवादेन विहितस्य वाङ्नियमन्यायेन स्वापूर्वसाधनीभूतोपसदर्थत्वादुपसदाञ्च प्रकरणाज्ज्योतिष्टोमसमाचाङ्गत्वावगतेः साह्नपदं श्रुत्या समाप्यमानत्वात्तदनुवादमात्रं न तूद्देश्यविशेषणं, वाक्यभेदाद्वैयर्थ्याच्च । अतस्तु तद्वदेव द्वादशत्वमपि तदनुवादेन विधीयमानमुपसदर्थमेव ।

न च तस्याहीनोद्देशेन विधिः । उपसदुपसर्जनत्वेन श्रुतस्य तस्याहीनसम्बन्धानुपपत्तेः । तस्यावृत्त्या द्वादशत्वोपपत्तेश्च । द्वादशाहप्रकरणपठितवाक्यान्तरेण तस्य तत्र प्राप्तत्वाच्च । अतोऽस्यापि त्रित्वेन विकल्पः । अहीनपदं न हीयत इत्यादिव्युत्पत्त्या नञ्समासमङ्गीकृत्य ज्योतिष्टोमानुवादकम् । सर्वे ह्यन्ये क्रतवो विकृतित्वादेनमपेक्षमाणा न जहति ।

अथ नायं नञ्समासस्तथात्वे तस्य तत्पुरुषत्वात् तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इति सूत्रेण प्रकृत्या पूर्वपदमित्यनुवृत्तिसहितया अव्ययाख्यस्य नञः पूर्वपदस्योदात्ताख्यप्रकृतिस्वरत्वविधानादाद्युदात्तत्वापत्तेः । अपि तु मध्योदात्तत्वादह्नः खः क्रतौ इति सूत्रेण तस्य समूह इत्यनुवृत्तिसहितया अहःशब्दस्य क्रतुसमूहवाचि-खप्रत्ययान्तत्वविधानात्तस्य आयनेयीनीयियः फढखछघां प्रत्ययादीनामिति सूत्रेणादेशविधानात् अयं शब्दः खप्रत्ययान्तः ।

तथात्वे आद्युदात्तश्चेति सूत्रात् प्रत्ययादेरीकारस्योदात्तस्वर-सिद्धिः ।

न चेकारस्यैनादेशावयवत्वात् कथं स्वप्रत्ययावयवत्वमिति वाच्यम् । अयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति स्मृत्या प्रत्यय-स्वरसिद्ध्यर्थं ईनादेशस्यापि प्रत्ययोपदेशकालत्वरूपोपदेशिवद्भावस्य विहितत्वात् । अतो नायं नञ्समास इति चेत् ।

तथापि प्रकरणानुरोधादहीनशब्दस्य ज्योतिष्टोमे बहुदिन-कत्वसादृश्येन गौणतयोपपत्तेः । वस्तुतस्तु अहःसाध्यक्रतुसमूहत्वस्य शक्यतावच्छेदकस्य ज्योतिष्टोमेऽप्यभ्याससमूहात्मके सत्त्वादहीनशब्दस्य मुख्यवृत्त्यैवानुवादत्वोपपत्तिरिति प्राप्ते ।

आस्तां तावदहीनपदं, एवकार एव तावत् चित्वातिरिक्त-संख्यायाः साधनत्वाभावमनुवदन् द्वादशत्वेन विकल्पं समूहे । किञ्चैवं प्रकरणादेव चित्वद्वादशत्वयोर्ज्योतिष्टोमसम्बन्धोपपत्तेः साङ्गाहीन-शब्दयोर्द्वयोरपि वैयर्थ्यप्रसङ्गः । अस्मन्मते तु एकेन अङ्गा समाप्य-मानत्वेन स्वल्पकर्मणः स्वल्पैव संख्योचितेति औचित्येन स्तुतिपरतया साङ्गशब्दस्य न वैयर्थ्यम् । किञ्च द्वयोः संख्ययोरेकार्थत्वेन विधौ शब्द-भेदो न युज्यते । अतोऽहीनपदं साङ्गादर्थान्तरपरमित्यप्यविवादम् ।

युक्तञ्चैतत् । तस्य समूह इत्यनुवृत्तिसहितया अङ्कः खः क्रताविति स्मृत्या वैदिकप्रयोगाच्च अहःसमूहसाध्यक्रतुविशेषत्व-स्यैव सत्रादिव्यावृत्तस्य यजतिचोदनाचोदितसुत्यासमुदायात्मकत्वस्यैव योगरूढ्याऽहीनपदशक्यतावच्छेदकत्वप्रतीतेर्न द्वादशत्वस्य ज्योतिष्टोमे निवेशसम्भवः । अतश्चाहीनसम्बन्ध्युपसदुद्देशेन द्वादशत्वविधिः । षष्ठी-

त्वे च परस्परसम्बन्धस्य प्राचीनमते व्युत्पन्नत्वाच्च विशिष्टोद्देशे वाक्यभेदः ।

वस्तुतस्तु, अहीनोद्देशेनातिदेशप्राप्तेः पूर्वप्रवृत्त्या द्वादशोपसत्त्वमेवानेन वाक्येन द्वादशत्वप्राप्तिफलकं, तां चतुर्भिरितिवद्विधीयते। द्वादशाहप्रकरणस्थवाक्यान्तरं तु शाखान्तरीयतया सत्रमात्रपरतया न विरुध्यते इति भाष्यकाराभिप्रायः।

वस्तुतस्तु द्वादशाहप्रकरणस्थवाक्यस्य सत्राहीनोभयसाधारणत्वादेवाहीनेऽपि द्वादशत्वप्राप्युपपत्तेरेकवाक्यतालाभाय प्रकरणपाठार्थवत्त्वाय चौचित्येन त्रित्वविधेरेवायमर्थवादः। महतः कर्मणो महती सङ्कोचिता न तु प्रकृत इति च स्तुतिः। अतो वाक्येन प्रकरणं बाधित्वा द्वादशत्वस्याहीनसम्बन्धावगतेर्न तेन ज्योतिष्टोमे द्वादशत्वम्। मूले तु षष्ठ्या भाक्तश्रुतित्वमादाय श्रुतिप्रकरणविरोधोपन्यासइति द्रष्टव्यम् ॥३॥४२॥

द्वित्वबहुत्व ॥ ज्योतिष्टोम एव उपास्मै गायता नर इति नित्यां प्रतिपदं विधाय, युवं हि स्थः स्वःपती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्, एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्य इति श्रुतम्।

तत्राद्यवाक्ये द्वयोर्यजमानयोरिति यदि सप्तमी, तदा सा निमित्तत्वपरः। यद्यपि च पृथक् विभक्तिश्रवणं, तथापि हविरार्त्यधिकरणन्यायेन पाक्षिकत्वाभावेन प्रत्येकं निमित्तत्वापर्यवसानात् प्रधानभूतनिमित्तत्वानुरोधेन मिलितयोरेव द्वित्वावच्छिन्नयजमानत्वावच्छिन्नयोर्निमित्तत्वं प्रतिपाद्यते।

यदि तु षष्ठी, तदाऽधिकारित्वाख्यसम्बन्धानुवादिका सती स्ववैयर्थ्यपरिहारार्थं पदद्वयेऽपि लक्षणामङ्गीकृत्य लाघवाद्द्वित्वयजमानत्वयोरेकं व्यासज्यवृत्तिनिमित्तत्वं प्रतिपादयति। विशेषणविशेष्यभावे विनिगमनाविरहात्। एवं बहुभ्यो यजमानेभ्य इति तादर्थ्यचतुर्थ्याऽपि अधिकारित्वसम्बन्धानुवादिकया उक्तविधे निमित्तत्वे लक्षणा। अतश्च नान्यतराविवक्षाप्रसङ्गः। निमित्ते च प्रतिपदुद्देशेन मन्त्रविधानेऽपि विजातीयत्वान्नानेकोद्देश्यता। प्रकरणाद्वा प्रतिपत्सम्बन्धलाभ इति पक्षद्वयेऽप्यविवादम्।

तदिहेमौ मन्त्रौ ज्योतिष्टोम एव निविशेते उत द्विसङ्ख्यजमानके कुलायाहीनादाविति चिन्तायाम्। प्रकरणाविरोधात् प्रकृतएव निवेशः। न च तत्र निमित्ताभावः। आख्यातेन वसन्ते वसन्ते ज्योतिषा यजेतेत्यादिना उपादेयकर्तृविशेषणत्वेनोक्तस्य विवक्षायामपि नित्यत्वेन ज्योतिष्टोम यथाशक्त्युपबन्धस्य वक्ष्यमाणत्वाद्यद्येको न शक्नुयात् तदा द्विसङ्ख्यजमानकत्वप्राप्तेः प्रतिपद्विधानसम्भवात्। अथवा यजमानशब्दस्य यागकर्तृमात्रवचनस्य पत्न्यामपि सम्भवादाद्यवाक्ये तावत् स्त्रीलिङ्गत्वे बाधकाभावात् पत्नीद्वित्वे स मन्त्रः। द्वितीयवाक्येऽपि पाशाधिकरणन्यायेन लिङ्गानुरोधेन प्रकरणबाधानुपपत्तेर्व्यत्ययानुशासनेन पुंलिङ्गस्य स्त्रीत्वपरत्वावगतेः पत्नीबहुत्वे द्वितीयोमन्त्रः। नित्यात्तु प्रतिपत्त्येक इति प्राप्ते।

नित्यत्वेऽपि ज्योतिष्टोमस्य नैकत्वे यथाशक्तिन्यायविषयता। उत्पत्त्यादिवाक्येषु समानाभिधानश्रुत्या भावनायामन्वितस्य तस्यान्तरङ्गत्वेनाशक्तौ दक्षिणापरिमाणाद्यङ्गान्तरबोधेनास्यैवानुग्राह्यत्वात्।

किञ्च यत् कृतिमाध्यत्वेनानुष्ठेयतया प्रसक्तं तत्रैव यथाग्रुक्त्युपबन्धो न त्वननुष्ठेये कालादौ । अतश्च तद्वदेवास्यापि न तन्न्यायविषयतेति न प्रकृते यागे द्वित्वबहुत्वे । न च यजमानशब्दः पत्नीपरः, पुंस्त्वेव प्रचुरप्रयोगेण शक्त्यवगमेन लक्षणायां प्रमाणाभावात् । यजमानेभ्य-इति पुंल्लिङ्गस्य प्राप्ता इत्यस्य मे * * 'मिव* निषिद्धत्वेनागतिक-व्यत्ययानुशासनाङ्गीकारानुपपत्तेश्च'। अतश्च वाक्येन प्रकरणबाधा यत्र,. एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम्, एको द्वौ बहवो वा यजेरन्नित्याहत्यैव कुलायाहीनादिषु द्वित्वबहुत्वविधानं तत्रैवास्योत्कर्षः । न चात्र तत्क्रतूपस्थापकाभावः । प्रतिपत्तृसम्बन्धेनैव सामान्यतः क्रतुसम्बन्धेऽवगते निमित्तबलेन तद्विशेषोपस्थितौ बाधकाभावात् ॥३।४३॥

जाघनी ॥ दर्शपूर्णमासयोः पत्नीसंयाजावान्तरप्रकरणे, जाघन्या पत्नीः संयाजयन्तीति श्रुतम् । तत्र किमनेन वाक्येनाग्नीषोमीय-पश्वनुनिष्पन्नजाघन्युद्देशेन पत्नीसंयाजा विधीयन्ते । ततश्चैतस्य विधा-नस्य प्रकरणादुत्कर्षः । उत पत्नीसंयाजोद्देशेन जाघनीद्रव्येण विधी-यत इति चिन्तायाम् ।

जाघनीशब्दस्योत्तरार्धादिशब्दवदेकदेशद्रव्यवाचित्वेन जाघन्याः परप्रयुक्तत्वावगमात् प्रयोजनवत्त्वावगमेन प्रयाजशेषवदुद्देश्यत्वावगते-स्तृतीयया द्वितीयार्थलक्षणामप्यङ्गीकृत्य पत्नीसंयाजा एव तदुद्देशेन विधीयन्ते। एवञ्च द्वितीयविधिप्रकाराङ्गीकरणाल्लाघवम् । इतरथा तृतीयविधि†प्रकारापत्तेः ।

---

* सर्व्वत्रैवमेव पाठः ।

† इत्यमेव पाठ सर्व्वत्र । तृतीयविधि,- इति तु प्रतिभाति ।

एवञ्च वाक्येन प्रकरणबाधात् पत्नीसंयाजानां पश्वङ्गत्वमात्रप्रतीतावपि आज्येन पत्नीः संयाजयन्तीति वचनस्य निर्विषयत्वापत्तेः प्रकरणबाधायोगात्तेनारादुपकारकतया दर्शपूर्णमासाङ्गत्वावगमेऽप्यनेन वचनेन सन्निपत्योपकारकतया अग्नीषोमीयपशुयागाङ्गतया विधिर्नानुपपन्नः ।

न च जाघन्याः परप्रयुक्तपश्वनुनिष्पन्नत्वस्य लोकेऽपि सम्भवाद्व्यभिचारिक्रतुसम्बन्धाभावेन कथं यागीयत्वोपस्थितिः । अग्नीषोमीयप्रकरणे श्रुतेन जाघन्या पत्नीः संयाजयन्तीति वाक्यान्तरेण प्रकृतापूर्वसाधनीभूतजाघन्युद्देशेन पत्नीसंयाजविधायकेन यागसम्बन्धोपस्थितौ अंशुं गृह्णातीतिवदनारभ्याधीतेऽप्यस्मिन् क्रतुसम्बन्धावगमोपपत्तेः ।

यत्तु कैश्चिदतिदेशादेव पत्नीसंयाजानां पशुयागसम्बन्धावगमात् प्राकरणिकं वाक्यं तद्धर्मककर्मान्तरविधायकं पूर्वपक्ष इत्युक्तम् । तदतिदेशेन पत्नीसंयाजानामारादुपकारकविधया पशुयागसम्बन्धावगमेऽपि तात्पर्यग्राहकाभावे अनारभ्याधीते वाक्ये जाघन्यास्तदीयत्वोपस्थितौ प्रमाणाभावादतिदेशेन सन्निधाने प्रकरणान्तरासम्भवेन कर्मान्तरत्वानुपपत्तेश्चोपेक्षितम् । तस्माद्वाक्येन प्रकरणं बाधित्वेदं विधानं अग्नीषोमीय उत्कृष्यत इति प्राप्ते ।

जाघनीशब्दस्य पश्ववयववाचित्वेऽपि उत्तरार्द्धादिशब्दवत् सम्बन्धिकत्वाभावात् लोकसिद्धद्रव्यजाघन्या एवाज्यवत् पत्नीसंयाजोद्देशेन विधिसम्भवे तृतीयाया लक्षणाङ्गीकरणे प्रमाणाभावः । अतिदेशात् प्राप्तानां पत्नीसंयाजानामारादुपकारकत्वबाधेन पशु-

प्रकरणस्थवाक्येन सन्निपत्योपकारकत्वलाभे दर्शपूर्णमासप्रकरणस्थ-वाक्यवैयर्थ्यापत्तिश्च । अतः पत्नीसंयाजोद्देशेनैव जाघनीविधिः ।

न च प्राप्तकर्मानुवादेन पत्नीनामपि विधाने देवतात्वेन प्राप्त्यु-ल्लावनेऽपि च विशिष्टोद्देशेन वाक्यभेदापत्तिरिति वाच्यम् । अवा-न्तरप्रकरणादेव कर्मविशेषोद्देशसम्भवेनावाक्यभेदात् । अतो नास्य प्रकरणादुत्कर्षः । अग्नीषोमीयप्रकरणस्थवाक्यन्तु विकल्पेन प्राप्ताया-नियमार्थमिति वक्ष्यते । न चैवं तत्र दृष्टस्थजाघन्या एव नियम-सम्भवेन पश्वनुनिष्पन्नायाग्रहणे प्रमाणाभावः । प्रतिपत्त्यन्तरा-भावेनोपस्थितायास्तस्यास्त्यागे प्रमाणाभावादिति तत्रैव वक्ष्य-माणत्वात् ॥३॥४४॥

सन्तर्दनम् ॥ ज्योतिष्टोमे अधिषवणफलके प्रकृत्य, न सन्तृण-त्तीत्यनेनासन्तर्दनं विधायाथो खलु दीर्घसोमे सन्तृद्ये धृत्यै इत्यनेन सन्तर्दनं विहितम् । सन्तर्दनं नाम, द्वयोः फलकयोः संश्लेषप्रदेशे तनूकरणेन एकोपर्यपरस्य संश्लेषः । तदिदं सन्तर्दनं किं प्रकरण एव निविशते उताग्निष्टोमान्यमात्रो उत्कृष्यत इति चिन्तायाम् ।

प्रकरणानुग्रहादनुत्कर्षः । न च वाक्यविरोधः । ज्योतिष्टोम-स्यापि इष्ट्याद्यपेक्षया दीर्घत्वात् सोमद्रव्यकत्वाच्च दीर्घसोमत्वोप-पत्तेः । अतश्च तत्रैव व्रीहियवादिवत्सन्तर्दनासन्तर्दनयोर्विकल्पः । यस्त्वत्र सूत्रे क्रयवदिति क्रयदृष्टान्तो विकल्पे दत्तः । स द्वादशे दशभिः क्रीणातीति वचनेन समुच्चयस्य वक्ष्यमाणत्वाद्वचनाभावं कृत्वा बोध्यः । अस्तु वा इष्ट्यादेरिहानुपादानात् तदपेक्षया दीर्घत्वस्य च नित्यत्वेन दीर्घसोमपदवैयर्थ्यापत्तेरष्टदोषदुष्टविकल्पस्य चान्याय्यत्वा-

दीर्घस्य यजमानस्य सोमो दीर्घसोम इत्येवं षष्ठीतत्पुरुषमपि प्रकरणानुरोधेनाङ्गीकृत्य यजमानदैर्घ्ये निमित्ते मन्तर्दनविधानम् ।

यदि तु निषादस्थपत्यधिकरणन्यायेन कर्मधारयस्यैव न्याय्यत्वात् यजमानदैर्घ्येण च फलकविदारणप्रसक्तस्तद्वारकत्वेन मन्तर्दनश्रुतेरसम्भवेन धृत्या इत्यर्थवादानुपपत्तेर्दीर्घश्चासौ सोमश्चेति कर्मधारय एवाङ्गीक्रियते । तथापि ज्योतिष्टोम एव उक्थादिसंस्थान्तरयुक्ते प्रदानविवृद्ध्या प्रदेयसोमविवृद्धेरावश्यकत्वात् दीर्घसोमत्वोपपत्तेर्वाक्यप्रकरणयोरविरोधान्निवेशः ।

न च प्रदानविवृद्धेस्तोयादिना सम्पादनम् । सोमद्रव्यकस्य यागस्य विना वचनं द्रव्यान्तरसंसृष्टेन सोमेन करणायोगात् । न च त्रिपर्वदशमुष्टिलक्षणसोमपरिमाणबाधः । स्थूलदीर्घपर्वसोमग्रहणेन तद्बाधाभावात् । अत एव सोमपदेन यागलक्षणाऽभावात् सोमदीर्घपर्वत्वमेव मन्तर्दने निमित्तमित्यपि शक्यं वक्तुम् ।

वस्तुतस्तु । त्रिपर्वदशमुष्टिपरिमितसोमग्रहणोत्तरमवशिष्टानंशूनुपसमूहतीत्युपसमूहनविधानात्तत्र चार्थवादे यद्वै तावनेव सोमः स्याद्यावन्तं मिमीते यजमानस्यैव स्यान्नापि सदस्यानां प्रजाभ्यस्त्वेत्यवशिष्टानंशूनुपसमूहतीति पूर्वोक्तमाननिन्दयोत्तरादोहनवश्यावदपेक्षितपरत्वप्रतीतेः कपिञ्जलाधिकरणन्यायस्याप्रवृत्त्या परिमाणाभावात् प्रदेयविवृद्धिः सुलभैव ।

न चैवमपि अग्निष्टोमसंस्थाया अङ्गत्वादन्यासां काम्यानां तिसृणां संस्थानाञ्च विकृतित्वेन स्वतःप्रकरणाभावात् ज्योतिष्टोमे च प्रदानवृद्ध्यभावेन प्रदेयवृद्ध्यभावात् कथं वाक्यप्रकरणयोरविरोध-

इति वाच्यम्। काम्यसंस्थासु ग्रहणविवृद्ध्या आश्रयभूतज्योतिष्टोमा-भ्यासे विवृद्धेरावश्यकत्वात् संस्थानां चतुर्णामपि स्वतःप्रकरणाभावे-ऽपि च ज्योतिष्टोमस्य सर्वत्रानुस्यूतत्वात् काम्यसंस्थाकज्योतिष्टोम-प्रयोगे सन्तर्दनविधानेन प्रकरणानुग्रहोपपत्तेः। अत एवाग्निष्टोम-संस्थाकज्योतिष्टोमप्रयोगेऽसन्तर्दनं प्रदानविरुद्धाभावादिति न विक-ल्पोऽपि। अत एव च दीर्घत्वस्यानुयोगिनः काम्यसंस्थाकज्योति-ष्टोमस्य प्रतियोगिनश्च नित्यसंस्थाकज्योतिष्टोमस्य प्रकरणादेव लाभादतिलाघवम्।

न चैवमितरसंस्थाकज्योतिष्टोमस्यापि प्रकरणे अङ्गीक्रियमाणे एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वा अथान्येन यजते गर्त्तपत्यमेव तद्भवतीत्यत्रापि एतच्छब्देनेतरसंस्था-कस्य ज्योतिष्टोमस्य ग्रहणापत्तेरग्निष्टोमसंस्थाकस्यैव प्रकरणात् ग्रहणं वक्ष्यमाणं विरुध्येतेति वाच्यम्। ज्योतिष्टोमत्वावच्छेदेनैव फलवत्त्वेन प्रकरणाङ्गीकारात्। अग्निष्टोमसंस्थाया अङ्गत्वेनेतराङ्गवत्प्रकरणाव-च्छेदकत्वानुपपत्तेश्च। एतच्छब्देन तु ज्योतिष्टोमत्वावच्छिन्नस्योक्ता-वपि अन्यशब्देन तद्विकृतिमात्रवाचकेन संस्थाप्रयुक्तत्वात् तासामपि ज्योतिष्टोमोत्तरकालविधिप्रतीतेरर्थादग्निष्टोमसंस्थाकस्यैव प्रथमं क-रणोपपत्तेः। अतो वाक्यप्रकरणयोरविरोधात् प्रकरण एव सन्त-र्दनस्य निवेश इति प्राप्ते।

भाष्यकारेण तावदिष्टापत्त्यैव सिद्धान्तितम्। पूर्वपक्षस्याद्य-प्रकारद्वयेनैव कृतः। वार्त्तिककारेण तु विकृतिमात्रे विवृद्धसोमके निवेश इत्युक्तम्। तस्यायमाशयः। दीर्घत्वं तावत् ग्रहणविवृद्धि-

प्रयुक्तसोमविवृद्धिकृतमिति भवतोऽप्यविवादम्। विवृद्धग्रहणानि च संस्थाङ्गानि वचनान्न तु ज्योतिष्टोमाङ्गानि। अतश्च दीर्घसोमत्वस्य ज्योतिष्टोमसम्बन्धाभावाद्विकृतिमात्रपरत्वमिति।

न चोक्तग्रहणानां ज्योतिष्टोमाङ्गत्वाभावेऽपि संस्थाद्वारा तत्सम्बन्धसत्त्वात्तस्य दीर्घसोमत्वोपपत्तिः। सर्वतोमुखादौ पूर्वादिदिक्षु अग्निष्टोमादिनानासंस्थाके दिगन्तरे दीर्घसोमत्वस्य सत्त्वादग्निष्टोमसंस्थाकेऽपि सन्तर्दनापत्तेर्यदङ्गग्रहणविवृद्धिप्रयुक्तविवृद्धप्रदेयकत्वं यत्प्रयुक्तविवृद्धप्रदेयकत्वमेव वा यत्र, तत्र तदपूर्वसाधनीभूतफलकसंस्कारकतया सन्तर्दनविध्यवगमादुक्तविवृद्धेश्च संस्थाप्रयुक्तत्वेन ज्योतिष्टोमप्रयुक्तत्वाभावात् तदङ्गत्वेन सन्तर्दनविध्यनुपपत्तेर्वाक्येन प्रकरणं बाधित्वोक्तविधसर्वविकृतावेव निवेशः। न तु संस्थास्वेव, तासां विकृतित्वेन प्रकरणाभावादिति।

अत एव सन्तृद्यादिति धातोः सकर्मकत्वादनुपक्तद्वितीयान्तपदेन फलकस्यैव संस्कार्यत्वावगमाद्दीर्घसोमस्योद्देश्यत्वतद्विशेषणत्वयोरसम्भवेन निमित्तत्वमेव। अत एव नायं बहुव्रीहिर्न वा सोमपदेन यागलक्षणया स्वराक्रान्तोऽपि तत्पुरुषः। अतश्च तामेवोक्ता + + तत्पुरुषः* समासत्वाच्च न निमित्तेऽपि विशिष्टोद्देशे वाक्यभेदः॥३।४ ५॥

सङ्ख्यायुक्तं॥ अनारभ्याधीतः प्रवर्ग्यो यत्प्रवर्ग्यं प्रवृणक्तीति श्रुतः। तस्य च पुरस्तादुपसदां प्रवर्ग्येण प्रवृणक्तीति ज्योतिष्टोमाङ्गत्वेन विनियोगः। अव्यभिचरितक्रतुसम्बन्धसहकृतद्विरुक्तत्वन्यायेन तद्-

---

* इत्यमेव पाठः सर्व्वत्र।

पस्थितेः। न चोपसदङ्गत्वमेव किं न स्यादिति वाच्यम्। उपसत्-पदस्य पुरस्तात् कालप्रतियोगित्वेन स्वार्थोपस्थापकस्योद्देश्यसमर्पक-त्वाभावात्। उपस्थितत्वात् तद्वाचकपदान्तरकल्पनयोद्देश्यत्वाङ्गीकारे तु उपसदां फलवत्त्वज्ञानार्थं ज्योतिष्टोमोपस्थितेरावश्यकत्वात् लाघ-वेन तदर्थत्वोपपत्तेः। कोषितकिब्राह्मणे* प्रकरण एव प्रवर्ग्याम्नानाच्च। तत्र च, न प्रथमयज्ञे प्रयुञ्ज्यादिति श्रुतम्।

तत्र प्रथमयज्ञपदेन सर्वसंस्थः सर्वावस्थश्च ज्योतिष्टोमोऽभिधीयते उत तदीयप्रथमप्रयोगमात्रमिति चिन्तायाम्।

प्रथमयज्ञशब्दो ज्योतिष्टोमनाम, एष वाव प्रथमो यज्ञो-यज्ञानां यज्ज्योतिष्टोम इति सामानाधिकरण्यात्। तस्य प्रथमं प्रयुज्यमानत्वेन प्रवृत्तिनिमित्तसत्त्वाच्च। यद्यपि च संस्थानामन्यपदे-नाभिधानात् तासु ज्योतिष्टोमोत्तरकालत्वविधानात् न सर्व-संस्थाकज्योतिष्टोमस्य प्रथमं प्रयुज्यमानत्वम्। तथापि ज्योतिष्टोम-त्वसामानाधिकरण्येन तावत् तदस्तीति प्रवृत्तिनिमित्ताविघातः।

अतो वाक्यात् प्रकरणाच्च ज्योतिष्टोमत्वावच्छेदेनैवायं प्रतिषेधः पर्युदासो वा। ज्योतिष्टोमभिन्ने प्रवृणक्तीति। अन्यथा विकल्पा-पत्तेः। यत्त्वग्निष्टोमे प्रवृणक्तीति वचनं तत्पर्युदस्तप्रतिप्रसवार्थम्। तदपि च, कामं तु योऽनूचानः श्रोत्रियः स्यात् तस्य प्रवृञ्ज्यादि-त्यनेनोपसंह्रियते। तेनानूचानस्य श्रोत्रियस्याग्निष्टोमसंस्थाकज्योति-ष्टोमे नित्यं करणम्। अन्यज्ज्योतिष्टोमेति समकरणम्†। विकृतिषु नित्यं करणमिति प्राप्ते।

---

* कौषीतकिब्राह्मणे,—इत्यत्र पाठः। † इत्थमेव पाठः सर्वत्र।

प्रत्येकशक्त्यैवार्थबोधोपपत्तौ अतिरिक्तशक्तिकल्पनायां प्रमाणाभावात् प्रथमशब्दस्य चाप्रवृत्तप्रवर्त्तनविषयवाचित्वादाद्यप्रयोगपरत्वावगतेर्यज्ञशब्दस्य च लक्षणया प्रयोगपरत्वं प्रकरणाज्ज्योतिष्टोमरूपयज्ञपरत्वमेव वाऽङ्गीकृत्य प्रथमयज्ञपदेन ज्योतिष्टोमप्रथमप्रयोगोऽभिधीयते। स चाग्निष्टोमसंस्थाकस्य ज्योतिष्टोमस्य पाञ्चमिकन्यायेन प्रथमं यजमानोऽतिरात्रेण यजेतेति वचनादतिरात्रसंस्थाकस्य च। अत उभयत्राप्यनेन वचनेन प्रवर्ग्यस्य प्रतिषेधः पर्युदासो वा। न तु विकृत्यन्तरे। तत्रोपदेशातिदेशाभ्यां तदप्राप्तेः।

न च ज्योतिष्टोमे द्वितीयादिप्रयोगापेक्षया प्राथम्यस्य विवक्षितत्वाद्विकृतावपि तद्द्वितीयादिप्रयोगापेक्षया प्राथम्यस्य सत्त्वात् कथं न तत्प्राप्तिरिति वाच्यम्। प्राथम्यस्य निरूपकापेक्षायां द्वितीयादिप्रयोगस्य निरूपकत्वाकल्पनात्। एष वाव प्रथमो यज्ञो यज्ञानामिति वचनेन ज्योतिष्टोमविकृतिमात्रस्यैव तदवधारणात्। अत एव प्रथमप्रयोगविषयोऽपि ज्योतिष्टोम एव बोध्यः।

तथाच प्रथमयज्ञशब्दो वाक्यशेषादैदिकप्रयोगाच्च निरूढलक्षणया सोमान्तरनिरूपितप्राथम्यवत्प्रयोगविषयज्योतिष्टोममेवाभिधत्ते। अन्यथा स्व-स्व-द्वितीयादिप्रयोगनिरूपितप्राथम्यवत्प्रयोगविषययज्ञमात्राभिधाने, आहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशाः सत्रमासीरन्नित्यादौ सत्रे यज्ञमात्रोत्तरकालताऽऽपत्तेः। अत उक्तद्विविधज्योतिष्टोमप्रथमप्रयोगे एव प्रवर्ग्यप्रतिषेधः।

वस्तुतस्तु। नायं प्रतिषेधस्तथात्वे न तौ पशौ करोतीतिवदतिरात्रप्रथमाहारेऽपि विकल्पापत्तेः। न च क्रियायाः स्वरूपेणोद्देश्य-

सम्बन्धित्वेन वा निषेध एव कल्प्यो यथोक्तस्थले। यत्र तु कारक-निषेधो यथा रात्रौ श्राद्धं न कुर्वीतेत्यादौ; तत्र निषेधस्य कारक-मात्रविषयत्वेन क्रियाविषयत्वाभावात् क्रियाविषयविधिविकल्पा* पादकत्वानुपपत्तिः। प्रकृते च प्रथमयज्ञशब्दस्य नोद्देश्यत्वपरत्वम्। अपि तु मध्यं प्रातःसवन इति वदधिकरणकारकत्वम्। अतश्च न विकल्पापादकत्वापत्तिरिति केषाञ्चिदुक्तं युक्तमिति वाच्यम्। कारकस्यापि प्रथमप्रयोगाधिकरणत्वस्य विधितः प्राप्तौ न्यायतौल्येन प्रथमप्रयोगाधिकरणत्वस्यैव विकल्पापत्तेरावश्यकत्वात्। अत एवाक्षेपेण यत्किञ्चित्कालप्राप्तौ रात्र्युपादानस्यैच्छिकत्वेन रागप्राप्त्या वैधत्वाभावान्न तन्निषेधस्य विकल्पापादकत्वम्। प्रकृते तु प्रथमप्रयोगाधिकरणत्वं नैच्छिकं प्रतिप्रधानं पुनरन्वयस्य वैधत्वात्। अतस्तन्निषेधोऽपि विकल्पापादक एव।

वस्तुतस्तु। प्रथमप्रयोगस्य उद्देश्यत्वमेव शास्त्रदीपिकायामुक्तमिति न किञ्चिदेतत्। अतो नानूयाजेष्विति वत्पर्युदास एवायमनारभ्यवादवाक्यशेषः। उक्तविधप्रथमप्रयोगभिन्ने प्रवृञ्ज्यादिति। ततश्च प्रापकप्रमाणाभावात् प्रथमप्रयोगे अकरणप्रसक्तावग्निष्टोमे प्रवृणक्तीति वचनं वस्तुतोऽत्यन्ताप्राप्तप्रापकमपि प्रतिप्रसवफलकं यदग्निष्टोमसंस्थाकत्वे निमित्ते प्रथमप्रयोगेऽपि नित्यं प्रवर्ग्यविधानार्थम्। न तु विकल्पेन। विकल्पे प्रमाणाभावात्।

अस्य च नान्यविषयता। सामान्यविधितएव सर्वत्र प्राप्तत्वादिति

---

* विकल्पा,—इति ख. ग॰ पुस्तकयोः पाठः। एवं परत्र।

प्रथमप्रयोगविषयतैव । अनेन च काममित्यनूचानवाक्योपसंहारः । तेनाग्निष्टोमसंस्थाकप्रथमप्रयोगे अनूचानस्य नित्यकरणम् । तथा श्रोत्रियस्यापि । अनूचानो वेदाध्यापकः । तेन क्षत्रियवैश्ययोर्निवृत्तिः । श्रोत्रियः प्रकर्षेण वेद-तदर्थ-ज्ञः । कामं पदेन प्रकर्षाभिधानात् । तस्येत्येकपदेनोभयोः कर्त्रोर्विधानाच्च न विधेयानेकत्वम् । तदन्येषामग्निष्टोमप्रथमाहारेऽपि नित्यमकरणम् ।

यत्तु वार्त्तिके अनूचानादेर्विकल्पोऽन्येषां नित्यमकरणमित्युक्तम् । तत्प्रौढिमात्रम् । अत एव पार्थसारथिना अनूचानादेर्नित्यमेव प्रयोग इत्युक्तम् । यदि तु तदेव समर्थनीयमित्याग्रहस्तदा कामं पदेन विकल्पाभिधानादग्निष्टोमवाक्यस्य च तेनोपसंहारादनूचानादेर्विकल्प इत्येवं समर्थनीयम् । सर्वथा अतिरात्रप्रथमाहारे प्रतिप्रसवाभावान्नित्यमेवाप्रयोगो विकृतौ तु प्रथमप्रयोगे नित्यं करणमिति स्थितम् ॥३॥४६॥

पौष्णम् ॥ दर्शपूर्णमासप्रकरणे, पूषा प्रपिष्टभागोऽदन्तको हि स इति श्रुतम् । तत्र किं दर्शपूर्णमासयोरेवाङ्गत्वेन कर्मान्तरविधिरुत पूषदेवत्ययागे पेषणमात्रविधिरितिचिन्तायाम् । न तावद्भागशब्दलक्षितयागोद्देशेन पेषणविधिः । एकप्रसरताभङ्गापत्तेः । पूषपदेन विशेषणे वाक्यभेदाच्च । क्तप्रत्ययार्थद्रव्योपसर्जनपेषणस्य यागान्वयानुपपत्तेश्च । अत एव न पूषपदमेव शक्यार्थस्य लक्षितपूषदेवत्ययागस्य वोद्देश्यतापरम् । पूष्णोऽव्यभिचरितक्रतुसम्बन्धाभावेन क्रतूपस्थितौ प्रमाणाभावाच्च । अतो गुणद्रव्यदेवताविशिष्टकर्मान्तरविधिरेवायमिति प्राप्ते ।

प्रपिष्टभागपदेन तावद्भागो भजनीयं सेव्यं यस्येति व्युत्पत्त्या सेवनासम्भवेऽपि सम्बन्धमात्रं देवत्वादिव्यवहारप्रमाणकं प्रपिष्ट-पूष्णोः प्रतीयते। तच्च यागं विनाऽनुपपन्नमिति यागमनु-मापयतीत्येतावत्तु उभयोरविवादम् । तत्र च विशेषणमात्रसम्भवे विशिष्टविध्यादिकल्पनस्यान्याय्यत्वात् प्रमाणाभावेन नापूर्वयागान्त-रानुमितिरित्यपि प्रथमतोऽवगतमेव ।

अतश्चानुमीयमानयागे अनुमापकपूषसम्बन्धेन प्रसिद्धपूषदेव-त्ययागत्वोपस्थितिरपि सुलभैव । अतश्च यागविशेषानुमितेरेव तात्पर्यग्राहकत्वात् पूषपदं विजातीयापूर्वसाधनीभूतपूषदेवतापरम् । तदुद्देशेनैव च स्वजन्ययागप्रदेयचरुप्रकृतित्वसम्बन्धेन प्रपिष्टद्रव्यकत्वं प्रपिष्टभागसमासार्थो विधीयते । सम्भवति च द्रव्योद्देशेन देवता-विधिवद्देवतोद्देशेनापि निरुक्तसम्बन्धेन द्रव्यविधिर्विशेषणमात्रविधि-फलकः । यद्यपि च प्रकृतिद्रव्यस्याप्यतिदेशेन सम्भवत्प्राप्तिकता; तथापि ततः पूर्वं विधानाङ्गीकारान्नैकप्रसरताभङ्गाद्यापत्तिः । पेषणमात्रविधिस्तु फलमिति गुणादिप्रमाणाभावाच्च कर्मान्तरता । एतेन पूषपदेन तद्देवत्यकर्मलक्षणया तदुद्देशेन प्रपिष्टभागपदल-क्षितपेषणविधिरिति प्रकाशोऽपि, निषादस्थपत्यधिकरणन्यायेन लक्षणापेक्षया कर्मान्तरविधेरेव न्याय्यत्वादषट्कर्त्तुः प्रथमभक्ष-इत्यादावतिप्रसङ्गापत्तेश्चोपेक्षितः । तत्रास्मदुक्तप्रकारस्तु भक्षस्य प्रत्यक्षविधिनैव प्राप्तत्वेन ततः पूर्वप्रवृत्त्यङ्गीकारानुपपत्तेरसम्भवी । तदेतत्सर्वं सिद्धमेवोत्तरविवक्षया स्मार्यत इति प्राञ्चः ॥३॥४७॥

तत्सर्वार्थम् ॥ तत्पेषणं पूषदेवत्ये चरौ पशौ पुरोडाशे च स्यादुत

चरावेवेति चिन्तायाम् । अविशेषाद्दन्तकलहेतुवशाच्च सर्वचेति प्राप्ते ।

पुरोडाशे तावत्पाकात्पूर्वं पेषणस्य प्राप्तत्वादेव विधानं व्यर्थम् । तदुत्तरं तु पुरोडाशपदवाच्याकृतिविनाशापत्तिः । एवं पशुचरु-चाद्वावपि । तेषामप्याकारविशेषविशिष्टमांसवाचित्वात् । न चोभय-चावदानोत्तरकालं पेषणविधिः ।• अत्यन्ताप्राप्तपेषणविधौ गौरवा-पत्तेः । चरावतिदेशेन प्रसक्तस्य प्रयोजनाभावेन निवर्त्तमानस्य प्रतिप्रसवमाचकरणे तु लाघवम् ।

प्रकृतौ हि प्रदेयपुरोडाशसिद्धेरन्यथोपपादयितुमशक्यत्वादर्थ-प्राप्तमपि पेषणं अध्वर्युकर्त्तृकत्वादिप्रयोजनसिद्ध्यर्थं सधर्मकं विहितम् । तच्चरौ प्रदेयसिद्धेस्तद्व्यतिरेकेण जायमानतया चरुत्वावच्छिन्नं प्रति पेषणस्याकारणत्वान्निवर्त्तमानं प्रतिप्रसूयते । अत एव प्रसक्तप्राप्तिकस्य कारणान्तरेण निवृत्तिप्रसक्तौ विधिः प्रतिप्रसवः । तच्च चोत्पत्ति-विनियोगाङ्गसम्बन्धादौ यथासम्भवं विधेर्व्यापाराभावाल्लाघवम् * ।

अत एव पेषणस्य प्रदेयसिद्धिरूपप्राकृतप्रयोजनलोपेनादृष्टप्रयो-जनान्तरकल्पनेऽपि न प्रतिप्रसवत्वविघातः । धर्माणान्तु पेषणस्य कर्मान्तरत्वाभावेन,

प्रधानं नीयमानं हि तदाङ्गान्यपकर्षति इति ।

न्यायेन प्राकृतपेषणाङ्गतया प्राप्तानामेवादृष्टरूपकार्यान्तर-कल्पनं न दोषाय । दृश्यते चायमर्थोऽग्निसंस्कारकमन्त्रमादेः

---

* पुनः कारणमात्रे व्यापाराल्लाघवमित्यर्थः,—इति टीका ।

पशुप्रकरणाम्नातस्य वचनाच्चातुर्मास्याङ्गत्वेन विनियोगे तद्धर्माणां कार्यान्तरप्रयुक्तत्वकल्पनादौ।

वस्तुतस्तु अत्र पेषणस्य न कार्यान्तरकल्पनाऽपि। प्रदेयसिद्ध्यर्थत्वादेव। यद्यपि हि चरुत्वावच्छिन्नं प्रति पेषणस्याकारणत्वं, तथापि पिष्टकचरावपि चरुशब्दप्रयोगात् पेषणविधिबलेन च पौष्णं चरुमित्यत्र सामान्यवाचिनोऽपि चरुशब्दस्य पिष्टकचरुविशेषपरत्वनिश्चयात् तस्य प्रदेयस्य पेषणमन्तरेणासिद्धेर्न पेषणस्य कार्यान्तरकल्पनाऽपि। अत एव चरुत्वं नामानवस्रावितान्तरूष्मपक्वतण्डुलप्रकृतिकत्वम्। अत्र भक्तव्यावृत्त्यै अनवस्रावितेति। मण्डकव्यावृत्त्यै अन्तरिति। सूपशाकादिव्यावृत्त्यै तण्डुलेति। अत एव पिष्टकचरावपि तत्सम्भवान्न पेषणस्य विघातकत्वमिति तत्रैव पेषणम्॥३॥४८॥

एकस्मिन्॥ यत्रान्यसहितः पूषा देवता; यथा राजसूये ऐन्द्रापौष्णश्चरुरिति, तत्रापि पेषणमुत यत्र केवल एव देवता तत्रैवेति चिन्तायाम्। अदन्तको हि स इति अर्थवादानुसारात् पेषणस्य पूषस्वरूपप्रयुक्तत्वावगतेस्तत्स्वरूपस्य चान्यसाहित्येऽपि सत्त्वाद्युक्तमेव पेषणम्। अत एव सोमापौष्णं चरुं निर्वपेन्नेमपिष्टं पशुकामइति नेमपदवाच्यार्द्धपिष्टत्वानुवादोऽपि सङ्गच्छते।

यदि तु नवमाद्यन्यायेन पूषस्वरूपे आनर्थक्यादपूर्वसाधनत्वलक्षणाया आवश्यकत्वमाशङ्क्येत, तदाऽस्तु पूर्वोक्तविधया पूषप्रपिष्टसम्बन्धज्ञानजन्ययागानुमितेरेव तात्पर्यग्राहिकायाः सत्त्वात् साऽपि पूषपदे। परं त्वर्थवादाद्यनुरोधात् पूषाधिष्ठानकदेवतात्वप्रयोज्यापूर्वीयत्वलक्षणायाएवाङ्गीकाराद्द्विदेवत्येऽपि पेषणधर्मस्य। यथाचैवं

सति पाकसम्पत्तिस्तथा यतितव्यं अन्तरायकरणेन वा क्रामिकनिक्षे-पेण वा पात्रभेदेन वेति प्राप्ते ।

आनर्थक्यपरिहारायापूर्वसाधनत्वलक्षणाया आवश्यकत्वादधि-ष्ठानद्वारकत्वकल्पनस्य च पूष्णोदेवतात्वोपस्थितिमन्तरेणानुपपत्तेः तदुपस्थितौ च तद्द्वारकत्वमात्रकल्पनयैवानर्थक्यपरिहाराद्‌द्विदेवत्ये च चतुर्धाकरणाधिकरणन्यायेन 'केवलस्य पूष्णोदेवतात्वाभावाद्यत्र केवल एव पूषा तत्रैव पेषणम् ।

न चापूर्वसाधनीभूतदेवतात्वस्यैव प्रकारतया पूषपदेन लक्षणेऽपि तस्य पूष्णोपरिभाने स्वरूपसम्बन्धस्यैव संसर्गविधया विवक्षणेन पर्या-प्तेरविवक्षणात्तस्य च द्विदेवत्येऽप्येकस्मिन् पूष्णि सत्त्वेन तस्याप्युद्देश्य-रूपत्वोपपत्तेः कथं न पेषणादीति वाच्यम् । व्यासज्यवृत्तिधर्मप-र्याप्तप्रकारतायां एकमात्रवृत्तिसम्बन्धस्य संसर्गत्वानुपपत्तेः । अन्यथा एको द्वित्वसमवायवानितिवदेको द्वित्ववानेको द्वौ इत्यादिशाब्द-बोधापत्तेः । अतो व्यासज्यवृत्तिदेवतात्वस्य पर्याप्तिसम्बन्धेनैव प्रका-रत्वात् तस्य च पूष्णि केवले बाधात् पूषमात्रवृत्तिदेवतात्वस्यैव प्रकारत्वेन तत्रैव पेषणादि । अदन्तकत्वं त्वर्थवादमात्रत्वान्न विरुध्यते । नैमपिष्टत्वस्यापि च तत्रैव विधेयत्वाक्षीरकारादिविशिष्टभावनाविधा-नेन चावाक्यभेदादगमकत्वम् ॥३॥४९॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां

तृतीयाध्यायस्य तृतीयः पादः ॥

अथ चतुर्थः पादः।

निवीतम्॥ दर्शपूर्णमासयोः, निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत्कुरुत इति श्रुतम्। तत्र सर्वोऽप्ययमुपव्ययत इत्यस्योपवीतविधेः शेषो न तु स्वतन्त्रो-विधिरित्यौदुम्बराधिकरणेनैव स्थितम्। यदा विधिस्तदा कृत्वा चिन्तया निवीतवाक्ये विचारः।

तत्र प्रकरणात्क्रतुक्रतुधर्मः। मनुष्यग्रहणन्तु सम्बन्धसामान्यवा-चिन्या षष्ठ्या अङ्गाङ्गिभावसम्बन्धपरत्वावसायात्। निवीतस्य मनु-ष्याभिलषितफलजनकत्वाङ्गीकाराच्छुद्धमनुष्यधर्मः, षष्ठीश्रुत्या प्रक-रणबाधादिति द्वितीयः। अबाधेनोपपत्तौ बाधायोगात्फलकल्पना-पत्तेश्च सन्निपत्योपकारकत्वलाभाच्च प्रकरणसहकृततया तया जप्य-मानमन्त्रवत्क्रतुयुक्तमनुष्यधर्म इत्यपरः। अत्र पूर्वपक्षत्रयक्रमो-मूलेऽन्यथा कृतोऽप्ययूक्तिसहत्वादुपेक्षितः।

सिद्धान्तस्तु प्राचीनावीतवैषम्यापत्तेस्तत्समभिव्याहारात्मकवाक्या-नुरोधात् षष्ठ्या मनुष्यसम्प्रदानकप्राकरणिकान्वाहार्यदानपाकादिप-दार्थोपकारकत्वरूपसम्बन्धपरत्वावसायादुक्तविधसम्बन्धेन मनुष्यार्थ-त्वम्। सम्भवति हि प्राचीनावीतस्य पितृदेवत्यप्राकरणिकप्रोक्षणी-शेषनिनयनाङ्गत्वात् पितुद्देश्यकप्राकरणिककर्माङ्गत्वम्। अतस्तत्सम-भिव्याहारादस्यापि तत्। एवञ्चाध्वर्यवसमाख्याऽप्यनुगृहीता भवति। निवीतस्यारादुपकारकत्वेनाध्वर्युकर्तृकेनापि तेन दानोपकारसिद्धेः।

पाकाद्यर्थत्वमेव वाऽङ्गीक्रियतामिति न दोषः। अतः सर्वप्रमाणाबा-धात्प्राकरणिकमनुष्योद्देश्यककर्माङ्गमित्येव सिद्धान्तः ।

यत्तु मूले पक्षान्तरं सिद्धान्तत्वेनोपन्यस्तम् । तथा हि । वाक्यादयं शुद्धमनुष्यप्रधानकातिथ्यादिकर्माङ्गतया विधिः । न च तदुपस्थापकाभावः । मनुष्यपदस्य लक्षणया सनकादिमनुष्यप-रत्वेन तत्प्रधानकस्य हन्तकारातिथ्यादेरुपस्थितिसम्भवात् । अत एव न फलकल्पनाऽपीति । तद्वाक्याबाधस्यास्मन्मतेऽप्युपपादितत्वात् सनकादिपरत्वस्य तेन चातिथ्याद्युपस्थितेरव्यभिचरितत्वाभावेन वक्तु-मशक्यत्वात् प्रकरणसमाख्ययोर्बाधे प्रमाणाभावात्तत्त्वाचिन्तात्वेन च सिद्धान्तनियमस्यानावश्यकत्वादस्य पक्षस्य वार्त्तिककृता क्लिष्टत्वाभि-धानाच्चोपेक्षितम् ।

अतः प्राकरणिकमनुष्यप्रधानकर्माङ्गत्वमेव सिद्धान्तः । वस्तुतस्तु नायं विधिर्वाक्यभेदापत्तेरपि तु उपवीतविधेरेव शेषः प्राचीनावी-तवत् । यथा च निवीतप्राचीनवीते तत्तत्प्रधानकर्मकत्वसम्बन्धेन मनुष्यपितृसम्बन्धिनी उचिते, तथोपवीतमपि देवसम्बन्धितया । अतस्तदेव दर्शपूर्णमासयोः प्रशस्तमिति स्तुतिः। अथवा ते तत्र तत्र वक्ष्यमाणवचनात्प्रशस्ते अत्र तु दैवत्वादुपवीतमेवेति स्तुतिः॥२॥५०॥

उपवीतम् ॥ तदिदमुपवीतं सर्वकर्माङ्गम् । स्मृताग्निहोत्रे प्राची-नावीती दोहयेद्यज्ञोपवीती हि देवेभ्यो दोहयतीति औवदव-स्थायां यज्ञोपवीतानुवादलिङ्गस्य प्राप्त्यभावेन सर्वार्थतागमकत्वात् । विप्रतिकृष्टत्वेन दर्शपूर्णमासस्थस्यानुवादानुपपत्तेश्च । वैकल्पिकेन्द्रमहे-न्द्रदेवत्यदार्शिकदोहने देवतावत्त्वाभावेन तदनुवादानुपपत्तेः च ।

सर्वार्थत्वे तु कर्तृसंस्कारकस्योपवीतस्य बहुदेवत्याग्निहोत्रप्रयोगाङ्गत्वेन तद्धोहनेऽपि प्राप्तेरनुवादोपपत्तिरिति प्राप्ते।

सन्निकृष्टासम्भवे विप्रकृष्टानुवादस्यापि न्याय्यत्वात् प्रकृतिविकृत्यभिप्रायेण च सान्नाय्येऽपि देवताबहुत्वसत्त्वादनुवादोपपत्तेः प्रकरणाद्दर्शपूर्णमासाङ्गमेवोपवीतम्।

वस्तुतस्तु वक्ष्यमाणवचनानुसाराद्ग्निहोत्रेऽपि यज्ञोपवीतसत्त्वेन तत्तत्त्यस्यैवायमनुवादः॥३॥५ १॥

विधिर्वा॥ उपव्ययत इति विधिरनुवादो वेति चिन्तायाम्। नित्योदकी नित्ययज्ञोपवीतीति गौतमस्मृत्या प्राप्तत्वादनुवादः। यदि त्वनेन पुरुषार्थतया प्राप्तिरित्याशङ्क्येत, ततो यज्ञोपवीतिना कर्त्तव्यमिति स्मृत्यन्तरात्क्रत्वर्थत्वेनापि प्राप्तिरुद्भावनीया। यदि तूक्तवचनेनाङ्गत्वे तल्लोपे स्मार्त्तप्रायश्चित्तापत्तेर्यत्तु* श्रौतप्रायश्चित्तप्राप्त्यर्थं दर्शपूर्णमासयोस्तद्विधानमित्याशङ्क्येत, ततो यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वेत्यादितैत्तिरीयकश्रुत्या सर्वयज्ञार्थत्वेन यज्ञोपवीतविधानात्तत्प्रायश्चित्तस्यापि प्राप्त्युपपत्तेर्विधानानर्थक्यम्। यदि त्वेतेषां सर्वेषां वचनानां नवतन्तुकत्रिसूत्ररूपमुख्ययज्ञोपवीतविषयत्वाद्वासोविन्यासरूपगौणोपवीतस्यैवाप्राप्तस्य दर्शपूर्णमासाङ्गत्वेन विधिरित्याशङ्क्येत, ततो यज्ञस्य प्रसृत्या अजिनं वासो वा दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीतं संवीतं मानुषमिति वचनेन तस्यापि सर्वयज्ञार्थत्वेन प्राप्तत्वादनुवाद एवायं दर्शपूर्णमासस्तुत्यर्थ इति प्राप्ते।

---

* इत्यमेव पाठः सर्व्वत्र। प्रायश्चित्तापत्तेः क्रतु,— इति तु भवितुमुचितम्।

यज्ञस्य प्रसृत्या इत्यनेन फलाधिक्यजनकगुणाधिक्यद्वारकत्वे-नास्य जपादिहोमवत्सर्वयज्ञाङ्गत्वावगत्याऽनावश्यकत्वप्रतीतेरावश्यकत्वार्थं दर्शपूर्णमासयोर्वासोविन्यासविध्युपपत्तिः। अत एव शिष्टा अपि वासोविन्यासं विनाऽपि कर्मान्तराण्याचरन्ति। यद्यपि च यज्ञस्येति वाक्यं यज्ञोपवीत्येवेत्यस्य वाक्यशेषः सन्निधानादिष्येत, तथापि समस्तेन तेन वासोविन्यास एवं फलाधिक्यार्थं विधीयत इति न दोषः। मुख्यब्रह्मसूत्ररूपयज्ञोपवीतं तु तदा स्मृत्यैव सर्वयज्ञार्थत्वेन विधीयते। एवञ्च श्रौतप्रायश्चित्तसिद्ध्यर्थमिदमपि दर्शपूर्णमासाङ्गत्वेन उपव्ययत इत्यनेन विधीयत इत्यपि केचित्। निवीतादिसमभिव्याहारस्योभयत्र प्रत्यभिज्ञापकस्य तुल्यत्वात्तु वासोविन्यास एवात्र नियम्यत इति युक्तमुत्पश्यामः। सर्वथोपव्ययत-इति विधिर्दर्शपूर्णमासविधिव्यवहितत्वात् तत्स्तावकत्वानुपपत्तेरिति सिद्धम् ॥३॥५२॥

एवं वा ॥ यावज्जीववाक्येनाग्निहोत्रे जीवनस्य निमित्तत्वावगमेऽपि वचनेनैव दाहावधि सायंप्रातःकाले, मरणोत्तरं नित्यत्वेन विहितोऽग्निहोत्रप्रयोगो मृताग्निहोत्रम्। तस्मिन्मृताग्निहोत्रे प्राचीनावीती होमयेद् यज्ञोपवीती हि देवेभ्यो होमयतीत्यनेन दैवाग्निहोत्रे किं यज्ञोपवीतस्य विधिरनुवादो वेति चिन्तायाम्। स्मृत्युपेण प्राप्तस्यापि ब्रह्मसूत्रस्य श्रौतप्रायश्चित्तप्राप्तिफलकत्वया विधिर्वासोविन्यासरूपस्य वा नियमार्थं विधिरिति प्राप्ते। स्थितं तावद्-पर्यवसितम्। मध्ये चिन्ताऽन्तरारम्भः ॥

उदक्त्वञ्च ॥ तत्रैव, ये पुरोडाशोदर्भास्तान् दक्षिणाग्रांस्तृणीया-

दिति श्रुतेऽपि ये पुरा दर्भास्त उदञ्चः कार्या इत्येवं विधिवाचक-पदाध्याहारेणापि पूर्ववद्विधिः । न च पुराशब्दस्य विशेषणत्वे विशिष्टोद्देशः । दक्षिणाग्रत्वस्य मृताग्निहोत्रे विधानवर्यादेवोदक्त्वस्य जीवदवस्थायामेव प्राप्तत्वेनाविशेषणत्वात् । निपातत्वेन पुराशब्दा-व्ययस्य व्युत्पन्नत्वाच्च । न चाग्रवन्ति प्रागग्राण्युदगग्राणि वेति सामान्य-स्तत्यैवोदगग्रत्वप्राप्तेर्विध्यानर्थक्यमिति वाच्यम् । यजुर्भ्रेषप्रायश्चित्त-सिद्ध्यर्थं तद्विधानोपपत्तेः । अन्यथा स्मृतिमूलभूतश्रुतेरविज्ञातवेद-त्वाद् यद्यविज्ञाते भूर्भुवः स्वरित्याहवनीये जुहुयादित्येतत्प्राप्येतेति प्राप्ते । यच्छब्दश्रवणात्प्रत्यक्षविध्यभावाद्विध्यन्तरैकवाक्यत्वाच्च नायं विधिः । अपि तु प्राप्तत्वात् तच्छब्दापेक्षितोद्देश्यविशेषसमर्थक एवे-त्यनुवादः ॥३॥५ ३॥

स्थितादुत्तरम् ॥ हिशब्दोपबन्धाद्विध्यन्तरैकवाक्यत्वाच्चायमपि निवीतादिवत्प्राचीनावीतस्तुत्यर्थः । अत एवोपव्ययत इतिवदानर्थ-क्याभावादपि विधिकल्पनं निरस्तम् । यज्ञोपवीतपदवाच्यब्रह्मसूत्रस्य च स्मृत्यैव जीवदग्निहोत्रे प्राप्तत्वादौचित्यादिना स्तुत्युपपत्तिः । वासो-विन्यासरूपस्यापि चानियमेनोक्तविधया जीवदग्निहोत्रे प्राप्तत्वात् स्तुत्युपपत्तिः । यदि तु नियमेन तत्प्राप्तिः स्तुतावावश्यकी अपेक्षेत, ततः सन्निकृष्टासम्भवाद्विप्रकृष्टदर्शपूर्णमासादिस्थस्यैवायमनुवादः स्तुत्यर्थं नानुपपन्नः । ऊहवचनं तु प्रकृतिविकृत्यभिप्रायमित्युक्तमेव ॥३॥५ ४॥

विधिस्तु ॥ मृताग्निहोत्र एवाधस्तात् समिधं धारयन्ननुद्रवे-दुपरि हि देवेभ्यो धारयतीति श्रुतेन किमुपरि धारणं दैवाग्निहोत्रे विधीयते उतायमप्यनुवाद इति चिन्तायाम् ।

त्रिशब्दश्रवणाद्विध्यन्तरैकवाक्यत्वाच्चोपरि होतीत्यनुवादः पूर्ववस्तु-त्यर्थः । न च प्राप्त्यभावः । स्रुग्दण्डे समिधमुपसंगृह्यानुद्रवतीतिवच-नेन स्रुग्दण्डस्याधिकरणत्वप्रतीतेरुपरि धारणाभावे च पतनप्रति-बन्धकत्वरूपतद्योगादुपरिभावस्य प्राप्तेः । न च समित्स्रुग्दण्डयो-रुभयोरपि कृतार्थत्वादुत यत्सुन्वन्ति सामिधेनीस्तदन्वाहुरितिवद्देशा-र्थत्वावधारणात् सप्तम्या सामीप्यमात्रलक्षणेति केषाञ्चिदुक्तं युक्तम् । कृतार्थयोरङ्गाङ्गिभावाभावेऽपि अधिकरणत्वेनैव दृष्टान्त इव स्रुग्द-ण्डस्य देशत्वोपपत्तेः । अतोऽत्राप्यनुवाद इति प्राप्ते ।

स्रुग्दण्डस्य न तावद्ग्रहणाधिकरणत्वम् । हस्तस्यैव तदधिकरण-त्वात् । उपशब्दवैयर्थ्याच्च । नाप्युपशब्दार्थे सामीप्ये, स्रुग्दण्डस्य सामीप्यप्रतियोगित्वेनाधिकरणत्वानुपपत्तेः । अतः सप्तमी सामीप्य-प्रतियोगित्वमात्रलक्षणार्था । कथञ्चित् सामीप्याधिकरणत्वसम्भवेऽपि वा समिदधिकरणत्वस्याप्राप्तत्वान्नोपरिभावानुवादः । अतो त्रिशब्द-परित्यागेनैकवाक्यतामपि भुङ्क्त्वा दैवाग्निहोत्रे उपरिभावनियम-विधिः ।

वस्तुतस्तु । अनियतप्राप्त्याऽप्येकवाक्यत्वसम्भवे हविरुभयत्वादिव-द्वाक्यभेदाङ्गीकारस्यायुक्तत्वादस्यार्थवादत्वमेवाङ्गीकृत्य सिद्धवन्निर्देशा-न्यथाऽनुपपत्त्या विध्यन्तरस्यैवाप्राप्तनियमफलकस्य कल्पनेति युक्तम् ।

वस्तुतस्तु स्रुग्दण्डे निधाय समिधमनुद्रवतीति, [illegible]सुधाकलि-खितवचनेनोपरिभावस्यापि लक्षणातात्पर्यग्राहकप्रमाणाभावेन प्राप्त-त्वादेतद्वचनाभावं कृत्वा चिन्तयेदमधिकरणमिति ध्येयम् ॥३॥५॥५॥

दिग्विभागस्य ॥ सोमे, प्राचीनवंशं करोतीत्येतद्विधिशेषः प्राची

देवा अभजन्त दक्षिणां पितरः प्रतीचीं मनुष्या उदीचीं रुद्रा-इत्ययं श्रुतः। तत्र मनुष्यसंयुक्ते निवीताधिकरणवदौदुम्बराधिकरणवच्च विधित्वं निरस्तमपि पूर्वाधिकरणवन्मनुष्यकर्त्तव्यवैदिककर्मणि तावद्दिगन्तस्येव सामान्यविशेषादिवचनेन प्राप्ततया प्रतीच्यास्तत्राप्राप्तेः लौकिके च कर्मणि प्रतीच्या नित्यप्राप्त्यभावाद्विधित्वं विधिकल्पकं वेति प्राप्ते।

इह प्रतीच्या मनुष्यसम्बन्धमात्रोपादानेऽपि कर्मविशेषानुपादानात् सर्वत्र विधानस्य त्वयैव निरस्तत्वात्तस्यामेव क्रियाव्यक्तौ प्रतीचीदिगभिमुखत्वं लोके यदृच्छया सिद्धं, तादृशक्रियागतमेव मनुष्यप्रतीचीसम्बन्धं गृहीत्वा स्तुत्युपपत्तेर्नातिरिक्तविध्यन्तरकल्पनं प्रमाणवत्। उपरि हीत्यत्र तु देवाग्निहोत्रत्वावच्छेदेनोपरिभावश्रवणात् तस्य चाप्राप्तत्वेन विध्यन्तरकल्पनया देवाग्निहोत्राङ्गसमिद्धारणानुवादेनोपरिभावविधिः। अनुमितवाक्यत्वाच्च न विशिष्टोद्देश इति वैषम्यम् ॥३॥५॥६॥

परुषिदित ॥ दर्शपूर्णमासयोः, पर्व प्रतिलुनातीति विधेर्यत्परुषिदितं तद्देवानां, यदन्तरा तन्मनुष्याणां, यत्समूलं तत्पितृणामिति शेषः। तथा सोमे, अत्पूर्णं तन्मनुष्याणाम्, यदुपर्यधान्तद्देवानामिति उपरिबिलादुल्लातीत्यस्य विधेः। तथा तत्रैव, नवनीतेनाभ्यङ्क्ते इत्यत्र, घृतं देवानां निःपक्कं मनुष्याणामिति। तथा दर्शपूर्णमासयोः, अविदहता अपयितव्यमिति विधेर्या विदग्धः स नैर्ऋतइति।

अत्र मनुष्यसंयुक्ते क्रियाविशेषस्य लवनादेरुपादानात्तत्र च

लौकिकस्तवनत्वाद्यवच्छेदेनान्तरालादिगुणानां नित्यप्राप्त्यभावाद्वि-ध्यन्तरकल्पनयाऽस्य विधानम् । न च फलकल्पना । तद्यथैवादो-मनुष्यराज आगत इत्यादौ, नयनं दक्षिणं दीक्षितः पूर्वमङ्क्ते इत्यादौ च शतशस्तस्या अङ्गीकारात् । अन्यथा तत्तत्स्मृतीनां तत्तदर्थवादोन्नीतविधिमूलकत्वानुपपत्तेः । यो विदग्ध इत्यत्र तु विदग्धनिर्ऋतिदेवतोभयसम्बन्धस्याप्राप्तत्वाद्विध्यन्तरकल्पनायां नैव किञ्चिद्बाधकमिति प्राप्ते ।

पदृषिदितमित्यत्र दितपदस्य वैदिकस्तवनपरत्वान्तरेत्यत्रानुषङ्गे तदर्थपरत्वे विकल्पप्रसङ्गादर्थान्तरपरत्वे वैरूप्यापत्तेरनुषङ्गायोगेना-ध्याहारावश्यम्भावाद्यदन्तरेति यच्छब्दयोगेन च लोकप्राप्तयावृ-च्छिकान्तरालस्तवनव्यक्तिमुद्दिश्यैव मनुष्यसम्बन्धस्य स्तुत्यर्थमुपदेशप्रती-तेर्लौकिकस्तवनत्वावच्छिन्ने अन्तरालस्याप्रतीतेस्तस्य च तद्व्यक्तौ नित्यप्राप्त्या न विध्यन्तरकल्पनम् । नयनं दक्षिणं दीक्षितः पूर्वमङ्क्ते सव्यं हि मनुष्या आञ्जत इत्यत्र तु मनुष्यनेत्राञ्जनत्वावच्छेदेनैव सव्यपूर्वकत्वस्य स्तुत्यर्थमुपादानात्तादृशस्य च नित्यप्राप्त्यभावेन विधि-कल्पकत्वमिति विशेषः ।

यादृशस्य हि स्तुत्यर्थमुपादानं, तादृशस्य नित्यवत्प्राप्तौ विधि-कल्पनं नान्यत्र । अत एव यो विदग्ध इत्यादौ विदग्धत्वनिन्दार्थं तस्य कर्मानर्हत्वफलकनिर्ऋतिसम्बन्धमात्रस्य उत्प्रेक्षाद्विधया सङ्की-र्त्तनान्निर्ऋतिसम्बन्धस्य च तं यज्ञं निर्ऋतिर्गृह्णातीत्यादौ कर्मानर्हत्व-प्रयोजकत्वावगतेरुत्प्रेक्षायां चोत्प्रेक्षितार्थस्य प्राप्त्यभावेऽपि क्षतिविर-हान्निर्ऋतेरक्षोऽधिपतित्वेन देवानर्हभक्षकत्वस्य प्रमाणान्तरप्राप्तत्वाच्च

न विधिकल्पकत्वम्। न ह्ययं देवतातद्धितः, येन तस्याप्राप्तत्वाद्विधिः कल्प्येत। निन्दार्थे सम्बन्धसामान्येनापि तदुपपत्तेः। अतो-नैते विध्यन्तरकल्पकाः॥३॥५७॥

अकर्म॥ तत्र क्रतुप्रकरणस्था विधिप्रतिषेधविशेषाः समिधो यजति नानृतं वदेदित्यादयः किं शुद्धपुरुषधर्मा उत क्रतुयुक्तपुरुषधर्मा उत शुद्धक्रतुधर्मा इति विचारः।

यद्यपि च प्रतिषेधस्य परोद्देश्यप्रवृत्तकृतिकारकत्वेन विधेयत्वरूपमङ्गत्वमेव दुर्वचम्। प्रतिषेधपदार्थस्य निवर्त्तनाया वदनानुकूलकृत्यभावस्य वा सम्बन्धान्तरेण कृत्यन्वयित्वेऽपि निमित्तादिवत्कृतिकारकत्वाभावात्। उपकारकत्वव्याप्यस्याङ्गत्वस्य व्यापकाभावे असम्भवाच्च। प्रतिषेध्यवदनादेस्तु क्रत्वङ्गत्वपुरुषाङ्गत्वे विध्यविहितत्वादेव कथ्यादिवद्दूरापास्ते। अतोऽङ्गत्वासम्भवादेव तद्विशेषविचारासम्भवः।

तथापि प्रतिषेधस्य पुरुषार्थत्वं नाम पुरुषनिष्ठप्रत्यवायजनकक्रियाविषयत्वं, क्रतुसम्बन्धिपुरुषगतायोग्यतासम्पादकक्रियाविषयत्वं च क्रतुयुक्तपुरुषधर्मत्वं, क्रतुगतवैगुण्यापादकक्रियाविषयत्वं शुद्धक्रतुधर्मत्वम्। इदञ्च तत्र, यत्र न प्रतिषेध्यक्रिया विशेषशास्त्रेण विहिता। यथा प्रकृतोदाहरणे। यत्र तु सा विशिष्य विहिता, यथा षोड़शीग्रहणादौ, तत्र प्रतिषेध्यषोड़शिग्रहणाभावेऽपि क्रतोः फलजनकत्वमित्यस्यैव. निषेधेनाक्षेपादुक्तविधार्थानुमापकत्वेनैव प्रतिषेधस्य क्रत्वङ्गतेति ध्येयम्। अत एव गौणमुख्यसाधारण्येनाङ्गत्वमेवाध्यायार्थ इति न लक्षणासङ्गतिः।

तत्र सत्यपि भावार्थाधिकरणोक्तन्यायेन भावनावाचित्वे आख्या-

तस्य कर्त्ताऽपि वाच्यः । एकत्वादिवत्ततस्तस्यापि प्रतीतेः । कर्त्तरि कृदित्येतत्सूत्रस्थकर्त्तरीत्येतदनुकर्षणार्थचकारयुक्तेन लः कर्मणि च भावे चाकर्मकेभ्य इत्यनेन कर्तृकर्मभावानामप्याख्यातार्थत्वस्मृतेश्च । चैत्रः पचतीति चैत्रादिपदसामानाधिकरण्याच्चैवम् ।

स च भावप्रधानमाख्यातमिति स्मृत्या एकत्वादिवदेव यद्यपि भावनां प्रति विशेषणत्वेनान्वीयते । तथाप्युपस्थितत्वात्तद्वाचकपदान्तरमात्रकल्पनया तदुपकारस्यैव भाव्यत्वेनान्वयो न तु कर्मणो विलम्बितप्रतीतिकत्वात् । दृश्यते च गुणत्वेन प्रतीतस्यापि प्रयोजनाकाङ्क्षायां प्राधान्यं पश्वाद्यथा पशुपुरोडाशादौ देवतादेः । विधिनिषेधाभ्यामपि स्वविषये तद्गतेष्टानिष्टसाधनत्वाक्षेपाच्चेदमेव युक्तम् । अतश्च विधिस्थले स्वर्गो निषेधस्थले च प्रत्यवाय एव क्रियाफलं समानाभिधानविधिश्रुतिभ्यां, न तु क्रतूपकारकः प्रकरणात् । एवञ्च यद्यप्याख्यातेन कर्त्ता नाभिधीयेत, तथापि भावनयाऽऽक्षिप्तस्याख्यातेन लक्षितस्य च तस्यैवोपस्थितत्वात्तदर्थत्वकल्पनं न दोषः ।

अतश्च वैमृधवत्प्रकरणबाधेन शुद्धपुरुषधर्मत्वावगतेस्तदा चानृतवदनप्रतिषेधस्योपनयनप्रभृतिप्रवृत्तेः स्मार्त्तानृतवदनप्रतिषेधस्यापीदमेव मूलमिति प्रथमः पक्षः ।

द्वितीयस्तु सत्यपि पुरुषप्राधान्यावगमे स्वर्गप्रत्यवायादिकल्पनाऽपेक्षया क्रतुगतफलाधानयोग्यत्वायोग्यत्वरूपसंस्कारस्यैव प्रकरणावगतस्य श्रुत्यपेक्षितस्य कल्पनं युक्तम् । अतश्च जञ्जभ्यमानमन्त्रवदेवैषां क्रतुयुक्तपुरुषधर्मत्वम् । तदा च,

प्रियञ्च नानृतं ब्रूयादेष धर्मः सनातनः।

इति स्मृतेः सनातनग्रहणेन सार्वकालिकविषयत्वावगतेरेतन्मूलत्वासम्भवेन मूलान्तरस्यावश्यकत्वात् सर्वदा चानृतं वर्जयतः क्रतावनृतप्रसक्त्यभावादनुवाद एवायम्।

अस्तु वा पुरुषार्थप्रतिषेधेन पुरुषस्यानृतवदने प्रत्यवायबोधनेऽपि क्रतुवैगुण्यापत्तौ प्रमाणाभावाद्यः प्रत्यवायं सोढ्वाऽपि क्रतुं सगुणं कर्त्तुमिच्छेत्तस्य व्रीहिभिर्यजेत्युक्त्वा सम्भवत्येव यवैर्यागेऽनृतप्रसक्तिरिति क्रतुप्रकरणगतस्यापि निषेधस्य विधायकत्वम्। अतश्चैतदतिक्रमे श्रौतप्रायश्चित्तप्राप्तिश्च फलमिति प्राप्ते।

सत्यं नानुवादः। क्रतुयुक्तपुरुषधर्मत्वे तु न किञ्चित्प्रमाणमस्ति। यद्यपि तावत्कर्त्ता वाच्यः स्यात्तथापि तस्य वक्ष्यमाणरीत्या गुणत्वेनोपपादनाच्च तावच्छब्दत एव प्राधान्यम्। नापि पदान्तरकल्पनया, वैमृधादिवत्। कर्त्तुः प्रयोजनवत्त्वसिद्ध्यर्थमवश्यं प्रकरणालोचने क्रियमाणे क्रतोरुपस्थितत्वेन तद्गतसाद्गुण्यवैगुण्यपरिहारयोरेव प्रवर्ग्यन्यायेन कल्पयितुं युक्तत्वात्।

अत एव यत्र पशुपुरोडाशादौ उद्देश्यांशस्य दृष्टविधया देवतास्मारकत्वान्नादृष्टोपकारकत्वकल्पना, तत्र सन्निपत्योपकारकत्वलाभाय परम्पराङ्गीकरणमप्यदोषः। अज्ञ्भ्यमानमन्त्रे तु वक्ष्यते। प्रकृते तु समिदादेः प्रकृतापूर्वसाधनीभूतपुरुषोद्देशेन प्रकृतक्रतुफलाधानयोग्यतासम्पादकतया विधाने गौरवापत्तेर्लाघवात् प्रकृतापूर्वसाधनक्रतुगतसाद्गुण्यमेव समिदादीनाम्। अनृतवदनस्य च तद्गतवैगुण्यसम्पादकत्वम्। अतः शुद्धक्रतुधर्मत्वमेव कर्त्तुर्वाच्यत्वपक्षेऽपि युक्तम्।

वस्तुतस्तु । न तस्य वाच्यत्वम् । प्रतीतेरन्यथाऽप्युपपत्तेः । तथा-हि, आख्यातात्तावत्कर्त्ता कृतिरेकत्वादिकं प्रतीयत इत्यविवादम् । तत्रानेकार्थबोधकपदे सर्वत्रैकत्र शक्तिरपरत्राक्षेपादीत्यपि तथैव । इतरथाऽनेकशक्तिकल्पनापत्तेः । तत्र च नियामकापेक्षायां प्रधानेन गुणभूतस्य लोके आक्षेपदर्शनात् प्राधान्यं तावन्नियामकम् । तच्च यथा सत्वप्रधानानि नामानीत्यनया स्मृत्या कृदन्तादिनामसु सत्व-रूपस्य कर्त्तुरेव प्राधान्यावगमाद्वाच्यत्वं न कृतेः, लक्षणादिनाऽपि तत्प्रतीत्युपपत्तेः । एवमाख्याते भावप्रधानमाख्यातमिति स्मृत्या भावनायाएव प्राधान्यावगमाद्वाच्यत्वं नाश्रयस्य कर्त्तृकर्मादेर्लक्षणया-ऽपि तत्प्रतीतेः ।

अत एव यत्र न किञ्चित्प्राधान्यनियामकं, तत्रैव घटघटत्वादौ नागृहीतविशेषणान्याय इत्यादि कौस्तुभे स्पष्टम् । यत्र तु नैक-त्वादौ व्यभिचाराद्राक्षेपः, तत्रातिरिक्तैव शक्तिः, न तु कर्त्रादौ । या तु स्मृतिस्तत्र प्राप्तः । द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचन-मिति सञ्ज्ञाशास्त्रेण लः कर्मणीत्यादेरेकवाक्यता । अत्र हि द्व्येकयोरित्यत्र भावप्रधानो निर्द्देशः द्वित्वैकत्वयोरित्यर्थः । अन्यथा द्व्येकेष्विति बहुवचनापत्तेः । तथा च कर्त्रादौ वर्त्तमानेष्वेकत्वादिषु लकारादेशभूततिबाद्येकवचनादीनि भवन्तीति सूत्रद्वयार्थः । न तु कर्त्रादौ लकारः शक्त इति ।

न चैवं कर्त्रादेरनभिहितत्वात्तत्र तृतीयाद्यापत्तिः । शक्त्याऽनभि-धानेऽपि लक्षणयाऽभिधानादिति । अत्रानभिहितत्वं अभिहितत्वा-भावः । तत्राभिहितत्वं न तिङादिवाच्यत्वं तत्प्रतिपाद्यत्वमात्रं वा ।

तथात्वे पाचकेन गम्यते चैत्रेण भुक्त्वा गम्यत इत्यादौ तृतीयाद्यनापत्तेः। कृत्प्रत्ययेन कर्त्तुरुपात्तत्वात्। क्त्वाप्रत्ययेन समानकर्त्तृत्वोक्त्या कर्त्तुरुपादानाच्च। नाप्यभिहितसङ्ख्याकत्वं, चैत्रेण पक्त इतिवच्चैत्रेण पाचक इति प्रयोगापत्तेः। सूत्रे लक्षणापत्तेश्च।

विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।

इत्यादौ निपातेन युज्यत इति क्रियाभिधायकेन सङ्ख्याऽनभिधानात् वृक्षमिति द्वितीयापत्तेश्च।

अपि तु यद्वृत्ति कारकं स्वान्वयिक्रियाप्रतिपादकेन पदेन वृत्त्या प्रतिपाद्यं, तत्त्वम्। अस्ति चेदं चैत्रः पचति ओदनः पच्यत इत्यादौ। चैत्रादिवृत्तिकर्त्तृत्वकर्मत्वादेर्निरुक्तपदेन प्रतिपादनात्। पाचकेन गम्यत इत्यादौ च कृदुपात्तस्य पुरुषस्य गमनक्रियैवान्वयिनी न तु पाकक्रिया, तस्या एव तस्मिन्नन्वयात्। तद्वृत्ति च कारकं न कर्माख्यातेनाभिहितमिति युक्तैव तत्र तृतीया। एवं चैत्रेणेत्यस्य भुजिक्रियायामनन्वयाद्गमनक्रियायामेवान्वयाङ्गीकारात् तृतीयोपपत्तिः। मयैव पक्त्वा मयैव भुज्यते इत्यत्र तु पक्त्वेत्यनेन कर्त्तुरुपात्तत्वात्कर्त्तरि न मयेत्याद्या तृतीया। अपि तु आत्मानमात्मना वेत्सि, अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि, इत्यादिवत्करणे इति न काचिदनुपपत्तिः। पक्त्वौदनो भुज्यत-इत्यादौ तु पचिधातोः कर्माकाङ्क्षायां द्वितीयान्तौदनपदाध्याहारेण वाक्यपूरणम्। न हि प्रधानक्रियायामुक्तस्य कारकस्य गुणभूतक्रियायामप्युक्तिरिति नियमे प्रमाणमस्ति। येनाध्याहारं विनाऽपि वाक्यं समर्थ्येत। तथात्वे, ओदनं भुक्त्वा ग्रास्तं पचते,

श्रुत्वाऽप्यर्थं नानुमतस्तेन सोऽर्थः कुबुद्धिना ।

इत्यादिद्वितीयान्तप्रयोगानापत्तिः । यदि तु क्तप्रयोगेष्वनाश्वासो- मयैव भुज्यत इत्यत्र च कर्त्तर्येवाद्या तृतीया पक्वौदनो भुज्यत- इत्यत्र नाध्याहाराङ्गीकरणम् । तदोक्तनियममङ्गीकृत्य क्तप्रत्यय- स्यापि च भाव एवशक्तिमङ्गीकृत्य तदर्थस्य भावस्य पूर्वकालत्वसमा- नकर्तृकत्वसंसर्गेणोत्तरक्रियायामन्वयोऽङ्गीक्रियते । तदाऽस्तु यद्धि कारकं स्वान्वयिप्रधानक्रियाप्रतिपादकपदेन वृत्त्या प्रतिपाद्यं तत्त्व- मभिहितत्वं, तदभावोऽनभिहितत्वं, तत्र तृतीयादीति संक्षेपः ।

अत्र वदन्ति । एवं सति क्त इति षष्ठ्यन्तन्तिवाद्यन्वितं वाच्यम्। प्रथमान्तस्यान्वयात् । अतश्च लस्येति सूत्रवैयर्थ्यापत्तिः । स्वादेशभूत- शानजादेः कर्त्रादिवाचित्वानुपपत्तिश्च । न च कर्त्तरि कृदित्यनेन तद्वाचित्वं, तथात्वेऽपि कर्मणि भावे चाकर्मके तत्प्राप्तेः सूत्रान्तरा- विषयत्वात् । अत एवं परिहर्त्तव्यम् । ल इति प्रथमान्तं कर्त्रादावे- वान्वेति । न त्वेतावता तस्य वाचित्वं लाघवेन वृत्त्या तद्धन्यत्वस्यैव शास्त्रतात्पर्यविषयत्वेन शक्त्यंशे तद्व्यापाराकल्पनात् । सा तु प्राधा- न्यादिनैव सिध्यतीति सिद्धमाख्याते कर्त्रादेरवाच्यत्वम् । शानजादौ च वाच्यत्वमिति । लस्येति सूत्रस्य च तिबादीनां स्वादेशत्ववि- धायकस्य न वैयर्थ्यम् ।

अतः कर्त्तुरवाच्यत्वाद्वाच्यत्वेऽपि वा प्राधान्यस्य दूरभ्रष्टत्वान्न पुरुषधर्मत्वक्रतुयुक्तपुरुषधर्मत्वे । एतेन लक्षणया तस्योपस्थितत्वादेव तत्कल्पनेति निरस्तम् । प्रयोजनमाद्यपक्षे स्नातं प्रायश्चित्तम् । क्रतुयुक्तपुरुषधर्मत्वे फलसंस्कारकत्वाद्यजमानेनैव विधिप्रतिषेधार्थ-

सम्पादनं, न तु समाख्ययाऽध्वर्युनियमः । शुद्धक्रतुधर्मत्वे तु विधिषु सति सम्भवे तथा नियमः । निषेधेषु तु तस्यानियामकत्वासम्भवात् कर्त्तृमात्रेण वर्जयितव्यमिति ॥ ३ ॥ ५ ८ ॥

अहीनवत् ॥ ज्योतिष्टोमे, तीर्थे स्नाति तीर्थमेव समानानां भवतीत्यत्र तीर्थस्नानस्य प्रकरणादेव पूर्ववदारादुपकारकत्वं प्राप्तं, पशुपुरोडाशन्यायेन दृष्टरूपमलापाकरणार्थत्वलिङ्गेन बाधित्वा क्रतु-युक्तपुरुषधर्मत्वम् । तेऽप्सु दीक्षातपसी प्रावेशयन्निति अर्थवादे अप्सु दीक्षावत्त्वसङ्कीर्त्तनात् दीक्षायाश्च यमनियमपरिग्रहरूपायाः पुरुषसंस्कारकत्वस्य गृहपतिं दीक्षयतीत्यादिना स्पष्टत्वादपि स्नानस्य क्रतुयुक्तपुरुषधर्मत्वम् । अत एव कर्त्तृत्वांशे वैयर्थ्यादनुपयोगेऽपि फलाधानांशे उपयोगकल्पनादस्य याजमानत्वमिति स्पष्टत्वादेवेदं मूले उदाहृतमपि न विचार्यते ।

दर्शपूर्णमासयोस्तु, जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू इति प्राणापानावेवात्मन् धत्त इति श्रुतो मन्त्रपाठः किं शुद्धक्रतुधर्म-उत शुद्धपुरुषधर्म आहो क्रतुयुक्तपुरुषधर्म इति चिन्तायाम् । पूर्ववत्पुरुषस्य प्राग्नुपात्तस्यापि सर्वप्रधानभूतायां भावनायां चैत्रा-दिवद्विशेषणत्वेनोपादानात्प्रवर्ग्यन्यायेन प्राधान्यकल्पनानुपपत्तेर्लक्षण-हेत्वोः क्रियाया इत्यनेनानुवचनक्रियायां लक्षणत्वेनावगतस्य जृम्भणस्य भाव्यत्वादिना लक्षणत्वायोगान्निमित्तत्वप्रतीतेर्जृम्भणायां निमित्तेऽनु-वचनं भेदनहोमवदारादुपकारकम् । प्राग्नुपात्तः कर्त्ता त्वर्थप्राप्त-त्वादनुवादः ।

वस्तुतस्तु । अनुवचनस्यारादुपकारकत्वे समाख्याया आध्वर्यवत्वा-

नुपपत्तेर्यजमानाद्यन्यपुरुषजृम्भायामपि तत्कर्त्तृकमन्त्रपाठापत्तेः प्राक्-जुक्तजृम्भाकर्त्तृकर्त्तृकत्वानुवादानुपपत्तेरवश्यं जृम्भायाः पुरुषविशेषण-त्वमङ्गीकृत्य जञ्जभ्यमानकर्त्तृविशिष्टमनुवचनमेवाध्वर्य्यवं विधीयते आरादुपकारकत्वेन । ततश्च जृम्भायाः क्रियां प्रति निमित्तत्वेनान्व-यायोगादार्थिकमेवास्या वषट्कारादिवन्निमित्तत्वमिति प्रथमः पक्षः ।

द्वितीयस्तु जञ्जभ्यमानस्य कर्त्तृत्वेनानुवचनं प्रति गुणत्वाङ्गीकारे गुणानुरोधेन प्रधानभूतानुवचनस्य क्रतौ पाक्षिकत्वापत्तेर्जञ्जभ्यमानस्य क्रियां प्रति शब्दतो विशेषणस्यापि स्वर्गादिवदेव प्राधान्यम् । तदा हि प्रधानानुरोधेन पाक्षिकत्वेऽपि न दोषः । यद्यपि च तिङ-भिहितकारकत्वमेव प्रथमार्थो न तु संस्कार्य्यत्वम् । तथापि कर्त्तृ-त्वस्य फलसमानाधिकरणत्वतद्व्यधिकरणत्ववैशिष्ट्यभेदेन भिन्नत्वादुक्त-युक्त्येह फलसमानाधिकरणकर्त्तृत्वस्यैव प्रथमार्थत्वात् फलभोक्तृत्वरूप-संस्कारसिद्धिरविकलैव । एतदभिप्रायेणैव च कौस्तुभे अधिकारि-त्वस्य प्रथमार्थत्वोक्तिरिति ध्येयम् । अतो जञ्जभ्यमानोद्देशेनानु-वचनविधानात् प्रकरणानुरोधेन च वाक्यसङ्कोचे प्रमाणाभावात् शुद्धपुरुषधर्मत्वम् । न च फलकल्पना । प्राणापानधारणरूपस्य फलस्य स्ववाक्य एव क्लृप्तत्वेन तदभावात् । यद्यपि चायमर्थवादः स्यात्, तथापि प्रकरणावगतक्रतूपकारापेक्षयाऽस्यैव स्ववाक्योपस्थितस्य तद्वाचकपदान्तरकल्पनया फलत्वस्यौचित्याच्च । अतः शुद्धपुरुष-धर्मत्वमिति प्राप्ते ।

न तावत् फलं क्लृप्तम् । धत्त इति वर्त्तमानत्वनिर्देशेन योग्या-नुपलब्धिबाधितत्वात् । अतोऽस्य स्तुत्यर्थत्वेनान्वयमङ्गीकृत्य फला-

पेक्षायां कामपदयुक्तपदान्तरकल्पनयाऽस्यैव वा भविष्यदर्थकल्पनया फलपरत्वं परिकल्प्य तस्य कथञ्चिल्लभ्यमानकर्त्तृभोग्यत्वं वाच्यम् । तथा सति फलं तज्जनकत्वं तद्व्यापाररूपापूर्वञ्चेत्यनेककल्पनातो वरं प्रकरणानुरोधेन क्लृप्तक्रतुफलाधानयोग्यताजनकत्वमात्रं क्लपेक्षित-त्वात् कल्पयितुमुचितमिति क्रतुयुक्तपुरुषधर्मं पवायम् । फलाधान-योग्यतासम्पादकत्वाच्च याजमान इति प्रयोजनम् ॥३॥५८॥

शंयौ ॥ अत एवं दर्शपूर्णमासयोर्देवा वै शंयुं बार्हस्पत्यमब्रुवन् हव्यं नोवहेति सोऽब्रवीत् वरं वृणे किं मे प्रजाया इति तेऽब्रुव-न्योब्राह्मणायावगुरेत्तं शतेन यातयात्तस्मान्न ब्राह्मणायावगुरेदिति अतोदण्डोद्यमनादिरूपावगूरणादिप्रतिषेधोऽपि शुद्धपुरुषधर्म एव । यातनारूपस्य फलस्य क्लृप्तत्वेन प्रकरणेन वाक्यसङ्कोचायोगात् । अत्र हि श्राग्निषि लिङ्, प्रवर्त्तनाया बाधात् । आख्यातार्थोऽपि लक्षणया भोगरूपानुभवो निस्तारो वा । तमिति द्वितीयार्थो विषयत्वम् । तथाचावगूरणकर्त्तृविषये शतगुणं यातनानुभवः शतसंवत्सरेण वा तन्निस्तारो भवत्वित्यर्थः ।

वस्तुतस्तु आख्यातार्थोऽनुभावनादि, लिङर्थोऽनुकूलव्यापार एव । तथाच तं प्रति भवान् शंयुरनुभावयेदित्यर्थः । अत्र लिङुपादानेन पूर्ववद्वर्त्तमानत्वाप्रतीतेर्यातनायाः साध्यत्वावगमान्निषेध्यफलं काम-पदाद्यभावेऽपि क्लृप्तम् । अतः शुद्धपुरुषधर्म इति प्रत्युदाहरणमा-त्रम् । अतएव सामान्येन शंयोर्वरदानमपि सङ्गच्छते । पुरुषधर्मत्वञ्च पुरुषनिष्ठफलजनकक्रियाविषयतामात्रं, न तु पुरुषस्य संस्कार्यतया शेषित्वं प्रमाणाभावादिति ध्येयम् ।

न च क्रतौ अवगूरणप्राप्त्यभावादेवास्योत्कर्षसिद्धेर्न प्रत्युदाहरणत्वमिति वाच्यम् । अन्याहार्येणानत्यसम्भवे तस्यापि तदर्थं प्राप्तेः । क्रत्वुपकारकतया प्राप्त्यभावेऽपि न स्त्रियमुपेयादित्यादिवत्क्रतुमध्यप्रसक्तप्रतिषेधस्यापि क्रत्वङ्गत्वोपपत्तेश्च । अतश्च फलस्य क्लृप्तत्वादेव पुरुषधर्मत्वम् । अत्र चार्थवादोन्नीतस्य वा पदान्तरस्य फलपरत्वं, अस्यैव स्वर्गादिवद्वा तत्परत्वमित्यादि तु स्वयमूह्यम् ॥२॥६०॥

प्रागवरोधात् ॥ दर्शपूर्णमासयोरेव, मलवद्वाससा न संवदेदिति श्रुतम् । मलवद्वासा रजस्वला । अस्य च प्रतिषेधस्य फलाश्रवणात् क्रत्वङ्गत्वे नानुपपत्तिः । न च यस्य व्रत्येऽहन् पत्न्यनालम्भुका स्यात् तामपरुध्य यजेतेति वचनेनैवानालम्भुकापदवाच्यरजस्वलाऽपरोधोत्तरं क्त्वाप्रत्ययेन यागप्रयोगकर्त्तव्यताविधानात् क्रत्वङ्गभूतस्य लौकिकस्य च याजमानस्य आर्त्विजस्य वा रजस्वलासंवादस्याप्रसक्तेः कथं प्रतिषेध इति वाच्यम् । अन्यस्याप्रसक्तावपि साधारणद्रव्यतया श्रौत्यांशेऽनुमतिरूपस्य तस्य प्रसक्तेः । अनुमतेरपि परम्परया ग्रातुं शक्यत्वेन संवादाप्रसक्तौ तु पत्न्यतिरिक्तरजस्वलासंवादस्य क्रतुमध्ये रागतः प्राप्तस्यापरोधवाक्यविषयस्य स्मृतौ निषिद्धस्यापि क्रत्वर्थतया प्रतिषेधोऽनृतवदनिषेधवदिति प्राप्ते ।

मनुना, रजस्वला च षंढश्चेत्यादि प्रक्रम्य,

> होमे प्रदाने भोज्ये च यदेभिरभिवीक्षितम् ।
> दैवे हविषि पित्र्ये वा तद्गच्छत्ययथायथम् ।

इत्युक्त्वा, तमप्यनयेत् तत इत्यनेन रजस्वलामात्रस्य दैवकर्ममात्रे वाक्येन श्राद्धप्रकरणं बाधित्वा अपनयविधानात् तया सह संवादा-

प्रसक्तेर्न क्रत्वर्थत्वम्। न चेयमेव श्रुतिस्तस्यामूलम्। स्मृतेर्दैवकर्म-मात्रविषयत्वेन सामान्यरूपत्वात्। न च रजस्वलामात्रस्यापनये अपरोधवाक्यवैयर्थ्यम्। अपरोधवाक्यस्य पत्न्या सहैव पत्युरधि-काराद्रजस्वलायास्तामधिकारेण तां विना यागाकरणप्रसक्तौ दर्श-पूर्णमासकरणविध्यर्थत्वात्। अत एव तेत्रत्यमपरुध्येत्यनुवादः। अत-स्त्वाप्रसक्तत्वात् पुरुषार्थ एवायं निषेधः। श्रौतप्रायश्चित्तप्राप्त्यर्थं इति तु शक्यते वक्तुमिति ध्येयम्॥२॥६१॥

अप्रकरणे॥ अनारभ्य, सुवर्णं हिरण्यं भार्यं दुर्वर्णोऽस्य भ्रातृव्यो-भवतीति श्रुते, न तावत्क्रतुगतहिरण्योद्देशेन सुवर्णत्वविधिः। धारणप्राप्त्यभावेनानुवादानुपपत्तेः। नापि हिरण्यं हस्ते सम्प्रदाय षोडशिनस्तोत्रमुपाकरोतीति विहितक्रतुहिरण्यधारणानुवादेन सुव-र्णत्वविधिः। विशिष्टोद्देशापत्तेः। अतो भार्यमिति कृत्प्रत्ययेन सुवर्णस्य कर्मत्वाभिधानात्तदुद्देशेनैव धारणाख्यसंस्कारविधिः। हिरण्यपदस्य तु सुवर्णरजतसाधारणवाचिनोऽनुवादित्वम्। न चैव-मपि क्रतुगतसुवर्णोपस्थितावेव प्रमाणाभावः। सुवर्णस्वरूपे आन-र्थक्याल्लौकिकक्रियासाधनीभूतग्रहणेऽपि तत्तादवस्थ्यात् सुवर्णस्यैव श्रुतकर्मत्वान्यथाऽनुपपत्त्या स्वर्गार्थवादिकफलकल्पनस्य चाश्रयाभा-वादनुपपत्तेः। परिशेषादेव क्रतुगतसुवर्णोपस्थितिलाभोपपत्तेरिति प्राप्ते।

न तावत्प्रकरणात्क्रतुसम्बन्धोपपत्तिरनारभ्याधीतत्वात्। नापि शुक्रादिवदव्यभिचरितत्वात्। लोकेऽपि सुवर्णसत्त्वेन व्यभिचारात्। न वा पारिशेष्यात्। श्रुतकर्मत्वान्यथाऽनुपपत्त्या सुवर्णस्यार्थवादिक-

फलसाधनत्वकल्पनाया एव प्रसक्तेः पारिशेष्याभावात्। धारणस्य संस्कारकस्य सुवर्णस्याश्रयापेक्षायां तत्त्वेनाप्यर्थादन्वये बाधकाभावात्। न चेष्टापत्तिः। तथात्वे धारणसुवर्णोभयकारणकयोर्द्वयोर्भावनयोरपूर्वयोस्तत्पदयोश्च कल्पने गौरवापत्तेः। सुवर्णांशेऽप्यपूर्वविधित्वप्रसङ्गाच्च। अध्वर्युं वृणीते, स्वाध्यायोऽध्येतव्य इत्यादौ तु उभयोरपि दृष्टार्थत्वादुक्तगौरवाभावेन संस्कारविध्यन्यथाऽनुपपत्त्या विनियोगकल्पनेऽपि न दोषः। प्रकृते तु धारणेन सुवर्णं संस्कुर्यात्तेन च तदाश्रितेन फलं भावयेदिति कल्पने गौरवम्।

अतः तत्प्रत्ययलभ्या एकैवात्र भावना। तस्याश्चावश्यकत्वादार्थवादिकस्य फलस्यैव भाव्यत्वं, न तु सुवर्णस्योद्देश्यानेकत्वप्रसङ्गात्। अतः सक्तुन्यायेन विनियोगभङ्गात् सुवर्णहिरण्यधारणमेवार्थकर्मतया विधीयते। किञ्च सुवर्णस्वरूपे आनर्थक्ये यथैव तत्कार्यं क्रतुरेवं लौकिक्यपि क्रिया। तस्यामपि च नैवानर्थक्यम्। क्षेत्रकर्मणि बाहुल्याहरणादिवन्निर्विघ्नसमाप्त्यर्थत्वेन धारणाख्यसंस्कारोपपत्तेः। अतः परिशेषाभावान्न क्रत्वर्थत्वम्। न चोभयार्थत्वम्। एकस्यैव विधेरंशे प्रयोजकत्वमंशे च प्रधानप्रयुक्तत्वादप्रयोजकतेति वैरूप्याच्च। अतः सक्तुवद्विनियोगभङ्गमपि प्रकल्प्य धारणाख्यार्थकर्मतैव युक्ता।

न च तत्रापि वैदिकक्रियात्वसामान्यात्क्रत्वङ्गत्वं साहूप्येन क्रतूपस्थितौ धर्मातिदेशस्यैवाङ्गत्वेऽपि बाधकाभावादिति, वाच्यम्। विधिबलेनोपस्थितेषु नियमेन सर्वेष्विष्टेषु तद्गतनिरतिशयत्वस्यापि सर्वपुरुषाभिलषितत्वेन शीघ्रोपस्थितिकतया स्वर्गस्यैव कल्पनीयत्वात्। आर्थवादिकफलस्य वाक्योपात्तत्वेन ततोऽपि शीघ्रोपस्थितिकत्वाच्च।

क्रत्वर्थत्वे तु स्वगतेन वैदिकक्रियात्वेन क्रतुगतस्य तस्योपस्थितौ क्रतोरुपस्थित्या तदङ्गत्वकल्पने गौरवम्। अत एव विश्वजिद्रात्रिसत्रादौ न तत्कल्पनम्।

प्रकृते तु विशिष्टधारणस्यार्थवादिकमेव फलमिति पुरुषार्थता। तत्त्वं सुवर्णस्य कर्मत्वमेव। तस्यैव 'त्वार्थवादिकफलम्। तेनेति पदाध्याहारस्य स्तुतिपक्षेऽपि समानत्वात्। न चात्राश्रयापेक्षाविधिवैयर्थ्यं, तस्य संस्कारविधिनैव परिहारात्। दुर्वर्णोऽस्य भ्रातृव्यो भवतीत्यत्र भविष्यदर्थकत्वमात्रलक्षणा तु पूर्वपक्षिणोऽप्यविशिष्टा। स्तुतिलक्षणा सुवर्णपदे अपूर्वसाधनत्वलक्षणा च तवाधिकेति ममैव लाघवमिति॥३॥६ २॥

शेषोऽप्रकरणे॥ अनारभ्यैवाधीतं, येन कर्मणेर्त्सेत् तत्र जयां जुहुयादिति। कर्मणा ऋद्धिं स्वफलाधिक्यं प्राप्तुमित्यर्थः। अतस्य यथावस्थितफलार्थं विनैव जयादीन् कर्माणि। कर्मभ्यः फलाधिक्येच्छायान्तु जयादयः कर्माङ्गम्।

तत्र च कर्मत्वस्य क्रतुव्यभिचरितत्वान्न तावज्जुह्वादिवत्तदुपस्थितिः। न च लौकिकस्य कर्मणः कृतिभोजनादेर्दृष्टार्थत्वेनादृष्टार्थजयादिग्राहकत्वायोगः। रोहिण्यां कृषिकर्माणि कारयेत्, पुरस्तात्कृषिकर्मणां प्राच्यां क्षेत्रमर्यादायां द्यावापृथिवीयं बलिं हरेदित्यादिवत्तस्यापि निर्विघ्नसमाप्त्यर्थत्वेन फलोपचयार्थत्वेन वा ग्रहणोपपत्तेः। न च तथापि जयादेराहवनीयसाध्यत्वात्कृष्यादौ तदभावादनङ्गत्वम्। जयादेरेव होमत्वेनाहवनीयप्रणयनप्रयोजकत्वोपपत्तेः। न च प्रधानस्य देशासम्भवादनङ्गत्वम्। अङ्गगुणविरो-

धन्यायेन तदसम्भवेऽप्यङ्गत्वोपपत्तेः । क्वचिदेशेऽग्निचयनेन समान-देशासम्भवाच्च ।

वस्तुतस्तु शय्यादेर्दृष्टार्थतया विधेयत्वाभावेन प्रयोगविध्यभावा-दङ्गप्रधानयोरेकदेशत्व एव प्रमाणाभावः । अस्तु वा तत्तथापि तस्य लिङ्गादिरूपप्रमाणत्वाभावेन वाक्यसंकोचकत्वानुपपत्तेर्लौकि-कसाधारणसर्वकर्मार्थत्वमेव जयादीनामिति प्राप्ते ।

अग्निमद्वैदिककर्माङ्गे तस्य परप्रयुक्ताग्नितत्प्रणयनोपजीवित्वं तदन्यकर्माङ्गे च तत्प्रयोजकत्वकल्पनमिति गौरववैरूप्यादिभिया कामश्रुतीनामाहिताग्न्यादिमात्रविषयत्ववज्जयादिविधिनैव स्वलाघ-वार्थमग्निमत्कर्मार्थतयैव जयादिविधानान्नेतरकर्मार्थत्वम् ॥२॥६ २॥

दोषात् ॥ अनारभ्य, प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामा-र्छत्स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत्तन्निरवपत्ततो-वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान् निर्वपेदिति श्रुतम् ।

प्रतिग्रहशब्दोऽत्र दानपर इत्युत्तराधिकरणे वक्ष्यते । ततश्च यस्मिंश्चदायादादिभ्यो लौकिकं दानं तत्सम्बन्धिनीयमिष्टिः, किं वाऽश्वदानमात्रसम्बन्धिनी, किं वाऽग्निमत्कर्माङ्गभूताश्वदानसम्ब-न्धिनीति चिन्तायाम् । अर्थवादानुरोधेन दानविषयत्ववदस्या दृष्टे-दोषनिर्घातार्थत्वस्याप्यवगमाद्दोषस्य च न केसरिणीं ददातीत्यनेना-विहितलौकिकविषयत्वात्तदनुरोधेनास्या अपि लौकिकदानविषयत्वम् । इदं हि वचनं यत्रानियमेन सामान्यतो विहिते अश्वविषये

इच्छया प्रवृत्तिर्यच वा नैव विहितं तथा मित्रदायादादिभ्यस्तद्विषयम्।

अत एव यत्र विश्वजिदादौ सर्वस्वदानेऽश्वदानं नियतं तत्र तत्प्रकरणस्थेन वाक्यान्तरेणैव तस्य पर्युदासेऽप्यस्य शाखान्तरीयवचनस्योक्तविषयनिषेधत्वमेव। अतस्तत्र निषेधबलेन दोषावगतेस्तन्निघातार्थाया इष्टेरपि तद्विषयत्वम्। भेदनहोमस्येव भेदनवद्दर्शपूर्णमासविषयत्वम्। अत एव दोषनिर्घातः फलं, अश्वदानं च निमित्तं न तु शेषि। तथात्वे उक्तफलत्वानुपपत्तेः। अव्यभिचरितक्रतुसम्बन्धाभावाच्च। यदि त्वस्यादोषनिर्घातार्थत्वं नाभ्युपगम्यते, ततो यावच्छब्दसमभिव्याहारेणाश्वदानस्योद्देश्यत्वावगतेस्तावच्छब्दसमभिव्याहृतायाः प्राप्तेष्टेस्तदङ्गत्वापातान्निमित्तत्वानुपपत्तिः। न हि यावच्छब्दो निमित्तवाची।

न च यावत्तावच्छब्दाभ्यां क्रियाद्वयसम्बन्धमात्रावगतौ शेषित्वपक्षे आरादुपकारकत्वेन तत्र त्वापत्तेस्तावच्छब्दस्य प्राप्त्यभावेन विधेयत्वप्रसङ्गान्निमित्तत्वपक्षे च प्रतिनिमित्तं नैमित्तिकावृत्तिरिति न्यायेनैव तावच्छब्दार्थस्य प्राप्तत्वेनाविधेयत्वाद्विधिलाघवेन निमित्तत्वावगतिः सिद्धान्ते सुलभेति वाच्यम्। पक्षद्वयेऽपि निमित्तानुरोधेन आवृत्तिप्रसक्तौ कालस्यैक्ये तन्त्रत्वप्राप्तेस्तावच्छब्दस्य प्रतिप्रसवविधित्वावश्यम्भावात्। अत एव गृह्णीयादिति लिङः प्रयोजकत्वापरपर्यायहेतुत्वार्थकत्वेऽपि शेषित्वेऽपि तदुपपत्तेर्निमित्तत्वनिश्चयो दुर्लभः। प्रत्युतापेक्षितत्वाच्छेषित्वमेव सिद्धान्ते स्यात्। मम तु दोषनिर्घातार्थत्वात्तन्निश्चय इति वैषम्यम्। अतस्तद्बलेन लौकिकएवाश्वदाने आहिताग्नेः स्यादिति प्रथमः।

द्वितीयस्तु तदर्थवादे जलोदरापरपर्यायो वरुणग्रहाख्यो दोषः। स नैव प्रत्यक्षादिना वैद्यकसंहिताभिर्वाऽश्वदानजन्यतयाऽवगम्यते। अथ मुख्यार्थबाधेऽपि पापमेव वृणोतीति व्युत्पत्त्याऽवयवयोगेन वरुणग्रहशब्देनोच्येत, ततो वैदिके दानेऽपि कथञ्चित् त्यागाद्दुःख-दर्शनात्तदेव वरुणग्रहशब्देनोच्यताम्। दृश्याडम्बरविनोदेन च दुःखशमनात्स एवैनमित्यस्याप्युपपत्तेरस्यादोषनिर्घातार्थत्वे प्रमाणा-भावाल्लौकिकमात्रविषयत्वानुपपत्तेर्वाक्यसंकोचायोगेन सर्वविषयत्वम्। न च गृह्णीयादिति लिङा विहितत्वेनोक्तत्वाद्विहितस्योपस्थितिः। उद्देश्यस्य विहितत्वेन विशेषणायोगात्। अतः सर्वविषयत्वमिति प्राप्ते।

जयादिन्यायेनैव लौकिके फलकल्पना वैदिके नेत्येवं विहिते-ऽप्यग्निरहिते तत्प्रणयनादिप्रयोजकत्वमितरत्र नेत्येवञ्च वैरूप्यापत्ते-र्विधिलाघवानुरोधेनैव स्वसंकोचं कामश्रुतिवदेवानुमन्यते। अत-स्त्वाग्निमत्कर्मसम्बन्ध्यश्वदानमेवोद्देश्यम्। तदपि च न शेषितया। प्रवर्ग्यन्यायेनाश्वदानगतप्रयोजनवत्त्वजिज्ञासायामवश्योपस्थितक्रतोरेव शेषित्वकल्पनौचित्यात्। अतस्तोपसद्वदेव नाश्वदानहेतुत्वं शेषितया अपि तु निमित्ततयैव। अस्तु वा तत्तथापि अग्निमत्कर्मसम्बन्ध्यश्व-दान एवेयमिष्टिः ॥३॥६ ४॥

अचोदितं च॥ सेयमिष्टिर्न प्रतिग्रहीतुरपि तु दातुरेव। उप-क्रमस्थार्थवादे प्रजापतेर्दातुरेव प्रधानभूतस्य स इत्यनेन परामर्शात् प्रजापतिरेव वरुणायाश्वं दत्वा स्वां देवतां सम्प्रदानरूपां वरुणं जलो-दररूपेण प्राप्त इत्यर्थावगमात्तस्यैव तन्निर्मोकार्थमिष्टिकर्तृत्वाव-

गतेश्चैन्द्राद्विवद्देवोपसंहारस्य प्रतिग्रहीतृपदस्य दातृलक्षणार्थत्वात्। अथवाऽऽख्यातेन साक्षात्प्रयोजकसाधारण्येन कर्तृमात्राक्षेपात्साक्षात्स्वभावे प्रयोजककर्तृनापेक्षेऽपि इष्ट्युपक्रमानुरोधेन तदाक्षेपात्प्रतिग्राहयः कारयेदित्यर्थावगतेर्विनैव लक्षणां दातुरिष्टिः।

न चैवं तेन गतार्थत्वम्। मैत्रायणीयशाखायां स एषोऽश्वः प्रतिगृह्यते इत्येवं प्रतिग्रहोपक्रमाया एवास्या आम्नानात्तद्ग्रन्थेनोपक्रमस्थेऽप्यर्थवाद एव लक्षणेत्यधिकाशङ्कायाः सत्त्वात्। तन्निवृत्तिस्तु शाखान्तरे प्रतिग्रहीतुरिष्ट्यवगमेऽप्यस्यां शाखायां प्रबलोपक्रमे प्रमाणाभावेन लक्षणानुपपत्तेरेतद्वचनेन दातुरिष्टौ बाधकाभावात् दूरस्थकर्मानुवादेन उद्देश्यसम्बन्धानुपपत्तेरस्य कर्मान्तरविधायकत्वाच्च नामादीनामुपस्थापकानामभावेन शाखान्तरन्यायाभावाच्च। दात्रुपक्रमानुरोधेन मैत्रायणीयशाखास्थोपक्रमस्यापि प्रयोजककर्तृत्वाभिप्रायेण व्याख्यातुं शक्यत्वाच्च॥ २॥ ६ ५॥

पानव्यापच्च॥ अनारभ्यैव, वि वा एष इन्द्रियेण वीर्येणर्ध्यते यः सोमं वमिति तस्मात्सोमेन्द्रं चरुं निर्वपेत्सोमवामिन इति श्रुतेष्टिरपि वैदिकस्यैव सोमस्य वमने न तु लौकिकस्य। वैद्यगौरवादिभयेन जयादिहोमनदेवोभयार्थत्वस्य तावदनुपपत्तेः। न चाश्वप्रतिग्रहेष्टिवद्दोषनिर्घातार्थत्वकल्पनया लौकिकमात्रविषयत्वशङ्का। वमनजन्यस्यार्थवादिकस्येन्द्रियवीर्यनाशाख्यव्यृधिरूपस्य दोषस्य वैदिकसोमवमनेऽपि जायमानत्वात्। तन्निर्घातार्थत्वस्य प्रत्यक्षबाधितत्वाच्च। वैद्यके वमनार्थतयैव सोमपानविधानात् तस्येन्द्रियादिनाशकत्वानुपपत्तेश्च। अत इन्द्रियवीर्यव्यृधिपदेन लक्षणया

क्रतुवैगुण्यस्यैवोपादानात्तन्निर्घातार्थत्वमेवास्या इष्टेर्युक्तम् । जायते च मामेका वाक् नाभिमतिगादित्यादिमन्त्रवर्णात्सम्यगजरणात्सस्यैव भक्षणस्य शेषप्रतिपत्त्यर्थत्वावगतेर्वमने क्रतुवैगुण्यम् । अतश्चाश्वदानवद्वमनस्य वैधत्वाभावेऽपि इष्टेरग्निमत्क्रतुविशेषाङ्गत्वमविरुद्धम् ॥ ३॥६६॥

तत्सर्वेच ॥ सैव किं याजमान एव वमने स्यादुतार्त्विज्येऽपीति चिन्तायाम् । ऋत्विग्वमनेऽपि प्रतिपत्तिविलोपादिना वैगुण्यस्याव-श्यकत्वात्तत्समाधानार्थमियमिष्टिः स्यादेवेति प्राप्ते ।

इष्टिस्तावदियं क्रत्वङ्गत्वाद्यजमानेन कार्या । ऋत्विग्भिर्यजमान-द्रव्यस्य त्यक्तुमशक्यत्वात् । स्वद्रव्येण स्वाग्निषु करणे पुनः क्रत्वर्थ-त्वानुपपत्तेः । यजमानकर्तृकायाश्च न ऋत्विग्वमनस्य निमित्तता, यः सोमं वमितीति यच्छब्दबलेनेष्टेर्वमनसमानकर्तृकत्वावगतेः । तस्य चोपादेयविशेषणत्वेन विवक्षितत्वात् । अतश्च समानकर्तृकत्वबलाद्य-स्यैवेयमिष्टिर्नैमित्तिकी क्रत्वुपकारिका, यदि वा नैमित्तिक्येवार्थ-वादवशात्क्रतुवैगुण्यसमाधानार्था सती आरादुपकारिका, यदि वा वमनस्य जृम्भावदेवार्थिकं निमित्तत्वमङ्गीकृत्य तद्वदेवेयमिष्टिः षष्ठ्या क्रतुयुक्तपुरुषसंस्कारिका, सर्वथा यजमानवमन एव स्यात् ऋत्विग्व-मने तु सामान्यविहितं यजुर्भ्रेषनिमित्तम् ॥३॥६७॥

सर्वप्रदानम् ॥ शेषभूतसोमवमनप्रसङ्गात्किमाग्नेयादौ कृत्स्नस्य पुरोडाशादेर्यागसाधनता होमस्तेत त्र्यवदानादेरेव तत्पुरोडाशा-दिस्तु तत्प्रकृतिरुत कृत्स्नः पुरोडाशादिः यागसाधनं होमस्तु तद्व्य-वदानस्यैवेति चिन्तायाम् । उत्पत्तिवाक्ये कृत्स्नस्यैव साधनत्वप्रतीतेर्न

तावद्धविरवदानस्यैव यागसाधनत्वम्। न हि चतुरवत्तं जुहोतीत्येतदुत्पत्तिवाक्यम्। तथात्वे आग्नेयादिवाक्ये द्रव्यदेवताद्यनेकगुणविधाने वाक्यभेदापत्तेः। अतश्चोत्पन्नशिष्टत्वेन पुरोडाशावरुद्धे यागे चतुरवत्तविधानानुपपत्तेः चतुरवत्तवाक्ये जुहोतिना यागमनूद्यावदानाख्यसंस्कार एव निर्मन्थ्येनेष्टकाः पचन्तीतिवद्विधीयते। न हि यागाद्धोमोभिद्यते, येन जुहोतिनां नानुवाद इत्याशङ्क्येत। जुहोतिचोदितानामपि, स एष यज्ञः पञ्चविध इत्यादौ यजिनाऽनुवादात्। यजतिचोदितानाञ्च प्रयाजादीनामभिक्रामं जुहोतीति जुहोतिनाऽनुवादाच्च। यागहोमयोर्भेदे प्रयाजानूयाजगृहमेधीययागादौ प्रक्षेपे प्रमाणाभावाच्च। अतो यागहोमयोरभेदाद्युक्तो जुहोतिना यागमनूद्य प्रदेयपुरोडाशसंस्कारकतयाऽवदानविधिः। अतश्च कृत्स्नस्यैव पुरोडाशस्यावदानेन संस्कार्यत्वात् पुनः पुनरवदाय याग इति ज्योतिष्टोमवद्यागाभ्यासेऽपि न दोषः।

वस्तुतस्तु। सर्वं पुरोडाशं पुनः पुनरवदाय सकृदेव चूडयादिवद्याग इत्यपि शक्यं वक्तुम्। शेषकार्याणि स्विष्टकृदादीनि तु प्रकृते विद्यमानशेषाभावाद्धविरन्तराक्षेपकाणि। तद्वाक्यस्थशेषशब्दस्तु अवशिष्टवचनत्वासम्भवादाज्येन शेषं संस्थापयतीतिवदन्यपरः। दृष्टश्च शेषशब्दोऽन्यत्रापि ततः शेषेण विशिष्टदेशजात्यादिमतोजन्म प्रतिपद्यत इति गौतमस्मृतौ स्वर्गारम्भकसुकृतातिरिक्तसुकृतपरः। न हि स्वर्गारम्भकसुकृतशेषेण देहान्तरप्राप्तिरन्यत्रान्यस्य व्यापारायोगात्। अतस्तत्र शेषशब्दोऽन्यवाच्येवेति प्रकृतेऽपि हविरन्तरमेव पूर्वसदृशं शेषशब्दवाच्यं भविष्यति।

अस्तु वा शेषकार्यानुरोधाद्यस्य कस्यचित् प्रकृतस्यैकस्य हविषः शेषस्थापनं, इतरेषां तु सर्वहोम एव। तदा च तद्विषयमेव मध्य-पूर्वार्धवाक्यमिति प्राप्ते।

न चतुरवत्तवाक्येनावदानविधिः, द्विर्हविषोऽवद्यतीत्यनेनैव प्राप्तेः। अनेनैव विधानेऽपि वा निष्ठाप्रत्ययोपादानवैयर्थ्यप्रसङ्गेनाव-दानसंस्कृतस्यैव द्रव्यस्य विधेयत्वाच्च। अतश्च यागानुवादेनावत्तस्यैव हविष्ट्वेन विधेयत्वादुत्पत्तिवाक्येऽष्टाकपालपदं पशुसोमवत् प्रकृति-द्रव्यविधायकम्। अतश्चावत्तस्यैव यागसाधनत्वादवशिष्टस्यानुनि-ष्पन्नप्रतिपत्तिशेषकार्याणीति भाष्यकारः॥

वार्त्तिककारस्तु। न यागहोमयोरभेदः। याज्ञिकानां देवतो-द्देशपूर्वकद्रव्यत्यागे प्रक्षेपाङ्गके यजिपदप्रयोगाद्देवतोद्देशद्रव्यत्याग-प्रक्षेपेषु समप्रधानेषु जुहोतिप्रयोगात् प्रक्षेपाङ्गकक्रियाद्वयवृत्ति जातिर्यागत्वं, क्रियात्रयवृत्तिजातिश्च होमत्वमिति तयोर्भेदात्। अत एव न यजिनाऽङ्गभूतोऽपि प्रक्षेपः शक्योच्यते, अपि तु प्रमा-णान्तरलभ्य एव। तदत्राग्नेयादिवाक्ये यागमात्रानुमानेऽपि अङ्ग-भूतस्य प्रक्षेपस्याप्राप्तत्वाच्चतुरवत्तवाक्येनैवावत्तोद्देशेन तद्विधानम्। अतएव तत्र द्वितीयाऽप्युपपद्यते। यागे त्वष्टाकपालः कृत्स्न एव हविः। प्रक्षेपस्तु त्यागसमानकालीनस्तदुत्तरकालीनो वा द्रव्यदानस्य प्रति-पत्तिः। अतएवात्रत्यजुहोतिनोद्देशत्यागयोरुत्पत्तिवाक्यादेव प्राप्तेर्लक्ष-णया प्रक्षेप एव प्रतिपाद्यते। एवं च यत्र प्रकृतौ विकृतौ वा प्रत्यक्ष-वचनेनातिदेशेन वा प्रक्षेपप्राप्तिस्तत्र नाक्षेपः प्रक्षेपस्य। अन्यत्र तु प्रया-जादौ प्रमाणान्तराभावाद्यत्र न प्राप्तिस्तत्र यजिनैवाक्षेपः। तदङ्ग एव

शक्तिग्रहात्। पात्नीवतादौ तु देवतासम्बन्धेनोद्देशत्यागयोरेव कल्प-नात् पर्यग्निकरणान्तगरौति विधानेन च प्रक्षेपानतिदेशात् न प्रक्षेपः। गृहमेधीयादौ तु आज्यभागवत् पुनःश्रवणाद्वा तत्करण-मिति विशेषः। अतश्च कृत्स्नस्यैव पुरोडाशस्य देवतायै त्यागादुप-युक्तस्य च ध्रुवदानस्य प्रक्षेपणमिति प्रतिपत्तिः। उत्तरार्धादेश्च स्विष्टकृदादिना। न च त्यक्तस्य स्विष्टकृते पुनस्त्यागानुपपत्तिः। वचनवशेन त्यक्तस्यापि पुनः स्वीकारेण त्यागोपपत्तेः। अतोऽस्ति शेष इति सिद्धम् ॥३॥६८॥

अप्रयोजकत्वात्॥ अत्र भाष्यकारेण शेषकार्याणामर्थकर्मत्वा-देकस्मादेव हविषः शेषकार्याणि कर्त्तव्यानीति पूर्वपक्षयित्वा प्रति-पत्तित्वं प्रसाध्य सर्वेभ्य इति सिद्धान्तितम्। तच्चतुर्थे एतादृशविषये प्रतिपत्तित्वस्य साधयिष्यमाणत्वात् पुनरुक्तत्वापत्तेः पूर्वाधिकरण-प्रयोजनकथनार्थान्येतानि सूत्राणीति वार्त्तिककारो व्याचख्यौ।

यदि पूर्वाधिकरणे शेषकार्याणां हविरन्तराक्षेपकत्वं पूर्वपक्षे, तदा स्पष्टमेव प्रयोजनम्। यदा तु शेषकार्यानुरोधेन शेषस्थापनं, तदा तेषां परप्रयुक्तद्रव्योपजीवित्वेनाप्रयोजकत्वेऽप्यर्थकर्मत्वेन तुषोपवाप-कपालवच्छेषस्य गुणभूतत्वात् गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वा-दुपादेयविशेषणत्वेन तद्गतसङ्ख्याया विवक्षितत्वादेकस्मादेव करणं शेषकार्याणाम्। सकृत्सकृदिति वीप्साश्रवणं तु चतुर्थे चतुर्थेऽहन्य-हीनस्येतिवत्प्रयोगान्तरविषयम्। सिद्धान्ते तु विद्यमानशेषत्वाख्य-चातुर्थिकन्यायेन प्रतिपत्तिकर्मत्वादविवक्षितसङ्ख्यशेषाख्यसंस्कार्यानु-रोधेन सर्वेभ्यः करणम्। वीप्सा चोपपन्नतरा ॥ ३॥६९॥

एकस्माच्चेत् ॥ परप्रयुक्तद्रव्योपजीविनोऽर्थकर्मणस्तु तुषोपवापादे-रनेकपुरोडाशीयकपालानां मध्ये एकस्मिन् कपाले ग्टह्यमाणे अनियमप्राप्तौ आग्नेयस्य मुख्यत्वेन प्रथमोपस्थितत्वात् तदतिक्रमकारणाभावेन तदीयकपालस्यैव ग्रहणम् । ग्राह्यतावच्छेदकञ्च प्रथमोपस्थितत्वं न त्वाग्नेयत्वम् । अतो विकृतावन्यविकारस्य तत्त्वेन तदीयमेव कपालं ग्राह्यम् ।

यत्त्वत्र मूले मङ्गतिलोभेन क्वाचित्कतया यदा शेषकार्यानुरोधेन यस्य कस्यचित् स्थापनं तदा कस्येत्यपेक्षायां मुख्यस्येति सिद्धान्तितम् । तदाग्नेयवेलायां शेषकार्याणामबुद्धिस्थत्वाच्छेषस्थापनापेक्षानुपपत्तेः शेषकार्यानुष्ठानवेलायां चान्यस्यैव स्थापनोपपत्तेरुपेक्षितम् । तत्रत्यमुख्यपदं वा प्रथमोपस्थितपरम् । ततश्च यस्यैव यत्र प्रथमोपस्थितिराद्यस्यान्यस्य वा, तस्यैव तत्र ग्रहणमिति न्यायशरीरार्थः ॥ ३ ॥ ७० ॥

भक्षाश्रवणात् ॥ आग्नेयस्य पुरोडाशस्य चतुर्धा कृतस्येदं ब्रह्मण इदं होतुरित्यादिमन्त्रवर्णकल्पितो विभागरूपो व्यादेशः श्रुतः । स किं दक्षिणारूपतया परिक्रयार्थः सन् ऋत्विक्संस्कारार्थः, उत भक्षणरूपतया प्रतिपत्त्यर्थः सन् शेषसंस्कारार्थ इति चिन्तायाम् । भक्षणस्याश्रवणाद् ब्रह्मण इत्यादिषष्ठीश्रुत्या च वासिष्ठादिवद्ब्रह्मादीनां स्वामित्वावगमात् तस्य च दानमन्तरेणानुपपत्तेस्तस्य च त्यक्तेऽपि पुरोडाशे स्विष्टकृदादेरिव स्वीकारकल्पकत्वोपपत्तेः सोमचमसवदृत्विक्संस्कारार्थं दक्षिणादानविधिरेवात्र कल्प्यते । अत एव एषा वै दर्शपूर्णमासयोर्दक्षिणेत्यपि लिङ्गमुपपद्यते । अतः परिक्रयार्थ इति प्राप्ते ।

सकलस्यैव पुरोडाशस्याग्नये त्यक्तत्वादनीशो यजमानो न शक्नोत्यन्यांस्तेन परिक्रेतुम्। अतस्तव मते पुनः स्वीकारो दानं आनतिश्चेत्यनेककल्पना। स्विष्टकृति तु यागस्य श्रुतत्वात् स्वीकारकल्पनेऽपि न दोषः। अतोवरम्भक्षणकर्त्तृत्वमेव सम्बन्धसामान्यवाचिषष्ठ्यर्थं परिकल्प्य शेषापेक्षितशेषप्रतिपत्तिरूपं भक्षणमेव ब्रह्मादिकर्त्तृकं मान्त्रवर्णिकविधिना विधीयते। अवश्यं चानतिरप्यनेन भक्षणोपयोगिन्येव जननीया, न तु गृहसुवर्णादिवत् क्रियान्तरोपयोगिनी, अयोग्यत्वात्। अतश्चावश्यकत्वाद्भक्षणमेव सम्बन्धघटकं कल्प्यते न क्रियान्तरं समर्पणादि गौरवात्। अतश्च ब्रह्मसम्बन्धि समर्पणमेव शेषप्रतिपत्तिस्तेन तु गृहे नीत्वा स्वयं अन्यद्वारा वा भक्षणं सम्पादनीयमित्यपास्तम्। आवश्यकभक्षणस्यैव तत्कर्त्तृकस्य प्रतिपत्तित्वोपपत्तौ क्रियान्तरकल्पने गौरवात्। दक्षिणाश्रुतिस्तु आनुषङ्गिकानतिसाधनत्वादर्थवादः ॥२॥७१॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
तृतीयाध्यायस्य चतुर्थः पादः॥

अथ पञ्चमः पादः।

आज्याच्च। उपांशुयाजप्रयाजाज्यभागानूयाजादिद्रव्याणां जौहवादीनां स्विष्टकृदिडादीनि शेषकार्याणि कर्त्तव्यान्युत नेति चिन्तायाम्। उत्तरार्धात् सकृत्सकृत्समवद्यति सर्वेभ्यो हविर्भ्यः समवद्यतीत्यादिवचनेभ्यो वेद्यां हवींष्यासादयतीतिवदङ्गप्रधानसाधारणहविरर्थत्वप्रतीतेः कर्त्तव्यानीति प्राप्ते।

यत्तावदेषां तत्तद्यागेषु असाधारणं प्रयाजानूयाजेषु जौहवाद्येकदेशरूपं आज्यभागोपांशुयाजेषु च वाचनिकध्रौवोपादानं चतुर्गृहीतं, तस्य तत्तद्यज्याग्निप्रक्षेपरूपविशेषप्रतिपत्तिसत्त्वात् चतुर्गृहीतं जुहोतीति भाष्यकारघृतोपांशुयाजावान्तरप्रकरणस्थवाक्यादेव तत्सत्त्वाद्वा न सामान्यविहितविद्यमानशेषोपक्षीणस्विष्टकृदादिप्रतिपत्तिग्राहकता। अत एव यत्र प्रयाजशेषाभिघारणादौ विशिष्येव तद्विधानं, तत्रागत्याऽवयवशस्तयोः समुच्चयः। न चैवमाग्नेयस्यापि विशिष्य चतुर्धाकरणभक्षणरूपप्रतिपत्तिविधानात् स्विष्टकृदाद्यकरणापत्तिः। तत्र भक्षणस्य कल्प्यत्वेन तस्यापि विलम्बोपस्थितिकत्वेन तुल्यत्वात्। नापि तत्तदुपादानभूतात् ध्रौवात् स्थाल्याज्याद्वा तत्करणं, तयोः सर्वस्मै वा एतद्धित्यादिवाक्याद्यज्ञादिरूपकरिष्यमाणकर्मार्थत्वस्याप्यवश्यम्भावेनाकीर्णकरत्वाभावात्। न चाकीर्णकरत्वाभावेऽपि आज्ये तावन्मध्य एव प्रतिपत्तिः तत्रापि स्थाल्याज्यस्य पिष्टलेपफलीकरणादावुपयोगसत्त्वेऽपि वचनादेव पत्नी-

संयाजावयवशेषस्यैव प्रतिपत्त्युपपत्तावपि प्रकृते तादृशवचनाभावेन साधारणद्रव्यस्य प्रतिपत्त्ययोग्यत्वात्। न च सर्वकार्यान्ते क्रमं बाधित्वाऽपि प्रयोजनवशेन तत्करणं, समिष्टयजुरादिविशिष्यप्रतिपत्त्यन्तरविधानेन तत्र तदप्राप्तेः। अतः शेषाभावान्न शेषकार्याणि ॥३॥७२॥

साकं प्रस्थाय्ये ॥ दर्शपूर्णमासयोः, साकं प्रस्थाय्येन यजेत पशुकाम इत्यत्र सहत्वं फलाय विधीयते। तस्य चाग्नेयेन प्रचर्याग्नीधे स्रुचौ प्रदाय सह कुम्भीभिरभिक्रामेदिति वाक्येन सान्नाय्याङ्गभूतमभिक्रमणं आश्रयत्वेनोच्यते, कुम्भ्यौ निरूपकत्वेन, अन्यत् सर्वमनूद्यते। वाक्यभेदश्च न, निपातत्वाद्विशिष्टभावनाविधानादित्युक्तं द्वितीये। तदत्र सान्नाय्याङ्गतया स्विष्टकृदादिशेषकार्याणि कर्त्तव्यानि न वेतिचिन्तायां, अभिक्रमणे कुम्भीसाहित्येऽपि आहवनीयदेशङ्गत्वा चतुरवत्तमादायैव होमानुष्ठानाच्छेषसद्भावेन कर्त्तव्यानीति प्राप्ते।

नात्रापूर्वमभिक्रमणमाश्रयः, भेदकप्रमाणाभावात्। अपि तु सान्नाय्यप्रक्षेपाङ्गभूतमेव। तादृशाभिक्रमणकर्त्तुः कुम्भीसाहित्यं च कर्त्रभिक्रमणकालीननयनसंस्कार्यत्वं नान्यत्। नयनमपि च नेदमपूर्वं, अपि तु दृष्टार्थत्वलाभाय स्रुक्त्यागानुवादाच्चोक्तप्रक्षेपाङ्गभूतस्रुग्नयनमेव। अतश्च कुम्भ्योरुक्तसंस्कार्यत्वान्यथानुपपत्त्याऽभिषवयुक्तपूतिकवत् स्रुक्कार्यप्रक्षेपार्थत्वावगत्या तत्स्थस्य हविषोऽपि ध्रुवदानवत्प्रक्षेपप्रतिपाद्यत्वावगतेः सर्वहोमावसायान्न साकं प्रस्थाय्यप्रयोगे सान्नाय्यस्य शेषकर्माणि ॥३॥७३॥

सौत्रामण्याम् ॥ सौत्रामणी नाम पशुयागाः। तत्रातिदेश-

प्राप्तदेवतासंस्कारार्थे पशुपुरोडाशे द्रव्यतया पयोग्रहाः सुराग्रहाश्च विधीयन्त इति दशमे सूत्रभाष्यकाराभ्यां वक्ष्यते। तदत्र स्थानापत्त्या पुरोडाशाङ्गं स्विष्टकृदिडं कर्त्तव्यमेव। न च ग्रहशब्दस्य नामातिदेशकत्वाज्ज्योतिष्टोमिकशेषकार्यातिदेशशङ्का। ग्रहशब्दस्य प्रयणीयपदवन्नामातिदेशकत्वानुपपत्तेरिति प्राप्ते।

न तावदवशिष्टः शेषोऽस्ति। यथागृहीतान् ग्रहान् ऋत्विज उपाददते उत्तरेऽग्नौ पयोग्रहान् जुह्वति दक्षिणेऽग्नौ सुराग्रहानिति वचनेनानवदायैव होमावगमात्। न चोच्छिन्नरिष्टि न सर्वहुतं जुहोतीति वचनेन हुतशेषावगतेः शेषकार्यकरणम्। तस्य ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारं यदि न विन्देत् वल्मीकवपायामवनयेत् ततोऽप्यवशिष्टं शतातृण्णायां विचारयन्ति इति विशिष्य प्रतिपत्त्यन्तरविधानेनातिदेशिकप्रतिपत्तिबाधात्। वल्मीकवपा वल्मीकछिद्रं, शतातृण्णा शतछिद्रा कुम्भी। इदञ्च सूत्रभाष्यकारमताभिप्रायेणोक्तम्। यदा तु वार्त्तिकरीत्या देवतासंस्कारार्थं यागान्तरमेव सुरापयोद्रव्यकं विधीयते, तदाऽप्यौषधद्रव्यकत्वपयोद्रव्यकत्वाभ्यां दार्शिकपूर्णमासिकविध्यन्तस्याष्टमे वक्ष्यमाणत्वेन स्विष्टकृदिडादिप्राप्तावपि पूर्ववत्तदभाव इति अधिकरणं व्याख्येयम्॥३॥७४॥

द्रव्यैकत्वे॥ सर्वपृष्ठायामिन्द्राय राथन्तरायेन्द्राय बार्हतायेन्द्राय वैरूपायेत्यादिषट्हविष्कारायां पश्वोऽपि निरुप्य सहावघातपेषणे कृत्वा प्रकृतिवद्विभागे प्राप्ते तमकृत्वा वचनादेकमेव रथचक्रमात्रं पुरोडाशं कृत्वा समन्ततः पर्यवद्यतीति वचनेन समन्ततः पर्यवदाय प्रधानानि क्रियन्ते। अत्र समन्तत इत्येव कर्मभेदतात्पर्यग्राहकम्।

अन्यथाऽग्नये कृत्तिकाभ्य इतिवत्कर्मैकत्वे सकृदवदानापत्तेः। याज्या-भेदाद्वा कर्मभेदः। तच्च च स्विष्टकृदिडादि प्रधानभेदात् प्रत्येकं भवति।

न च द्रव्यैकत्वात् तन्त्रता, अवदानप्रदेशभेदेन तत्सदुत्तरार्धा-दीनां भेदात्। न च संस्कारवाक्यानां परस्परान्वये प्रमाणाभावे-नोत्तरार्धस्यावदानप्रदेशप्रतियोगिकत्वाभावात् प्रकरणेन हविःप्रति-योगिकत्वप्रतीतेस्तस्य च पुरोडाशैक्येन साधारणत्वात् द्रव्यैकत्वमिति वाच्यम्। तत्तद्देवतायै चतुर्मुष्टिपरिमितस्यैव निरुप्तस्य हविष्ट्वेन पुरोडाशस्य हविष्ट्वाभावात्। न च तथापि हविषः संसृष्टत्वेन साधारणत्वाद्यागकाले इन्द्राय राथन्तराय निरुप्तं यत्तत् तस्मै न ममेति प्रत्येकं सङ्कल्पेऽपि संसृष्टोत्तरार्धादेः अगृह्यमाणविशेषत्वात् तन्त्रत्वं शेषकार्याणामिति वाच्यम्। तथापि न ह्यत्रानूयाजानिति-वत् द्विरैन्द्रवायवस्य भक्षयति द्विर्ह्येतस्य वषट्करोतीत्यनेन प्रधान-भेदस्य शेषकार्यभेदे हेतुत्वावगमात्। तदन्यथानुपपत्तिकल्पित-व्याप्तिबलेन भेदोपपत्तिरिति प्राप्ते।

तेन ह्यन्नं क्रियत इतिवद्विधौ लटा भूतलक्षणापत्तेरपेक्षित-स्तुतिमात्रपरत्वावसायाद्भक्षमात्रस्य च न्यायप्राप्ततन्त्रत्वबाधकत्वानुप-पत्तेः सकृदेव शेषकार्याणि। न ह्यत्रेत्यत्र तु लक्षणाभावाद्धेतु-विधित्वमिति शेषः। ऐन्द्रवायवे तु वचनादेव भक्षावृत्तिरिति वैषम्यम्॥२॥७५॥

सोमे॥ ज्योतिष्टोम उत्पत्तिशिष्टोऽपि सोमोऽभिषवादिसंस्कार-विधिवशाद्रसप्रकृतिः। रस एव तु ग्रहचमसादिपात्रवृत्तिरैन्द्रवाय-

वादिदेवतासम्बन्धाद्धविरिति सर्वं एव भज्यते । तस्य चाल्पं जुहो-तीति वचनेनोल्पोद्देशेन प्रक्षेपरूपप्रतिपत्तिविधिर्द्धवदानवत् । तत्र च ग्रहैर्जुहोतीत्यादिना पात्रविधिरिति स्थितिः । अतश्च शेषसत्त्वा-द्भक्षणं प्रतिपत्तिः । तत्प्रमाणञ्च समाख्या वचनञ्च ।

तत्र समाख्या तावत्प्रैतु होतुश्चमसः प्र ब्रह्मण इत्यादिका वेदे, याज्ञिकानां होमचमस इत्यादिका । अदनार्थस्य चमेर्धातोरधि-करणवाचके औणादिके असन्प्रत्यये कृते चमसशब्दनिष्पत्तेः । सोम-श्चम्यते अस्मिन्निति व्युत्पत्त्या सोमभक्षणसाधनत्वावगतेस्तत्तत्समाख्या-कल्पितश्रुत्या होत्रादिकर्तृकभक्षणस्य सोमप्रतिपत्त्यर्थत्वसिद्धिः । यदि लौणादयोऽव्युत्पन्ना इति पक्षाश्रयणं, तदा चमसशब्दस्य पात्रे रूढत्वे योग्यतयैव होतृसोमादिसम्बन्धो भक्ष्यभक्षकत्वादिसम्ब-न्धेनैवेति तथा भक्षणसिद्धिरविकला । अतश्च होतृब्रह्मोद्गातृयज-मानमैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्रच्छावाकाग्नीध्राणां स्वस्वचमसेषु समाख्यया भक्षः । सदस्यपक्षे तस्यापि स्वचमसे । वचनं त्वग्रे निरू-पयिष्यते ॥२॥७६॥

उद्गातृ ॥ तत्रैव, प्रैतु होतुरित्यादिमन्त्रे प्रोद्गातॄणामिति श्रुतम् । तेन किं उद्गातैवैकस्तच्चमसभक्षणे विनियुज्यते उतोद्गातृप्रस्तोतृप्रति-हर्त्तारस्त्रय इति चिन्तायाम् । प्रातिपदिकश्रुत्या उद्गातैव । न च बहुवचनानुरोधेनास्य सर्वतोमुख्यादौ उत्कर्षः, प्रातिपदिकस्य वा लिङ्गसमवायेन त्रितयपरत्वम्, योगेन वोत्कृष्टगानकारित्वेन त्रितय-परत्वं कल्प्यतामिति वाच्यम् । उद्गातृशब्दस्य प्रचुरप्रयोगेनोद्गीथा-परपर्यायसामद्वितीयभागरूपोद्गानकर्त्तरि रूढत्वाद् गुणभूतबहुवच-

नानुरोधेन त्वदुक्तार्थस्त्रिविधाया अपि अन्याय्यकल्पनायाः पाशाधिकरणन्यायेनानुपपत्तेः। न ह्युत्कर्षायोग एव तदधिकरणविषयः, प्रकरणबाधापादकतदयोगे श्रुतिबाधापादकलक्षणाद्ययोगस्य सुतरान्तदधिकरणविषयत्वात्। अतो बहुवचनमेव व्यत्ययानुशासनादिरीत्या एकत्वलक्षणार्थं व्याख्येयम्। न चैकत्वलक्षणायां जहत्स्वार्थतापत्तेः प्रातिपदिक एवाजहत्स्वार्थता युक्तेति केषाञ्चिदुक्तं युक्तम्। मुख्यत्वप्राधान्याभ्यां प्रातिपदिके जघन्यवृत्त्यङ्गीकारे निरस्ते जहत्स्वार्थतायाः फलमुखत्वेनादोषात्।

न च प्रतिहर्त्रादिकर्मण्यपि तत्प्रतिपादकवाक्येषु च औद्गात्रं कर्म काण्डञ्चेति समाख्यानात् तत्कर्त्तर्यपि प्रतिहर्त्रादावुद्गातृशब्दस्य शक्त्यैव प्रयोगोपपत्तेरनेकार्थकस्योद्गातृपदस्य बहुवचनानुरोधेन निषद्योद्गातारः स्तुवत इत्यादिवच्चितयपरत्वमविशेषाद्वा सत्सुब्रह्मण्यचतुष्टयपरत्वं किं न स्यादिति वाच्यम्। अनेकशक्तिकल्पनाभियोद्गानकर्त्तृवाचकस्यैवोद्गातृपदस्य लक्षणादिनाऽपि क्वाचित्कसर्वविषयप्रयोगोपपत्तेः। अत एव मुख्योद्गातुरेव कर्म मुख्यमौद्गात्रं तद्वेद्संयोगाद्यान्यत्रापि औद्गात्रशब्द उद्गातृशब्दस्य गौण इति द्रष्टव्यम्। अतः पाशाधिकरणन्यायेनोद्गातैवैकः पिबेदिति प्राप्ते।

नोद्गातृशब्दस्य ऋत्विग्विशेषे शक्तिः, क्लृप्तावयवयोगेनैवोत्कृष्टगानकर्त्तृमात्रवाचित्वेनोपपत्तौ अतिरिक्तशक्तिकल्पनायां प्रमाणाभावात्। प्रचुरप्रयोगस्याहवनीयेऽग्निपदवन्निरूढलक्षणयाऽप्युपपत्तेः। न चात्र रथकारादिशब्दवदवयवार्थं विहाय ऋत्विग्विशेषे प्रयोगः, येनातिरिक्ताऽपि शक्तिः कल्प्येत। न चोद्गायतिरप्युङ्गीथवाच्येवेति

नियमः। उद्गायतीनामरविन्दलोचनमित्यादावन्यत्रापि प्रयोगात्। अत एव पङ्कजादिशब्दस्य मण्डूकादौ प्रयोगाभावेन योगरूढ़ि-कल्पनायामपि प्रकृते न तत्कल्पना। अपि तु अग्निशब्दवन्निरूढ़-लक्षणैव। अतश्च तात्पर्यग्राहकसत्त्वे लाक्षणिकार्थग्रहणेऽपि प्रकृतेऽग्नि-मुपनिधाय स्तुवत इतिवन्मुख्यार्थसम्भवे लाक्षणिकार्थग्रहणायोगात् बहुवचनानुरोधाच्च निषद्योद्गातार इतिवत्प्रकृतापूर्वीयगानकर्तॄणा-मेव ग्रहणम्। न सुब्रह्मण्यस्य भाष्यकारोक्तस्यापि। गानकर्तृत्वा-भावात्। मूलग्रन्थान्यथाकरणं तु युक्त्यनुरोधेन न दोषः, सिद्धान्ते-ऽन्यथालाभावादिति ध्येयम् ॥२॥७७॥

ग्रावस्तुतः॥ भक्षे समाख्या प्रमाणमुक्ता। वचनमिदानीमभि-धीयते। यथाचमसमन्यांश्चमसांश्चमसिनो भक्षयन्ति, अथैतस्य हारियोजनस्य सर्वे एव लिप्सन्त इति श्रुतम्। तत्र लिप्साशब्दे-नोपक्रमस्यार्थवादानुरोधाल्लिप्सामात्रग्रहणे अदृष्टार्थत्वापत्तेश्च लक्ष-णया भक्षणमभिधीयते। तच्च हारियोजने वक्ष्यमाणविधया वषट्-कारनिमित्तं होमाभिषवनिमित्तञ्च यद्यपि प्राप्तं, तथाप्यत्र विशि-ष्टोद्देशे वाक्यभेदापत्तेर्भक्षान्तरमेव सर्वकर्तृविशिष्टं विधीयते।

अथवा हारियोजनावान्तरप्रकरणे पाठात् तदीयभक्षानुवादेनैव पुरस्तादैन्द्रवायवस्य भक्षयति सर्वतः परिहारमाश्विनं भक्षयती-त्यादिवद्गुणमात्रं विधीयते। विशेषपुरस्कारेण कर्तृविधानाच्च नैक-कर्त्रवरोधे कर्त्रन्तरविधानानुपपत्तिशङ्का। सर्वथा वाचनिकः कर्तृ-विशेषः। तदिह सर्वपदं किं चमसिमात्रपरं किं वा प्राकृतसर्व-र्त्विक्परमिति चिन्तायाम्। सर्वशब्दस्य सर्वनामत्वादुपस्थितपरा-

मर्प्नित्वावगतेश्चमसिनामेव पूर्वमुपस्थितत्वात् तेषामेव ग्रहणमिति प्राप्ते।

चमसिशब्दस्यान्यचमसेषु एकैकचमसिनो भक्षणं न्याय्यं अत्र तु चमसिनामन्येषां च सर्वेषामेव तद्युक्तमित्येवं स्तुत्यवलम्बनत्वेनोपपत्तेर्न पुनः सर्वपदसङ्कोचत्वम्। अतश्च परमसर्वेण व्यवहारासम्भवादावश्यकेन प्रकरणादिनैव प्रकृतकर्मकरमात्रग्रहणोपपत्तौ पुनश्चमसिभिर्विशेषणे प्रमाणाभावः। न चैवं पत्न्या अपि ग्रहापत्तिः मेषीवदेव, पुंलिङ्गेन तस्या ग्रहणानुपपत्तेः। चमसाध्वर्यूणान्तु याज्ञिकाचाराभावादेवा-ग्रहणमिति ध्येयम्। न हि ऋत्विज एव सर्वशब्देन ग्राह्या इत्यत्रा-न्यत् किञ्चित्प्रमाणमस्ति॥३॥७८॥

वषट्काराच्च॥ सोम एव, वषट्कर्त्तुः प्रथमभक्ष इति श्रुतम्। तत् किं भक्षान्तरवचनं किं वा समाख्यादिप्राप्तभक्षानुवादेन प्राथम्य-मात्रविधिरिति चिन्तायाम्। भक्षान्तरत्वे प्रमाणाभावात् प्राथम्य-मात्रविधिः। न च वषट्कर्त्तुरपि विधेयत्वे वाक्यभेदः। वषट्कारे निमित्ते भक्षोद्देशेन प्राथम्यविधानात् रथन्तरे निमित्ते ग्रहोद्देशे-नैन्द्रवायवाग्रत्वविधिवच्च विजातीयानेकोद्देशे वाक्यभेदाभावात्। अतश्च यत्र चमसे हारियोजने वा अध्वर्य्वादेरन्यस्य वषट्कर्त्तुश्च होमाभिषवाभ्यां समाख्यया लिङ्गावचनेन वा भक्षप्राप्तिस्तत्र वषट्कर्त्तुः प्रथमं भक्षः ततोऽन्यस्येति वचनार्थ इति प्राप्ते।

प्रथमभक्ष इति समासरूपे एकस्मिन्पदे एकांशेनोद्देश्यत्वे एकां-शेन विधेयत्वे चाङ्गीक्रियमाणे एकप्रसरताभङ्गापत्तेः कर्मान्तर-मेवेदम्। न च तस्मिन्रूपकताबीजाभावः। सामर्थ्यभङ्गस्यैव तद्बीज-

त्वात् । तथा हि सर्वत्रोद्देश्यविधेयभावस्थले उद्देश्ये विधेयान्वयात्पूर्व-मुद्देश्यस्योद्देश्यत्वेन क्रियान्वयोऽवश्यं वक्तव्यः । अत एव,

यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम् ।

इत्यपि सङ्गच्छते । प्राथम्यं तत्त्वेन प्रथमक्रियान्वयोऽन्यस्याति-प्रसक्तत्वात् । तदत्र यत्र भिन्नपदस्थले यागेन स्वर्गं भावयेदित्यादौ तत्तत्पदार्थोपस्थित्यनन्तरं स्वर्गस्योद्देश्यत्वेन यागस्य च विधेयत्वेन क्रियान्वये प्रथममवगते पश्चादेव विधेयस्य यागस्योद्देश्ये स्वर्गेऽन्वय इति स्थितिः । तद्वच्चेहाप्येकपदस्थले, भक्षे प्राथम्यान्वयात्पूर्वं भक्षस्य क्रियान्वयोऽभ्युपगन्तव्यः । ततश्च क्रियान्वयात्पूर्वं भक्षप्राथम्ययोर्विशे-ष्यविशेषणभावानवगमादेकार्थीभावलक्षणसामर्थ्यभङ्गादपरिपूर्णसमा-सपदस्य पदान्तरेणाख्यातेनाप्यन्वयायोगः ।

यद्यपि चास्मन्मते वैयाकरणवद्विशिष्टार्थवाचकत्वं न सामर्थ्यं, तथापि क्रियान्वयात्पूर्वं विशिष्टार्थबोधकत्वमेव तदिति बोध्यम् । अत्र च क्रियाभिन्नं विधेयं बोध्यम् । क्रियात्मके विधेये तदन्वयात् पूर्वमुद्देश्यस्य तत्त्वेन क्रियान्वयस्य वक्तुमशक्यत्वात् । अत एव विविदि-षन्ति यज्ञेनेत्यादौ विविदिषोद्देशेन यज्ञादिभावनाविधानेऽपि न क्षतिः । अतश्चैकप्रसरताभङ्गभिया भक्षान्तरमेव विधेयम् । अत एव लोहितोष्णीषा इत्यादावतिदेशात् पूर्वमेव लोहितोष्णीषविशिष्टाः कर्त्तार एव प्रचारोद्देशेन विधीयन्ते विशेषणमात्रविधिफलका इति तत्र तत्रैकप्रसरताभङ्गपरिहारप्रकारो वक्ष्यते । अतश्च प्रकृते एक-प्रसरताभङ्गभिया प्राथम्यस्य पूर्वकर्मण्यनिवेशाद्गुणादेव वषट्कर्तृप्राथ-म्योभयविशिष्टभक्षान्तरमेव विधीयते सोमसंस्कारार्थत्वेन । तत्र च

यागार्थत्वेन वषट्कारस्य क्लृप्तत्वात् कर्त्रुपलक्षणत्वेनार्थान्निमित्तत्वाव-गतेर्वषट्कारनिमित्तकमिदं भक्षणं ग्रहेषु चमसेषु चाविशेषात् सिद्धं भवति ॥३॥७९॥

होमाभिषवाभ्याञ्च ॥ इदमपरं भक्षस्य निमित्तम्। हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्तीत्यत्र हविर्धानादीनां सर्वेषां गुणानां विध्यन्तरादर्थाच्च प्राप्तत्वात् केवलं होमाभिषवसमानकर्तृकत्वं भक्षमात्रे अप्राप्तं विधेयम्। यद्यपि हारियोजनादौ होमाभिषवसमानकर्त्तुरपि भक्षणं प्राप्तं, तथाप्यव-युत्यानुवादे वाक्यवैयर्थ्यापत्तेस्तस्य विधेयता। सा च न पूर्वविहित-भक्षेषु। सर्वत्रोत्पत्तिशिष्टविशेषविहितकर्त्रन्तरावरोधात्। अतश्च होमाभिषवसमानकर्तृकं भक्षान्तरमेवेह विधीयते। कर्तृरूपगुणा-नुरोधेन वाऽवेष्टिवद्वषट्कर्तृभक्षस्यैव प्रयोगभेदमात्रम्। न चोत्पत्तौ नियामकाभावः। प्राथम्यस्यैवोत्पत्त्यन्वयिनो वषट्कारवाक्ये नियाम-कत्वात्। प्राथम्यस्यापि प्रयोगान्वये तु कर्मान्तरमेवेति ध्येयम्।

अत्र च होमे अभिषवसमानकर्तृकत्वस्याध्वर्यवसमाख्यावलादेव प्राप्तेः प्रधानान्वयस्याभ्यर्हितत्वाच्च भक्ष एवाभिषवसमानकर्तृकत्वं होमसमानकर्तृत्ववद्विधीयते। होमाभिषवयोश्च क्लृप्तफलत्वाद्वषट्कार-वदेवार्थान्निमित्तत्वम्। तयोश्च समुच्चितयोर्निमित्ततेति षष्ठे वक्ष्यते। अतश्च यो यदभ्यासे होमाभिषवकर्त्ता अध्वर्युः प्रतिप्रस्थाताऽन्यो वा ग्रहे चमसे वा स तेन भक्षयेत् ॥३॥८०॥

प्रत्यक्षोपदेशात् ॥ अथ यत्रैकस्मिन्पात्रे अनेकेषां भक्षकर्तृणामेक-स्मिन्कर्त्तरि वा अनेकेषां वषट्कारहोमाभिषवसमाख्यादिकारणानां

समवायस्तत्रैकशेषप्रतिपत्त्यर्थत्वाद् भक्षणानां विकल्पः । प्रत्यक्षशिष्टानामपि वषट्कारादिभक्षाणां सामान्यविहितत्वात् कल्पिकयाऽपि समाख्यया विशेषनिष्ठया प्रमेयबलाबलन्यायेन बाधाद्भक्षविषयत्वावगतेर्भिन्नविषयत्वे वा प्राप्ते अल्पं भक्षयतीति वचनेन हुतस्य शेषस्यैकभक्षणप्रतिपाद्यत्वासम्भवादेकेन भक्षणेन प्रतिपादितेऽपि शेषे अवशिष्टशेषस्य भक्षणान्तरेण प्रतिपत्तिसम्भवात् प्राथम्यविधेश्च समुच्चयः ।

नन्वेवं कर्त्तृभेदेन केषाञ्चिद्भक्षाणां पृथगनुष्ठानेन समुच्चयोपपत्तावपि यत्रैकस्मिन्नेव कर्त्तरि कारणानेकत्वं, तत्र प्रयोगविध्यवगतसाहित्यसम्पत्त्यर्थं तन्त्रत्वोपपत्तेर्न पृथगनुष्ठानेन समुच्चयः । वस्तुतस्तु समाख्याया ब्रह्मोद्गातृयजमानसदस्यचमसेषु कारणान्तरेणैतत्कर्तृकभक्षस्याप्राप्तत्वात् तद्विधायकश्रुतिकल्पकत्वेऽपि होत्रकचमसेषु वषट्कर्तृत्वेन तेषां तत्र भक्षस्य प्राप्तत्वात् क्लृप्तप्रवृत्तिनिमित्ततया न विधिकल्पकत्वावकाशः । एवं हारियोजनेऽपि । येषां कारणान्तरेण न भक्षप्राप्तिस्तत्प्राप्तिफलक एव सर्वत्र विधिरिति न तत्रापि कारणद्वयस्यैकस्मिन् कर्त्तरि समवाय इति चेत् ।

मैत्रावरुणादिहोत्रकचमसेषु वषट्कारात्तेषामिव होतुरपि वषट्कर्तृत्वाद्धोतृचमससाधारण्येन चाध्वर्योरपि होमाभिषवकर्त्तृत्वाद्धोत्रादीनामपि तद्भक्षणप्राप्तेर्विशिष्य तत्तच्चमस इत्येवंविधसमाख्यायास्तत्तत्कर्त्तृकभक्षणान्तरविधिमन्तरेणानुपपत्तेः । अत एव तन्त्रानुष्ठाने विधिफलाभावेन न तन्त्रत्वमपि । न चैवमप्येकस्मिन्नेव कस्मिंश्चिद्भक्षे समाख्यानिमित्तभक्षकरणमात्रेण समाख्योपपत्तौ न चमस-

साध्याध्यासमाचे तदापत्तिः। समाख्याकस्थश्रुतौ अविशेषात् प्रकृता-
पूर्वसाधनसमसस्यसोमसंस्कारार्थत्वेन तत्तत्कर्तृकभक्षणस्य विधेयत्वेन
सर्वत्रैव समससाध्याध्यासे तत्प्राप्तेः। अतः सर्वत्रैव एकपात्रे कर्तृभेद-
इवैककर्तरि कारणभेदेऽपि युक्तो भक्षस्य पृथगनुष्ठानसमुच्चयः।
यद्वा, हारियोजने तु माऽस्तु समुच्चयः। याज्ञिकानुष्ठानं चेत्तर्हि
तेनास्तु सः ॥३॥८१॥

एकपात्रे ॥ भक्षसमुच्चये चिन्तितेऽधुना प्रसङ्गात् तत्क्रमो निरू-
प्यते। तत्रैकस्मिन्पात्रे कर्तृभेदेन भक्षणभेदे, वषट्कर्तुः प्रथमभक्ष इति
वचनात्, होतेव नः प्रथमः पाहि इत्यादिमन्त्रवर्णाच्च वषट्कर्तुस्त-
न्निमित्तः प्रथमो भक्षः। न च होमकर्तुरध्वर्योर्हस्ते पात्रसत्त्वादर्पण-
प्रत्यर्पणकल्पने गौरवापत्तेस्तस्यैव न्यायेन भक्षप्राथम्यावगतेस्तदपेक्षया
च वषट्कर्तुः प्राथम्यविधाने अपूर्वविधित्वापत्तेः समाख्यानिमित्त-
भक्षापेक्षयैव तेन प्राथम्यविधिर्नियमविधित्वलाघवानुरोधेन युक्त इति
वाच्यम्। नियामकन्यायप्रवृत्तेः पूर्वमेवैतस्य वचनस्य प्रवृत्तत्वेन
नियमविधित्वानपायात् न्यायेन सङ्कोचानुपपत्तेः।

अतो वषट्कारनिमित्तं प्रथमं भक्षः। मैत्रावरुणादिचमसेषु च
सवनमुखीये ऐन्द्रप्रदाने होत्रा वषट्कारात् मित्रावरुणादिभ्यश्च प्रदाने
मैत्रावरुणादिभिर्वषट्काराद्वषट्कर्त्रनेकत्वे तु प्रदानक्रमेण क्रमः। वष-
ट्कर्तृभक्षानन्तरञ्च होमाभिषवोभयकर्तृसत्त्वे तस्य भक्षः। तन्नि-
मित्तभक्षस्य वाचनिकत्वात्। ततो दुर्बलः समाख्याप्रमाणकः।
होमाभिषवकर्तृकभक्षाभावे तु तदनन्तरं भिन्नकर्तृकसमाख्या-
प्रमाणक एव। समानकर्तृके तु होमाभिषवकर्तृकभक्षाभावे द्विरनु-

स्थानमात्रं न क्रमाभिव्यञ्जकं किञ्चित्। तत्सत्त्वे तु पूर्वोक्तक्रम इति ध्येयम् ॥३॥८२॥

वचनात् ॥ इदं च भक्षणं, नानुपहूतेन सोमः पातव्य इति वचनादनुज्ञाप्यैव। तदपि न लौकिकेन शब्देन, अपि तु आम्नानवशादुपहूत उपह्वयस्वेत्यनेनैव मन्त्रेण। तत्रापि लिङ्गेन वाक्यं बाधित्वा विभज्यैवैकोऽनुज्ञापने अपरस्यानुज्ञायाम्। निषेधबलास्वानुज्ञापनानुज्ञयोर्विधिकल्पना। मन्त्रबलाच्च। तत्राप्यर्थक्रमेण पाठं बाधित्वा उपह्वयस्वेति प्रथममनुज्ञाग्रहणे उपहूत इति पश्चादनुज्ञादाने विनियोक्तव्यम् ॥३॥८३॥

तदेकपात्राणाम् ॥ सेयमनुज्ञा यस्यैकस्मिन् पात्रे भक्षप्रसक्तिस्तस्यैव ग्राह्या। दृष्टार्थतालाभात्। भागाधिक्यादिप्रसङ्गनिमित्तकलहशङ्कानिवृत्त्यर्थत्वात्। उपायान्तरेणापि तु तन्निवृत्तावस्य नियमविधित्वात्। अन्यस्यानुज्ञाने तु अदृष्टार्थत्वमपूर्वविधित्वञ्च दोषः। अत एव यत्रैकस्मिन् पात्रे एक एव भक्षयिता तत्र नैवानुज्ञाग्रहणम्। एवं अन्तिमस्यापि भक्षयितुर्नानुज्ञाग्रहणं, प्रयोजनाभावात्। याज्ञिकास्त्वाचरन्ति ॥३॥८४॥

याज्यापनयेन ॥ ज्योतिष्टोमे ऋतुयाज्यासु हौत्रप्रवचनाम्नानासु अन्त्या याज्या होतुरपनीय यजमानस्य विकल्पेन विधीयते। यजमानयाज्या सोऽभिप्रेष्यति होतरेतद्यजेति स्वयं वा निषद्य यजतीति। तत्र स्वयं याज्यापाठपक्षे वषट्कारभक्षयोः स एव कर्त्ता उत होतेति चिन्तायाम्।

षष्ठीश्रुत्या यजमानस्य याज्यामात्रं श्रुतं न वषट्कारः। तस्य

याज्याया अधिवषट्करोति वचनेन याज्यातो भेदात्। अतश्च वषट्कारे समाख्यानिमित्तो होतैवेति तन्निमित्तो भक्षः तस्यैव। यत्तु स्वयं वेति वचनम्। तन्न तावद्यागकर्तृत्वविधायकं तस्य प्रधानवाक्यादेव सिद्धेः। नापि यागप्रकाशकवषट्कारप्रयोगकर्तृत्वविधायकम्। विध्यन्तरत्वे वाक्यभेदापत्तेः। अत आद्यवाक्येन यजमानस्य याज्यायां विहितायां द्वितीयेन. प्रैषकर्तृत्वविधानात् प्रैषार्थकर्तृत्वानुपपत्तेरेव याज्याविकल्पप्राप्ते यागकर्तृत्वस्य च याज्याप्रयोक्तृत्वमात्रेणाप्युपपत्तेस्तृतीयमर्थवादः। निषद्येत्यपि याज्यायां निषद्यत्वस्य सामान्यविधित एव प्राप्तत्वादनुवादः। अनवानं यजतीति तु याज्यान्तरविषयमिति प्राप्ते।

आख्यातश्रवणाद्वाऽनुपपत्तेश्च तृतीयमेव विधायकं, आद्यन्त्वर्थवादः। अतश्च याज्यान्तेन वषट्कारेणैव मुख्ययागकर्तृत्वाद्वषट्कारोऽपि तस्यैव। याज्यावषट्कारयोः समानकर्तृकत्वस्यानवानत्वस्य च बाधापेक्षया वषट्कारे होतृकर्तृकत्वमात्रस्यैवैकस्य समाख्याप्रमाणस्य बाधौचित्याच्च। एवञ्चाद्यस्यापि विधित्वे न कश्चिद्दोषः। अतश्च वषट्कारनिमित्तो भक्षोऽपि तस्यैव ॥२॥८५॥

फलचमसः ॥ तत्रैव, यदि राजन्यं वैश्यं वा याजयेत् स यदि सोमं बिभक्षयिषेन्न्यग्रोधस्तिभिनीराहृत्य ताः सम्पिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममिति श्रुतम्। अत्र द्वितीयो निःसन्दिग्धत्वपरः आद्यस्तु निमित्तत्वपर एव। स्तिभिनीः अङ्कुरामूलानि च। तत्रैतस्य फलचमसपदाभिधेयस्य किं भक्षणमात्रं किं वा यागोऽपीति चिन्तायाम्।

निमित्तत्वेनोपक्षीणस्य यागस्य फलचमसाम्वयित्वानुपपत्तेस्त-च्छब्दपरामृष्टस्य च तस्य भक्षान्वयश्रवणात् प्राप्तयागानुवादेनानेक-पेषणादिरूपगुणविधाने वाक्यभेदापत्तेश्चानेकगुणविशिष्टभक्षान्तर-मेव फलचमसकरणकं विधीयते। फलचमसस्य विनियोगाभावेन संस्कार्यत्वानुपपत्तेः सक्तुन्यायेन विनियोगभङ्गस्यावश्यकत्वात्। तदपि आरादुपकारकमपि यजमानसोमभक्षस्य बाधकं, न सोममित्यनु-वादबलात्। न गिरा गिरेति ब्रूयादितिवदेककार्यत्वाभावेऽपि बाधकत्वकल्पाया एव स्थानापत्तेरङ्गीकारात्। अस्तु वा स्वतन्त्र एव तन्निषेध इति प्राप्ते।

यद्यपि भक्षान्तरमिदं तथापि तस्य नारादुपकारकत्वम्। तमिति द्वितीयानिर्देशेन फलचमससंस्कारार्थत्वप्रतीतेः। अनुप-युक्तस्य च संस्कारायोगेऽपि अध्वर्युं वृणीतइत्यादिवद्विनियोग-कल्पना। तथापि यदि सोमं बिभक्षयिषेदित्याद्यनुवादबलाद्यज-मानकर्तृकभक्षस्य च तावतैवोपपत्तौ सर्वत्र सोमबाधेन सर्वार्थत्व-कल्पने प्रमाणाभावाद्यजमानचमसयागाभ्याससाधनत्वमेव फलचमसस्य कल्प्यत इति न काचिदनुपपत्तिः।

वस्तुतस्तु। भक्षान्तरत्वे प्रमाणाभावाद्यजमानसोमभक्ष एव तत्कर्तृकपेषणदध्युन्मृज्युत्तरकालद्वयविशिष्टः फलचमससंस्कारकत्वेन विनियुज्यते। राजा राजसूयेनेतिवत्, तस्य वायव्याश्चितिवच्च, विनियोगविशिष्टप्रयोगविधानादवाक्यभेदः। यजमानचमसाभ्यासो-पद्रव्यसंस्कारकभक्षसंस्कार्यत्वात्, पूर्वोक्तयुक्तेश्च, तदीयत्वानुमानात्। कल्पितवाक्येन फलचमसस्य उक्तयागाभ्याससाधनत्वसिद्धिः। नैमि-

ज्ञिकत्वाच्च तच्च नित्यसोमबाधकत्वम्। एवं च स्थानापत्त्यैव फल-चमसे इतरसोमसंस्कारवद्यजमानभक्षस्यापि प्राप्तिसम्भवे पूर्वप्रवृत्त्या तद्विध्यङ्गीकरणं गुणद्वयविधानार्थं फलचमसस्य यागसाधनत्वसिद्ध्यर्थं चेति द्रष्टव्यम्। एतेन यदि सोमं न विन्देत् पूतीकानभिषुणुया-दित्यत्राभिषवयुक्तपूतीकानामपि यागसाधनत्वं व्याख्यातम् ॥३॥८६॥

अनुप्रसर्पिषु ॥ राजसूये दशपेयो नाम सोमयागविकारोराज-कर्तृकः। तत्रातिदेशतोदशसु चमसेषु प्राप्तेषु यजमानचमसे राज्ञो-भक्षणम्। तत्रापरं, शतं ब्राह्मणाः सोमान् भक्षयन्ति दशदशै-कञ्चमसमनुप्रसर्पेयुरिति वचनद्वयं श्रुतम्।

तत्र न तावच्छ्रुतं ब्राह्मणा इति विधिर्दशदशेत्यनुवादः, भक्षा-नुवादेन गुणद्वयविधाने वाक्यभेदात्। एकैकस्मिन् भक्षे शतब्राह्मण-प्राप्त्यापत्तौ दशदशेत्यस्य प्राप्त्यभावाच्च। अतो दशेत्येव लिङ्श्रवणा-द्विधिः। सोऽपि न चमसोद्देशेन, दशत्वस्य प्राप्तत्वात्। नापि तदु-द्देशेन भक्षाश्रितदशकर्तृविधिः। चमसोन्नयनादिक्रियान्तरस्याप्या-श्रयत्वप्रसङ्गेन भक्षस्यैवाश्रयत्वे प्रमाणाभावात्। याज्ञिकाचारसिद्ध-समाख्याभक्षस्यैव नियमेनोपस्थित्यभावेन वषट्कारनिमित्तस्याप्याश्रय-त्वापत्तेश्च। चमसमिति द्वितीयाया अनुशब्दयोगनिमित्तत्वेन प्रति-योगित्वपरतया तस्योद्देश्यत्वोपस्थापकाभावाच्च। नापि चमसानुप्रस-र्पणोद्देशेन दशकर्तृविधिः। विशिष्टोद्देशेन वाक्यभेदात्। चमस-प्रतियोगिकत्विक्कर्तृकानुप्रसर्पणस्याप्राप्तत्वाच्च। प्रयाजेभ्यस्तदितिवत्सर्व-चमसेषु एकस्यैव दशकस्य प्रसक्त्यापत्तेश्च। चमसे चैकैकत्वविशेषणे पुनर्विशिष्टोद्देशः। दशदशेति वीप्सार्थविधाने वाक्यभेदः। प्रतिचमसं

विंशत्यापत्तिश्च, अतो दशकर्त्तृविशिष्टं प्रत्येकचमसप्रतियोगिकमनु-प्रसर्पणमेवात्र विधीयते। तथोश्च पार्ष्टिकान्वये एकैकस्मिन् चमसे दशदश कर्त्तारो भवन्तीति वीप्सानुवादः। अनुप्रसर्पणस्य च प्रयोजनापेक्षायां वैमृधन्यायेन चमसपदान्तर्गत-चमिधातु-प्रतिपाद्यस-माख्यानिमित्तभक्षस्यैव स्ववाक्योपस्थितत्वात्तद्वाचकपदान्तरकल्पनया प्रयोजनवत्त्वम्। अतश्च समाख्यानिमित्तभक्षार्थं प्रतिचमसं दशाना-मनुप्रसर्पणे चमसानां दशत्वाच्छतसङ्ख्यासम्पत्तेः शतवाक्यमनुवादो-विधेयदशत्वस्तुत्यर्थो न तु ब्राह्मणत्वविधायको वाक्यभेदापत्तेः। अतो-ब्राह्मणग्रहणं सोमपदवदेव भूम्ना गौणमिति यजमानचमसे राजत्व-जातेरेव न्यायप्राप्तत्वाद्राजन्यादश भक्षयेयुरिति प्राप्ते।

ब्राह्मणत्वस्य सर्वचमसेषु प्राप्त्यभावेनोपरि हि देवेभ्यो धारयतीति वद्विधेयत्वापत्तेर्गौणत्वे प्रमाणाभावात् ब्राह्मणत्वमेवेह शतोद्देशेन विधीयते। सोमान् भक्षयन्तीत्यनुवादमात्रम्। वस्तुतस्तु भक्षयतिना पूर्ववाक्ये समाख्याभक्षस्योद्देश्यत्वेनोपस्थितस्यैवोपादानात्तदुद्देशेनैव ब्रा-ह्मणत्वविधानमिति दशत्वेनैकत्वबाधवद्ब्राह्मणत्वेन राजत्वबाध इति यजमानचमसेऽपि ब्राह्मणा एव फलचमसन्दश भक्षयेयुः। न च स यदि सोमभित्यनेन राजकर्त्तृकभक्षस्य निमित्तत्वावगतेः कथं तदभावे फलचमस इति वाच्यम्। निमित्तद्वयाङ्गीकारे वाक्यभेदापत्तेराद्ये-नैव यदि-शब्देन यागगतराजकर्त्तृकत्वनिमित्तप्रतिपादनात्। अयन्तु यदि-शब्दो निःसन्दिग्धत्वार्थकोऽनुवाद इत्युक्तम् ॥२॥८७॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां

तृतीयाध्यायस्य पञ्चमः पादः।

अथ षष्ठः पादः।

सर्वार्थं॥ अनारभ्य श्रुतेन यस्य पर्णमयी जुहूर्भवतीत्यादिना अव्यभिचरितक्रतुसम्बन्धिजुहूद्देशेन विधीयमाना पर्णता तद्द्वारेण जुहूमत्क्रत्वङ्गमिति स्थिते, सा किं प्रकृतिविकृतिसाधारणा उत प्रकृतिरेवेति चिन्तायाम्।

अविशेषात् सर्वोऽपि। न च विकृतावतिदेशेनापि प्राप्तेर्द्विरुक्तत्वापत्तिः। उपदेशेनैव प्राप्तिसत्त्वे अतिदेशस्य कुशविषयत्ववत्पर्णताविषयत्वाकल्पनात्। न च विकृतौ जुहूप्राप्तेरतिदेशापन्नत्वात्तस्य च प्रकृतेः सर्वाङ्गसम्बन्धोत्तरकालीनत्वेन पर्णताविधेः प्रथमं प्रकृतिविषयशाब्दबोधजनकत्वावश्यम्भावे पुनर्विकृतिविषये तज्जनकत्वायोगेन प्राप्तिकालवैषम्यापत्तिरिति वाच्यम्। वैमृधादिवत्पर्णताव्यतिरिक्ताङ्गसम्बन्धेनैव प्रकृतेः पूर्णत्वमङ्गीकृत्य विकृतावतिदेशोपपत्तौ पर्णतायाः पश्चादेव विधानेन साधारण्योपपत्तेः। अन्यथा वैमृधेऽपि वैमृधव्यतिरिक्तप्रयाजाद्यतिदेशानापत्तेरिति प्राप्ते।

यत्किञ्चिदितिकर्त्तव्यताकं-वैमृधोपेतसकालाङ्गसम्बन्धेनैव प्रकृतेः पूर्णत्वमङ्गीकृत्य वैमृधेऽतिदेशकल्पनायामपि येषामङ्गानां स्वाङ्गसम्बन्धेन निराकाङ्क्षता तेषामेवातिदेशो न वैमृधस्य अङ्गविशेषानवगमेन तद्भावनाया अपरिपूर्णत्वात्। अतश्च पर्णतारूपाङ्गसम्बन्धं विना प्रकृतेः पूर्णत्वाभावादतिदेशतो जुहूप्राप्त्यनन्तरं पुनः पर्णताविधौ प्राप्तिकालवैषम्यापत्तेः प्रकृत्यर्थैव पर्णता। यथा चैवं सति

दीचास्तु यूपच्छिनत्तीत्यत्र अग्नीषोमीयसवनीयानुबन्ध्यसम्बन्ध्युप-दिष्टातिदिष्टच्छेदनसाधारणेन दीचाकालविधौ न प्राप्तिकालवैषम्यं, तथाऽग्रैव वच्यामः। वस्तुतस्तु न साधारणेन विधिः। प्रकृत्यर्थत्वेन विहितस्यातिदेशतोऽपि प्राप्तिसम्भवात्। तथापि यूपैकत्वं भिन्न-कालकत्वेनाग्टह्यमाणविशेषत्वात् पात्रवदेव नानुपपन्नम्। प्रयोजनं, पूर्वपचे पर्णतालोपे वेदान्तरीयविकृतौ याजुर्वैदिकत्वात्तद्भ्रेषप्राय-श्चित्तं, सिद्धान्ते अविज्ञातप्रायश्चित्तं विकृतिवेदीयं वा। भूरादि-प्रायश्चित्तानामपि उपक्रमानुसारेणोच्चैष्ट्वादिवद्वेदधर्मत्वात् ॥३॥८८॥

प्रकरणविशेषात्तु ॥ सप्तदश सामिधेनीरनुब्रूयादित्यनारभ्याधीतं सामिधेन्युद्देशेन विधीयमानं साप्तदश्यं प्राकरणिकपाञ्चदश्यावरो-धात्र पूर्ववत्प्रकृतौ दर्शपूर्णमासयोर्निविशते सामिधेनीस्वरूपे आन-र्थक्यप्रसक्तौ लचणीयस्यापूर्वविशेषसाधनत्वस्य प्रकरण**त्युपस्थाप-नात्। साप्तदश्ये तु अव्यभिचरितक्रतुसम्बन्धेन कथञ्चिदपूर्वसामा-न्योपस्थितावपि तद्विशेषस्य द्विरुक्तत्वन्यायेनोपस्थित्या विलम्बितत्वात्। किन्तु विकृतौ।

न च तत्रापि क्लृप्तोपकारपाञ्चदश्यविरोधः। औपदेशिकत्वेन शरवद्बाधकत्वोपपत्तेः। न चानारभ्याधीतत्वेन दौर्बल्यं, निरवकाशत्व-रूपप्राबल्यम्। युक्तेरुभयत्रापि तुल्यत्वात्। अत एव य इष्ट्येत्यनेन गम्यमानसद्यस्कालत्वादिसर्वविकृतिषु निविशत एव। सर्वविकृतिषु साप्तदश्यप्राप्तौ कासुचित्पशुमित्रविन्दादिविकृतिषु तत्पुनःश्रवणं

---

* सर्व्वत्रैव पुस्तके अत्र किञ्चित् स्थानं रचितम्।

अन्यविकृतिषु तत्परिसङ्ख्याफलकोपसंहारार्थम्। न च वाक्यद्वय-वैयर्थ्यापत्तिः। एकेन सामिधेनीसम्बन्धोऽपरेण क्रतुविशेषसम्बन्ध-इति विषयभेदात्। न चैवमपि प्राकरणिकेनैवोभयसम्बन्धसिद्धौ इतरवैयर्थ्यम्। वाक्यद्वयाम्नानबलेनाभ्युदयशिरस्कलकल्पनादिति दशमे वक्ष्यते ॥३॥८९॥

नैमित्तिकम् ॥ यत्तु प्रकरण एव, सप्तदश वैश्यस्येति नैमित्ति-कसाप्तदश्यन्तत्पाञ्चदश्यस्य बाधकम्। अत्र हि षष्ठ्या निमित्तत्वमेव वैश्यस्योच्यते। विजातीयत्वाच्च सामिधेन्युद्देशेऽपि न वाक्यभेदः। वैश्यस्वामिकसामिधेन्युद्देशेन वा साप्तदश्यविधिः। षष्ठ्याः परम्परा-सम्बन्धस्य प्राचां व्युत्पन्नत्वेन न विशिष्टोद्देशे वाक्यभेदोऽपि। वैश्यो-द्देशेनैव वा स्वस्वामिकसामिधेनीकत्वसम्बन्धेन तद्विधिः। सामि-धेनीरनुब्रूयादित्यस्य तात्पर्यग्राहकत्वात्। अन्यपक्षद्वये च वैश्याभावे साप्तदश्याननुष्ठानान्निमित्तत्वं तस्यार्थिकम्।

तथा, काम्यमपि गोदोहनादि एकविंशत्याद्यनुवचनादि च नित्यस्य चमसपाञ्चदश्यादेर्नैमित्तिकस्य च साप्तदश्यादेर्बाधकम्। नित्यस्य सामान्यविहितत्वेन ब्राह्मणादिप्रयोगे सावकाशत्वेन च विशेषविहितान्निरवकाशाच्च • काम्यनैमित्तिकाद्दुर्बलत्वावगतेः। न चैवमपि नैमित्तिकस्य कामनारहितप्रयोगे सावकाशत्ववत्काम्यस्यापि ब्राह्मणादिकाम्यप्रयोगे सावकाशत्वाविशेषेण नैमित्तिकापेक्षया बल-वत्त्वानापत्तिः। साक्षात्पुरुषार्थसाधने पुरुषस्योन्मुखत्वेन काम्यस्य पुरस्फूर्त्तिकतया बलवत्त्वोपपत्तेः।

न च काम्यस्य क्रत्वनङ्गत्वात्तेन क्रत्वङ्गभूतनित्यादेर्बाधे विगुण-

त्वाश्रितात् काम्यादपि फलानापत्तिः। काम्यस्य लाघवेन परप्रयु-क्ताश्रयोपजीवितया स्वातन्त्र्येणानुष्ठानशङ्कानुपपत्तेराश्रयस्यापि पर-प्रयुक्तकाम्यगुणेनैवोपकारसिद्धौ नित्यनैमित्तिकचमसाद्यनुष्ठापकत्व-कल्पनात्। काम्यप्रयोगे चमसादेरङ्गत्वाभावेनैव वैगुण्यशङ्काऽप्रसक्तेः। अतो दुर्बलस्य नित्यादेः प्रबलानास्कन्दितप्रयोगविषयत्वकल्पनया प्राप्तबाधविधया बाधकत्वं काम्यनैमित्तिकादेरिति सिद्धम्॥२॥९०॥

इष्ट्यर्थम्॥ अग्नीनामतिदेशेन पवमानेष्ट्यङ्गत्वावगमात्तत्संस्कार-कत्वेन विहितस्याधानस्यापि प्रकरणसहकृतवाक्यात् पवमानेष्टिसा-धनीभूताग्निसंस्कारकत्वेन विनियुक्तस्य पवमानेष्ट्यङ्गत्वम्। पवमा-नेष्टीनां विश्वजिन्न्यायेन फलकल्पनेति प्राप्ते।

आधानस्य किमुत्पादकत्वमुत सम्मार्गादिवदग्निनिष्ठातिशयमात्र-जनकत्वं? उभयथापि लभ्यते अग्निहोत्रादिषु आहवनीयाद्युत्पा-दकाभावादतिदेशस्यैवासम्भवः। अतोऽग्निहोत्राद्यङ्गभूताहवनीयाद्यु-त्पादकमेवाधानम्। पवमानेष्टयोऽप्यग्न्यङ्गभूताः, फलवदाधानाङ्गभूता एव वा, प्रकरणात्। ततश्च पवमानेष्टिष्वसिद्धत्वादग्नेरतिदेशस्यैवा-भावः। प्रयोजनं, पवमानेष्टिषु पूर्वपक्षेऽन्वारम्भणीया, सिद्धान्ते पृथगारम्भाभावान्नेत्यादि॥२॥९१॥

तत्प्रकृत्यर्थम्॥ तदाधानमग्निवदेव पर्णतान्यायेनाव्यभिचरित-क्रतुसम्बन्ध्यग्न्यङ्गत्वेन क्रत्वङ्गत्वावगतेर्द्विरुक्ततादोषभियैव प्रकृत्यर्थमिति प्राप्ते।

नाधानस्य क्रत्वङ्गत्वं, प्रमाणाभावात्। जुह्वादयो ह्याकृतिविशेष-रूपाः पर्णतादिव्यतिरेकेणापि काष्ठान्तरेण जायमाना आनर्थक्य-

भयाद्युक्तं यत्पर्णतादेः स्वजन्यापूर्वार्थतां बोधयन्तीति। आहवनीया-द्याश्रयस्तु अदृष्टविशेषरूपा आधानं विनोत्पत्तौ प्रमाणाभावादानर्थ-क्याभावेन स्वस्वरूपार्थत्वमेवाधानस्यावबोधयन्ति। अत एव तत्र नाग्निशब्दे अपूर्वसाधनत्वलक्षणा। अतः क्रत्वर्थत्वस्यैवाभावात् प्रकृ-त्यर्थता दूरापास्तैव। न चैवमाधानाकरणे क्रतुवैगुण्यानापत्तिः। अन्यभावेन वैगुण्योपपत्तेः।

वस्तुतस्तु, लाघवेन क्रतुविधीनां आधानविधिसिद्धाग्निग्रहणे-नैवोपपत्तौ स्वयं अग्निप्रयोजकत्वाभावादनाहिताग्नेरनधिकारः क्रतु-ष्विति वैगुण्यशङ्का दूरापास्तैव। एवं पवमानेष्टीनामप्यक्रत्वर्थत्वं व्याख्यातम्। प्रयोजनं, पूर्वपक्षे आधानस्य कालान्तराम्नानेन भिन्न-प्रयोगविहितत्वतथा सर्वार्थं सकृदनुष्ठानेऽपि बृहस्पतिसवादिवदधि-कारिविशेषणत्वे प्रमाणाभावान्नित्ये आधानं विनाऽप्यनुष्ठानं यथा-शक्तिप्रयोगे। सिद्धान्ते त्वधिकारसम्पादकत्वान्नेति ॥३॥९२॥

तासाम् ॥ पवमानेष्टीनां दर्शप्रकृतिकत्वादतिदेशेन प्रयाजादि-वदेवाग्निः प्राप्नोति। ते चाधानपवमानेष्टिसाध्या इति ततः पूर्वं कर्त्तव्यमेवाधानम्। पवमानेष्टयश्च। न चानवस्था। यावत्पौर्णमा-स्यादिकालं करणोपपत्तेरिति प्राप्ते।

न तावत्पवमानेष्ट्यादिकं प्रकृतावङ्गं, अग्निमात्रार्थत्वस्य स्थापित-त्वात्। सत्यपि चाङ्गत्वे तेषां नातिदेशः। पवमानेष्ट्यादिषु यत्कि-ञ्चिदितिकर्त्तव्यताकपवमानेष्ट्युपेतसकलाङ्गसम्बन्धेनैव प्रकृतेः पूर्णतां परिकल्प्य पवमानेष्टिष्वतिदेशाकल्पनात्तेषामङ्गानां प्रकृतौ स्वाङ्ग-सम्बन्धेन निराकाङ्क्षता तेषामेवातिदेशो न पवमानेष्ट्यादीनाम्।

तेषामङ्गविशेषानवगमेन तद्भावनाया अपरिपूर्णत्वात् । अतोऽन्वारम्भणीयावैमृधन्यायेनैवानतिदेशः ।

वस्तुतस्तु, नाङ्गत्वमपि । अग्नीनां तु सत्यप्यङ्गत्वे साध्यत्वान्नेहातिदेशः । अवश्यं हि ये प्रथमतः आधानेष्ट्यादयः कार्याः तेभ्योऽग्निसिद्धिरङ्गीकर्त्तव्या । ततश्च तेभ्यः कार्यसिद्धावन्येषामकरणम् । यथा चैवं सति पवमानेष्टिहोमादय आधानहोमावाऽऽधानजन्योत्पत्त्यपूर्वरूपाहवनीयादौ भवन्ति, तथा कौस्तुभे वारणाधिकरणेऽत्र च स्पष्टम् ॥३॥९२॥

तुल्यः ॥ ज्योतिष्टोमे क्रयसन्निधावग्नीषोमीयः पशुराम्नातो वचनात् स एष औपवसथ्येऽहन्यालब्धव्यः इत्यस्माच्चतुर्थेऽहन्यनुष्ठीयते । पशुधर्माश्च तत्रैव पशूपाकरणादयः समाम्नाताः । सवनीयश्च पशुः सौत्येऽहनि समाम्नात आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोति इति । अनूबन्ध्यस्त्वन्ते समाम्नातः । तदिह पशुधर्माणां किं पशुत्रयसाधारण्यमुत सवनीयमात्रार्थत्वमुत सवनीयाग्नीषोमीयोभयार्थत्वमुताग्नीषोमीयार्थत्वमेवेति चिन्तायाम् ।

महाप्रकरणाज्ज्योतिष्टोमसम्बद्धानां धर्माणां पशुधर्मत्वेन साक्षात्तत्सम्बन्धायोगेनानर्थक्यतदङ्गन्यायेन पशुयागद्वारकत्वावगतेस्तेषां च मध्ये कस्यचिद्विशिष्य प्रकरणबाधकबलवत्प्रमाणाभावेनाविशेषात्सर्वार्थत्वमित्याद्यः पक्षः ।

द्वितीयस्तु सत्यपि ज्योतिष्टोमप्रकरणस्य पशुधर्मग्राहकत्वे सवनीयावान्तरप्रकरणेन तद्बाधः तस्य चौपवसथ्येऽहन्येवोत्पत्तिः । आग्नेयः पशुरग्निष्टोम आलभ्य ऐन्द्राग्न उक्थ्ये द्वितीय ऐन्द्रो वृष्णिः

षोडशिनि तृतीयः सारस्वती मेष्यतिरात्रे चतुर्थीत्येतैर्वचनैः क्रतुपशूनां विधानात् तस्य च क्लृप्तोपकारप्राकृताङ्गसम्बन्धेऽपि अपेक्षितानां पशुधर्माणां सन्निहितत्वेन प्राकृताङ्गसन्दष्टत्वेन चात्र प्रकरणोपपत्तिः। ऐन्द्राग्नादिपशूनान्तु संस्थाधिकरणन्यायेन समानविधानत्वाभावादेव न पशुधर्मग्राहकत्वशङ्का। अस्तु वा तेषामप्यवान्तरप्रकरणाद्धर्मग्राहकत्वम्। नैतावता सर्वार्थत्वम्। न च सौत्येऽहनि तद्विधिः। सवनीयोद्देशेन तस्याश्विनग्रहणोत्तरकालत्वमात्रविधायकत्वात्। यूपपरिव्याणस्य त्रिवृता यूपं परिव्ययतीति सामान्यविधिना आश्विनग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययतीति परिव्याणान्तरविधिना वा प्राप्तत्वेनानुवादात्। परिव्याणान्तरे त्रिवृत्त्वस्यापि रशनासाधारणाधिकरणे उपपादयिष्यमाणत्वाच्च। न च तथापि दूरस्थकर्मानुवादेन कालविधिरशक्यः। औपवसथ्याहे विहितानामपि क्रतुपशूनां वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यन्दिने अङ्गैस्तृतीयसवने इत्यनेनोत्कर्षविधानात्सौत्येऽहन्यनुष्ठीयमानतयोपस्थित्युपपत्तेः। तेन यथैव क्रयसन्निधावाम्नातस्याग्नीषोमीयस्यौपवसथ्येऽहन्यनुष्ठीयमानत्वे नैव धर्मग्राहकत्वं सिद्धान्ते, तद्वदिहापीति न दोषः। न चैवमपि क्व सवनीयविधिरित्यत्र विनिगमनाविरहः। धर्मबाहुल्यस्यैव नियामकत्वात्। अतस्त्ववान्तरप्रकरणात्सवनीयार्थ इति।

तृतीयस्तु सत्यं सवनीयार्थाः स्थानादग्नीषोमीयार्था अपि। तस्य हि क्रयसन्निधौ विधिदशायामेव क्लृप्तोपकारप्रकृताङ्गैर्निराकाङ्क्षीकृतस्यौपवसथ्येऽहन्युत्कृष्टस्यार्थोपस्थितिमात्रसत्त्वेन स्थानम्। सवनीयवद्वाक्यसन्निध्यभावेन प्रकरणशङ्कानुपपत्तेः। अत एवेतिकर्त्तव्य-

तात्वेनायोग्यसम्बन्धयोर्वाक्यार्थयोः सन्निधिरिति स्थानलक्षणम्। यद्यपि चात्र पशुधर्माणां श्रुत्यादिविनियुक्तत्वान्न प्रकरणस्य स्थानस्य वा विनियोजकत्वसम्भावना, तथाप्यपूर्वसाधनत्वलक्षणातात्पर्यग्राहकत्व-एव विनियोजकव्यवहारोभाक्त इति द्रष्टव्यम्। न चैवमपि प्रकरणेन स्थानबाधापत्तिः। अग्नीषोमीयस्य पशुधर्माकाङ्क्षायामेवातिदेश-कल्पनवदौपदेशिकस्थानस्यैव विनियोजकत्वकल्पनौचित्यात्। अन्यथा प्रबलौपदेशिकप्रमाणेन प्रकृत्यर्थत्वाद्धर्माणां क्वापि विकृत्यर्थत्वाना-पत्तेः। इन्द्रादेरुपायान्तरेणापि स्मृतिसम्भवान्न लिङ्गादेः श्रुतिकल्प-कत्वमिति विशेषः। अत उभयार्थत्वमिति प्राप्ते।

न सवनीयस्यावान्तरप्रकरणं, मौख्येऽप्यनुपपत्तेः। अन्यथा दूरस्थ-कर्मानुवादेन कालरूपानुपादेयगुणविधानानुपपत्तेः। न च प्रातः-सवन उत्कृष्टत्वादेवोपस्थितिः। आनुष्ठानिक्युपस्थितेरङ्गग्राहकत्वेऽपि प्रकरणान्तरप्रतिबन्धकत्वस्य क्वाप्यदर्शनात्। अस्तु वा तत्, तथापि वपाभ्यासमाचस्य प्रातःसवन उत्कृष्टत्वेऽपि उपाकरणोत्कर्षे प्रमाणा-भावात्तदुपस्थित्यनुपपत्तेः। यद्यपि चोपाकरोतिना याग एव लक्ष्येत, तथापि शक्यार्थस्योपाकरणस्याश्विनग्रहणोत्तरकालस्याप्राप्तेरनुवादा-नुपपत्तिः। यद्यपि च वपाप्रचारोत्तरभाविपदार्थानान्तदाद्युत्कर्षन्या-येनोत्कर्षः सम्भाव्येत, तथापि न तत्पूर्वभाविनामुपाकरणादीनामु-त्कर्षे प्रमाणमस्ति। वस्तुतस्तु। पूर्वेद्युर्वेदिकरणन्यायेनापूर्वत्वात्तदुत्तर-भाविनामपि नोत्कर्षः।

वस्तुतस्तु, गङ्गायाङ्घोष इत्यादौ शक्यार्थस्य घोषान्वयप्राप्त्यभावे-ऽपि लक्षणादर्शनात्तस्योत्तरकालत्वप्राप्त्यभावेऽपि उपाकरोतिना वपा-

भ्यासलक्षणोपपत्तेः। पश्वनपक्रमोपयोगियूपदार्ढ्यसम्पादकद्वितीयपरि-व्याणस्याश्विनग्रहणोत्तरकालताविधित एव तदुत्तरभाविवपायाग-स्यापि आश्विनग्रहणोत्तरकालत्वसिद्धेरेतद्वाक्यवैयर्थ्यभिया एवाभ्यासा-देतस्योत्पत्तिविधित्वम्। तत्रापीतरस्य सर्वस्य द्वितीययूपपरिव्याणा-देर्वाक्यान्तरप्राप्तत्वात्कालविशिष्टं शुद्धमेवं वा द्रव्यदेवताविशिष्टं कर्म विधीयते। ततश्चानेनैव वाक्येनाग्नेयसवनीयस्यैतत्समानजातीयैश्च वाक्यान्तरैरैन्द्राग्नादीनां विधानादौपवसथ्याहे तेषां पुनः श्रवणमनु-वादमात्रम्। तदपि यथा वै मत्स्योऽविदितोजलमवधूनुते एव-मेतेऽप्रज्ञायमानाजनमवधून्वते इत्यर्थवादकृतसन्ततकरणनिमित्तक-निन्दोपपादकैतच्छब्दापेक्षितपशुसमर्पणार्थं निन्दोन्नीतदोषपरिहा-रार्थं च वपया प्रातःसवने चरन्तीत्यादिना वपाप्रचाराद्युद्देशेन प्रातःसवनादिकालविधिः। खण्डशः कालभेदेनानुष्ठाने हि मध्ये सत्यर्थमवकाशलाभाद्दोषपरिहारः। यद्यपि चात्रापि कालविधान-न्दूरस्थकर्मानुवादेन न शक्यम्, तथाप्यर्थवादत एव तदुपस्थितेर्न कश्चिद्दोषः।

यत्तु प्रचारविप्रकर्षस्योपादेयगुणस्य सत्त्वान्न दोष इति मूलोक्तं समाधानं, तद्विप्रकर्षस्याशब्दस्य विधेयत्वाभावादुपेक्षितम्। अतो न सवनीयस्यावान्तरप्रकरणम्। स्थानात्त्वग्नीषोमीयाङ्गं पशुधर्माः। न च ज्योतिष्टोमप्रकरणेन स्थानबाधः। पशुधर्माणां श्रुत्यादिभिः पशुसंस्कारकतया विनियुक्तानामयोग्यतया ज्योतिष्टोमप्रकरणेना-ग्रहणात्। अतो यत्रैव श्रुतः सम्बन्धो यथा वाजपेयस्येत्यादौ, तत्रै-वानर्थक्यतदङ्गन्यायो न त्वत्र। एवं सत्यपि यदि कस्यापि पशो-

विशिष्य प्रमाणान्तरमपूर्वसाधनत्वेऽपि ज्ञापकं न स्यात्, ततो महा-प्रकरणगृहीतानामेषामानर्थक्यतदङ्गन्यायेन भवेत्सर्वपश्वर्थत्वम् । न तु तदस्ति । स्थानेनाग्नीषोमीयार्थत्वावगमात् । तेन सिद्धमग्नीषोमीय एवोपदेशोऽन्यत्र त्वतिदेश इति । सामानविध्यप्रयोजनं दशमादौ स्पष्टम् ॥३॥९४॥

दोहयोः ॥ दर्शपूर्णमासयोर्दधि पूर्वेद्युरपरेद्युश्च पय उत्पाद्यते । दोहधर्माश्च शाखाहरणादयः पूर्वेद्युः क्रियन्ते । तेषामनुष्ठानसादे-श्याद्दधिमात्राङ्गत्वमिति प्राप्ते ।

यद्यपि स्थानं भवेत्तथापि प्रकरणेन तद्बाधः । न ह्यत्र पूर्ववत् क्लृप्तोप-कारकत्वादिना प्रकरणाभावः शङ्कितुं शक्यः । न च स्थानमत्र दधियागस्यास्ति । उत्तरेद्युरेवानुष्ठानात् । दध्नस्तु विद्यमानमपि नान-र्थक्यभियाऽपूर्वसाधनत्वलक्षणातात्पर्यग्राहकम् । न च स्मारकविधया दध्नैव यागोपस्थितेः स्थानशङ्का । तादृशोपस्थितेर्नैयत्याभावेन ग्राह-कत्वानुपपत्तेः । किञ्च दोहधर्माः परेद्युरेवाम्नातास्तत्रैव च भाव्यापे-क्षायां प्रकरणादुभयार्थत्वेनावगम्यमानाः सामर्थ्यात् पूर्वेद्युरनुष्ठीय-मानदधिसिद्ध्यर्थं पूर्वेद्युस्तन्त्रेण क्रियमाणा अपि न तन्मात्रार्था भवन्ति । दोहनादयस्तु सामर्थ्यादेवावर्तन्त इति विशेषः ॥३॥९५॥

तद्वत्सवनान्तरे ॥ ज्योतिष्टोमे प्रातःसवनिकग्रहणसन्निधौ ग्रह-धर्मा उपोप्तेऽन्ये ग्रहाः साद्यन्तेऽनुपोप्ते ध्रुव इत्याद्याः । ते निःसन्दिग्ध-स्थानात् प्रातःसवनिकग्रहमात्रार्था इति प्राप्ते । माध्यन्दिनसवनि-कादीनामपि प्रकरणात्तेन च स्थानबाधात्सर्वार्थत्वं, प्रयाजादीना-मिवाग्नीषोमीयाद्यर्थत्वमिति ॥३॥९६॥

रशना च॥ पशुनियोजनाङ्गत्वेन विनियुक्तस्य यूपस्यानुष्ठानसा-देश्यादग्नीषोमीयापूर्वसाधनीभूतपशुनियोजनार्थत्वम्। अतिदेशात्तु सवनीयानुबन्ध्यार्थत्वम्। एवं तदुत्पादकानां छेदनादिसंस्काराणा-मपि। यद्यपि च यूपस्वरूपे आनर्थक्याभावस्तथाप्यनुवादस्य सन्नि-हितगामित्वादेवाग्नीषोमीये निवेशः। विकृतौ त्वभिक्रमणवद्गमनम्। तेषां तु भेदेनानुष्ठाने प्राप्ते दीक्षाकालस्याप्युपदेशातिदेशाभ्यां विहितस्यैकत्वात्तन्त्रेणानुष्ठानादेकस्या एव यूपव्यक्तेः सर्वोपकारकत्व-मेकादशे वक्ष्यते। ये च परिव्याणादयः उत्पन्नयूपसंस्कारकास्तेषा-मप्यनुष्ठानसादेश्यातिदेशाभ्यां प्रकृतिविकृत्यङ्गत्वम्। यूपस्वरूपस्य तद्व्यतिरेकेणाप्युत्पन्नत्वात्। यूपव्यक्तेरेकत्वात्तु गृह्यमाणविशेषत्वेऽप्या-तिथ्याद्यर्थवर्हिःप्रोक्षणन्यायेन प्रसङ्गेन कार्यसिद्धेर्नावृत्तिः।

न चैवं तन्न्यायेनैवाग्निपात्रसम्मार्गादेर्दर्शपूर्णमासिकस्यापि विकृतौ प्रसङ्गापत्तिः। व्रीहिप्रोक्षणादिवद्यत्कार्यकूटोद्देशेन यद्व्यक्तेरुत्पत्ति-स्तत्कार्यकूटाङ्गभूततद्व्यक्तिगतसंस्कारजन्यादृष्टं प्रति तत्कार्यान्तिम-कार्यत्वेन नाशकत्वस्य कॢप्तत्वेन तदनापत्तेः। न ह्यग्निपात्रादेर्यत्कार्य-कूटोद्देशेनोत्पत्तिः तत्कार्यकूटाङ्गं संस्कारः। सम्मार्गस्य ज्योतिष्टोमा-द्यनङ्गत्वात्। अतस्तत्र तद्व्यक्तिजन्यादृष्टत्वावच्छिन्नं प्रकृति* तत्फली-भूतान्तिमकार्यत्वेन नाशकतेति विशिष्य कार्यकारणभावेनैव तत्प्र-योगवृत्त्यन्तिमफलेन नाश इति वैषम्यम्। एवं च परिव्याणरशना-तद्धर्मादय औपवसथ्येऽहन्यनुष्ठीयमाना अप्युपदेशातिदेशाभ्यां त्रित-योपकारकाः। सवनीये चाश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परि-

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, प्रति,—इति पाठः प्रतिभाति।

श्यतीति विधिनाऽभ्यासात्परिव्याणान्तरं विहितम्। आश्विनोत्तर
कालत्वस्य पाठादुपनिष्क्रमणस्य चार्थादेव प्राप्तेः। तच्च प्रकरणात्
सवनीयस्यैवाङ्गन्तदपि च न प्राकृतकार्यापन्नम्। प्राकाशदानवद्विधि-
वैयर्थ्यापत्तेः। अत एव तत्कार्यमदृष्टं यूपदार्ढ्याधिक्यं वेत्यन्यदेतत्।
तदिह रशनातद्धर्मास्तु त्रिवृत्त्वदर्भमयीत्वादयोनाप्राकृतकार्यापन्ने
परिव्याणान्तरे यूपावटबर्हिरास्तरण इव भवन्तीति प्राप्ते।

उत्पत्तिवाक्ये त्रिवृत्त्वानुवादरूपतात्पर्यग्राहकवशाल्लाघवाच्च प्रकृ-
तापूर्वसाधनीभूत-यूपपरिव्याणत्वमेवोद्देश्यतावच्छेदकं, न तु विजा-
तीयपरिव्याणत्वम्। तथात्वे उत्पत्तिवाक्ये त्रिवृत्त्वस्याप्राप्तत्वेन विधाने
गौरवापत्तेः। अत उद्देश्यतावच्छेदकरूपसत्त्वात्तत्रापि रशनातद्धर्माः।
व्याख्यातृणान्तु सङ्गतिलोभेन यूपच्छेदनपरिव्याणरशनातद्धर्माणां
सर्वेषामुपदेशेनैव चितयसाधारण्यमङ्गीकृत्य सवनीयपरिव्याणान्तरे
उपदेशेनैव तत्प्राप्तं व्याचक्षाणानामभिप्रायं न विद्मः॥२।१९७॥

आराच्छिष्टम्॥ ग्रहधर्माणां ग्रहस्वरूपे आनर्थक्यप्रसक्तौ ग्रहया-
गाभ्याससाधनत्वमेव ग्रहपदेन लक्ष्यते, दीक्षणीयावाक्यिमन्यायेन।
न तु ज्योतिष्टोमापूर्वसाधनत्वम्। अतश्च प्रकरणोपस्थितापूर्वसाधन-
त्वस्यैव लक्षणात्त्वानारभ्याधीतांशुदाभ्यापूर्वार्थत्वं धर्माणामिति प्राप्ते।

प्रकरणादन्येषामिवानुष्ठानसादेश्यादनारभ्याधीतानामप्युपस्थिते-
र्वाक्यसङ्कोचे प्रमाणाभावादेव सर्वार्थत्वम्। अत एव प्रबलेन दुर्बलेन
वा प्रमाणेन साधनत्वेनावगतानां सर्वेषामेव हविषां वेद्यादिकमङ्गम्।
वस्तुतस्तु अंशुदाभ्ययोरनारभ्योत्पन्नयोरपि प्राकरणिकवाक्येनैव क्लृ-
प्ततेति तुल्यत्वमेव॥२।१९८॥

अभ्यङ्गम् ॥ इष्टकाधर्माणामक्ष्णालादीनामनारभ्याधीतचित्यादीष्टकाविनियोगस्याप्यनारभ्याधीतत्वात् प्राकरणिकेष्टकामात्रधर्मत्वमिति प्राप्ते। पूर्ववदनुष्ठानसादेश्यादिष्टकाप्रयोज्यचयनापूर्वसम्बन्धित्वस्यैव लक्षणीयस्यानारभ्याधीतास्वप्यविशेषाच्चाचाप्युभयधर्मत्वम् ॥ ३ ॥ ९९ ॥

नैमित्तिकम् ॥ सोमधर्मा अभिषवादयः फलचमसेऽपि समानविधानाः। सोमस्वरूपे आनर्थक्यप्राप्तौ लक्षणीयस्य ज्योतिष्टोमापूर्वसाधनीभूतप्रदेयप्रकृतित्वस्योद्देश्यतावच्छेदकस्य यवेष्विव फलचमसेऽप्यविशेषात्। न चात्र सोमत्वमपि विवक्षितम्। फलचमसे स्यागापत्त्याऽप्यभिषवाद्यनापत्तेः। न च नित्यानामभिषवादीनानित्यक्रतुसम्बन्धे अनित्यस्य फलचमसस्य द्वारत्वानुपपत्तिः। नित्यानामपि नित्यसोमवदनित्यफलचमसस्य द्वारत्वे उद्देश्यत्व एव वा बाधकाभावात्। इत्यतएव हि उपांशु यजुषेत्यादौ नित्यानां नैमित्तिकानां च होमादीनामुपांशुत्वादिविषयता।

न च नैमित्तिकस्य नित्यविनियोगोत्तरप्रतीकत्वेन विलम्बितप्रतीकत्वादतुल्यत्वम्*। तथात्वे प्रमाणाभावात्। क्वचित्सवेऽपि वा संस्कारविध्युत्तरप्रवृत्तिकत्वे प्रमाणाभावेन तुल्यत्वाच्च। अस्तु वा तत्तथापि संस्कारविध्युद्देश्यतावच्छेदकाक्रान्तत्वस्य फलचमसेऽप्यनिवारणाच्च। न च संस्कारविधावपूर्वसाधनत्वरूपसामान्यधर्मप्रकारकसोमविशेष्यकबोधाङ्गीकारान्न फलचमससङ्ग्रह इति वाच्यम्। एव-

* इत्यमेव पाठः सर्व्वत्र। नित्यविनियोगोत्तरप्रतीतिकत्वेन विलम्बितप्रतीतिकत्वादतुल्यत्वम्,—इति तु समीचीनं प्रतिभाति।

मप्युपदेशस्य सोमतात्पर्यकत्वाभिवारणेन विकारभूतेऽपि फलचमसे अप्राकृतविशेष्यकत्वप्रसङ्गाद्भिषवाद्यनापत्तेः। अतश्च सर्वत्र संस्कार-विधौ प्रकृत्यपूर्वसाधनत्वप्रकारकप्रकृत्यपूर्वसाधनविशेष्यक एव बोध-इति तद्वत् कुर्यादित्यतिदेशेन विकृत्यपूर्वसाधनेऽपि समानविधान-त्वाभावेऽपि धर्मप्राप्तिरविरुद्धा। प्रकृते तु फलचमसस्य प्रकृत्यपूर्व-साधनत्वादेव यवादिवदुपदेशविषयत्वमिति प्राप्ते।

सर्वत्र संस्कारविधौ प्रकृत्यपूर्वसम्बन्धित्वप्रकारकप्रकृत्यपूर्वसम्बन्धि-विशेष्यक एव पार्यन्तिक उद्देश्यबोधः। तथापि सा सम्बन्धिता यद्धर्मावच्छिन्नस्य संस्कारविधिपार्यन्तिकशाब्दबोधात्पूर्वं प्रमीयते, तद्धर्मावच्छिन्नस्यैव संस्कारविध्युपदेशविषयत्वेन व्यवहारो नान्यस्य तस्य। घटादेरिव तत्त्वेनाप्रतीतस्योद्देश्यत्वानुपपत्तेः।

अत्र च तप्ते पयसि दध्यानयतीत्यादौ प्रथमं पयस्त्वावच्छिन्नो-द्देशेन विधीयमानेऽपि दध्यानयने पयस्त्वावच्छिन्नस्यापूर्वसाधनत्व-बोधोत्तरमेवापूर्वसाधनत्वावच्छिन्नोद्देश्यतायाः पार्यन्तिकत्वात् पयस-एवोपदेशविषयत्वं पार्यन्तिकपदोपादानाच्च विरुध्यते। प्रकृते च न फलचमसत्वावच्छेदेनापूर्वसाधनताऽभिषवादिविधितः पूर्वं प्रमिता। तथात्वे स यदि सोमं बिभक्षयिषेत्तमस्मै भक्षं प्रयच्छेन्न सोम-मित्याद्यनुवादानुपपत्तेः। अतस्तात्पर्यग्राहकानुरोधेन सत्यप्युद्देश्यता-वच्छेदकावच्छिन्नत्वेनोपदेशविषयत्वे फलचमसस्येत्यसमानविधानता। अतश्च तस्यैव धर्माकाङ्क्षायां सत्यपि कर्मैकत्वे कल्पितेन स्थानापत्त्या-ख्यातिदेशेन क्रयाभिषवादीनां सोमधर्माणां प्राप्तिः। अत एव प्रकृतोपदेशविषयभिन्नविषयत्वादस्य संस्कारोत्वमाचचते।

वस्तुतस्तु गुणकामवाक्य इवात्र भावनान्तरमेव विधीयते। अनेकगुणोपादानाच्च। अतश्च तस्या एवेतिकर्त्तव्यताकाङ्क्षयाऽतिदेश-कल्पनमित्यपि शक्यं वक्तुम्। अत एव न्यग्रोधस्तिभिनीनामाहरण-स्यैवौपदेशिकत्वान्न क्रय इति केचित्। प्रयोजनं, गुणकामप्रवृत्त्य-प्रवृत्ती। सोमपदवतोमन्त्रस्य लोपोहौ च॥३॥१००॥

प्रतिनिधिश्च॥ ब्रीह्याद्यभावे नीवारादिसदृशप्रतिनिधेरपि संस्कारविधितः पूर्वं साधनत्वानवगमादसमानविधानत्वम्। सकलाङ्ग-युक्तव्रीहिजन्ययागप्रयोगासम्भवे कर्मशास्त्रेण तदाक्षेपादिति प्राप्ते।

सत्यमुत्तरकालन्तदाक्षेपः, तथापि ब्रीहिशास्त्रार्थालोचनवेलाया-मेव ब्रीहित्वजातेर्यागसाधनत्वेऽवगते तदन्यथानुपपत्त्या तदवच्छिन्न-व्यक्तेस्तदारम्भकीभूतावयवानां च साधनत्वमाक्षिप्यते। अतश्च जाति-व्यक्त्यवयवसाधनतानां पूर्वमेवावगतानां सर्वासामसम्भवे कतिपयग्रहण-स्योत्तरकालप्रतीतिकत्वेऽपि स्वरूपेण पूर्वावगतेः समानविधानत्वोप-पत्तिः। न हि नीवारत्वेन रूपेण तेषामुपादानं, येन तद्रूपेण साधनत्वबोधस्योत्तरकालिकत्वादसमानविधानत्वापत्तिः। अपि तु ब्रीह्यारम्भकावयवसमानजातीयकतिपयावयवारम्भत्वात्। अतश्च तेषां ब्रीह्यवयवनिष्ठसाधनतासम्पत्त्यर्थमवर्जनीयतयोपादानेऽप्यवयवसाधन-तायाः संस्कारविधिभ्यः पूर्वमेव प्रमितत्वात्समानविधानत्वोपपत्तिः। संस्कारविधिषु हि प्रकृतापूर्वसाधनीभूतप्रदेयद्रव्यप्रकृतित्वत्वावच्छि-न्नस्यैव प्रकृतित्वस्योद्देश्यतावच्छेदकत्वादवयवनिष्ठसाधनताया अवयव-निष्ठसाधनतातोभेदेऽपि* न विरोधः।

---

* अवयविनिष्ठसाधनतातो भेदेऽपि,—इति भवितुमुचितम्।

एवं यत्र नावयवविघटितसादृश्येन प्रतिनिधिस्तत्र न समानविधानत्वं, न वा कार्यापत्त्याऽपि धर्मप्राप्तिः । यथाऽवघातप्रतिनिधितया नखनिर्लुञ्चनादेः करणे नखेषु प्रोक्षणादेः । यूपावटस्तरण-बर्हिर्वल्लौकिकेतिकर्त्तव्यतोपादानेऽपि चरितार्थत्वात् । फलचमसे तु तमस्मै भक्षं प्रयच्छेदित्यादिशब्दगतलिङ्गादेवातिदेशकल्पनमिति विशेषः । प्रयोजनं, व्रीहीणां मेध इति मन्त्रस्य पूर्वपक्षे लोपः, सिद्धान्ते त्वनूहः । मन्त्रान्तर्गत-व्रीह्यादिपदानां व्रीहित्वसाधनताऽऽचिन्नसाधनताकानामित्यर्थेनावयवेष्वपि प्रयोगोपपत्तेः ॥३॥१०१॥

नियमार्था ॥ यत्र तु पूतीकादौ तत्त्वेन विधिस्तत्र सकलाङ्गयुक्तसोमअन्ययागप्रयोगासम्भवे पश्चादेव तत्प्रवृत्तेर्न समानविधानत्वम् । न चाप पूतीकगतावयवानां प्रतिनिधिनियमः । तेषां मन्दसादृश्यत्वेन पक्षेऽप्यप्राप्तेः । पूतीकपदेऽवयवलक्षणाप्रसङ्गाच्च । न च नियमविधिलाघवानुरोधेन तदङ्गीकारः । तस्य फलमुखत्वेन निषादस्थपत्यधिकरणेन न्यायेनाकिञ्चित्करत्वादिति प्राप्ते ।

पूतीकपदार्थस्य हि पूतीकत्वस्य नाच करणत्वं श्रुतं, द्वितीयान्तत्वात् । अतस्य नियमविधिलाघवानुरोधेन तथा न पूतीकत्वस्य साक्षाद्यागसाधनत्वं लभ्यते । अपि त्ववयवनिष्ठसाधनतानान्तरीयकप्रयोजकत्वमिति न पूतीकपदेऽवयवलक्षणा । सादृश्यनियामकन्यायप्रवृत्तेः पूर्वमेव चास्य विधेः प्रवृत्तेर्नियमविधित्वोपपत्तिः । ततश्चाभापि कतिपयावयवसाधनत्वस्य सोमशास्त्रादेव सिद्धेः समानविधानत्वम् ॥३॥१०२॥

संस्थास्तु ॥ ज्योतिष्टोमे चतस्रः संस्था अग्निष्टोमोक्थ्यषोडश्यतिरात्रसंज्ञाः । संस्था नाम क्रतुप्रयोगवृत्तिस्तोत्रोपरमः । तत्र द्वादश

स्तोत्राण्यग्निष्टोमे। तत्राग्निष्टोमस्तोत्रमन्त्यम्। साऽग्निष्टोमसंस्था नित्या काम्या च। संयोगपृथक्त्वाद्दध्यादिवत्। उक्थ्येऽग्निष्टोमस्तोत्रोत्तरस्त्रीण्यन्यान्युक्थ्यस्तोत्राणि। सोक्थ्यसंस्था। षोडशिनि तदुत्तरं षोडशिस्तोत्रम्। सा षोडशीसंस्था। अतिरात्रे तदुत्तरं द्वादश स्तोत्रात्मकास्त्रयोरात्रिपर्याया आश्विनस्तोत्रं च। साऽतिरात्रसंस्था। यास्त्वत्यग्निष्टोमवाजपेयाप्तोर्यामाख्या अन्यास्तिस्रः स्मृतौ गण्यन्ते, ता एतास्वेवान्तर्भूताः। यत्राग्निष्टोमस्तोत्रोत्तरं उक्थ्यान्यकृत्वा षोडशिस्तोत्रं क्रियते, सा अग्निष्टोमसंस्थैवात्यग्निष्टोमपदवाच्या। यथावस्थितषोडश्युत्तरं यत्र वाजपेयस्तोत्रं क्रियते, सा षोडशीसंस्थैव वाजपेयपदवाच्या। यत्रातिरात्रे चतुर्थोरात्रिपर्याय-स्तोत्रत्रयात्मकोवर्धते, तत्रातिरात्रसंस्थैवाप्तोर्यामपदवाच्या। तत्रात्यग्निष्टोमोराजन्यस्य नित्यः। अत्यग्निष्टोमे राजन्यस्य गृह्णीयादिति वचनात्। अन्यास्तूक्थ्यादयः काम्याः। पशुकाम उक्थ्यं गृह्णीयात्, षोडशिना वीर्यकामः स्तुवीत, अतिरात्रेण प्रजाकामं याजयेदिति वचनेभ्यः। अत्राग्निष्टोमादिशब्दानां प्रचुरप्रयोगात् संस्थास्वेव प्रसिद्धिः, तदृति ज्योतिष्टोमे निरूढलक्षणा, तद्वति क्रत्वन्तरे सांप्रतिकी, ग्रहणे स्तोत्रे च गौणीत्येवं कौस्तुभे द्रष्टव्यम्।

अतश्च संस्थानामेव फलसम्बन्धः। ग्रहणस्तोत्रादिकं तु तत्तद्वाक्ये वाक्यान्तरप्राप्तमनूद्यते। संस्थापदार्थवृत्तिप्रयोगस्य प्रतिसम्बन्ध्यपेक्षायाञ्च प्रकरणाज्ज्योतिष्टोमक्रतुरेवाश्रयत्वेनान्वीयते। तदेतत्सर्वमिन्द्रियकामाधिकरणे स्थितमेव। इह तु सर्वगुणकामाश्रयमात्मानविधं न वेति चिन्तायां, फलवत्त्वेन संस्थादीनामपि ज्योति-

ष्टोमादिवत् प्रकरणाविशेषाद्दीक्षणीयादिधर्माणामुभयार्थत्वमिति प्राप्ते।

फलवत्त्वज्ञानं विना धर्माणामङ्गत्वबोधानुपपत्तेस्तस्य च गुणस्थले आश्रयसम्बन्धव्यतिरेकेणाबुध्यमानत्वादाश्रयस्य च स्वविधिविहितस्य लाभसम्भवे गुणेनोत्पत्तिविनियोगप्रयोगाणामनाक्षेपाद्धर्माणां गुणान्वयात् पूर्वमेवाश्रयान्वयस्य तद्विधिपर्यवसानार्थमवश्यं वाच्यत्वेन विरम्य व्यापारत्वापत्तेर्नोभयार्थत्वम्। न ह्येवमाश्रयनिष्ठफलवत्त्वज्ञानं गुणान्वयाधीनम्। तद्बोधव्यतिरेकेणापि यागस्य क्रियारूपस्य फलवत्त्वबोधोपपत्तिः। गुणे तु फलवत्त्वज्ञापकविधिवैयर्थ्यापत्त्यैव ह्रुतिसाध्याश्रयान्वयस्य धर्मान्वयात् पूर्वमवश्यं वाच्यत्वम्। अत एवाश्रयोगुणनिष्ठकरणतासम्पादको गुणकरणतावच्छेदककोटिप्रविष्टोवेति करणाकाङ्क्षैव वितता आश्रयाकाङ्क्षेति मूलप्रवादः। अतोधर्माणामाश्रयाङ्गत्वमेव। गुणभावनायान्तु आश्रयतोधर्मातिदेश इति सिद्धम्।

प्रयोजनं, यद्यपि न गुणकामप्राप्तिरूपं सम्भवति। संस्थानां विकृतित्वेऽपि तदाश्रयभूतस्य ज्योतिष्टोमस्य प्रकृतिभूतस्य सत्त्वेनैव सदोमानाद्याश्रितगुणकामानां षोडश्याद्यभ्यासाङ्गभूतग्रहणाद्याश्रितानां वा गुणकामानां प्राप्त्युपपत्तेः। नाप्युद्भिदादीनां वैकल्पिकसंस्थाप्रकृतित्वरूपम्।, यागत्वसादृश्याधिक्येन ज्योतिष्टोमप्रकृतित्वस्यैवोपपत्तेः। तथापि यत्राग्येष भूर्वैश्वदेव इत्यादौ न यागत्वपरिचायकपदश्रवणं, तत्र वैकल्पिकसंस्थाप्रकृतित्वं पूर्वपक्षे। सिद्धान्ते ज्योतिष्टोमप्रकृतित्वमेवेति द्रष्टव्यम्। संस्थाङ्गभूतधर्मश्लेषे याजुर्वैदि-

कादिप्रायश्चित्तं पूर्वपक्षे। सिद्धान्ते त्वविज्ञातमपि। तथा, यज्ञस्याग्नीदद्दृषमग्नीयेत्यादि यज्ञपदोपेतमन्त्रे अविकृतः प्रयोगः पूर्वपक्षे। संस्थायामस्य लोपात्। सिद्धान्ते तु यज्ञस्य संस्थायास्त्वाग्नीरित्येव मूहितव्यम्, इत्याद्यपि द्रष्टव्यम् ॥२॥१०३॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
तृतीयाध्यायस्य षष्ठः पादः ॥

अथ सप्तमः पादः ।

प्रकरणाविशेषात् ॥ दर्शपूर्णमासयोर्वेदिबर्हिषी तद्धर्माश्च खननलवनादयः किमङ्गप्रधानसाधारणहविरासादनार्था उत प्रधानाङ्गभूतहविरासादनमात्रार्था इति विचारे । वेद्यां हवींष्यासादयति बर्हिषि हवींष्यासादयतीति वचनेन वेदिबर्हिरासादनस्य हविरुद्देशेन विधानादर्थात्तयोरपि हविरर्थत्वप्रतीतेर्हविः स्वरूपे चानर्थक्यप्रसक्तौ अपूर्वसाधनत्वलक्षणातात्पर्यग्राहकजिज्ञासायां अप्रतिबद्धफलवत्प्रधानाधिकाराख्यप्रकरणस्यैव तात्पर्यग्राहकत्वावसायात्तेन चाङ्गत्वसम्बन्धस्यैव शाब्दस्य लक्षणाघटकतया श्रवणात् प्रधानापूर्वाङ्गभूतहविरर्थत्वमेवेति प्राप्ते ।

प्रकरणेन वाक्यसङ्कोचे प्रमाणाभावाद्दानर्थक्यपरिहारार्थं यथा प्रधानप्रकरणेन तात्पर्यग्रहस्तथा दुर्बलेनापि अङ्गाधिकाराख्यतत्प्रकरणेनापि । अत एवानारभ्याधीताङ्गानुष्ठानसादेश्यस्यापि तात्पर्यग्राहकत्वमुक्तम् । तेन सर्वार्था एवैते । अस्तु वा प्रधानप्रकरणस्यैव तत् । तथापि नाङ्गत्वं सम्बन्धघटकं, गौरवात् । अपि तूपकारकत्वमात्रं, अभ्युदितेष्ट्यां दधिपयसोरिव । सम्बन्धमात्रं वा स्वर्गादिवद्गम्यत्येव । अतश्च प्रधानापूर्वोपकारकहविरर्थत्वमात्रावगते रङ्गतदङ्ग हविषामपि अनारभ्याधीतानां प्राकरणिकानां वा प्रधानोपकारकत्वाविशेषात् सर्वार्थत्वम् ॥१॥१०४॥

फलसंयोगात्तु ॥ दर्शपूर्णमासयोर्ज्योतिष्टोमादौ केशश्मश्रुवप-नादयः तावत् क्रतुयुक्तपुरुषसंस्कारार्था न त्वारादुपकारकाः। केशश्मश्रु वपते, नखानि निकृन्तते, दतोधावते, स्नाति, ऽभ्यङ्क्ते इत्यादावात्मनेपदनिर्देशेन पुरुषार्थत्वावगमात्। क्रियाफलस्य ह्यात्म-गामित्वे आत्मनेपदम्। आरादुपकारकत्वे तु तत्फलस्य क्रतु-साद्गुण्यस्य क्रतुगतत्वेन नात्मगामित्वम्। यत्त्ववान्तरादृष्टं, न तत् क्रियाफलम्।

यद्यपि स्नातौ अञ्जू च धातुः परस्मैपद्येव, तथापि छन्दस्यात्मने-पददर्शनात्तस्य च सार्थकत्वे सम्भवति साधुत्वार्थत्वस्यान्याय्यत्वात्स्वरिते-त्यादिविधेरेवानित्यत्वं परिकल्प्यात्मगामिक्रियाफलत्वाङ्गीकारो न दोषाय। एवं दतोधावत इत्यादौ। दन्तानां द्वितीययाऽपि संस्कार्य्यत्वावगमः। पयोव्रतं ब्राह्मणस्येत्यादौ षष्ठ्या। स्नानस्य तु मलापकर्षणार्थत्वलिङ्गात्। एवं तपसोऽपि वक्ष्यते। अन्ततो यच्च न किञ्चिद्गमकं, तच्च दीक्षासमाख्यैव तथा। यमादिपरिग्रहानु-कूलपुरुषसंस्कारवाचित्वात्। पुरुषस्य च क्रतूपयोगित्वं कर्त्तृतया क्रतुजन्यफलभोक्तृतया च। तदिह संस्काराः किं कर्त्तृत्वांशोपयोगिन उत भोक्तृत्वांशोपयोगिन इति चिन्तायाम्।

भोक्तृत्वार्थत्वे समप्राधान्यापत्तेः प्रकरणावगतक्रतुसम्बन्धबाधा-पत्तिः। अतः कर्त्तृत्वार्थाः। दन्तधावनादीनां शरीरसंस्कारार्थ-त्वात्तस्य च परलोकभोग्यफलभोक्तृत्वेऽनुपयोगादपि तथात्वम्। अतश्च कर्त्तुरङ्गप्रधानार्थत्वात् संस्काराणामपि तथात्वमिति प्राप्ते।

कर्त्तृत्वस्य शरीरादिवदेव संस्कारव्यतिरेकेणापि जायमानत्वा-

दैवर्थ्यादृष्टरूपभोक्तृत्वार्थमेव युक्तम् । भोक्तृत्वस्य कर्त्तृत्वापेक्षया अभ्यर्हितत्वाच्चैवम् । शरीरादीनामपि स्वावच्छेद्यजीवव्यक्तिगतत्वसम्बन्धेन भोक्तृत्वोपयोगित्वमव्याहतम् । न चैवं प्राधान्यापत्तिः, क्षेत्रसंस्काराणां बीजावपनार्थत्वस्येवात्मसंस्काराणामपि क्रतुजन्यफलाधानयोग्यताजननार्थानां क्रत्वङ्गत्वोपपत्तेः । अत एव सर्वैरेव संस्कारैः स्वस्वावान्तरादृष्टद्वारा समुच्चित्य प्रधानफलानुकूलातिशयविशेषो जन्यते । प्रधानफलमेव चात्मन्युत्पद्यते इति तदर्था एव संस्कारा नाङ्गार्थास्तत्फलस्य क्रतुगामित्वात् । यत्र तु दृष्टविधया वचनादेव वा कर्त्तृत्वोपयोगित्वं, यथा प्राथमिकशुद्ध्यर्थस्नानाचमनादौ हिरण्यमालिनः प्रचरन्तीत्यादौ च बहुवचनात्तत्र कर्त्तृत्व एवोपयोगादङ्गप्रधानार्थत्वम् । अत एव तादृशस्थले अङ्गविकृतिषु तस्यातिदेशः ॥ ३ ॥ १ ० ५ ॥

चिकीर्षया ॥ सोमे षट्त्रिंशत्प्रक्रमादिपरिमाणां वेदिं विधाय श्रुतं, इयति शक्ष्यामहे, स्वां कर्त्तुमिति । सा वेदिर्यद्यपि देशत्वादङ्गप्रधानार्थतया प्रसज्यते, तथापि दीक्षादक्षिणान्यायेन उक्तवचनात् प्रधानमात्रार्था । कर्त्तुमिति हि तुमुना इच्छार्थकेन चिकीर्षितार्थत्वप्रतीतेः प्रधानस्यैव चिकीर्षितत्वादङ्गानाञ्चाचिकीर्षितानामपि चिकीर्षितप्रधानार्थत्वेनैवानुष्ठानात् प्रधानमात्रार्थैव वेदिः । स्थितन्तावदपर्यवसितम् ॥

तथा प्रधानेन ॥ दर्शपूर्णमासयोश्चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्रामावास्यामिति श्रुतम् । तत्राप्येतौ मन्त्रौ पौर्णमास्यमावास्यापदवाच्यप्रधानमात्रसंयोगात्क्रतुविरभिमर्शनार्थाविव । न चात्र

पौर्णमास्यादिशब्दौ कालपरौ तथात्वे द्वितीयया सम्बन्ध्यर्थलक्षणा-नुपपत्तेः। आसन्नानि हवींष्यभिमृशतीति प्राप्ताभिमर्शनानुवादेन मन्त्रकालोभयविधौ वाक्यभेदापत्तेश्च। काले निमित्तेऽभिमर्शनो द्देशेन मन्त्रविधौ प्रतिपदादिकालीनाभिमर्शने मन्त्रानापत्तेश्च। पौर्णमास्यादिपदाभ्यां पौर्णमास्यादिप्रयोगस्याधिकरणत्वविधौ चोभ-यत्र प्रातिपदिके प्रत्यये च लक्षणाप्रसङ्गो वाक्यभेदश्च तदवस्थ एव। प्रयोगस्य निमित्तत्वाङ्गीकारे च लक्षणाद्वयप्रसङ्गो विकृतावप्राप्त्या-पत्तिश्च। अतो लाघवात् प्रातिपदिकेनैव पौर्णमास्यादिप्रधानमात्र-सम्बन्धिहविर्लक्षणात्तदुद्देशेनैव मन्त्रविशिष्टमभिमर्शनं विनियुज्यते। मन्त्रमात्रं वा तदुद्देशेन विधीयते। अभिमर्शनं तु प्रकरणप्राप्तानु-वादः। उत्पत्तिवाक्ये च हविःशब्देन प्रधानमात्रहविरुपादानमुप-संहारविधया न विरुध्यते। अतः प्रधानमात्रार्थौ मन्त्रौ ॥

स्थितादुत्तरम् ॥ यद्यपि चिकीर्षितार्था वेदिस्तथापि साङ्गस्यैव फलसामग्रीत्वेन चिकीर्षितत्वादङ्गप्रधानार्थैव सा। वस्तुतस्तु। देश-त्वात्तस्याः प्रकरणादेवाङ्गप्रधानार्थत्वसिद्धेरर्थवाद एवायमियति शक्ष्यामह इति। अत एव शक्ष्यामह इति वचनात् कर्तृप्रचारमा-त्रार्थत्वमङ्गीकृत्याङ्गप्रधानार्थत्वमप्यपास्तम्। अतः सर्वार्थायावेदेरग्नी-षोमीयादौ प्राकृतहविरासादनार्थवेदिबाधकत्वं तद्विकृतौ चाति-देशः सिद्धो भवति।

यत्तु द्वादशे प्राकृतवेदेः प्रसङ्ग इति वक्ष्यते। तत्कर्तृप्रचार-मात्रार्थत्वं कृत्वा चिन्तया। द्वितीयस्योत्तरम्। सत्यं पौर्णमास्यादि-शब्दाभ्यां प्रधानसम्बन्धिहविर्लक्षणा। तथापि सम्बन्धोनाङ्गत्वाख्यः,

तथात्वे वाक्यसङ्कोचापत्तेः। अपि तूपकारकत्वाच्च इत्यङ्गप्रधानार्थावेव मन्त्रौ ॥२॥१०६॥१०७॥

दीक्षादक्षिणम्॥ ज्योतिष्टोमे दीक्षा, दण्डेन यजमानं दीक्षयतीत्यादिका, दक्षिणा च गौश्चाश्वश्चेत्यादिका, श्रुता साङ्गप्रधानार्था। दीक्षायास्तावद् द्वितीयया पुरुषसंस्कारिकाया वपनाधिकरणन्यायेन फलिसंस्कारकत्वप्रसक्तावपि यो दीक्षितो यदग्नीषोमीयं पशुमालभते दीक्षितः सोमं क्रीणातीत्यादौ दीक्षितग्रहणानिर्थक्येनेष्टकाः प्रचतीत्यादिवद्विशेषणीभूतदीक्षाया अपि कर्त्तृसंस्कारद्वाराऽग्नीषोमीयाद्यर्थत्वप्रतीतेस्तस्य च स्वतन्त्रविधायकत्वे गौरवादनुवादविधया दण्डेन दीक्षयतीत्यादौ हिरण्यमालिन इति बहुवचनवत्कर्त्तृसंस्कारकतातात्पर्य्यग्राहकत्वावगतेः कर्त्तुरङ्गप्रधानार्थत्वेन दीक्षाया अप्यङ्गप्रधानार्थत्वात्। दक्षिणायास्तु कर्त्रानयनार्थत्वादेवाङ्गप्रधानार्थत्वं स्फुटमेव। एवं च दीक्षाः सोमस्य दक्षिणाः सोमस्येति वाक्यद्वयं साक्षात्परम्परासाधारणसम्बन्धसामान्यमादायानुवादः। इतरथा परिसङ्ख्यापत्तेरिति प्राप्ते।

वचनानर्थक्यभिया प्रधानमात्रार्थत्वम्। फलतः परिसङ्ख्यात्वाच्च न वैदोष्यापत्तिः। न च वचनस्य प्रधानप्रयुक्तत्वमात्र परत्वेनाप्युपपत्तेरङ्गांगत्वनिवृत्तिपरत्वे मानाभावः। प्रसङ्गसिद्धिकृतिकारकत्वादेर्निराकर्त्तुमशक्यतया वचनस्याङ्गोद्देश्यतामात्रनिवृत्तिफलवत्त्वावसायात्तस्याश्च प्रयुक्तत्व इवाङ्गत्वेऽपि प्रविष्टत्वेनोभयनिवृत्त्युपपत्तेः। प्रयुक्तत्वनिवृत्तौ अङ्गत्वाङ्गीकारे फलाभावाच्च। न च दक्षिणावाक्ये परिसंख्यार्थत्वोपपत्तावपि दण्डेनेत्यादिवाक्येन दीक्षायाः प्रसक्तस्य

प्रधानमात्रार्थत्वस्य यो दीक्षित इत्यादिवाक्येन दीक्षायास्तत्तद-ङ्गाङ्गताविधायकेन बाधितस्य प्रतिप्रसवार्थता दीक्षाः सोमस्येति वाक्यस्यास्त्विति वाच्यम्। गौरवेणाग्नीषोमीयादिवाक्यस्य दीक्षा-विधायकत्वानुपपत्तेः। अतोऽनुवादविधयैव तद्बाधकत्वाद्युक्तमेव परिसङ्ख्यात्वम्।

वस्तुतस्तु गौरवभियैवानुवादविधयाऽपि न बाधकत्वम्। अपि तु प्रधानाङ्गभूतदीक्षायुक्तपुरुषानुवाद एव य एवं विद्वानिति-वद्दीक्षितपदम्। अतश्च दीक्षावाक्यस्यानुवादकत्वमेव दक्षिणाप्रशंसा-फलम्। अतः प्रधानमात्रार्थमेव दीक्षादक्षिणम्। तथापि तु नाङ्गेषु प्राकृती अन्या वा दक्षिणा। प्रसङ्गेन कार्यसिद्धेर्द्वादशे वक्ष्यमाणत्वात्। प्रयोजनमग्नीषोमीयादिविकारेषु दीक्षादक्षिणयोरनतिदेशः सि-द्धान्ते। अतश्च तेष्वपेक्षितत्वाच्छतोक्थ्यादिवत्प्रकृतितोऽन्वाहार्यदक्षि-णायाः स्वतन्त्रादिदेशः, अर्थाक्षिप्तं यत्किञ्चिद्दानतिसाधनं द्रव्यं वा दक्षिणेत्यपि तत्रैव वक्ष्यते॥ ३॥ १०८॥

तथा यूपस्य॥ दर्शपूर्णमासयोर्होतुरन्तर्वेद्येकः पादो भवति बहिर्वेद्येक इति श्रुतम्। तथा सोमेऽग्नीषोमीययूपमानं, प्रकृत्यार्ध-मन्तर्वेदि मिनोत्यर्धं बहिर्वेदीति। तत्रान्तर्वेदिदेश एव तत्तदङ्गत्वेन विधीयते, उतान्तर्वेदिबहिर्वेदिशब्दलक्षितदेशविशेषो वेति चि-न्तायाम्। प्रमाणाभावादन्तर्वेदिदेश एवैकपादोद्देशेन यूपार्धोद्देशेन च विधीयते। तद्विधौ पादार्धान्तरयोर्बहिर्वेदिदेशः प्राप्त एवा-नूद्यत इति प्राप्ते।

आद्योदाहरणे तावद्धविरासादनार्थायादेक्षिक्यावेदेरेकपादोद्दे-

शेन विधावेकत्वस्योद्देशविशेषणस्याविवक्षापत्तेः बर्हिर्वेद्येक इत्यस्यानुवादायोगाद्विधाने वाक्यभेदापत्तेरगत्या देशविशेषलक्षणया श्रोत्रवस्थानोद्देशेन विधीयते। न च देशविशेषलक्षणापेक्षया लाघवादन्तर्वेदित्वविशिष्टबर्हिर्वेदित्वमेव लक्षणया विधीयतामिति वाच्यम्। विशेष्यविशेषणभावे विनिगमनाविरहात्।

द्वितीयोदाहरणेऽपि सौमिक्यावेदेर्दर्शत्वेनाङ्गप्रधानार्थत्वस्य स्थापितत्वाद्यूपार्धद्वयेऽपि वेदेः प्राप्तत्वादर्धोद्देशेन तद्विधाने परिसङ्ख्यापत्तिः। न चाग्नीषोमीयादिरूपाङ्गाङ्गत्वेऽपि वेदेस्तदङ्गभूतयूपमानाङ्गत्वे प्रमाणाभावः। प्रयोगविधिना साङ्गानामेवाङ्गानां प्रयोगविधानात्। अन्यथा तदङ्गप्रयाजपशुपुरोडाशादिष्वविरासादनादौ वेद्यादेरनापत्तेः। न च वाक्येन वेदेर्यूपार्धाङ्गत्वेन विधानात् प्रकरणगम्यसर्वार्थत्वस्य बाधोपपत्तेः परिसङ्ख्यात्वानापत्तिः। षट्त्रिंशत्प्रक्रमपरिमाणार्थवादस्ये यति शच्यामह इत्यस्यार्धमात्रार्थत्वेऽनुपपद्यमानत्वेन सर्वार्थत्वबाधानुपपत्तेः।

न चैवमपि फलतः परिसङ्ख्यात्वात् चैदोष्यानापप्रापकप्रमाणप्रतिबन्धाभावेन शाब्दपरिसङ्ख्यात्वापत्त्या चैदोष्यावश्यकत्वात्। अतो वरं देशविशेषलक्षणैका। न चार्धोद्देशेन बर्हिर्वेदिमात्रविधानादर्धान्तरे च वेदेरेव प्राप्तत्वादनुवादोपपत्तेर्न लक्षणाऽपीति वाच्यम्। अनुवादवैयर्थ्यभियैव लक्षणाङ्गीकारात्। तत्राप्यन्तर्वेदिपद एव लक्षणाङ्गीकारे बर्हिर्वेदेरपि विधेयत्वेन वाक्यभेदापत्तेरर्धमन्तर्वेदि अर्धं बर्हिर्वेदीति पदैर्लक्षितदेशविशेषविशिष्ट-मानस्यैव यूपोद्देशेन मानोद्देशेनैव वा विधानम्। तत्प्रयोजनं तु, यूपैकादशिन्यां

वेदेरविवृद्धिः । वस्तुतस्तु देशविशेषलक्षणायामपि सामान्यतः साङ्गे विहिताया वेदेरविरोधेनार्धे प्राप्त्युपपत्तेर्यूपैकादशिन्यामपि तदर्थं वेदिविवृद्धिरावश्यकी । अतएव यावद्यूपं वेदिमुद्धन्तीति कल्पसूत्रकारवचनमपि सङ्गच्छते । अतोऽन्यत्प्रयोजनं मृग्यं, देशविशेषलक्षणैव वा नाङ्गीकर्त्तव्येति ध्येयम् ॥३॥१०९॥

सामिधेनी ॥ सोमे, उत यत्सुन्वन्ति सामिधेनीस्तदन्वाहुरिति श्रुतम् । यत् यत्र दक्षिणहविर्धानेऽभिषवस्तत्राग्नीषोमीयादिसामिधेनीरनुब्रूयादित्यर्थः । तत्र हविर्धानशकटः सामिधेन्यङ्गमुत तल्लक्षितोदेश इति चिन्तायाम् । पूर्ववत्परिसङ्ख्यावाक्यभेदाद्यभावाल्लक्षणापरिहाराय सोमधारणे कृतार्थस्यापि हविर्धानस्यैव पुरोडाशकपालन्यायेन सामिधेन्यङ्गत्वमिति प्राप्ते ।

हविर्धानस्यात्यन्ताप्राप्तस्य सामिधेन्यङ्गत्वेन विधावपूर्वविधित्वापत्तेः प्रकृतित आहवनीयप्रत्यग्देशस्यातिदेशप्राप्तस्यानियमेन दक्षिणोत्तरहरिर्धानसमीपवर्त्तितया प्राप्तेर्दक्षिणहविर्धानलक्षितदेशस्य नियमविधौ लाघवमिति तदनुरोधेन लक्षणाऽपि न दोषः ।

वस्तुतस्तु लाघवस्य प्रमाणानुग्राहकत्वान्निषादस्थपत्यधिकरणन्यायेनौत्तरकालिकत्वाच्च तदनुरोधेन लक्षणाऽनुपपत्तेः यद्यत्र देशे सुन्वन्त्यभिषुण्वन्ति तस्मिन्नभिषवदेशे सामिधेनीरनुब्रूयादित्यर्थावगमेन हविर्धानस्याप्रतीतेरभिषवदेशस्यैव श्रौतत्वेन विधेयत्वान्न लक्षणाऽपि । प्रयोजनं, पूर्वपक्षे हविर्धानोपरि सामिधेनीपाठः । सिद्धान्तेऽभिषवदेशे दक्षिणहविर्धानसमीपे ॥३॥११०॥

शास्त्रफलम् ॥ तदेवं पूर्वैः सह प्रकरणस्थानयोर्विरोधाविरोध-

विचारे समाप्तेऽधुना समाख्यायास्तं कर्त्तुं प्रथमं तावत्स्वाम्यतिरिक्त-कर्त्तृसद्भावः प्रतिसमाध्यते ।

अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादिषु दक्षिणायुक्तेषु कर्मसु यद्यपि तावत्स्वर्गकामो यजेतेति सामानाधिकरण्यात्माख्याया अपि यागादिकरणिकायाभावनायाः स्वर्गकामकर्त्तृत्वं प्रतीयते, तथापि कर्त्तृत्वस्य स्वतन्त्रः कर्त्ता तत्प्रयोजको हेतुश्चेति सूत्रद्वयानुसारात् षड्भिर्हलैः कृषतीति प्रयोगाच्च साक्षात्प्रयोजकसाधारण्येनैवावग-तेरसति प्रमाणान्तरे प्रयोजककर्त्तृत्वायोगेऽपि प्रकृते दक्षि-णाऽऽम्नानादिना प्रयोजककर्त्तृत्वस्याप्यवगतेः स्वाम्यतिरिक्तस्यापि कर्त्तृत्वम् ।

कर्मकरानतिसाधनवचनो हि दक्षिणाशब्दोनासत्सु कर्त्रन्तरेषू-पपद्यते। न ह्यत्रास्ति किञ्चिद्बलवद्बाधकं येन यदि पत्नीः संयाजयन् कपालमभिजुहुयाद्वैश्वानरं द्वादशकपालं निर्वपेत्तस्यैकहायनो गौर्द-क्षिणा तं स देयाय दद्यादित्यत्र देयस्य स्वलिङ्गप्रतिषेधादिवा-दृष्टार्थत्वं लक्षणया कल्प्येत। सामानाधिकरण्यस्य प्रयोजककर्त्तृत्वेना-प्युपपत्तेः । आत्मनेपदस्यापि च साक्षात्प्रयोजकसाधारण्येनाकर्त्तरि फलप्रतिषेधकत्वेनैवोपपत्तेर्न फल्यतिरिक्तस्य कर्त्तृत्वप्रतिषेधकत्वम् ।

अत एव यजन्ति याजका इति परस्मैपदप्रयोगः। तेन कस्यापि बाधकस्याभावान्न दक्षिणादानस्यादृष्टार्थत्वकल्पना। अतस्तद्बलाद्दर्श-पूर्णमासयोश्चत्वार ऋत्विज इति वचनाद्धौत्रादिसमाख्यावरणाद्या-म्नानबलाच्च स्वाम्यतिरिक्ता अपि कर्त्तारः । न च स्वामिनोऽशक्तौ दक्षिणादानादिनाऽन्योपादानम् । दक्षिणादेर्नित्यवदाम्नानविरो-

धात् । अतः परकीयस्वत्वस्य परेणोत्स्रष्टुमशक्यत्वादुत्सर्गमात्रं स्वामिना कार्यम् । अन्यत्तु विशेषतः प्रमाणाभावेऽन्येनैवेति सिद्धम् ॥२॥११॥

तत्रार्थात् ॥ ते कियन्त इत्यपेक्षायां तत्तत्कर्मणि अध्वर्य्वादिसंज्ञापुरस्कारेण तत्तत्कर्मविधानाद्यावंतां यत्र विधानन्तावन्त एव तत्र ज्ञेयाः । अत एवाग्निहोत्रे एक एवाध्वर्युः, दर्शपूर्णमासयोश्चत्वारः, चातुर्मास्येषु पञ्च, पशौ षट्, सोमे सप्तविंशतिः ।

न च परिक्रयवशादेकोपादानावश्यम्भावे तस्यैव पाचकलावकादिवत्तत्तत्कर्मकरणनिमित्ताबह्वः संज्ञाभविष्यन्तीति वाच्यम् । सञ्ज्ञानां कर्मकरणात् पूर्वमेवाध्वर्युं वृणीत इत्यादिना पूर्वंप्रयुक्तत्वेन कर्मकरणनिमित्तकत्वाभावात् । अपि तु तत्तद्वरणनिमित्तकत्वं तत्तद्वरणजन्यतत्तद्दानतिनिमित्तकत्वं उक्तविधानतिजन्याध्यवसायनिमित्तकत्वं वा । कृतेऽपि वरणे अहमध्वर्युः स्यामित्यध्यवसायाभावे अध्वर्युशब्दाप्रयोगात् ।

वस्तुतस्तु अध्यवसायस्यापि निश्चयरूपस्य क्षणिकत्वात्तज्जन्योऽभिमानविशेष एव निमित्तम् । तस्य च सत्रे स्वत एवागतत्वेन वरणाभावेऽपि इष्टकात एव सत्त्वादध्वर्युत्वाद्युपपत्तिः । प्रकृतावपि होता अवृतः सामिधेनीरन्वाहेति वरणात्पूर्वं होतृशब्दप्रयोगोपपत्तिः । अत एव वरणजन्यादृष्टवत्त्वमध्वर्युत्वादिकमिति प्राभाकरमतमपास्तम् । सत्रेऽपि ऋतुयाज्यावरणवत् वरणापत्तेश्च ।

न चैवमप्येकस्यैव तत्तदभिमानोपपत्तेः कर्त्तृभेदे प्रमाणाभावः । अध्वर्युं वृणीते ब्रह्माणं वृणीत इति तत्तद्विधिविहितवरणानाम-

भ्यासेन भिन्नानां संस्कार्यभेदं विनाऽनुपपत्तेः। अप्रवृत्तस्य पुरुषस्य प्रवर्त्तनफलकमभ्यर्थनं हि वरणम्। न च तदेकस्मिन् पुरुषे अनेकं सम्भवति। भिन्नानां संस्कार्याणां तत्तत्क्रियासु भिन्नास्वेव विनियोगान्न विकल्पाशङ्का। दर्शपूर्णमासयोश्चत्वार ऋत्विज इत्याद्यनुवादवशादप्येवम्।

एवं च ऋत्विजोवृणीत इत्यत्रापि न वरणविधिस्तथात्वे ऋत्विज इति बहुत्वानुवादानुपपत्तेः। अपि तु ऋत्विक्संस्कारकवरणमात्रानुवादो ऋत्विग्धर्माणां तदुत्तरत्वप्राप्त्यर्थस्तद्धर्मविधानार्थश्च। अतो यावन्ति लौकिकानि यावन्ति मन्त्रवन्ति वा वरणानि, तावन्तः कर्त्तार इति सिद्धम् ॥३॥११२॥

चमसाध्वर्यवश्च ॥ अध्वर्य्वादिसञ्ज्ञानां रूढत्वादस्तु भेदकत्वम्। चमसाध्वर्युसञ्ज्ञायास्तु चमसेष्वध्वर्युरित्येवं यौगिकत्वादध्वर्युपुरुषादय एवैत इति प्राप्ते। सत्यपि सञ्ज्ञाया यौगिकत्वे चमसाध्वर्यून् वृणीत इति पृथग्वरणाम्नानादवरीतव्यानां चमसाध्वर्यूणां पूर्ववदेवान्यत्वम्। एवं सदस्यं वृणीत इति वचनात्सदस्यस्यापि। एवं च भक्षतः कारिणां चमसाध्वर्यवो होत्रकाणां चमसाध्वर्यव इति ऋत्विक्सम्बन्धव्यपदेशोऽपि भेद एवोपपद्यते ॥३॥११३॥

उत्पत्तौ ॥ ते चमसाध्वर्यवोवरणवाक्ये बहुत्वश्रुतेर्बहवः। यद्यपि तत्रोद्देश्यविशेषणत्वाद्बहुत्वाविवक्षा। तथापि स्वाध्यायोऽध्येतव्य इति वत्संस्कारविध्यन्यथाऽनुपपत्त्या विनियोगकल्पनदशायान्तद्विवक्षोपपत्तिः। अनयैव दिशा पुरोहितं वृणीते अध्वर्युं वृणीतइत्यादावप्येकत्वविवक्षा द्रष्टव्या। वस्तुतस्तु तत्र तत्र विनियोगे चम-

साध्वर्यवश्चमसानुन्नयन्ति अध्वर्युः पुरोविभजते इत्यादौ बहुत्वैक-
त्वश्रुतेस्तद्विवक्षोपपत्तिः ॥३॥११४॥

दशत्वम् ॥ ते च दशैकादश वा। न तु त्रयः। चमसानाम्ना-
वत्वात्। अत एव मध्यतः कारिणां होत्रादीनां चतुर्णां होत्रकाणां
च मैत्रावरुणादीनां षण्णां चमसाध्वर्यव इति व्यपदेशोऽपि सङ्गच्छते।
सदस्यपक्षे तच्चमसे एकादशः। एवं च दशपेये क्रतौ सिद्धवद्दश
चमसाध्वर्यव इति व्यपदेशोऽपि सदस्याभावपक्षे सङ्गच्छते। त्रित्वपक्षे
न कथञ्चिदस्योपपत्तिः ॥३॥११५॥

शमिता च ॥ पशौ शमितारमुपनयीतेति श्रुतः। शमिता
वरणभेदानाम्नानात्सत्यपि सञ्ज्ञाभेदे यौगिकत्वेन प्रकृतेष्वेव ऋत्विक्षु
अनृत्विक्षु वा तेषु तस्या उपपत्तेर्नान्यः। तत्राप्यध्वर्योः पराङावर्त्तते-
ऽध्वर्युः पशोः सञ्ज्ञप्यमानादिति वचनेनासामर्थ्यात्तत्पुरुषः प्रति-
प्रस्थाता सञ्ज्ञपयेत्। न च तस्य हिंसादोषभिया अप्रवृत्तिः।
दक्षिणादिलोभेन तदङ्गीकारेण प्रवृत्त्युपपत्तेः। अत एवार्त्विज्यं
निन्दति। ब्राह्मणस्य च शामित्रविषये कलौ पृथङ् निषेधो-
दोषाधिक्यख्यापनार्थः। अत एव कलौ शामित्रे ब्राह्मणालाभेन
शूद्रेण क्रियमाणे क्लोमाङ्गं शमितुस्तद्ब्राह्मणाय दद्याद्यद्यब्राह्मणः
स्यादिति वचनं सङ्गच्छत एव। अब्राह्मणः स्यादिति यजमानपर-
मिति तु प्राञ्चः ॥३॥११६॥

उपगातारश्च ॥ एवं सोमे समाम्नाता उपगातारोऽपि वृतेष्वेव।
न चोपगातॄणां कर्त्तृगुणत्वेन लोके प्रसिद्धेर्वृतानां च तुल्यकक्षत्वेन
तदभावादन्य इति वाच्यम्। तुल्यानामपि प्रैषप्रैषार्थकारित्वत्पर-

स्वरोपकारित्वस्यैवोचितत्वात्। स्वामिपरिक्रीतानामपि शिल्पकारिणां तथा दर्शनाच्च। तथाप्युपगानस्य सामवैदिकत्वादुद्गात्रादीनां चयाणाङ्गानव्यापृतत्वेऽपि* सुब्रह्मण्यो नियतः। अन्ये तु अवरा उपगायन्ति चत्वार उपगायन्तीति वचनान्तरानुसारादनियताः। अत एव नाध्वर्युरुपगायेदिति वचनान्नासौ ॥३॥११७॥

विक्रयी ॥ सोमविक्रयी त्वन्य एव। वरणादिकं हि क्रत्वर्थत्वात्तदङ्गपदार्थकरणाय पुरुषानुपादातुं क्रियते। विक्रयस्त्वविहितः क्रयान्यथानुपपत्त्या आवश्यकोऽपि दोषस्वीकारेण रागतः प्रवृत्तपुरुषकर्त्तृकविक्रयोपजीवनेनापि क्रयसिद्धेरनाक्षेपात्त्वानङ्गम्। अतस्तत्र प्रवृत्तानामप्राप्तेरन्य एवेति ॥३॥११८॥

कर्मकार्यात् ॥ ब्रह्मादयस्सप्तसाध्वर्यवस्य सोमे कर्त्तारः समधिगतास्ते सर्वे ऋत्विक्पदवाच्याः। ऋत्विक्पदस्य ऋत्विग् दधृगित्यादिसूत्रेण कर्त्तृवाचिक्विन्नन्तत्वनिपातनेन यौगिकत्वावगतेर्वसन्ताद्यृतुकालीनयागप्रयोगकर्त्तृवाचित्वनिर्णयोनादृष्टरूपऋत्विक्त्वे रूढिमङ्गीकृत्यौणादिकत्वकल्पनाऽनुपपत्तेः। तस्य च सर्वपुरुषेष्वविशेषात्। तस्यैतस्य यज्ञक्रतोः सप्तदश ऋत्विज इति तु एकं वृणीत इत्यादिवदवयुत्यानुवादः। इतरथा परिसङ्ख्यायां त्रिदोषत्वापत्तेः। अदृष्टरूपऋत्विक्त्वकल्पनायां गौरवादेव वरणमेव तज्जन्यादृष्टमेव वा ऋत्विक्पदप्रवृत्तिनिमित्तमित्यप्यपास्तम्। रूढिकल्पनायां प्रमाणाभावात्। ब्रह्मादिवरणानां भेदादनेकादृष्टशक्तिकल्पनापत्तेश्च। व्यापकधर्मस्य वरणत्वस्यैव शक्यत्वाङ्गीकारे तु अतिप्रसङ्ग इत्यस्मन्मत-

---

* व्यापृतत्वेऽपि,— इति भवितुमुचितम्।

प्रवेशः। यजमाने वरणाभावेन ऋत्विक्त्वानापत्तेश्च। सत्रे ऋत्विक्त्वसम्पत्तये वरणापत्तेश्च। अत एव 'ऋत्विजोवृणीत इत्यस्यैव वरणविधित्वादेकमेव वरणं पदप्रवृत्तिनिमित्तमित्यपास्तम्। ब्रह्माणं वृणीत इत्यादिविधीनां वैयर्थ्यप्रसङ्गाच्च। एतेन ब्रह्मादिनिष्ठक्रतुयजनान्येव ऋत्विक्पदप्रवृत्तिनिमित्तमित्यपास्तम्। अनेकशक्तिकल्पनातादवस्थ्यात्। अतश्च सर्व एव ऋत्विक्पदवाच्या इति सर्वेषामेव हिरण्यमालित्वादि ऋत्विक्कार्यमिति प्राप्ते।

सत्यं, ऋत्विक्पदं यौगिकम्। क्रतुयजनसामान्यवाची च सः। तथापि सप्तदशश्रुत्या उद्भित्पङ्कजादिवदेव रूढिमकल्पयित्वैव सप्तदशश्रुत्युन्नीतप्राचीनप्रयोगस्य सहकारित्वकल्पनयैव सप्तदशानामेव ऋत्विक्पदशक्यत्वोपपत्तिः। न ह्युद्भिदादिपदेषु अतिप्रसङ्गनिराकरणार्थं रूढिकल्पनम्। तथात्वे सोमादिवन्मत्वर्थलक्षणामङ्गीकृत्य गुणविधित्वस्यैवोपपत्तेः। न चैवं सप्तदशश्रुतेः परिसङ्ख्यात्वापत्त्या त्रिदोषत्वापत्तिः। ऋत्विक्पदन्यानकारणताकल्पनवेलायामेव* सप्तदशश्रुतेस्तात्पर्यग्राहकत्वकल्पनेन प्राप्तपरिसङ्ख्यात्वाभावात्। अतश्च सप्तदशानामेव ऋत्विक्कार्यं हिरण्यमालित्वादि ॥३॥११९॥

नियमः॥ के ते सप्तदशेत्यपेक्षायां ऋत्विग्भ्यो दक्षिणां ददातीत्युपक्रम्याग्नीधे ब्रह्मण उद्गात्रे इत्यादीनां षोडशानामेव सङ्कीर्त्तनात्तेषामेव ऋत्विक्त्वम्। अत एव सत्रे यजमानानामेव ऋत्विक्त्वात्तेषामेव यजमानसहितानां दीक्षाश्रवणम्। अतः षोडश तावत्समधिगताः ॥३॥१२०॥

---

* इत्थमेव पाठः सर्व्वत्र।

स्वामिसमन्त्रणाः ॥ समन्त्रणस्तु सदस्यः। तस्यापि पृथग्वरणाम्ना-
नाच्च समविधानाच्चेति प्राप्ते। सदस्यकर्त्तव्यपदार्थाश्रवणाद्वरणस्य
सक्तुन्यायेन विनियोगभङ्गं कल्पयित्वा दृष्टार्थत्वावगतेः सदस्यस्य
पाक्षिकत्वेन समन्त्रणश्रुतेः पाक्षिकानुवादत्वात्तच्चे तस्य दीक्षाम्नानाच्च
स्वाम्येव समन्त्रणः। कर्मकरत्वेऽपि वा न पत्नी। समन्त्रणत्वजनकी-
भूतापेक्षाबुद्धौ लिङ्गवैरूप्याङ्गीकारे प्रमाणाभावात् ॥३॥१२१॥

ते सर्वार्थाः॥ तत्तत्क्रतुषु प्रमितानां तेषां कर्तॄणामव्यवस्थयैवा-
सति विशेषविधौ लिङ्गप्रकरणाभ्यां तत्तत्पदार्थकर्तृत्वं, न तु तयोर्दुर्ब-
लतया आध्वर्यवादिसमाख्यया सङ्कोचः॥ स्थितं तावदपर्यवसितम् ॥

अग्नयश्च ॥ आहवनीयादयोऽनारभ्याधीतवचनैर्होमाद्यनुवादेन
विहिताः पर्णतान्यायेन प्रकृतिहोमाद्यर्था एव विकृतौ हि ये
तावद्धोमादयोऽतिदेशेन प्राप्यन्ते, तेषु प्राप्तिकालवैषम्यात् स्पष्टमेव
द्विरुक्तत्वम्। येऽप्यामनहोमादयोऽपूर्वास्तेषामपि विकृतिसम्बन्धबो-
धव्यतिरेकेणाङ्गग्राहकत्वानुपपत्तेर्विकृतेश्च क्लृप्तोपकाराङ्गग्रहणार्थं पूर्व-
मतिदेशकल्पनाऽवश्यम्भावात्तस्य च प्रकृतावाहवनीयप्राप्तिमन्तरेणानु-
पपत्तेस्तेष्वपि द्विरुक्तत्वम्। अतस्तेषु नोपदेशेन नापि यूपावटस्तरण-
बर्हिर्वदतिदेशेनाहवनीयप्राप्तिः। अतोऽधिकरणं विनैव तद्रुति प्राप्ते।

सत्यमतिदेशप्राप्तेषु नाहवनीयाद्युपदेशः। अपूर्वेषु त्वस्यानारभ्या-
धीतत्वादतिदेशेन प्राप्तिरविरुद्धा। न ह्यामनहोमानां विकृति-
सम्बन्धं विना नाङ्गग्राहकत्वम्। उत्पत्तिवाक्ये दृष्टसामान्यस्य भाव्य-
त्वबोधेनापि शाब्दबोधस्य पर्यवसन्नतया तदनुवादेनाहवनीयविधा-
नोपपत्तेः। अतस्तेऽपि सर्वार्थाः ॥३॥१२२॥

श्रितादुत्तरम् ॥ नात्र समाख्यया लिङ्गप्रकरणयोर्बाधः। किन्तु ताभ्यामव्यवस्थया प्राप्तानां कर्त्तॄणां व्यवस्थामात्रमपेक्षितं क्रियते । अतश्च हौत्रसमाख्याताः पदार्था होत्रा कर्त्तव्या आध्वर्यवसमाख्याताः चाध्वर्युणा औद्गात्रसमाख्याता उद्गात्रा। सर्वेषु हि ऋग्वेदयजुर्वेद-सामवेदेषु ये पदार्था विहिताः तेषामेताः क्रमेण समाख्या याज्ञि-कानां प्रसिद्धाः। यौगिकाश्चैते शब्दा न पदार्थानामध्वर्य्वा-दिसम्बन्धव्यतिरेकेण सम्भवन्तीति तेषु तेषां योग्यत्वात्कर्त्तृत्व-सिद्धिः ॥ ३॥१२३॥

तस्योपदेश ॥ अयं चोत्सर्गो वचनाद्यजमानस्य याज्येत्यादिका-द्विशेषसमाख्यया च पोत्रीयं नेष्ट्रीयं याजमानमित्यादिकया अपो-द्यते। न चैवं तादृशविषये सामान्यसमाख्यायानिर्विषयत्वापत्त्या आनर्थक्यप्रतिहतन्यायेन विकल्पापत्तिः। यथाशक्ति प्रयोगे पोत्रादी-नामशक्तौ सविषयत्वोपपत्तेः। वस्तुतस्तु हौत्रादिसमाख्यायाः सामा-नाधिकरण्यसम्बन्धेन ऋग्वेदविहितकर्मत्वमुपलक्षणीकृत्यैव तत्तत्पदा-र्थेषु होत्रादिविधायकत्वं निरुक्तसम्बन्धेनाग्नीषोमीयप्राक्कालवृत्तित्व-मुपलक्षणीकृत्योपांशुत्वविधायकत्वमिव यत्किञ्चित् प्राचीनमित्यस्य। अतश्च तद्यदेव केषु चित्पदार्थेषु तदभावेऽपि न क्षतिः। अत एव दक्षिणारहितकाम्यादौ यजमानस्यैव कर्त्तृत्वेऽपि समाख्यायान काचिदनुपपत्तिः ॥ ३॥१२४॥

प्रैषानुवचनम् ॥ ज्योतिष्टोमे मैत्रावरुणः प्रेष्यति चानु चाहेति श्रुतम्। सन्ति च तत्र केचित् केवलाः प्रैषाः, अग्नये समिध्यमाना-यानुब्रूहि यूपायाज्यमानायानुब्रूहीत्यादयः। केवलानि चानुवच-

मानि, प्रवोवाजा अभिद्यवः अञ्जन्ति त्वामध्वर इत्यादीनि उप-देशातिदेशप्राप्तानि । प्रैषोत्तरत्वाच्चैषामनुवचनत्वम् । कानिचित्तु प्रैषत्वे सत्येवानुवचनानि, यथा होता यक्षदित्यादीनि । एषां च प्रेष्येत्यध्वर्युप्रैषोत्तरभावित्वाद्धोतर्यजेत्यन्तं प्रैषत्वाच्चोभयरूपत्वम् ।

तदिह मैत्रावरुणः प्रैषानुवचनोद्देशेन विधीयमानः सर्वत्र स्यान्न तु प्रैषान्तानुवचनेष्वेव । उद्देश्यविशेषणस्य साहित्यस्याविवक्षितत्वात् । च-शब्दस्यापि प्रैषानुवचनरूपधर्मसाहित्यपरत्वेन प्रैषत्वानुवचनत्वरूप-धर्मयोरेकाधिकरण्यरूपसाहित्यबोधकत्वाभावात् । तस्य च प्रति प्रधानं गुणाम्वयन्यायेनैवास्मन्मतेऽपि सिद्धेरनुवादकत्वाच्च । अतश्च सर्वत्रैव समाख्याप्राप्तकर्त्रन्तरबाधेन वाक्यान्मैत्रावरुणनिवेशः । न चात्रानेकोद्देशे वाक्यभेदो दोषः । अर्धमन्तर्वेदि मिनोतीतिवदाख्यातैकत्वा-भावात् । अत एवैकवाक्योपादानगम्यसाहित्यस्योद्देश्यगतस्याप्रतीत-त्वादेव नाविवक्षापत्तिः ।

न चैवमपि शुद्धप्रैषेष्वध्वर्युकर्तृकत्वस्य शुद्धानुवचनेषु च हो-तृकर्तृकत्वस्यैव समाख्यया प्राप्तेः कर्त्रन्तरानपेक्षत्वादेव न मैत्रावरुण-विधिः, प्रैषान्तानुवचनेषु तु प्रैषत्वेनाध्वर्युकर्तृकत्वस्यानुवचनत्वेन च होतृकर्तृकत्वस्य प्राप्तेर्विरोधेनोभयोरपि निवृत्तौ कर्त्रन्तरापेक्षायां तत्रैव मैत्रावरुणविधिरिति पार्थसारथ्युक्तं युक्तमिति वाच्यम् । प्रैषान्तानुवचनानामपि हौत्र एव पाठस्य वार्त्तिकोक्तत्वेनाध्वर्युकर्तृ-कत्वाप्राप्तेः । उभयत्र पाठेन तत्प्राप्तावपि च विकल्पेनोभयनिवे-शोपपत्तेर्निवृत्त्यप्रसङ्गाच्च ।

यदपि वार्त्तिके अग्नीषोमीयाङ्गभूतेषु प्रैषान्तानुवचनेषु यजेति

शब्दस्य प्राकृतत्वात्तन्मात्रेऽतिदेशेनाध्वर्योः प्राप्तिः। प्रेष्येति प्रैषान्तराम्नानाद्वा। इतरमन्य इति न्यायेन प्रतिप्रस्थातुः। सोमाङ्गान्तर्वर्त्ति-यजेति शब्दे तु होतर्यजेति लिङ्गानुरोधेन समाख्यां बाधित्वा मैत्रावरुणस्य। तदतिरिक्तपदान्तरेषु होतुरेव। ततश्चांशभेदेन नानाकर्तृप्राप्तेरेकपदार्थे च कर्तृद्वयासम्भवात् प्रच्युतयोर्मैत्रावरुणविधिरित्युक्तम्। तदपि यजेति शब्दस्याग्नीषोमीयादौ हौत्र एव प्रत्यक्षपठितत्वेन समाख्यया अतिदेशकाध्वर्य्ववादिबाधेन होतृप्राप्तेस्तस्य च होतर्यजेति लिङ्गेन बाधेऽपि तत्पुरुषस्य मैत्रावरुणस्यैव यजेतिपदे तदेकवाक्यतापन्नपदान्तरेषु च प्राप्तेरुपेक्षितम्।

अबाधेऽपि वा समाख्याया दुर्बलत्वेन यजेति शब्दे तदेकवाक्यतापन्नपदान्तरेषु च प्रतिप्रस्थातुरेवैकस्य प्राप्तेर्न कर्त्रन्तरापेक्षा। एवं सोमाङ्गभूतेष्वपि। अतः सर्वत्रैव मैत्रावरुण इति प्राप्ते।

वाक्यभेदाङ्गीकारेऽनुषङ्गापत्तेश्च-शब्दवैयर्थ्याच्च पदद्वयेन प्रैषान्तानुवचनान्येवार्धमन्तर्वेदीतिवल्लक्षयित्वा तेष्वेव मैत्रावरुणविधानम्। च-शब्देन धर्मिणोरितरेतरयोगस्य स्वरूपे कार्ये वा असम्भवात्समुच्चयस्य च न्यायादेव प्राप्तेरानर्थक्यतदङ्गन्यायेन धर्मयोरेव प्रैषत्वानुवचनत्वयोरितरेतरयोगप्रतीतेर्निपातस्थले च परस्परान्वयस्य व्युत्पत्तिसिद्धत्वेन वाक्यभेदाभावाल्लक्षणां विनैव परस्परयुक्तप्रैषत्वानुवचनत्वावच्छिन्नोद्देशेन मैत्रावरुणो विधीयते। अत एव प्रैषानुवचनत्वावच्छिन्ने एव लक्षणोपपत्तेर्न युक्तो वाक्यसङ्कोच इत्यपास्तम्। वस्तुतस्तु शुद्धानुवाक्यास्वपि कासुचिन्मैत्रावरुणस्य याज्ञिकसम्मतत्वाच्च-शब्दो नेतरेतरयोगार्थः। अपि तु धर्मिसमुच्चयार्थ एव सन्ननुवादः।

न चैवं सार्वत्रिकत्वापत्तिः। अनुवादस्य सति सम्भवे सन्निहितगामित्वनियमेन यानि प्रैषानुवचनान्यधिकृत्यायं विधिः प्रवृत्तस्तद्विषयत्वस्यैवाङ्गीकारात् ॥ ३॥१२५॥

चमसात् ॥ चमसेषु विशेषसमाख्यया चमसाध्वर्युरूपया तेषामेव होमादौ कर्त्तृत्वम्। समासान्तर्गताध्वर्युपदस्य रूढ्या शुद्धाध्वर्युपदवदेव वरणादिनिमित्तत्वाविशेषात्। इयांस्तु विशेषः, यत्तस्य सर्वकार्येषु विनियोग एतेषां तु चमसेष्वेवेति। यदि तु तत्तद्वरणानां भेदादनेकशक्तिकल्पने गौरवमाशङ्क्येत। ततोऽस्तु एष्वध्वर्युशब्दस्य गौणत्वम्।

न च विनिगमनाविरह इति शङ्क्यम्। चमसाध्वर्युवरणवाक्ये रूढिकल्पने चमसाध्वर्युपदस्यैव तत्कल्पनापत्तेरध्वर्युपदस्य ततोभिन्नस्य शक्त्यन्तरकल्पनावश्यम्भावात्। अतो लाघवात् प्रचुरप्रयोगाच्चाध्वर्युपदस्यैव प्रसिद्धाध्वर्यावेव शक्तिरितरेषु तु गौणी। तथापि तु ग्रहादौ तस्यापि होमादिकर्त्तृत्वाद्धोमकर्त्तृत्वसादृश्यमात्रेणैतेषु गौणत्वोपपत्तेः सामान्यसमाख्यां बाधित्वा चमसेष्वेतेषामेव होमादिकर्त्तृत्वमिति प्राप्ते।

गौणत्वस्यावश्यकत्वे चमसवृत्तिहोमादिकर्त्तृत्वेनापि गौणत्वोपपत्तौ स्वोपजीव्यसामान्यसमाख्याबाधे प्रमाणाभावाच्चमसेष्वप्यध्वर्युरेव होमादिकर्त्ता तस्यान्यत्र व्यापृतत्वे तु गौणसमाख्यया चमसाध्वर्यवस्तेषामप्यसम्भवे इतरमन्य इत्येवं प्रतिप्रस्थात्रादयः ॥ ३॥१२६॥

वेदोपदेशात् ॥ औद्गात्रे सामवेदे श्येनेन श्रुतो ज्योतिष्टोमोधर्मवान्। तत्र प्राकृताङ्गेष्वतिदेशेन नाना ऋत्विजः प्राप्ता औपदे-

श्चिका औद्गात्रसमाख्यया बाध्यन्त इति तेषूद्गातैव कर्त्ता। समाख्या हि कर्तृप्रापिका, कर्त्ता च प्रयोगाङ्गं, प्रयोगश्च प्रयोगविधिना साङ्गस्यैवैकोविधीयत इति समाख्यया अङ्गेष्वपि कर्तृविधिरुपदेशेन। अतश्च यथैवाध्वर्य्यवेन चरन्तीत्यपाद्देशत्वात्साङ्गभावनाविषयत्वप्रतीतेः प्राकृतेषु प्रयाजादिष्वग्निबाधकत्वं, तथा प्रकृतेऽपि।

न च समाख्यायाः प्रधानमात्रे श्रुताया अपि अङ्गविषयत्वस्य कल्पनीयत्वेन प्रयोगविध्याश्रितत्वात्तस्य चातिदेशप्रापिताङ्गविषयत्वेन तदपेक्षत्वात्तदुपजीविचोदकप्रापितनानाकर्तृत्वबाधानुपपत्तिरिति वाच्यम्। सत्यपि तृतीयाश्रवणे अपामप्यङ्गविषयत्वस्य कल्पनीयत्वेनोक्तविधयाऽग्निबाधकत्वानापत्तेः। न हि तृतीयायाः साङ्गवृत्तिकरणत्वे शक्तिरपि तु प्रधानकरणत्व एव। तत्तु अङ्गवैशिष्ट्यं विनाऽनुपपन्नमिति अङ्गविषयत्वं कल्प्यमेव।

अतश्च शरादौ कृप्तोपदेशस्थल इव कल्प्योपदेशस्याप्यतिदेशबाधकत्वं वाच्यम्। अत एव यत्र प्रकृतावेव स्तोत्रशस्त्रादौ वेदान्तरीयविशेषसमाख्यारूपेणोपदेशेनैव कर्त्रन्तरप्राप्तिस्तत्राङ्गविषये कल्प्यायाः प्रधानसमाख्याया बाध दृष्ट एव। वर्णितं ह्येतद्गुणमुख्यक्रमाधिकरणे। प्रकृते त्वातिदेशिकत्वात् प्रधानसमाख्याया एव प्राबल्यमिति प्राप्ते।

इहापि प्रयोगविध्याश्रितायास्तस्या अङ्गविषये कल्प्यत्वेनोपजीव्यातिदेशापेक्षत्वात्, तेन च कर्तृविशिष्टानामेव प्राप्तत्वेन कर्त्रपेक्षाऽभावात्, समाख्याया आकाङ्क्षाविरहे श्रुत्यकल्पकत्वात्, कल्पकत्वेऽपि वा प्राकृताङ्गविषयत्वाभावान्न प्राकृतकर्तृबाधकत्वम्। न चैव-

मप्स्वपि तथात्वापत्तिः। अविधेः प्रत्यक्षत्वात्तासाञ्च धात्वर्थान्वयस्या-व्युत्पन्नत्वात् तृतीययाऽवभृथकरणकभावनायामन्वयावगतेर्दृष्टत्वेन च भावनोत्पत्त्यन्वयित्वाभावेन तत्प्रयोगान्वयित्वात् प्रयोगस्य चाङ्गप्रधा-नसाधारणत्वाङ्गभावनाऽन्वयद्वारा पाश्चात्यतद्विशेषणान्वये अविशेषणोभ-यान्वयतात्पर्य्यावगत्योपदेशेनैव प्रधान इवाङ्गेष्वमप्रिबाधात्*।' अत-एव यत्र तृतीयायाः श्रवणाभावो 'यथा यज्ञाथर्वणं वै काम्या इष्टयः ता उपांशु कर्त्तव्या इत्यादौ, तत्र प्रधानकर्मकभावनायामेवान्वयप्रा-प्तस्यां चाङ्गान्वयाभावेन प्रधान एव प्राकृतस्वरादिबाधकत्वम्। प्रकृते तु समाख्यायाः प्रधानमात्रविषयत्वात्तस्य च स्वामिकर्त्तृकत्वे-नान्यकर्त्तृकत्वानुपपत्तेः स्वनिर्विषयत्वापत्त्या कथञ्चिदानर्थक्यतदङ्ग-न्यायेनाङ्गमात्रविषयकत्वकल्पनेऽपि क्लृप्तकर्त्तृकाङ्गविषयत्वकल्पने प्र-माणाभावात्कष्टकविनोदनाद्यौपदेशिकाङ्गविषयत्वमेव कल्प्यते।

वस्तुतस्तु तेषामपि विशिष्य स्वसमाख्ययैव कर्त्तृप्राप्तेर्न प्रधान-समाख्याविषयत्वम्। अपि तु यानि वेदत्रयाविहितानि स्मृत्याद्य-नुमितवेदविहितान्यङ्गानि, तद्विषयैव सेति ध्येयम्। अतः प्राकृता-ङ्गेषु नानेव कर्त्तारः। किं च समाख्यायाः पाठमात्रनिबन्धनत्वे-नोच्चैः ऋचेत्यादिवद्विधाननिबन्धनत्वाभवात् प्राकृतानां च सामवेदे अपठितत्वादपि तद्विषयत्वाभावः॥३॥१२७॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
तृतीयाध्यायस्य सप्तमः पादः।

---

* इत्यमेव पाठः सर्व्वत्र। इवाङ्गेष्वप्यभिबाधात्,—इति प्रतिभाति।

अथ अष्टमः पादः।

स्वामिकर्म॥ वरणं दक्षिणादानं च समाख्ययाऽध्वर्य्वादिभिरेव कार्यम्। अध्वर्युश्च यथा तान् स्वद्रव्येण परिक्रीणीते तमुपायं यजमानः कुर्यात्। अध्वर्योस्त्वितरमन्य इति न्यायेन वरणादिकं प्रतिप्रस्थाता कुर्यात्। स चाध्वर्युर्दक्षिणाम्नानात् तेनानतः स्वकृत्यं कुर्यात्। ऋत्विगन्तरार्थं स्वद्रव्यं दातुं यजमान उपायान्तरं कुर्यादिति प्राप्ते।

अवश्यं वृतोऽध्वर्युरन्यान् वृणीते। अन्यथा ध्वर्युत्वासम्भवात्। वरणस्यादृष्टार्थत्वाद्यापत्तेश्च। तद्वरणं च येनादौ कर्त्तव्यं, तस्याध्वर्युगुणत्वसम्पत्तये वरणस्यावश्यकत्वात्तस्य च समाख्यातः सकर्त्तृकत्वावश्यंभावाद्वरणे तावत्समाख्याबाध आवश्यकः। एवं दक्षिणादानेऽपि। उपायान्तरकल्पने गौरवापत्तेः। प्रयोगवाक्यावगतस्वामिकर्त्तृकत्वबाधापत्तेश्च। समाख्याया एव केवलाया बाधः।

वस्तुतस्तु। सर्वत्र स्वामिकर्त्तृकत्वप्राप्तौ वरणेनेव दक्षिणादानेनाप्यन्यत्रान्यकर्त्तृकत्वसिद्धेः समाख्यया नियममात्रं क्रियत इति स्वलाघवानुरोधेनापि न समाख्यावरणभरणविषयिणी। सत्यपि वा तस्मिन्नुपायान्तरकल्पनाद्यनुरोधेनैव दानमात्रे स्वामिकर्त्तृकत्वम्। यत्र तु वचनं यथा, य एतामिष्टकामुपदध्यात्स त्रीन्वरान्दद्यादित्यादौ, तत्राध्वर्य्वादीनामपि दानकर्त्तृत्वम्। अत्र हि स्वामिकर्त्तृकत्वे ह्युपधानस्य सामानाधिकरण्येन तत्समानकर्त्तृत्वावगतेरस्यापि तत्कर्त्तृत्वे उपदध्यादिति परस्मैपदानुपपत्तिः। तस्य ञित्परत्वेन उपधात्रभिन्न-

गामिक्रियाफलकत्वावगतेः। यदि तु क्रियाफलस्याम्यादिगतत्वात्प-
रस्मैपदोपपत्तिरित्याशङ्क्येत, ततः प्राप्तोपधानानुवादेन दानस्य तत्-
कर्त्तृत्वस्य च विधौ वाक्यभेदापत्तेः, य इत्यनेन कर्त्तृप्राप्तिप्रतीते-
श्चोपधानस्याध्वर्युकर्त्तृकत्वावसायात्तत्समानकर्त्तृकस्य दानस्यापि तत्-
कर्त्तृकत्वसिद्धिः॥ ३॥१२८॥

संस्कारास्तु॥ वपनादयः फलिसंस्काराः समाख्यानादध्वर्युक-
र्त्तृकाः। तेनाध्वर्युणा क्षुरन्दन्तकाष्ठं जलं च गृहीत्वा यजमानस्य
केशवपनादिकं दन्तधावनं स्नानं कारणीयं अञ्जनाभ्यञ्जनवत् इति
प्राप्ते।

वपत इत्यात्मनेपदाद्वपनफलाश्रयस्य यजमानस्यैव तत्कर्त्तृत्वं
प्रतीयते। अस्ति च तस्यापि छेदनाख्यवपनाधारत्वेन स्थाली पच-
तीवत् तत्कर्त्तृत्वम्। तदादायैव च तस्मात् केशान्वपाम्यहमिति
प्रयोगः। यस्तु नापितोवपतीत्यादिप्रयोगः, स च्छेदनानुकूलक्षुर-
क्रियाकर्त्तृत्वमादाय। तत्प्रयोजककर्त्तृत्वमादायैव नापितो यजमानं
वापयतीत्यादिप्रयोगः। अतश्च वपत इत्यात्मनेपदस्थले आधार-
त्वमादायैव तत्कर्त्तृत्वोपपत्तौ क्षुरग्रहणकर्त्तृत्वेऽपि तात्पर्यकल्पने
प्रमाणाभावः। तेनार्थाच्छिन्नस्य यजमानकर्त्तृत्वस्य नियम एव।
प्रमाणाभावे अध्वर्युकर्त्तृकत्वनियमस्य कः प्रसङ्ग इति नापित-
कर्त्तृकमपि तत्।

सोमे तु प्रवपति देवश्रु इति परस्मैपदादध्वर्युकर्त्तृकगोदानव-
पनोत्तरं नापिताय क्षुरं प्रयच्छतीति विधानात्तत्कर्त्तृकमेव तत्।
एवमन्यत्राप्यात्मनेपदयुक्ते द्रष्टव्यम्। अत एव यत्र तमभ्यनक्ति शरेषी-

कथाऽनन्ति दण्डेन दीक्षयतीत्यादौ परस्मैपदनिर्देशोऽधिकः श्रुतस्वाम तत्स्याधारत्वमादायात्मनेपदोपपत्त्या यजमानकर्त्तृकत्वे यथाश्रुतार-स्यापि विधेयत्वादध्वर्युकर्त्तृकत्वमिष्टमेव।

स्नाने तु स्वनिष्ठव्यापार एव स्नातीति परस्मैपदस्यापि प्रयोगा-दन्यकर्त्तृके च स्नापयतीत्येव प्रयोगात् यजमाननिष्ठव्यापारस्यैव विधेयत्वेनान्यकर्त्तृकव्यापारस्याविधेयत्वेन नाध्वर्युनियमः। न चात्र परस्मैपदादन्यकर्त्तृकत्वनियमः, स्नाधातोः स्वरितेत्त्वाद्यभावेन तद-भावात्। अतः फलिसंस्काराः स्वामिकर्त्तृका एव, कर्त्तृसंस्कारास्तु हिरण्यमालित्वादयः सामान्यविहिताः सर्वेषामेव, विशिष्य विहितास्तु तेषामेवेति न तत्रापि समाख्यया नियमः। तस्या नियामकत्वाच्चलेन प्रापकत्वाभावादिति वक्ष्यते॥ ३॥ १२९॥

तपश्च॥ सोमे द्वयहं नाश्नाति त्र्यहं नाश्नातीति श्रुतम्। तत्रा-शनप्रतिषेधोऽनृतवदनप्रतिषेधवदेवारादुपकारको न फलि-संस्कारकः। आत्मनेपदाद्यभावात्। सत्त्वेऽपि वा स्वरितेत्त्वाद्य-भावाच्च। अतश्च समाख्यानादध्वर्युकर्त्तृकत्वम्। वस्तुतस्तु। अनृतवदेव प्रतिषेध्याशनस्याविहितत्वादभावस्य चाननुष्ठेयत्वाच्च समाख्याविषय-त्वमिति कर्त्तृमात्रविषयत्वे प्राप्ते।

आरादुपकारकत्वपक्षे अनशनस्य क्रतुवैगुण्यजनकत्वं तस्य च फलप्रति-बन्धकत्वमित्यादिकल्पनाऽपेक्षया लाघवेनाशनाभावस्य दुःखजनकतया क्लृप्तत्वात्तद्दुःखस्य च स्वजनकीभूतपापनाशकत्वस्यापि क्लृप्ततया केवलं तत्पापस्य सोमफलप्रतिबन्धकत्वमात्रकल्पनया अशनाभावस्य यज-मानविष्ठफलप्रतिबन्धकाभावसम्पादकत्वमेव यद्दानप्रसादा लेधार्ह-

इति वाक्यशेषानुसारात् कल्पयितुमुचितम्। अतश्च तस्य लिङ्गादेव यजमाननिष्ठत्वम्। न ह्यन्यसमवेतदुःखेनान्यदीयं पापं नश्येत्। न वा ऋत्विग्गतपापस्य स्वामिगतफलप्रतिबन्धकत्वकल्पनम्। गौरवात्। अत एव यच्च ऋत्विज उपवसन्तीत्यादिवचनं तत्रानृतवदनन्यायेनारादुपकारकत्वकल्पनं व्यधिकरणस्यैव वा फलप्रतिबन्धकत्वादिकल्पनमिति द्रष्टव्यम्। अत एव तत्र न समाख्या नियामिका॥ ३॥ १२०॥

गुणत्वाच्च॥ ये ऋत्विक्संस्कारा हिरण्यमालित्वादयः तत्तद्वेदपठितास्ते समाख्यानादध्वर्य्वादिना कर्त्तव्याः, बहुत्वस्योद्देश्यगतत्वेनाविवक्षितत्वात्। अथाप्यनुवादापेक्षा, तदा तत्पुरुषैः कार्या इति प्राप्ते।

अनियतकर्त्तृप्राप्तौ समाख्यया लाघवेनापेक्षितनियममात्रकरणात् प्रकृते च संस्कार्यस्य प्रतिप्रधानावृत्तिन्यायेन सर्वस्यैव नियतप्राप्ततया नियमानपेक्षत्वान्न समाख्यायास्तन्नियामकत्वम्। कर्त्रन्तरपरिसङ्ख्यायकत्वं तु वैरूप्यापत्तेरयुक्तम्। यदि तु समाख्यायास्तत्तत्पदार्थवाचिन्याभेदेनास्या हिरण्यमालित्वविषयिण्याः परिसङ्ख्यायकत्वमेवेत्याशङ्क्येत, तथापि समाख्यया वचनस्य सङ्कोचायोगादेव सर्वविषयत्वनिश्चयः॥ ३॥ १२१॥

तथा कामः॥ ये गुणजन्याः कामाः, यदि कामयेत वर्षुकः पर्जन्यः स्यान्नीचैः सदो मिनुयादित्यादयस्ते मानाद्याश्रयस्य तावदाध्वर्यवत्वात्तत्सामानाधिकरण्याच्च कामयतेस्तत्समानकर्त्तृकत्वप्रतीतेरध्वर्युनिष्ठा एव। अत एव यच्च दध्नेन्द्रियकामस्येति वैयधिकरण्यं तत्र यजमानगामित्वमेव। प्रक्षेपाख्यहोमस्याध्वर्यवत्वादिति प्राप्ते।

मिनुयादिति ङितः परस्मैपदनिर्देशादध्वर्युभिन्नकर्त्तृकत्वावगतेः

सामानाधिकरण्यबाधेन याजमानत्वमेव। यत्रापि यो वृष्टिकामः स सौभरेण स्तुवीतेत्यादौ न परस्मैपदं, तत्रापि नोद्गातृगामित्वम्। वृष्टिकामनाऽनुरोधेन यजमानफलसाधनीभूतनित्यगुणबाधानुपपत्तेः। अतस्तत्र सामानाधिकरण्यमात्मनेपदञ्च प्रयोजककर्त्तृत्वाभिप्रायेणैव व्याख्येयम्। अतएव यत्र न नित्यगुणबाधोबाधेऽपि वा साक्षादेव वचनं, तत्र स्वामिभिन्नगामित्वेऽपि न क्षतिः। यथाऽऽत्मने वा यजमानाय वा यं कामं कामयते तमुद्गायेदिति। अत्र पृथग्यजमानपदश्रवणादात्मशब्दश्रवणाच्चात्मपदेनोद्गातैवोच्यते। अतएवाऽनुषङ्गेण वाक्यभेदोऽप्यदोषः। तमित्यनेनोभयविशिष्टं वैकल्पिकं कामं परामृश्य उद्देश्यत्वविधानाद्वा न वाक्यभेदः। गायतेश्च गायन्ति यं सामगा इत्यादौ अर्थाभिधानेऽपि प्रयोगाच्च कामरूपार्थस्योद्देश्यत्वविघातः॥ २॥ १२२॥

मन्त्राश्च॥ इह कार्य्ये करणभूताः कर्मफलप्रकाशकाः कर्माङ्गभूतमन्त्रा आयुर्दा अग्ने अगन्म सुवरित्यादयः। ते समाख्यानादाध्वर्यवा इति प्राप्ते।

यद्यप्येते लिङ्गादिनाऽऽहवनीयोपस्थानादौ विनियुक्ता न सूक्तवाकादिवत्तृतीयया इतिकरणेन वा विनियुक्तत्वाभावादानुषङ्गिकफलकल्पकास्तथापि कर्मफलमेवोपस्थानादिप्रयोज्यं प्रोत्साहनार्थं प्रकाशयन्ति। तत्र च यच्चैतत्प्रकाश्यं फलं कर्मजन्यत्वेन क्लृप्तं, तत्र तच्छक्त्यैव नियतमनियतं वा प्रकाश्यते। अत एव दर्शपूर्णमासादौ स्वर्गायुरादेः फलत्वात्तत्तत्फलार्थप्रयोग एव तत्तन्मन्त्रो न फलान्तरार्थप्रयोगे। यत्र तु नैतत्प्रकाश्यस्य कर्मफलत्वं; तत्र स्वरूपया

कर्मफलमेव एतेन मन्त्रेण प्रकाश्यत इति द्रष्टव्यम् । तच्च फलं यजमानगाम्येव । ऋत्विक्फलस्योपस्थानाद्यप्रयोज्यत्वेन तत्प्रकाशने तदङ्गत्वानुपपत्तेः । तस्य यजमानादाशास्यत्वेनाग्निं प्रत्यनाशास्यत्वाच्च । न च यजमानफलमेवाध्वर्युणाऽऽशास्यताम् । मद्दति अगन्म इति चाध्वर्य्यप्रकाशकत्वेन लिङ्गविरोधात् । अतो याजमाना एवैते । अत एव यत्रैव नैतादृशं लिङ्गं, तत्राध्वर्यवा एव ॥ ३ ॥ १३ ॥

द्व्याम्नातेषु ॥ ये मन्त्राः सामान्यत आध्वर्यवसमाख्याते काण्डे समाख्याताः पुनश्च याजमानेऽपि विशेषतः समाख्यायन्ते । यथा- ऽऽज्यग्रहणमन्त्राः स्रुग्व्यूहनमन्त्राश्च । ते तावत्तत्प्रत्यभ्यासे प्रत्यभि- ज्ञायमानत्वादिध्यभावाच्चाभिन्नाः । अतस्तत्र गुणभूतकर्तृद्वयस्य विकल्पः । विशेषसमाख्याबलाद्वा यजमान एव कर्त्ता । आज्यग्रहण- स्रुग्व्यूहनादेर्वा निःसन्दिग्धमाध्वर्यवत्वात्तदङ्गभूता मन्त्रा अपि तत्कर्तृका एव । न चैवं द्विःपाठवैयर्थ्यम् । एकत्र स्वरूपज्ञानमन्यत्र विनियोग इत्येवं सार्थक्यादिति प्राप्ते ।

एकपाठेनैवोभयसिद्धौ द्वितीयस्य वैयर्थ्यापत्तेस्तस्योच्चारणान्तर- विधायित्वावगतेस्तस्य च समाख्यान्तरेण कर्त्रन्तरसिद्धिः । उच्चा- रणान्तरप्रयोजनं तत्क्रियाप्रत्यवेक्षणमिति नादृष्टकल्पनाऽपि । यद्यपि च तन्नियमेन यजमानस्य न प्राप्तं, तथापि द्विःपाठबलादेव तत्कल्प्यमिति न दोषः । यत्र तु नैवंविधं प्रयोजनं कर्तृभेदो वा- ऽसम्भवी । यथा अयं सहस्रमानव इत्यस्यामौद्गात्रे एव प्रगीता- प्रगीतभेदेन समाम्नातायाम् । तत्रागत्याऽभ्युदयाशिरस्कत्वं परिकल्प्य उत्पत्तिविनियोगपरत्वेन सार्थक्यमिति विशेषः ॥ ३ ॥ १४ ॥

श्राते च॥ वाजपेयादौ यत्र तूष्णीं यजमानं वाचयतीति श्रुतं, तत्र याजमानो मन्त्रः। वाचनमाध्वर्यवमित्यविवादम्। परन्तु वाचयतेर्ब्रह्मचारिणो गायत्र्युपदेशादौ शिक्षणवाचित्वेन क्लृप्ततया प्रकृतेऽपि शिक्षणविधायित्वावगतेः तस्य चादृष्टार्थत्वप्रसङ्गेन शातत्वाभावात् तदुक्तविधाङ्गानुरोधेनात्र एव वाजपेयादावधिकारी। अतोऽन्येषां क्रतूनामध्ययनविधिसिद्धज्ञानोपजीवनेन शावधिकारकत्वेऽपि वाजपेयादौ तदसम्भवादत्रत्यैव वाचनमिति प्राप्ते।

वाचयतेर्वचनानुकूलव्यापारमात्रवाचित्वेन क्वचिदन्यथानुपपत्त्या शिक्षणग्रहणेऽपि स्मरणमात्रग्रहणेनापि प्रकृते वाचनोपपत्तेरर्थज्ञानापेक्षत्वे प्रमाणाभावात् शत्रैव वाचनम्। तत्र खण्डशो वा इमं मन्त्रं ब्रूहीत्येवं वेत्यन्यदेतत्॥ २॥ १२५॥

याजमाने॥ दर्शपूर्णमासयोर्वत्समुपावसृजतीत्यादीनि कानिचित्कर्माण्याध्वर्यवसमाख्यायुक्तानि प्रत्येकं विभिन्नदेशे विधाय, पुनस्तान्येव याजमानसमाख्यायुक्तानि द्वन्द्वशोवत्सञ्चोपावसृजत्युखाञ्चाधिश्रयतीत्याद्युक्त्वैतानि वै द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि सम्पाद्य यजेतेति श्रुतम्। तदेषां ह्यान्नातमन्त्रवदुभयकर्त्तृकत्वं तावन्न सम्भवति। अदृष्टार्थत्वापत्तेः। न चाभ्यासात्कर्मार्थत्वम्। अन्यपरत्वात्। अत एव एककर्त्तृकत्वावश्यंभावे विशेषसमाख्यानाद्याजमानत्वे प्राप्ते।

नैषां याजमानकाण्डे विधानम्। आध्वर्यवे भिन्नदेशविहितानामेव द्वयोर्मिथः प्रत्यासन्नत्वाख्यद्वन्द्वतारूपगुणविधानार्थमेवानुवादात्। अतः पदार्थेषु तावदध्वर्युरेव कर्त्ता। न च द्वन्द्वतायामेव यजमानः प्रभुः। अन्येन क्रियमाणानामन्येन द्वन्द्वतायाः सम्पादयितुमशक्य-

त्वात्। द्वन्द्वता हि नाम एकया वत्सोपावसर्जनक्रियया धेनुवत्सयोः प्रत्यासन्नत्वसम्पादनं, एकया चावहननक्रिययोलूखलमुसलयोः। एवं द्वादशस्वपि द्रष्टव्यम्।

न च तत्कर्त्तनुरोधेन प्रधानभूतपदार्थानां कर्तृबाधः। अङ्ग-गुणविरोधन्यायेन तदसम्भवात्। न च तानि सम्पाद्य यजेतेति क्त्वाप्रत्ययबलेनैव द्वन्द्वतायाः यागसमानकर्तृकत्वावगतेः वचनादेवाङ्ग-निष्ठादपि पदार्थेषु समाख्याया बाध इति वाच्यम्। क्त्वाप्रत्ययस्य प्रयोजकत्वेनाप्युपपत्तेः प्रधानसमाख्याबाधकत्वानुपपत्तेः। एवं द्वन्द्व-तानिष्ठसमाख्याऽपि प्रयोजकत्वाभिप्रायेणैव व्याख्येया। अतः स्मरण-मात्रं याजमानं पदार्थास्त्वाध्वर्यवा एव॥ ९॥ १२१॥

विप्रतिषेधे॥ दैक्षपशौ यूपपरिव्याणे आध्वर्यवः करणमन्त्रः परिवीरसीत्ययं श्रुतः। तथा, युवा सुवासा इत्ययं क्रियमाणानु-वादी हौत्रोऽपि। तौ च द्वावपि यूपाय परिवीयमाणायानुब्रूहीति प्रैषवशादेतदुत्तरपाठाच्चैतत्प्रैषाव्यवहितोत्तरक्षणे एककालीनौ। आङ्ग-परिव्याणभावनाकरणसमकालत्वाच्च क्रियमाणानुवादित्वाविरोधः। सोमविकृतौ च कौण्डपायिनामयने तथैव प्राप्तौ। तत्र च यो होता सोऽध्वर्युरिति च श्रुतम्। तस्य च सत्त्वात्तत्रे चानतिप्रयुक्तवरण-जन्यहोतृत्वाध्वर्युत्वादेरानत्यभावेनाभावाद्योहोतेत्यत्र होत्रध्वर्युपदाभ्यां तत्कार्यलक्षणया कार्यद्वयेऽप्येककर्तृकत्वं विधीयते। अतस्तौपदेशि-कैककर्तृकत्वबलेन प्राकृतैककालत्वबाधात् प्रथमतः करणं पश्चादपर-इत्येकः पक्षः।

होतृत्वादेरध्यवसायमात्रनिमित्तकत्वस्य स्थापितत्वात् सर्वेऽपि

तदसम्भवेन पदद्वये कार्यलक्षणायां प्रमाणाभावाज्जघन्य एवाध्वर्युपदे तल्लक्षणामङ्गीकृत्याध्वर्यवपदार्थानां 'होतृसंस्कारकत्वेन विधानम्। अप्राकृतकार्यकारित्वापत्तेः होतृपदे कर्मत्वलक्षणापत्तेश्च होतैव वा तत्कर्तृत्वेन विधीयते। तथापि तु परिधौ पशुं नियुञ्जीतेत्यत्र परिधित्वाविरोधेनेव होतृत्वाविरोधेनैव कर्तृत्वविधानाद्धौत्रः क्रियमाणानुवाद्येव तेन प्रयोक्तव्यः। अपरस्तु तेन कालान्तरेऽन्येन वा तत्पुरुषेण तस्मिन्नेव काले प्रयोक्तव्य इति प्राप्ते।

पुरोडाशकपालवदग्निपरिधानार्थस्यैव परिधेः पशुनियोजने विनियोगाद्युक्तं परिधिधर्माणां सत्वक्कादीनां प्राबल्यम्। प्रकृते लब्धवषायनिमित्तहोतृत्वेनैवाध्वर्यवे विनियोगाद्धौत्रकार्यस्य प्रयोजकत्वकल्पने प्रमाणाभावादाध्वर्यवस्य करणस्यैव प्रत्यक्षवाक्यावगतशेषित्वेन प्राबल्यात्मातिदेशिकसमाख्याप्रमाणकक्रियमाणानुवादिनः प्राथम्यं, न वा कालान्तरे तस्य होत्रा पाठः। स उ श्रेयान् भवतीति लिङ्गावगतक्रियमाणानुवादित्वबाधापत्तेः। नापि करणमन्त्रान्यवहितोत्तरक्षणे होत्रा तस्य पाठः। यूपायेत्यादिप्रैषे होतुः कर्तृत्वेन प्रैषार्थे तदसम्भवात्। अतस्तस्मिन् तत्काले एव होतृपुरुषोऽन्यः कश्चिदन्तरङ्गोऽध्वर्य्वादिः कर्त्ता। तस्य कर्मान्तरव्यापृतौ तु बहिरङ्गोऽपि॥ २॥ १२७॥

प्रैषेषु॥ प्रोक्षणीरासादयेत्यादयः प्रैषाः प्रैषार्थाश्च प्रोक्षण्यासादनादयः समाख्यानादध्वर्युणैवैकेन कर्त्तव्याः। न च स्वस्मिन् स्वस्य प्रैषानुपपत्तिः। चेतो वृथा खिद्यस इत्यादाविव स्वस्मिन्नपि स्वस्योपदेशसम्भवात्। वस्तुतोनैवायं प्रैषः। अपि तु प्रैषातिसर्गप्राप्त-

कालेषु कृत्यासेति चकारेण लोटोऽपि प्राप्तकालतायां विधानात् प्राप्तकालतायामयं लोट्। प्रोक्षणीरासादयेत्यस्य प्राप्तः काल इति। युष्मदर्थकोमध्यमपुरुषस्तु साधुत्वार्थः। अथ वा। हे प्रोक्षणीरासादक, तव प्राप्तः काल इति क्रियायां चेतनत्वाध्यारोपेण सः। अत्र तु अग्नीदग्नीन्विहरेत्येवं प्रैषः, तत्रापि सम्बोधनानुरोधेन प्रैषार्थस्याग्नी-ध्रकर्तृकत्वम्। यस्तत्र हे अग्नीत् समाग्निविहरणस्य प्राप्तः काल इति व्याख्यातुं शक्यत्वात् तत्रापि समाख्याबाध इति प्राप्ते। .

समाख्यानुरोधेन मध्यमपुरुषस्य साधुत्वेन क्रियायां चैतन्यत्वा-रोपेण व्याख्याने प्रमाणाभावात् सम्बोधनमध्यमपुरुषयोश्चादृष्टार्थत्वा-पत्तेः प्रैषत्वसमाख्याबाधापत्तेश्च प्राप्तकालार्थकत्वानुपपत्तेः। प्रैषस्यापि लक्षितौपचारिकत्वापत्त्या एकचाध्वर्युसमाख्याबाधेनोभयोर्भिन्नकर्तृ-कत्वमेव ॥ २ ॥ १२८ ॥

अध्वर्युः॥ तत्रापि बहुषु प्रधानभूतेषु प्रैषार्थेषु समाख्याबाधे प्रमा-णाभावादेकस्मिन् प्रोक्षणीरासादयेत्यादिप्रैषे एवाध्वर्युबाधेनान्यकर्तृ-कत्वम्। अत एव तिर्यञ्चं स्फ्यन्धारयित्वा संप्रैषमाह यदन्यञ्च धारयेत् इध्माबर्हिषाध्वर्युं कल्पीतेति धारयितुर्भिन्नमध्वर्युं दर्शयतीति प्राप्ते।

प्रैषार्थस्यान्यकर्तृकत्वेऽपि प्रयोजकत्वेनाप्यध्वर्योः कर्तृत्वोपपत्तेः समाख्यायाः क्वचाप्यबाधात् प्रैषार्थानन्य एव कुर्यात् प्रैषोच्चारणं त्वध्वर्युः। स च सोमादावस्ति विशेषवचने प्रतिप्रस्थात्रादिरन्य-पुरुषः, दर्शादौ त्वाग्नीध्र एव कर्मकरत्वेन याज्ञिकप्रसिद्धत्वादिति ध्येयम्। यत्तु लिङ्गं, तदपध्वर्युरन्वश्चन्धारयेत्तदा स्फ्यस्तं कल्पीते-त्यर्थेऽपि बाधकाभावाद्धारणप्रैषयोराध्वर्यवत्वेऽप्युपपन्नम्। स्फ्यधार-

यमपि कल्पसूत्रेषु आध्वर्यवमेव प्रसिद्धमिति । अथ वार्त्तिकं प्रौढिवादः ॥२॥१२९॥

ऋत्विक्फलम् ॥ ये इतिकरणेन तृतीयया वा विनियुक्ताः करणमन्त्रास्तेषां मान्त्रवर्णिकक्रियाजन्यफलकल्पकत्वं, न तु आयुर्दा अग्न इत्यादिवत् प्रधानफलानुवादकत्वमित्युक्तं कौस्तुभे । तद्यथ-ममाग्ने वर्च्चो विहवेष्वस्त्विति पूर्वमग्निं परिगृह्णातीत्यादावन्यप्रधानक्रिया तावदाध्वर्यवी । मन्त्रलिङ्गवशेन प्रधानभूतक्रियायां समाख्याप्राप्तकर्त्तृबाधानुपपत्तेः ।

न च याजमानेन मन्त्रेणाध्वर्युगतक्रियाप्रकाशनम् । वयन्त्वेन्धाना इति मन्त्रलिङ्गवशेन क्रियासमानकर्त्तृकत्वस्य मन्त्रे प्रतीतेः । अतश्च मन्त्रक्रिययोरुभयोरप्याध्वर्यवत्वात् फलमपि वर्चःप्रभृति तद्गतमेव । अन्यथा ममाग्ने इति मह्यं न मन्त्रामित्यादिमन्त्रलिङ्गविरोधापत्तेः ।

न च साङ्गप्रधानविधायिफलवाक्यावगतात्मनेपदानुरोधेनाङ्ग-फलानामपि स्वर्गकामकर्त्तृकत्वावगतेर्यजमानगामित्वमिति वाच्यम् । श्रुतस्यात्मनेपदस्य वाचकाशतया तेन कल्पितस्यापि लैङ्गिकस्याध्वर्यु-वृत्तित्वस्य बाधानुपपत्तेः । न चात्मनेपदार्थस्यैव तद्विषये बाधे विधेरन्यप्राधानविषयेऽनुष्ठापकत्वस्यापि बाधापत्तिः । प्रमाणा-भावात् । अतोऽग्निसंस्कारार्थानुष्ठापितक्रियाजन्यानुषङ्गिकफलस्य क्रत्वनुपयोगिनोऽप्याध्वर्यवत्वेऽपि न काचित् क्षतिरिति प्राप्ते ।

यां काञ्चन यज्ञे ऋत्विज आशिष आशासते यजमानस्यैव सेत्य-न्यथासिद्धलिङ्गानुगृहीतात्मनेपदश्रुत्या यजमानगामित्वावगतिः । एतल्लिङ्गबलादेव च यत्र नात्मनेपदश्रवणं यथा जुहुयादित्यादौ,

तत्रापि यजमानगामित्वम्। अतश्च तदनुरोधेन ममेति मम यजमानस्येत्येवं व्याख्येयम्। मह्यमित्यादौ त्वस्मच्छब्देन यजमान एवोपचारादभिधीयत इति न दोषः। प्रयोजनं, यद्येऽग्न्याधानाभावादृष्टानूहप्रयोजनासम्भवेऽप्यर्थानुसन्धानविशेषरूपं द्रष्टव्यम् ॥ ३॥ १४०॥

कर्मार्थम् ॥ यत्र तु मां मा सन्ताप्तमित्यादाविति करणविनियुक्त एवासन्तापनादिरूपं फलं ऋत्विग्गामित्वेऽपि क्रतुविरोधिसन्तापनिवर्त्तकतया तदुपयोगि, तत्र यजमानस्य चेति षष्ठ्याः परम्परयाऽप्युपपत्तेर्लिङ्गानुरोधादृत्विग्गाम्येव ॥ ३॥ १ ४ १॥

व्यपदेशाच्च ॥ एवं यत्रापि तन्नौ सहेत्यादौ द्विवचनानुपपत्तिस्तत्रापि ऋत्विग्गामित्वम् ॥ ३॥ १ ४ २॥

द्रव्यसंस्काराः ॥ बर्हिर्धर्माणां प्रकृतावङ्गप्रधानसाधारणत्वमुक्तम्। अतश्च दैचपशावपि बर्हिषा यूपावटमवस्तृणातीति विहिते यूपावटस्तरणबर्हिष्यपि दार्शिकबर्हिर्धर्मा भवेयुरिति प्राप्ते ।

प्रकृतौ बर्हिषि हवींष्यासादयतीति वचनादङ्गप्रधानसाधारणहविरासादनार्थएव बर्हिषि धर्मा न कार्यमात्रार्थे इत्युत्तराधिकरणे वक्ष्यते। यद्यपि वा परिभोजनीयादिवत् प्राकृतकार्यमात्रार्थत्वं स्यात्, तथापि नाप्राकृतकार्ये यूपावटस्तरणबर्हिषि भवेयुः। उपकारपृष्ठभावेनैव पदार्थानामतिदेशेन विकृतावप्राकृतकार्यकारित्वकल्पनाऽनुपपत्तेः। न हि प्रकृतौ येन केनचित्सम्बन्धेन अपूर्वसम्बन्धि बर्हिरुद्देश्यतावच्छेदकम्। येनाप्राकृतस्यापि तत्सम्बन्धाद्धर्मग्राहकत्वं गृह्येत। सम्बन्धविशेषग्राहकप्रमाणबलेन तावद्विशेषाणामेव प्रवेशेनानुपस्थितसामान्यस्योद्देश्यतावच्छेदककोटावप्रवेशात्। न च तथापि

यूपावटस्तरणभावनायाधर्माकाङ्क्षायामेव फलचमसन्यायेन धर्मग्राह-कत्वम् । लौकिकधर्मग्रहणेनाप्याकाङ्क्षानिवृत्तौ उपदेशातिदेशयोर-भावात् । फलचमसे तु स्थानापत्त्या भक्षानुवादबलाच्चातिदेश-कल्पनमिति विशेषः ॥२॥१४३॥

विरोधे ॥ प्रकृतावपि च न समन्त्रकबर्हिर्लवनादिधर्माणां प्रकृत्यपूर्वसम्बन्धिबर्हिर्मात्रार्थत्वम् । अपि तु हविरासादनार्थबर्हि-रर्थत्वमेव । अत एव पवित्रविधृत्यादिबर्हिषि नैते संस्काराः । त्रिधातु पञ्चधातु वा बर्हिर्लुनातीति विहितलवनं संस्कृतस्य बर्हिष-स्तथैव सम्बद्धस्यासादितस्य । त्रिधातु पञ्चधातु वा बर्हिस्तृणातीती वचनेन सर्वस्यैव स्तरणे विनियोगात्, अमन्त्रलवनमात्रसंस्कृतस्य परिभोजनीयबर्हिषः प्राकृततदितरसर्वकार्यार्थत्वेन तत एव पवि-त्रादिकरणोपपत्तेः ॥२॥१४४॥

अपनयः ॥ सोमे पुरोडाशशकलमैन्द्रवायवपात्रे प्रास्यति आ-मिक्षां मैत्रावरुणपात्रे धाना आश्विनपात्र इति श्रुतम् । तत्र शकल-पदस्य उत्तरार्धादिपदवदेकदेशवाचित्वेन स्वतन्त्रपुरोडाशाक्षेपकत्वा-प्रसक्तेः प्रातःसवनिकसवनीयपुरोडाशावयवपरत्वं तावन्निर्विवादम् । आमिक्षादौ तु तदभावात्पयस्यां मैत्रावरुणं श्रीणातीतिवल्लौकिका-मिक्षादिग्राहकत्वेनोपपत्तौ क्लृप्तप्रतिपत्तिबाधेन सवनीयगततद्ग्रा-हित्वे प्रमाणाभाव इति प्राप्ते ।

द्वितीयया प्रासनस्यामिक्षादिप्रतिपत्तित्वावगमात्तदंशे औपदे-शिक्या तया आतिदेशिकप्रतिपत्तिबाधोपपत्तेः प्रातःसवनिकसव-नीयसम्बन्धिनामेव पुरोडाशादीनां ग्रहणम् ॥२॥१४५॥

विकृतौ ॥ अनारम्भ, यच्चाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्त्तव्या इति श्रुतमुपांशुत्वं प्रधानवदङ्गेष्वपि मन्त्रोच्चारणसत्त्वात्काम्य-शब्दस्य च कामप्रयोजकत्वेनाङ्गेष्वपि प्रयोगोपपत्तेर्जनकमात्रपरत्वे-ऽपि चोद्देश्येष्टिविशेषणत्वेनाविवक्षितत्वादिष्टीनामेवाविवक्षितत्वे चो-देऽपि तद्वापत्तेः साङ्गेष्वङ्गमिति प्राप्ते।

अङ्गेषु क्वचिदपि काम्यशब्दप्रयोगाभावाज्जनकत्वसम्बन्धेन प्रधान-मात्रपरत्वावगतेः काम्यत्वेष्टित्वोभयपरामर्शकतच्छब्दस्य चोद्देश्यपर-त्वेनोभयविवक्षोपपत्तेः प्रकृतौ प्राकरणिकवैस्वर्याविरोधे निवेशासम्भ-वेऽपि काम्यविकृतीष्टिप्रधानमात्रे निवेशः। न ह्युच्चैः प्रवर्ग्येणाव-भृथेनेत्यादिवत्करणविभक्तिनिर्देशो येन साङ्गस्य भवेत्। तव्यप्रत्य-येन कर्मत्वाभिधानात्तु प्रधानमात्रे एव निवेशः ॥२॥१४६॥

सन्निधान ॥ श्येने, दृतिनवनीतमाज्यं भवतीति श्रुतम्। दृति-नवनीतं प्रकरणात् श्येनप्रकरणाङ्गम्। न ह्याज्यानुवादेन दृत्य-धिकरणकनवनीतप्रकृतिविधिः। आज्यस्य नवनीतप्रकृतिकत्वस्य प्रा-प्तत्वात्। तदनुवादेन दृत्यधिकरणकत्वविधाने एकप्रसरताभङ्गा-पत्तेश्च। अतो बहुव्रीहिसमासार्थ एवैको दृत्यधिकरणकनवनीतप्रकृ-तिकः सन्निधानात् श्येने विधीयते। आज्यपदन्तु तस्यैव नवनीत-प्रकृतिकत्वानुवादः अन्यपदार्थतात्पर्यग्राहकश्चेति नानेकविधानता। अत एव श्येनोऽप्याज्यद्रव्यकत्वादुपांशुयाजविकार एव। गमकान्तर-सत्त्वे तु सोमप्रत्याम्नायमात्रमिति प्राप्ते।

विशिष्टविधौ गौरवाद्यापत्तेः अतिदेशप्राप्ताज्यपरत्वमेवाज्यशब्द-स्याङ्गीकृत्य तदुद्देशेन दृत्यधिकरणकनवनीतप्रकृतिकत्वमेव प्रयो-

गानःपातितया विधीयते । आज्यस्याङ्गत्वेनैव प्राप्तमिति तन्मात्र-विषयता । यत्तु दृतिनवनीतपदस्य तत्पुरुषत्वमङ्गीकृत्य दृत्यधिकर-णकनवनीतमेव आज्यपदलक्षितसत्कार्योद्देशेन द्रव्यतया प्रकृत-रूपाज्यप्रत्याम्नायेन विधीयत इति न्यायसुधाकृतोक्तम् । तदाज्यपदे सांप्रतिकलक्षणापत्तेस्तदपेक्षया आनुशासनिकनिरूढलक्षणापादक-बहुव्रीह्यङ्गीकारस्यैव न्याय्यत्वादुपेक्षितम् । यदि तु किञ्चिदुक्त-कारणान्तरं भवेत्तदा तदेवास्तु ॥२॥१४७॥

आधाने ॥ सर्वत्र धर्माणामनारभ्याधीतप्राकरणिकसाधारण्येना-पूर्वोपकारे एवान्वयात्पवमानेष्ट्यादीनामपि च श्येनापूर्वोपकारकत्वा-त्तत्रापि दृतिनवनीतमिति प्राप्ते ।

यदुपकारकता वैधप्रमाणप्रमिता तदुपकारके एव धर्माणां निवेशः । न त्वर्थसमाजग्रस्तोपकारकत्वेऽपि । श्येनोपकारकयजमा-नाज्यभोजनादावपि दृतिनवनीतत्वापत्तेः । न चाधानादेः श्येनोप-कारकत्वं शास्त्रप्रमितम् । अग्निमात्रार्थत्वस्यैव तत्प्रमितत्वात् । अतः श्येनप्रयोगवर्त्तितदुपकारकाज्ये एव तन्निवेशः ॥२॥१४८॥

तत्काले वा ॥ एवं चेत्सुत्याकाले एव श्येनवैशेषिकाणां सह पशुनालभत इत्यादीनां दर्शनाद् दृतिनवनीतत्वस्यापि सुत्याकाला-व्याप्त एव निवेश इति प्राप्ते ।

सामान्यतोदृष्टेन वाक्यसङ्कोचायोगात्सर्वार्थत्वम् । न हि पशु-साहित्यस्यापि सुत्याकालत्वे श्येनाङ्गत्वं प्रयोजकं, अपि तु प्रधान-प्रत्यासत्ति-तुल्यकालोत्कर्ष-वाक्यावाधरूपहेतुत्रयम् । न चात्र तदस्ति । अतः सर्वार्थतैव ॥२॥१४९॥

मांसन्तु ॥ षट्त्रिंशद्वात्रिके शाक्यानामयनाख्ये सत्रे, संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति तत्र यान् मृगान् हन्ति तेषान्तरसाः सवनीयाः पुरोडाशाभवन्तीति श्रुतम्। मांसं भवतीति विधिना प्रत्यासन्नत्वात् पुरोडाशस्य तदुद्देशेनैव विधीयते। विधेरेव हि प्रवर्त्तनार्थं भावनाभाव्यसाकाङ्क्षत्वम्। अतस्तत्प्रत्यासन्नस्यैव तदुचितं, न सवनीयानाम्। यदा तु पुरोडाशाः सवनीया इति भवदेवादिभृतः पाठस्तदा प्राथमिकत्वाद्विधेयतरसप्रत्यासन्नत्वाच्च पुरोडाशकार्यस्यैवोद्देश्यत्वं स्पष्टमेव।

न च पुरोडाशस्य सवनीयपदेन विशेषणम्। विशिष्टोद्देशापत्तेः। अतः सर्वपुरोडाशकार्ये तरसं विधीयते। सवनीयपदन्तु सवनीयासवनीयपुरोडाशमात्रे गौणं लाक्षणिकं वा। अतः पुरोडाशमात्रे तरसस्य धानाद्यादिस्थाने इति प्राप्ते।

सवनीयपदवत् पुरोडाशपदेऽपि कार्यलक्षणापत्तेः प्राथमिकसवनीयपदमेव सवनीययागोद्देश्यतापरम्। प्रथमायास्तु द्वितीयार्थे लक्षणा उभयवादिसिद्धैव। अतः सवनीययागोद्देशेनैव धानादिपञ्चकबाधेन तरसं विधीयते। पुरोडाशपदं त्वेकं जघन्यस्य पुरोडाशवत्त्वसम्बन्धेन सवनीययागेषु लाक्षणिकमनुवादः। दृष्टश्च पुरोडाशानलङ्कुर्वित्यादौ पुरोडाशशब्दः सवनीयहविःपर इति तस्य सवनीययागलक्षकत्वं सुकरमेव। तदेवं श्रुत्यादिषट्प्रमाणकमङ्गत्वं निरूपितम्। अतः परं प्रयोज्यत्वं निरूपयिष्यते ॥३॥१५०॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां

तृतीयस्याष्टमः पादोऽध्यायश्च ॥

श्रीगणेशाय नमः ।

अथ चतुर्थोऽध्यायः ।

प्रथमः पादः ।

अथातः क्रत्वर्थ ॥ एवं सिद्धे शेषिनिरूपिते शेषत्वे प्रयोजक-निरूपितं प्रयोज्यत्वमिह निरूप्यते । तच्च परोद्देशप्रवृत्तकृतिव्याप्य-त्वम् । कृतिव्याप्यत्वञ्चानुष्ठाप्यत्वरूपं कालादिव्यावृत्तं वाजपेयाधि-करणे कौस्तुभ एव निरूपितम् । अतश्च कालादेः कृतिकारकत्व-घटिताङ्गत्वसत्त्वेऽपि प्रयोज्यत्वाभावः । अङ्गत्वाच्च प्रयोज्यत्वस्य भेदः ।

तेन यदुद्देशप्रवृत्तकृतिव्याप्यत्वं यस्य, तत्तत्प्रयोज्यम् । यथा दध्यानयनप्रयाजा आमिक्षादर्शपूर्णमासादेः । यन्निष्ठकृतिव्याप्यता-निरूपितोद्देश्यताश्रयश्च यत्तत्तस्य प्रयोजकम् । यथाऽऽमिक्षादर्शादि दध्यानयनादेः । उद्देश्यता चाचानुपादेयपञ्चकसाधारणी ग्राह्या । तेन कालनिमित्तादेः प्रयोजकत्वाविघातः ।

यद्यपि विधिरेव सर्वत्रानुष्ठापकः । प्रवर्त्तनारूपत्वात् । प्रवर्त्त-नारूपो हि विधिरिष्टसाधनत्वमिव कृतिसाध्यत्वापरपर्यायप्रयोज्य-त्वमपि विषयस्याक्षिपतीति भवति प्रयोजकः । तथापि स यदुद्देशेन प्रयोजयति तस्यापि प्रयोजकत्वव्यवहारः शास्त्रे ।

अत्र च यद्यपि न प्रयोज्यत्वावच्छेदेन तन्निरूपणं प्रति शेषत्व-निरूपणस्य हेतुत्वम् । निमित्ताद्यङ्गत्वाभावेऽपि नैमित्तिकस्य तत्प्रयोज्यत्वेनाङ्गत्वे व्यापकत्वस्यैव पुरोडाशकपालादेस्तुषोपवापं प्रति

कारकत्वेनाङ्गत्वसत्त्वेऽपि तत्प्रयोज्यभावेन व्याप्यत्वस्याप्यभावात् । अतो-नावच्छेदकावच्छेदेन हेतुहेतुमद्भावः । तथापि क्वचिद्‌दध्यानयनादि-निष्ठप्रयोज्यत्वनिरूपणे तन्निष्ठशेषत्वनिरूपणस्योपयोगात् सामानाधि-करण्येन तन्निरूपणं प्रति अङ्गत्वनिरूपणस्य हेतुत्वात् सङ्गत्युपपत्तिः ।

अत्र प्रयोज्यत्वं, क्वचित्क्रत्वर्थपुरुषार्थविचारद्वारेण निरूप्यते, क्वचि-दन्यद्वारेण, क्वचित्साक्षादेवेति प्रयोज्यत्वमेवाध्यायार्थः । क्रत्वर्थपुरुषार्थ-त्वन्तु तृतीयसिद्धमपि उदाहरणविशेषनिष्ठतया प्रयोज्यत्वसिद्ध्यर्थं विचार्यत इति विवेकः ॥४॥१॥१॥

यस्मिन् ॥ वक्ष्यमाणयोः क्रत्वर्थपुरुषार्थयोर्लक्षणमुच्यते । तत्र तन्त्ररत्ने तावत्स्वयं प्रार्थितसाध्याधीनानुष्ठानः पुरुषार्थस्तदुपकारार्थः क्रत्वर्थ इत्युक्तम् ।

तन्न, फले काम्यकामादौ न कलञ्जं भक्षयेदित्यादिनिषेधेषु चाव्याप्तेः । अनुष्ठेयत्वाभावात् । निषेधेषु स्वयं प्रार्थितसाध्याप्रसिद्धेश्च । क्रत्वर्थलक्षणे आधानादावतिव्याप्तेश्च ।

यदपि शास्त्रदीपिकायामितिकर्त्तव्यतात्वेनान्वितत्वं क्रत्वर्थत्वं तद्भिन्नत्वं करणफलवृत्ति पुरुषार्थत्वमित्युक्तम् । तदपि न, क्रत्वर्थ-निषेधानामक्रियात्वेनानितिकर्त्तव्यतात्वेन तेष्वव्याप्तेः । आधानाध्य-यनयोरुभयभिन्नतया तन्त्ररत्ने त्वदुक्तत्वेन* तत्र पुरुषार्थलक्षण-स्यातिव्याप्तेश्च ।

तस्मात् स्वयं प्रार्थितवृत्त्युद्देश्यतानिरूपितविधिविषयताकत्वं पुरुषार्थत्वम् । स्वयं प्रार्थितत्वञ्च शास्त्रानधीनेष्टसाधनताज्ञानजन्ये-

* इत्यमेव पाठः सर्व्वत्र । तदुक्तत्वेन, इति तु प्रतिभाति ।

च्छाविषयत्वम्। स्वर्गे काम्यादौ हि इष्टसाधनता न शास्त्रगम्या। इदञ्च स्वर्गस्य देशविशेषरूपत्वे। सुखविशेषरूपत्वे तु शास्त्राधीनेष्टसाधनताज्ञानाजन्येच्छाविषयत्वं बोध्यम्। यागक्रतूपकारादौ तु शास्त्रगम्येति। तेन स्वयं प्रार्थिताः स्वर्गादयस्त्र तथा। अतस्तदुद्देशेन विधीयमानं यागादि भवति पुरुषार्थम्। फलस्य च पुरुषार्थत्वव्यवहारो भाक्त इत्युक्तमेव फलं पुरुषार्थत्वादित्यत्र।

उद्देश्यताविधेयते च स्वरूपसम्बन्धविशेषात्मिके लक्षणघटके न तु साध्यत्वानुष्ठेयत्वात्मिके। तेन निषेधस्थले नरकाभावोद्देशेन निवृत्तिविधानात्फलोद्देशेन च काम्यविधानान्नाव्याप्तिः। पुरुषार्थेष्वभ्यनुज्ञाविधिषु च दोषाभावोद्देशेन तत्तत्क्रियाविधानान्नाव्याप्तिः। एवञ्च स्वयं प्रार्थितभिन्नवृत्त्युद्देश्यतानिरूपितविधेयताकत्वमेवेह क्रत्वर्थत्वम्। क्रतुशब्दो ह्यस्मिन् प्रकरणे स्वयमप्रार्थितपरः। तेनाधानाध्ययनयोर्ज्योतिष्टोमाद्यर्थत्वाभावेऽपि तादृशाग्न्यर्थज्ञानार्थत्वात्क्रत्वर्थत्वोपपत्तिः।

क्रत्वर्थनिषेधेषु चोक्तविधया क्रतुवैगुण्यपरिहारोद्देशेन निवृत्तेर्विधेयत्वान्नाव्याप्तिः। नातिरात्र इत्यादौ तु क्रतुसाद्गुण्यस्याक्रान्तरजन्यत्वेऽपि षोडशिग्रहणाभावं प्रत्युद्देश्यत्वाविघातान्न सा। एवं क्रत्वर्थाभ्यनुज्ञाविधिष्वपीति सर्वं समञ्जसम्।

यद्वा, नानेन लक्षणकरणम्। अपि तु फलस्यापीतरांशवद्भावनाविशेषणत्वाद्विधेयत्वम्। न ह्यन्यांशयोरपि विशेषणत्वातिरिक्तं विधेयत्वम्। यदि तु विशिष्टभावनाविधावर्थादितरांशयोर्विधिरित्युच्येत, तत्फलस्याप्यविशिष्टमिति प्राप्ते।

विशिष्टभावनाविधाने आर्थिकविशेषणविधेरावश्यकत्वात्तस्य च

यद्दंशे अप्राप्तिस्तदंश एव कल्पनात् फलस्य च रागप्राप्तत्वेन तत्कल्पने प्रमाणाभावादविधेयत्वम् । प्रयोजनं, पूर्वपक्षे श्येनफलस्याभिचारस्य विधेयत्वान्निषेधाविषयत्वम् । सिद्धान्ते तु रागप्राप्तत्वाच्च हिंस्यादिति निषेधविषयत्वम् ।

न च हिंसाशब्दस्य मरणानुकूलव्यापारवाचित्वात्तस्य च वैरिमरणाख्याभिचारफलकश्येनरूपस्य विहितत्वात्कथं निषेधविषयत्वमिति वाच्यम् । अभिचरन् यजेतेति सामानाधिकरण्यात्कर्तृत्वेन-यजमानकर्तृत्वावगतेरभिचारपदस्य मरणानुकूलश्येनकर्तृनिष्ठविषदानादिव्यापारवाचित्वावगतेस्तस्यैव श्येनफलत्वावसायाद्रागप्राप्तस्य तस्य निषेधविषयत्वोपपत्तेः । एवञ्चावश्यं श्येनेन विषदानाद्युत्पत्तिस्तेन वैरिमरणम् । न तु श्येनेनैव साक्षादिति ध्येयम् ।

यत्तु वैरिनिष्ठो मरणानुकूलव्यापार एवाभिचारपदार्थः । तत्र च यजमानस्य श्येनद्वारा प्रयोजककर्तृत्वमिति तस्य निषेधाविषयत्वेऽपि यजमानस्य पापोपपत्तिरिति केनचिदुक्तम् । तत् श्येनस्यैव तथा सति प्रयोजकव्यापारत्वात्तस्य च विहितत्वात्तत्कर्तृत्वेन यजमाने पापोत्पत्त्यनुपपत्तेरुपेक्षितम् । यत्र तु वैरिमरणकामो यजेतेति श्रुतं, तत्र वैरिमरणानुकूलकर्तृनिष्ठलौकिकव्यापाराभावेऽपि वैरिमरणरूपपरानिष्टचिन्तनादेव पापमिति ध्येयम् । अभिचारार्थकर्मण्यसामवधर्मत्वस्मरणाद्वा तथा । प्रकृतेऽपि तथैव वाऽस्तु ।

यद्वा गोदोहनादीनां षष्ठीश्रुत्या पुरुषार्थत्वावगमेऽपि प्रकरणात् क्रत्वङ्गत्वम् । इतरथा, प्रणयनस्य चमसलोपेनाङ्गाभावादेगुण्यापत्त्या विगुणप्रणयनाश्रिताद्गुणादपि फलानापत्तेः । अत उपजीव्यत्वाद्दुर्बलमपि प्रकरणं विनियोजकम् ।

अथ वा षष्ठीसम्बन्धमात्रवाचिनी ह्रीयादिन्यायेन सार्वकाम्य-वाक्यप्राप्तपशुप्रयोजकप्रणयनजनकत्वसम्बन्धेनैव प्रकरणानुरोधेन पशू-द्देशेन गोदोहनं विधत्ते। न तु साक्षादिति प्राप्ते।

दुर्बलप्रकरणानुरोधेन परम्परासम्बन्धाङ्गीकारे प्रमाणाभावा-द्व्रीयादिवन्नियमविधिबाधकाभावाच्च साक्षादेवोद्देश्यत्वं पशूनाम्। प्रणयनवैगुण्यस्य च परप्रयुक्तगोदोहनजन्योपकारमात्रोपजीवनेन प्रणयनस्य तत्प्रयोगे अनङ्गत्वमसान्निहितया अनारभ्याधीतत्वात् पुरुषार्थत्व-मेव तस्येति पशुप्रयुक्तमेव गोदोहनमिति स्वतन्त्रपशुकामनायामेव कर्त्तव्यम्।

यत्तु भाष्यकारादिभिर्ब्राह्मणः प्रतिग्रहादिना द्रव्यमर्जयेत्क्षत्रिया-दिना राजन्य इत्यादिविधिमुदाहृत्यानारभ्याधीतस्यापि प्रतिग्रहा-दिनियमस्य फलकल्पनाभिया क्रत्वर्थत्वावसायात् तादृशविशिष्टोपा-यार्जितद्रव्यमपि सर्वं क्रत्वर्थमेव। अत एवाव्यभिचरितहिरण्यादि-सम्बन्धात् तत्साध्यानामपि क्रत्वर्थत्वसिद्धिरिति पूर्वपक्षयित्वा। श्रुत्याद्यभावाददृष्टकल्पनस्य च क्रत्वर्थत्वपक्षेऽपि तुल्यत्वान्नियमस्य क्रत्वर्थत्वानुपपत्तेरर्जनस्य च रागप्राप्तत्वेनाविधेयत्वात् तदर्जितद्रव्यस्य दृष्टार्थत्वादिहिताविहितसाधारणपुरुषकृत्यमात्रोपयोगित्वमेव। इतरथा जीवनपरिलोपात् सर्वतन्त्रपरिलोपापत्तेः। किञ्च द्रव्यार्जनरूपा-ङ्गोपक्रमेण सर्वाङ्गानामुपक्रमाद्यो दर्शपूर्णमासयाजी अमावास्यां वा पौर्णमासीं वाऽतिपातयेदित्यनारभ्यपातिपातनदर्शनानुपपत्तिः। अतो द्रव्यार्जनं तावत्पुरुषार्थम्। नियमोऽप्यदृष्टार्थत्वेऽपि पुरुषार्थ एव। एवञ्च कामवत्यादयोऽपि पुरुषार्था एव। क्रत्वर्थत्वे प्रमाणा-

भावादिति सिद्धान्तितम्। तत्प्रतिग्रहस्य फलकल्पनाभिया क्रत्वर्थत्वे हिरण्यधारणादेरपि तदर्थत्वापत्तेस्तेन गतार्थत्वाच्चोपेक्षितम्।

किञ्च नियमस्य क्रत्वर्थत्वेन श्रुतिवचनादिवत्तदर्जितद्रव्यस्य क्रत्वर्थत्वेऽपि भोजनाद्यर्थमनियतद्रव्योपायाक्षेपप्रतिबन्धे प्रमाणाभावाच्च सर्वस्य द्रव्यस्य चामवत्यादीनां वा क्रत्वङ्गता। अत एव सिद्धान्ते जीवनस्योपाद्यापादनमसंकृतम्।

किञ्चास्तु वा तत्। तथाप्यतिपातनस्यानारम्भरूपत्वे प्रमाणाभावाद्यागाकरणस्यासमापनस्यैव वाऽतिपातनत्वाङ्गीकारेण तद्दर्शनोपपत्तिः। अनारम्भरूपत्वेऽपि वा द्रव्यार्जनस्य प्रयोगबहिर्भूताङ्गत्वाङ्गीकारेण प्रयोगान्तःपातेऽपि वा श्रुतिवननप्रयाजादिवदेव प्रतिप्रयोगावृत्त्यङ्गीकारेणातिपातनदर्शने न काचिदनुपपत्तिः।

वस्तुतस्तु नायं प्रतिग्रहादिनियमविधिः। फलकल्पनापत्तेः।

प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत्।

इति तस्य पापजनकत्वश्रुतेश्च। नापि प्रतिग्रहाद्यतिरिक्तोपायान्तरपरिसंख्या। चौर्यादीनां सर्वसाधारणप्रतिषेधेनैव परिसंख्यातत्वात्। शिलोञ्छदायादीनां[१] सुख्यवृत्तित्वेन परिसंख्यानुपपत्तेश्च। अथवाणिज्यादीनां ब्राह्मणपुरस्कारेणापद्वृत्तित्वविधानादेवानापदि प्रतिषेधाच्च। अतो ब्राह्मणस्य प्रतिग्रहविधिर्दायशिलोञ्छाद्यसम्भवे दोषाभावमात्रबोधकतयाऽभ्यनुज्ञाविधिरेव। दायशिलोञ्छादीनां

(१) क्षेत्रे निपतितानां धान्यानामनेकैकशुक्तिकोच्चयनं शिलम्। तेषामेव मञ्जर्युच्चयनमुञ्छः। पित्रादिसकाशादागतं धनं दायः।

प्रतिषिद्धत्वाभावान्मुख्यवृत्तित्वमेव । सोऽपि च गौणि कर्माणि जीवि-केत्यादिवचनात्प्रकरणाद्यभावाच्च पुरुषार्थः ।

न्यायागतेन द्रव्येण कुर्यात् कर्माणि वै द्विजः ।
अन्यायोपगतं द्रव्यं गृहीत्वा यो ह्यपण्डितः ॥
धर्माकाङ्क्षी तु यजते न धर्मफलमश्नुते ।

इत्यादिवचनैस्तु मुख्यगौणसाधारणवृत्त्युपायानामधिकारितार-तम्येन क्रत्वर्थस्यापि बोधनात् संयोगपृथक्त्वन्यायेनोभयार्थत्वेऽपि न दोषः। यदि तु शिलोञ्छादेः क्वचित्फलश्रवणं भवेत्, तदा जीव-नाश्रितयावज्जीवशिलोञ्छनियमस्यैव फलजनकत्वं बोध्यं, न तु प्रति-ग्रहस्येति यथाऽयं विचारः । कृत्वाचिन्तात्वेन वा बोध्यः ॥ ४ ॥ १ ॥ २ ॥

तदुत्सर्गे ॥ तस्य व्रतमित्युपक्रम्य,

नेक्षेतोद्यन्तमादित्यमस्तं यन्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥

इत्यादि प्रजापतिव्रतं श्रुतम् । तत्रापि भाष्यकारादिभिः प्रति-षेधत्वे पर्युदासत्वे वोभयथापि फलकल्पनादिभिया क्रत्वर्थत्वमा-शङ्क्य, अनारभ्याधीतत्वात्क्रत्वाद्यभावेन च क्रत्वर्थत्वानुपपत्तेः पर्यु-दासत्वमङ्गीकृत्य पुरुषार्थत्वं सिद्धान्तितम् । तदपि कलञ्जभक्षण-प्रतिषेधहिरण्यधारणन्यायेन क्रत्वर्थत्वशङ्कानुपपत्तेरुपेक्षितम् ।

विचारस्त्वयमेवात्र कर्त्तव्यः । किमयं प्रतिषेधः पर्युदासो-वेति । सिद्धान्ते त्वर्थवादिकफलप्रयुक्तत्वात् प्रतिषेधपक्षे च तद-भावात् सङ्कृत्युपपत्तिः । तत्र नञः प्रधानान्वयव्युत्पत्तेर्धात्वर्थाद्य-न्वयस्य लक्षणाभियाऽनुपपत्तेः पर्युदासत्वायोगाद्रागप्राप्तेश्चेदादित्ये-

षभावनायाः प्रतिषेध एवायं पुरुषार्थः कलञ्जभक्षणादिप्रतिषेधवत्।

अतश्च निषेधेनेक्षणस्यानिष्टसाधनत्वाक्षेपेऽपि फलान्तराकाङ्क्षाभावान्नैतावता स्नातकः युक्तो भवतीत्याद्यर्थवादिकाश्रयफलकल्पनानुपपत्तेर्नार्थवादिकफलप्रयुक्तत्वम्। अर्थवादस्तु नीक्षणजन्यप्रत्यवायाभावबोधनद्वारा ईक्षणनिन्देति प्राप्ते।

तस्य व्रतमिति व्रतशब्देनोपक्रमस्थेनानुष्ठेयक्रियाप्रतिपादनात् तदनुरोधेनोपसंहारस्थो निषेधोऽप्यनुष्ठेयामेव क्रियां विधत्ते। अत एव नञ्-ईक्षतिभ्यामीक्षणाभावसंकल्परूपा क्रियैव लक्षणया विधीयते। मानससंकल्पस्य प्रवृत्त्यविनाभूतत्वात्। ईक्षतिरेव वा लाक्षणिको नञ्पदं तात्पर्यग्राहकम्। न चैवमुद्यदादित्यस्य पदार्थैकदेशे ईक्षणे अन्वयानापत्तिः। कारकाणां प्रथमतो भावनान्वयस्यैव स्वीकारेणैकदेशेऽन्वयाप्रसक्तेः। यक्ष्यते हि सोमादीनां प्रथमत एव धात्वर्थेऽन्वयस्तस्मात् एवेदं दूषणं न लप्स्यते। अतोऽनीप्सितकर्मत्वेन वस्तुवल्लक्षितकरणत्वेनैव वा भावनान्वयः। पार्ष्ठिकान्वये तु समस्तपदघटितवाक्यस्यैव कल्पनान्न कोऽपि दोषः।

अतश्चादित्येक्षणाभावसंकल्पभावनैवोदये निमित्ते विधीयते। यस्मादित्यादिवच्छतृप्रत्ययेन निमित्तत्वाभिधानात्। तत्फलञ्चार्थवादिकाश्रयः। अतः सिद्धं भावनाभिन्ने नञः सम्बन्धात्पर्युदासः, स च फलप्रयुक्त इति।

नन्वेवमपि नञोभेदवाचित्वस्य तदन्य-तद्विरुद्ध-तदभावेषु नञ इति प्रसिद्धेस्तत्पदेनैव सम्बन्धाङ्गीकारादुद्यन्तमादित्येक्षण-

शैवाद्यन्वयफलकत्वेन विधानोपपत्तेर्न संकल्पलक्षणा । न च सुबन्त-समन्वयेन नञः समासापत्तिः । नानुयाजेष्वितिवदुपपत्तेः । न च नञ-आदित्यपदेन वा सम्बन्धः उद्यत्पदेन वेत्यत्र विनिगमकाभावः । विशेष्यसाकाङ्क्षत्वस्यैव विनिगमकस्य सत्त्वादिति चेत् ।

तथात्वेऽपि नोद्यन्तमिति सुबन्तपदस्य निपातान्वयव्युत्पत्त्यभावेन उद्यन्निषेधेऽपि पदद्वयलक्षणाया आवश्यकत्वात् । तथात्वे स्वभावेनैव तादृशादित्येक्षणस्य सर्वदा जायमानत्वेनाप्रसक्तयोपपत्तेर्विधिवैफल्यात् । स्वरसतः प्रतीयमाननिषेधस्य संकल्पलक्षणयाऽप्यपरित्यागेन भवदुक्त-पर्युदासानुपपत्तेश्च । अस्मिन्नुदाहरणे तथाङ्गीकारेऽपि न वारिष्य-मित्यत्रैकादश्यान्न भुञ्जीतेत्यादौ च संकल्पलक्षणाया आवश्यकत्वाच्च । प्रयोजनं स्पष्टम् । सूत्राण्यप्यस्मिन्नेव विचारे सुधीभिर्योज्यानि ॥ ४॥१॥२॥

द्रव्याणि ॥ स्फ्यश्चेत्याद्युपक्रम्य श्रुतस्य यज्ञायुधवाक्यस्य तृतीये उदाहृतस्यैव साक्षात्प्रधानभूताग्नेयाद्युद्देशेनोत्पत्तिवाक्याविहितद्रव्य-कोपांशुयाजोद्देशेनैव वा स्फ्यादिद्रव्यविधायकत्वम् । इतरथा समस्त-वाक्यवैयर्थ्यापत्तेः । यज्ञशब्दस्य तत्साधनोद्धननादिलक्षकत्वापत्तेश्च । तस्मादुद्धननादिवाक्यैः स्फ्यादीनामुद्धननाद्यर्थत्वेऽप्यानेन सह वि-कल्पेनोपांशुयाजार्थत्वमपीति प्राप्ते ।

सम्भरणविध्येकवाक्यत्वादस्य तदर्थवादत्वेनाप्युपपत्तेः अनन्यशेष-भूतेन सर्वशो वेति वाक्येन विहितस्याप्यस्य पाक्षिकत्वापादकत्वा-नुपपत्तेरुद्धननादिक्रियाभेदेऽपि च दशत्वस्य सम्भरणरूपैकक्रिया-सम्बन्धादेवोपपत्तेरायुधशब्दस्य प्रयोजकत्वलक्षणयाऽप्युपपत्तौ साधन-

त्वसाधकत्वाभावाद्यज्ञशब्देऽपि तद्नापत्तेर्नैतस्य स्फ्यादिविषायकत्वम्। तदेतदर्थवादत्वस्य तृतीयसिद्धत्वेन पूर्वपक्षोत्थानाभावेऽपि शिष्य-हितार्थमुक्तमिति द्रष्टव्यम्।

यत्तु भाष्यादिभिः लिङ्गमुक्तं स्फ्याद्याकारस्य ध्रुवदानेन विकल्पत्वात् पूर्वपक्षे परिधानीये कर्मणि आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति यज्ञपात्रकरणकदाहानुपपत्तिरिति। तत्पूर्वपक्षे उद्धन-नाद्यर्थपात्राणां पृथक्सत्त्वात्तेषाञ्च यज्ञसाधनत्वाभावेऽप्यायुधशब्दा-भावेन प्रयोजकतयैव यज्ञपात्रत्वोपपत्त्या दाहोपपत्तेरुपेक्षणीयम्॥ ४॥२॥४॥

तच्चैकत्वं॥ पशुना यजेतेत्यादौ यत्रोपादेयपश्वादिगता संख्या विभक्त्युपात्ता सा किं विवक्षिता न वेति चिन्तायाम्। सत्त्वप्रधा-नानि नामानीति स्मृत्या प्रातिपदिकार्थस्य पश्वादेर्विभक्त्युपात्त-संख्याविशेष्यत्वरूपसत्त्वसमाख्यया विभक्त्युपात्तसंख्यायाः प्रातिपदिकार्थं प्रति पदश्रुत्या योग्यतारूपलिङ्गेन च विशेषणत्वावगमाद्वाक्यीयक्रिया-न्वयानुपपत्तेस्तदभावेऽपि क्रियाया अवैगुण्यान्न विवक्षिता संख्या।

न चैकत्वादेः पश्वन्वयेऽपि तद्विशिष्टस्यैव पशोः कारकान्वयद्वारा क्रियासम्बन्धाल्लोहितोष्णीषादिवत्पशुविशेषणस्यापि विवक्षोपपत्तिः। संख्याकारकत्वयोर्विभक्त्या युगपदुपादानेन संख्यायाः प्रथमतः पश्व-न्वयमभिधाय पश्चाद्विशिष्टस्य पशोः कारकान्वयाभिधाने विरम्य व्यापारतापत्तेः। न च त्वयापि संख्यायाः पदश्रुत्या पश्वन्वयाङ्गी-काराद्युगपदन्वयद्वयस्य शाब्दबोधस्य च विरुद्धत्वात् प्रथमतः शुद्धस्य पशोः कारकान्वयमङ्गीकृत्य पश्चात्संख्यायाः पश्वन्वयाङ्गीकारे तथापि

विरम्यव्यापारतापत्तिरिति वाच्यम् । तथापि भावनान्वितकारक-विशेषणविशेषणस्यासमस्तपदस्थले भावनान्वयव्युत्पत्त्यभावेनाविवक्षोप-पत्तेः । इतरथाऽऽरुण्यस्याप्यानुशासनिकमत्वर्थलक्षणया एकहायनीं प्रत्येव विशेषणत्वोपपत्तौ प्रथमतः क्रियान्वयमभ्युपगम्य पार्ष्ठिकैक-हायनीसम्बन्धसिद्धान्तभङ्गापत्तेः ।

अत्र च लौहित्यादेर्भावनान्वितकारकविशेषणविशेषणत्वेऽपि समस्तपदत्वान्न क्षतिः । वारवन्तीयादेस्तु कृत्वा-शब्दोक्तभावनायामे-वान्वय इति न कापि क्षतिः । अत एव सोमारुण्यादीनामपि न प्राथमिको धात्वर्थान्वयोऽपि तु भावनान्वय एवेत्युक्तं तत्र तत्र ।

किञ्च न प्रत्ययार्थस्यैकत्वस्य प्रकृत्यर्थं पशुं प्रति प्रकारता । प्रत्ययार्थप्राधान्यभङ्गापत्तेः । अपि तु पशोरेव करणत्वं प्रतीवैकत्वं प्रत्यपि प्रकारता । अतस्यैकत्वस्य करणत्ववद्विधेयभावनायामप्रकार-त्वादविवक्षेति प्राप्ते ।

पशोः करणत्व एवान्वयो न त्वेकत्वेऽपि, प्रमाणाभावात् । अतश्च पशोस्तद्द्वारा भावनान्वयवत् संख्याया अपि बलीयस्या समानाभि-धानश्रुत्या आधेयत्वेन सामानाधिकरण्येन वा प्रथमतः कारका-न्वयस्यैवाङ्गीकारात्पश्चाच्च पदश्रुत्यादिना आधारत्वसम्बन्धेन पश्व-न्वयोपपत्तेर्निरुक्तव्युत्पत्त्यैव संख्यायाभावनासम्बन्धित्वादविवक्षितत्वम् ।

न चैवं यदि सोममपहरेयुरेकाङ्गां दक्षिणां दद्यादित्यादा-वेकपदवैयर्थ्यम् । गामित्यनेनैवैकत्वविधानोपपत्तेरिति वाच्यम् । एकत्वविधिवद्गोत्वविधेरपि प्राप्तदक्षिणाऽनुवादेन धेनुर्दक्षिणेति वत् विशिष्टकारकान्तरविधानेनापत्तौ द्वादशशतसंख्यावत्सामान्यविहिता-

श्वादीनामपि बाधप्रसङ्गात् तन्निवृत्त्या दानाश्रितस्यैव गोरुद्देशेन विधानार्थमेकग्रहणोपपत्तेः। अतो विवक्षितैव संख्या। अत एव कर्णायामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्यास्तेषामैन्द्राग्नो दशम इति दशमत्वदर्शनमुपपन्नम् ॥४॥१॥५॥

तथा च ॥ भवतु संख्या शब्दार्थत्वाद्विवक्षिता। लिङ्गन्तु उपादेयगतमप्यशब्दार्थत्वादविवक्षितम्। न हि तत्प्रातिपदिकार्थः। सिंहादिपदात् तदप्रतीतेः। तस्य लिङ्गत्रयसाधारण्येन लिङ्गसामान्यव्यभिचाराच्च। नापि प्रत्ययार्थः। व्यभिचारादेव। नापि टादिषु स्विकाराणां तस्माच्छ्सोनः पुंसीत्यादीनाम्। विलिङ्गे वृक्षादौ विपरीतलिङ्गे वृक्षमक्षिकादौ च प्रयोगेण व्यभिचारादेव। अतः शब्दानुशासनमात्रमिदं, न लिङ्गं नाम कस्यचिच्छब्दस्यार्थ इत्यविवक्षितमिति प्राप्ते।

सिंहः तिष्ठतीत्यादावनन्यथासिद्धलिङ्गप्रतीतेर्लिङ्गमपि क्वचिट्टादिषुस्विकाराणां क्वचित्तिसृचतसादिप्रातिपदिकविकाराणां वाच्यम्। अतः सुबर्थत्वेन संख्यावत्, क्वचिच्च प्रातिपदिकार्थत्वेनैव विवक्षितम्। यत्र तु बाधस्तत्र साधुत्वार्थं तच्छब्दप्रयोगः॥ ४॥१॥६॥

आश्रयिषु॥ यजति जुहोतीति वा यत्र श्रुतं, तत्र यजेस्तावद्देवतोद्देशविशिष्टद्रव्यत्यागवाचित्वात्त्यागांशस्यादृष्टविधया आरादुपकारकत्वम्। उद्देशांशस्य त्वदृष्टविधया तदुपकारकत्वमेव। अतएवोद्देशाङ्गभूतदेवतायास्त्यागाङ्गभूतद्रव्यापेक्षया दुर्बलत्वम्। प्रक्षेपस्तु तत्र त्यागाङ्गद्रव्यसंस्कार एव। जुहोतिस्थले तदङ्गमेवादृष्टविधये-

तरौ। समप्रधानौ वा। अत एवोभयत्र मन्त्रस्तत्तदङ्गभूतदेवतादि-
प्रकाशनार्थ एवेति स्थितिः।

यत्र तु स्वाहाकारस्विष्टकृत्सूक्तवाकपशुपुरोडाशपिष्टलेपादि-
होमवाजिनेज्यादौ परकीयं द्रव्यं देवता वा प्रक्षेपांशेनोद्देशांशेन
मन्त्रेण वा संस्क्रियते। यथा स्वाहाकारसूक्तवाकपशुपुरोडाशादा-
वाग्नेयादिमन्त्रदेवतोद्देशाभ्यां स्विष्टकृति प्रक्षेपांशेन तदीयं द्रव्यं,
मन्त्रेणैव तदीयादेवताः। उद्देशांशस्य स्विष्टकृद्देवताकत्वात्। पिष्ट-
लेपादौ प्रक्षेपेण तदीयं द्रव्यमेव। सर्वत्र प्रमाणं तत्र तत्रोक्तं वक्ष्यते।
यस्तु तत्र त्यागांशः सोऽदृष्टार्थ एव। न च तस्य पदार्थैकदेशत्वा-
न्निष्प्रयोजनकत्वेऽपि न क्षतिः। विहितपदार्थान्यथानुपपत्त्या तद-
वयवानामप्यर्थाद्विहितत्वेन प्रयोजनाकाङ्क्षोपपत्तेः। अतः सोऽप्यदृष्टार्थ-
एव सन्फलवत्प्रक्षेपाद्यङ्गं तत्संस्कार्यद्रव्याद्यङ्गमेव वेति तत्संस्कार्य-
द्रव्यदेवतादावेव प्रोक्षणादिवददृष्टं जनयतीति सन्निपत्त्योपकारक-
स्तत्प्रयुक्तस्येति प्राप्ते।

विशेष्यतया गृहीतस्य त्यागांशस्य प्रक्षेपाद्यङ्गत्वे प्रमाणाभावा-
द्देवतादेश्च दृष्टमात्रापेक्षत्वेनादृष्टोपकारानपेक्षत्वात् प्रकरणात्त्यागां-
शस्यारादुपकारकत्वमेव प्रयाजादिवत्। तत्र लेतावान्विशेषः।
यत्परप्रयुक्तद्रव्यदेवतोपजीवि, तत्र परप्रयुक्त्यभावे स्वातन्त्र्येण तद्द्रव्य-
देवताऽऽक्षेपकम्।

अत एवैककपालस्य सर्वहोमे स्विष्टकृत्त्यागस्य लोप एव।
स्वोपकारकद्रव्यस्य नाशादिनिमित्ताभावेनाक्षेपेनापि समापन्ना-
योगात्। चयनादावयागे वाचनिकप्रयाजादिविनियोगेऽपि च न

स्वाङ्गाकारयागः । प्रकृतौ तु द्रव्यनाशे यस्य सर्वाणि हवींषि नश्ये-युर्भ्रश्येयुरपहरेयुर्वाऽऽज्येनैतादेवताः परिसंख्याय यजेतेति वचनादा-ज्येन समापनम् । सन्निपत्योपकारकत्वे तु संस्कार्याभावादिडादि-वल्लोप एवेति विशेषः ॥४॥१॥७॥

अर्थे ॥ एवं तावत्क्रत्वर्थपुरुषार्थविचारद्वारेण प्रयोजकत्वं चिन्तितम् । इदानीन्तु साक्षादेव तच्चिन्त्यते । तत्सिद्ध्यर्थस्तु क्वाचित्को-ऽङ्गाङ्गिभावविचार इति सुखग्रहणार्थं प्रतिज्ञामात्रमिदम् ॥४॥१॥८॥

एकनिष्पत्तेः ॥ चातुर्मास्येषु प्रथमे पर्वणि तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रुतम् । तत्र दध्यानयन-स्यामिक्षा वाजिनञ्चेत्युभयं प्रयोजकमुतामिक्षैवेति चिन्तायाम् ।

दध्यानयनवाक्ये तावत्तप्तपयोऽधिकरणकं दध्यानयनमात्रं श्रुतं न तु पयसो दध्नो वा प्राधान्यम् । सप्तम्या प्राधान्यानभिधानात् । तथात्वे उद्देश्यविशेषणत्वेन तापस्याविवक्षापत्तेश्च । न चानयतेर्द्विकर्मकत्वात् पयसो व्याप्यमानत्वेन दध्यपेक्षयाऽपि प्राधान्यावगतिः । द्विकर्मक-धातुस्थले हि अधिकरणत्वादिकारकान्तराविवक्षायां कर्मकारक-सम्बन्धमात्रविवक्षायाञ्च सम्बन्धसामान्ये षष्ठीप्राप्तौ अकथितञ्चेति सूत्रेण कर्मसंज्ञाकरणाद्द्वितीयाविधानावगतावपि प्राधान्ये प्रमाणा-भावात् । प्रकृते सप्तमीश्रवणेनाधिकरणत्वविवक्षावगतेर्द्वितीयकर्म-प्रसक्त्यभावाच्च ।

दध्नस्तूपयोगाभावादेव सक्तुवन्न प्राधान्यावगतिः । न ह्यामिक्षा नाम दधिपयोरूपा । रसघनीभावादिधर्मभेदेनार्थान्तरत्वात् । तस्यै शृतं तस्यै दधि तस्यै आमिक्षा तस्यै वाजिनमिति भेदेन

व्यपदेशाच्च। गोपयसोर्यदिति विकारवाचि-यत्प्रत्ययान्तपयस्याशब्द-पर्यायत्वाच्च। जुषतां युज्यं पय इति तु धान्यशब्दवद्विकारपरम्। अतश्च दध्यानयनस्य वाक्ये उद्देश्याभावात् सामर्थ्येन दधिसंसृष्टपयो-जन्यामिक्षार्थत्वाङ्गीकारे च जन्यत्वाविशेषेण वाजिनार्थत्वस्याप्यवगतेः उभयं प्रयोजकमिति प्राप्ते।

सा वैश्वदेवीति सर्वनाम्नः प्रकृतपरामर्शित्वात् पूर्ववाक्ये यत्प्रा-धान्येन निर्दिष्टं तदामिक्षेत्यवधार्यते, न त्वर्थान्तरम्। रसस्य मधु-राम्लरूपयोस्तयोरेवावधार्यत इति न ततोऽप्यर्थान्तरम्। घनीभावस्तु पीयूषादिवदभेदेऽप्युपपन्न एव। पृथङ्निर्देशोऽप्यवस्थान्तरात्। विकारार्थ-यत्प्रत्ययस्मृतिरपि तच्छब्दाद्यनुरोधेनावस्थापरैव। तस्मा-दामिक्षाऽर्थान्तरमपि तु दधि पयो वा। तत्रापि विशेषनिर्णय-स्त्वष्टमेऽतिदेशसिद्ध्यर्थं निरूपयिष्यते।

तत्सिद्धं स्ववाक्य एवामिक्षारूपोद्देश्यसम्बन्धित्वावगतेर्दध्यानयनं तत्प्रयुक्तमेव। न तु वाजिनप्रयुक्तम्। तस्य तच्छब्दाद्यभावेनार्था-न्तरत्वप्रतीतेः। तज्जन्यत्वेऽपि शेषित्वानवगमात्। अतश्च तस्यानु-निष्पन्नत्वात् तद्यागस्य स्विष्टकृदादिवदनुनिष्पन्नप्रतिपत्तित्वावगमेन परप्रयुक्तदध्यानयनोपजीवित्वावगतेर्न तत्प्रयोजकत्वं वाजिनस्य कल्प-नीयं गौरवात्।

प्रयोजनं, पूर्वपक्षे वाजिनयागस्यार्थकर्मत्वेन समप्राधान्यापत्तेरा-मिक्षायागविकारेऽनतिदेशः, सिद्धान्ते त्वनुनिष्पन्नप्रतिपत्तित्वेना-मिक्षायागाङ्गत्वात् तद्विकारेऽतिदेशः।

सोमेश्वरस्य तु सिद्धान्तेऽपि वाजिनयागे अर्थकर्मत्वं वदत-

आमिक्षायागाङ्गत्वानापत्तेस्तद्विकारेऽतिदेशो न सिध्येत् । अष्टौ हवींषीत्यस्य च विनिगमनाविरहेणावयुत्यानुवादत्वस्य लम्मते* आपत्तेः । यत्तु भाष्यकारादिभिः पूर्वपक्षे वाजिनलोपे आमिक्षानाश इव पुनर्दध्यानयनेन वाजिनोत्पत्तिः. सिद्धान्ते त्वाज्येन समापनमिति प्रयोजनमुक्तम् । तत् षष्ठे हविर्नाशादिनिमित्ते आज्येन समापनस्य विधिबलेन वक्ष्यमाणत्वेन पूर्वपक्षेऽपि तुल्यत्वादुपेक्षितम् । ४ । १ ॥९॥

पदकर्म ॥ सोमक्रयार्थमेकहायनीं विधाय क्रयदेशे तन्नयने क्रियमाणे, तस्याः षट् पदान्यनुनिष्क्रामति सप्तमं पदं स्फ्येन लिखेत् । हिरण्यमन्तर्धाय पदे जुहोति । ततः सप्तमं पदमध्वर्यु-रञ्जलिना गृह्णाति । यर्हि हविर्धाने प्राची प्रवर्त्तयेयुस्तर्हि तेनाक्ष-मुपांज्यादिति श्रुतम् † ।

तत्राक्षाभ्यंजनमपि क्रयवदेवैकहायनीनयनस्य प्रयोजकम् । अन्यत्ववदङ्गित्वस्याप्युभयत्र समत्वात् । अक्षाभ्यञ्जने हि तच्छब्देनैव पदपांशवो निर्दिष्टा इति ते तदङ्गम् । पदस्य चैकहायनीनिरू-पितत्वम्, तस्याः सप्तमं पदमित्युनुषङ्गाच्छाखान्तरवचनाच्चावगत-मिति साऽपि तदङ्गम् ।

अतश्च नीयमानसंस्कारार्थस्य नयनस्याप्युभयार्थत्वादुभयप्रयोज्य-त्वम् । न च प्रकरणादेवैकहायनीलाभात् तच्छब्दस्यानुवादकत्वम् । प्रकरणप्राप्तेः पूर्वप्रवृत्त्यङ्गीकारेण प्रयोजकत्वफलकाङ्गत्वविध्युपपत्तेः । न च तथापि क्रयप्रयुक्तत्वविशिष्टैकहायन्या एव तच्छब्देन परामर्शात्

* तन्मते,—इति भवितुमुचितम् ।

† तेनाक्षमञ्ज्यादिति,— । इति भाष्यधृत पाठः ।

पुरोडाशकपालन्यायापत्तिः । तथात्वे फलाभावेन तच्छब्दवैयर्थ्या-पत्तेस्तस्यैकहायनीस्वरूपमात्रपरत्वाङ्गीकारादिति प्राप्ते ।

विधिगौरव-प्रयोजकशक्तिकल्पनागौरवाभ्यां तच्छब्दस्य पूर्व-परामर्शित्वस्वभावेनोपजीव्यप्रकरणप्राप्तानुवादकत्वावगतेरैकहायन्याः क्रयमात्राङ्गत्वावसायात् तदङ्गभूतनयनस्यापि तन्मात्रार्थत्वप्रतीते-रत्राभ्यञ्जनं पदहोमादिकं वा क्रयप्रयुक्तैकहायनीतन्नयनलाभेन चरितार्थं नैकहायन्यास्तन्नयनस्य वा प्रयोजकम् ।

अतश्चैकहायन्यां क्रयार्थं नीयमानायां दैवाद्भावृत्ति सप्तमपद-पातेऽत्राभ्यञ्जनार्थं पुनर्न तदानयनम् । यथाशक्तिप्रयोगादौ क्रय-लोपेऽपि वा नैकहायनीप्रयुक्तिः । अत्राभ्यञ्जनार्थन्तु ये केचित्पांशवो-ग्राह्या एव । गुणलोपे मुख्यलोपानुपपत्तेः । होमस्तु आरादुपकार-कत्वाद्भावृत्त्येव । यथाशक्तिप्रयोगे लाहवनीये निरधिकरणक एव वेत्यन्यदेतत् ॥४॥१॥१०॥

अर्थाभिधान ॥ दर्शपूर्णमासयोः पुरोडाशकपालेन तुषानुपवप-तीति श्रुतम् । तच्च कपालस्य, कपालेषु पुरोडाशं श्रपयतीति श्रपणे विनियुक्तस्यापि तृतीयया तुषोपवापार्थत्वेनाप्यार्थिकविशेषण-विधिना विनियोगात् उभयप्रयुक्तत्वम् । न च पुरोडाशार्थकपाल-त्वेनैव तुषोपवापे विनियोगान्न तुषोपवापप्रयुक्तत्वम् । प्रकृतिविकार-भावाभावेन तादर्थ्यसमासायोगात् । षष्ठीसमासे च सम्बन्धमात्राव-गतेस्तस्य च कपालत्वेनैव विनियोगेऽपि पुरोडाशार्थोपात्तस्यैव प्रसङ्गेन ग्रहणोपपत्तेरनुवादकत्वात् ।

यदि तु प्रसङ्गलक्षणाभावादुपादेयत्वे प्रकृतग्रहणस्य च तानि

द्वैधमित्यत्र निराकृतत्वाच्च पुरोडाशार्थकपालनियम इत्याशङ्क्यैत, ततोऽस्तु नाम पुरोडाशसम्बन्धविशिष्टस्यैव विधानम्। तत्फलञ्च तद्भिन्नकपालव्यावृत्तिरेव न त्वप्रयोजकत्वमपि। सम्बन्धरूपाङ्गाभावेऽपि अग्निहोत्रहवणीन्यायेन प्रधानभूतकपालबाधानुपपत्तेश्चर्वादौ तन्नियमाभावरूपस्याप्रयोजकत्वफलस्यासम्भवादिति प्राप्ते।

पुरोडाशसम्बन्धस्य प्रमाणान्तरगम्यस्यालोचने तत्प्रयुक्तत्वस्याप्यवगतेर्न पुनस्तुषोपवापविधिरपि तत्प्रयुङ्क्ते। अतो लाघवादवघातकालीनस्तुषोपवापः परप्रयुक्तकपालोपजीवितया न कपालोपादानादनयोः प्रयोजकः। निनयनकालीनस्तु कपालधारणस्य प्रयोजको भवत्येव। उपादानस्य तु सोऽप्यप्रयोजकः। प्रयोजनं, चर्वादौ न कपालनियमः। अग्निहोत्रहवण्यान्तु वक्ष्यते॥४।१।११॥

पश्वावनालम्भात्॥ पशौ, शकृत्सम्प्रविध्यति लोहितं निरस्यतीति श्रुतं निरसनं, पश्वालम्भस्य शकृल्लोहितस्यैव वा प्रयोजकम्। न ह्यीयं तस्य प्रतिपत्तिः। हृदयादीनामेव हविष्ट्वेन तस्यानुपयुक्तत्वादपूर्वसाधनत्वाभावाच्च। अतश्चार्थकर्मैवेदं शकृल्लोहितस्य तावत्प्रयोजकम्। पश्वालम्भोऽपि च विशसनवाक्ये श्रुतः प्रयोजनाकाङ्क्षः सन् हृदयादेरिव लोहितादेरपि पशुप्रकृतित्वमाक्षिपति। न हि हृदयादेस्तदुत्पत्तिवाक्याधीनम्। तस्य तदभावे हविष्ट्वेनैव तद्विधायकत्वात्। अतस्तत्रत्यपशुपदमपि देवतासम्बन्धसिद्ध्यर्थं वस्तुतोऽनुवाद एव।

अस्तु वोत्पत्तिवाक्यावगतं पशोर्यागसाधनत्वम्, विशसनवाक्यानुरोधात् हवीरूपहृदयादिप्रकृतित्वरूपमेवेति विशसनवाक्यस्यापि

तत्परत्वमेव । तथापि निरसनस्यार्थकर्मत्वाज्जाघनीवल्लौकिकशक्त-लोहितप्रयोजकत्वे न किञ्चिद्बाधकमिति प्राप्ते ।

द्वितीयया निरसनस्य प्रकृतित्वावगमान्न लोहितादिप्रयोजकत्व-मपि । उपयुक्तत्वाभावेऽपि चानुनिष्पन्नत्वेन प्रतिपत्तिसापेक्षत्वात् परम्परयाऽपूर्वसम्बन्धस्य सत्त्वेन चानर्थक्याभावात् प्रतिपत्तिकर्मत्वोप-पत्तेः । प्रयोजनं, पशुलोहिताद्यभावनाशयोस्तल्लोपः । प्रायश्चित्तं परं तल्लोपनिमित्तं भवत्येव । सोमेश्वरलिखितरचोभागत्वसत्त्वे तु त्यागांशस्याज्येन येन केनचिद्वा द्रव्येण समापनं भवत्येवेति द्रष्टव्यम् ॥४॥१॥१२॥

एकदेश ॥ यचोत्तरार्द्धात् स्विष्टकृते समवद्यतीत्यादौ न द्वितीयादिनिर्देशस्तत्र प्रतिपत्तित्वे प्रमाणाभावादुपादानत्वेन श्रुत-स्योत्तरार्द्धस्य यागं प्रति गुणत्वादुत्तरार्द्धस्य तावद्यागः प्रयोजको-भवत्येव। तस्य च ससम्बन्धिकत्वेन स्वप्रतिसम्बन्धियत्किञ्चिद्दव-यवाक्षेपकत्वं सुलभमेव । न च प्रकृतपुरोडाशरूपावयवविसत्त्वे न स्वतन्त्राक्षेपकत्वम् । प्रकृतस्य स्वकार्य्ये सर्वस्य विनियुक्तत्वेनान्यत्र विनियोगासम्भवात् । न च तस्य प्रतिपत्त्यपेक्षत्वात्प्रक्षेपांशेनास्य प्रतिपत्तिकर्मत्वम् । प्रक्षेपांशस्याग्नेयादिप्रक्षेपवत्स्वयागाङ्गत्वेनैव प्रयो-जनानपेक्षत्वात् । उत्तरार्द्धस्यांशभेदेनापि गुणत्वप्रधानत्वयोरङ्गी-कारे वैरूप्यप्रसङ्गाच्च । प्रधानमात्रत्वस्वीकारेऽपि लक्षणायास्तावद-निवारणाच्च । अतः स्विष्टकृद्यागोऽर्थकर्मैव प्रयाजादिवत्सनुत्तरार्द्ध-तदवयविनोः प्रयोजक इति प्राप्ते ।

यद्यपि तावदर्थकर्मैव स्यात्तथापि ससम्बन्धिकत्वात्प्रतिसम्बन्ध्यपे-

चायां यावत्प्रकृतप्रतिसम्बन्धित्वलाभस्तावन्नान्याक्षेपकत्वकम् । गौरवात् । अस्ति च प्रकृते प्रतिपत्त्यपेक्षः शेषः । अतस्तदुपजीवकत्वमेव । अत एव शेषात्स्विष्टकृत इत्यपि लिङ्गमुपपद्यते । एवञ्चोत्तरार्द्धस्य त्यागं प्रति गुणत्वेन विनियुक्तस्यापि प्रधानगतप्रतिपत्त्यपेक्षानुरोधेन वाक्यान्तरकल्पनया प्रक्षेपांशं प्रति प्राधान्येऽपि न क्षतिः । श्रुतयागविधिनाऽपि धारणप्रयोजकत्वकल्पनाभिया तदनुपपत्तेश्च ।

अत एवानुमितप्रतिपत्तेरेव धारणप्रयोजकत्वादिकल्पना । दोषो नानुमिते ह्यसाविति न्यायात् । अनुमानस्य फलमुखत्वाच्च । अत एव सर्वाणि हवींषि समवद्यतीति लिङ्गमपि प्राधान्यादुपपन्नम् । अत एव स्विष्टकृत्प्रक्षेपोऽपि प्रधानाङ्गभूतस्तत्प्रयुक्त एव सन् स्विष्टकृत्त्यागस्याप्यङ्गं तत्प्रयुक्तस्य । प्रतिपाद्यत्वाविशेषात् । अतः स नावयविनो नोत्तरार्द्धस्य वा प्रयोजकः । आज्यप्रक्षेपस्य तु प्रयोजको भवत्येवेति सिद्धम् ।'४॥१॥१३॥

अभिघारणे ॥ दर्शपूर्णमासयोः, प्रयोजशेषेण हवींष्यभिघारयतीति श्रुतम् ।

तत्र प्रयाजशेषोऽभिघारणस्य तृतीयाद्वितीयाभ्यामुपयुक्तसंस्कारापेक्षया चोपयोक्ष्यमाणसंस्कारस्याभ्यर्हितत्वाद्धविःसंस्कारकत्वमेव । न तु प्रयाजशेषप्रतिपत्त्यर्थत्वं, लक्षणाप्रसङ्गात् । न च हविःसंस्कारकत्वे 'अदृष्टकल्पनापत्तेरपेक्षितदृष्टरूपप्रतिपत्त्यर्थत्वलाभाय लक्षणाद्यङ्गीकरणमपि न दोषायेति मिश्रमतं युक्तम् । निषादस्थपत्यधिकरणन्यायेनादृष्टकल्पनादेः फलमुखत्वात् । किञ्च द्वितीयायाः सप्तम्यर्थत्वलक्षकत्वे हविषामभिघारणं प्रत्युपादेयत्वापत्तेस्तद्गतबहुत्वस्य

विवक्षापत्तौ त्रिष्वेव करणापत्तिः। तथा च ग्रहैकत्वाधिकरणे तदविवक्षाऽभिधानं वार्त्तिककारीयं नोपपद्येत।

यत्तु अभिघारणं प्रत्याधारत्वेनान्वितानामपि हविषामाधारतानियमं प्रत्युद्देश्यत्वाद्विशेषणाविवक्षेति। तन्न। श्रुताभिघारणं प्रत्युपादेयत्वेन विवक्षितत्वे आर्थिकाधारतानियमं प्रत्यपि त्रयाणामेवोद्देश्यतापत्तेः। किञ्च यदर्थो नियमाश्रयस्तदर्थो नियम इति सर्वत्र क्लृप्तेराधारतानियमोऽपि अभिघारणनियमवत्तद्वारा प्रयाजेष्वेवोपयुज्येत। इतरथा पशुस्वजाघनीतुषोपवापादिवाक्येष्वपि करणतानियमस्य जाघनीप्रतिपत्त्यर्थत्वकपालसंस्कारकत्वापत्तेरेकत्वाविवक्षापत्तिः। एतेन पदद्वयेऽपि लक्षणामनङ्गीकृत्याधारतानियमोद्देश्यतामात्रेणैव हविःसंख्याविवक्षामुक्तवतो भट्टसोमेश्वरस्यापि मतं प्रत्युक्तम्।

यत्तु केश्चित् तृतीयाया एव द्वितीयार्थे लक्षणामङ्गीकृत्याभिघारणस्योभयार्थत्वं विजातीयानेकोद्देश्यकत्वाच्च न वाक्यभेद इत्युक्तम्। तदपि न। निषादस्थपत्यधिकरणविरोधस्य तादवस्थ्यात्। श्रुतोद्देश्यसत्त्वे लाक्षणिकत्वस्यान्याय्यत्वाच्च। न्याय्यत्वेऽपि वा श्रुतस्त्रीरूपोद्देश्यसंस्कारस्यैव धारणप्रयोजकत्वापत्तेश्च।

किञ्च वैजात्यं न तावन्निमित्तफलादिवत्। उभयोरपि स्फीतत्वात्संख्योद्देश्यत्वस्य समानत्वात्। अथ वैजात्याभावेऽपि साकाङ्क्षत्वादेव नानेकोद्देश्यता। तथात्वे गोदोहनादेरपि पशुप्रणयनाद्युभयोद्देश्यतापत्तेः। अतोऽभिघारणस्य केवलहविःसंस्कारार्थत्वात्रिनयनकालीनतुषोपवापपुरोडाशकपालन्यायेन शेषोत्पादना-

प्रयोजकत्वेऽपि धारणप्रयोजकत्वोपपत्तिः। अतश्च द्वैधे हृदया-द्यभिघारणार्थं वाजपेये प्राजापत्यवपाभिघारणार्थं धारणीय एव पात्रान्तरे प्रयाजशेषः। प्रकृतौ हि प्रयाजोत्तरं वपायागमात्रं कृत्वा कालान्तरे हृदयादियागः। वाजपेये च प्राजापत्यान् क्रतु-पशूंश्चोपक्रम्य दशप्रयाजोत्तरं पर्य्यग्निकरणान्ते कृते प्राजापत्यानां वैकल्पिको ब्रह्मसामकाले उत्कर्षः। अतश्च पर्य्यग्निकरणोत्तरभाव्यु-त्तरप्रयाजशेषेण क्रतुपशुवपाभिघारणवत्कालान्तरभाविप्राजापत्यव-पाभिघारणार्थमपि धार्य्यः शेष इति प्राप्ते।

सत्यं प्रयाजशेषाभिघारणं हविःसंस्कारार्थमेव वाक्येन विधीयते। तथापि तु प्रयाजशेषस्य प्रतिपत्त्यपेक्षत्वात् तदनुरोधेन स्विष्टकृदेव वाक्यान्तरकल्पनयाऽभिघारणस्यैव तत्प्रतिपत्त्यर्थमङ्गीक्रियते। न च प्रयाजेषु सर्वहोमस्यैवापत्तेर्न प्रतिपत्त्यपेक्षा। आर्थिकप्रतिपत्त्यन्तर-विध्यभावेऽपि प्रयाजशेषकरणकाभिघारणविधिनैव द्वितीयतुषोप-वापवद्द्वारणाक्षेपापत्त्या सर्वहोमानापत्तेः।

न च स्विष्टकृदादिहांशभेदाभावादभिघारणस्य श्रौतेन हवि-रर्थत्वेनाक्षेपमात्रप्रमाणकप्रतिपत्त्यर्थत्वबाधः। श्रौतविधेर्धारणाद्या-क्षेपशक्तिकल्पनगौरवपरिहारार्थमेव फलमुखप्रतिपत्तिकल्पनानुमतेः। अतएव ज्ञानाद्याक्षेपशक्तिकल्पनागौरवपरिहारार्थमधिकारिसङ्कोच-वत् सन्निहितहविःसङ्कोचोऽपि न दोषाय। अत एव यत्र न प्रतिपत्तिर्यथा द्वितीयतुषोपवापकपालादौ, तत्र न तत्कल्पना। लाघवात्तु वक्ष्यते।

न चार्थिकप्रतिपत्तिविधेरपि धारणाक्षेपशक्तिकल्पनाऽऽवश्यकत्वे

श्रौतविधेरेव तत्कल्पकत्वौचित्यमिति वाच्यम् । पूर्वाधिकरणवदेवा-
नुमानिके तत्कल्पनस्यादोषत्वात् । अनुमानस्य फलमुखत्वाच्च । अतश्च
प्रतिपत्तिबलेनैवाचिप्तस्य धारणस्योपजीवनादिनिगमनाविरहेण
सन्निहितसर्वहविःषु अभिघारणोपपत्तावपि न कालान्तरीयहविरर्थं
धारणमिति । अत एव प्राजापत्यवपानां क्रतुपशुभिः सह करणपक्षे
सह पशूनालभते वपानामभिहृतत्वायेति लिङ्गं अन्यसामकालीनत्व-
पक्षे तदभावं दर्शयति । स्पष्टञ्च सव्या वा एतर्हि वपा यर्हि
अनभिहृता इति रूक्षत्वाख्यं सव्यत्वमस्मिन्पक्षे दर्शयति । न चाभि-
घारणान्तरेण रूक्षत्वनिवृत्तिः । तस्य तापमात्रनिवर्त्तकत्वेन रूक्ष-
ताया अनिवारणात् ॥४॥१॥१४॥

समानयनं ॥ दर्शपूर्णमासयोः प्रयाजार्थं जुह्वां चतुर्गृहीतं
विधाय, अष्टावुपभृति गृह्णाति प्रयाजानूयाजेभ्यस्तदिति वचनेन
चौपभृतं विधाय पुनर्ध्रुवायां चतुर्गृहीतं विहितम् । तत्रैव चाति-
हायेडो बर्हिः प्रतिसमानयते जुह्वामौपभृतमिति श्रुतम् ।

तत्र किं प्रयाजाः समानयनस्य तत्संस्कृताज्यस्य प्रयोजकास्तदर्थ-
श्चेदमुभयं, उत ते अप्रयोजकाः अनूयाजा एव तु तयोः प्रयो-
जकास्तदर्थञ्चेदमुभयमिति चिन्तायाम् ।

प्रयाजानूयाजेभ्यस्तदिति द्वन्द्वान्ते श्रुतस्य बहुवचनस्य प्रत्येकं
सम्बन्धादुद्देश्यगतत्वाप्यप्राप्तत्वेनानुवादायोगादौपभृतस्य न्यायत एव
सर्वप्रयाजार्थत्वप्रतीतेः प्रयाजार्थस्यार्द्धस्य सर्वप्रयाजादौ समानीतत्वा-
द्धर्हिःप्रयाजकाल उपभृति अनूयाजार्थस्यैव सत्त्वेन तस्यैवेदं समानयनं
तत्संस्कारार्थमनूयाजप्रयुक्तं न तु प्रयाजप्रयुक्तम् । अत एव जौहव-

स्याद्यविशेषेण सर्वप्रयाजार्थत्वादौपभृतेन विकल्पः। त्रिरतः प्राचीनं प्रयाजान्यजतीति तु त्रयवयुत्यानुवादमात्रमिति प्राप्ते।

कालविशिष्टसमानयनस्यानूयाजान्यसंस्कारकत्वे अदृष्टार्थत्वापत्ते-र्विशिष्टविधिगौरवात् त्रिरित्यस्यावयुत्यानुवादत्वापत्तेश्च प्रयाजार्थ-स्येदं समानयनम्। तच्च जुह्वा जुहोतीति वचनादर्थप्राप्तमेवेति तदनुवादेन कालमात्रमनेन विधीयते। अतश्च प्रयाजानूयाजेभ्य इत्यत्र प्रयाजाभ्यामनुयाजेभ्य इत्यपि विग्रहे न दोषः। अत एव जौहवमपि परिशेषादाद्यप्रयाजत्रयार्थमेवेति न विकल्प-प्रसङ्गोऽपि।

एवञ्चातिथ्यायामिष्टान्तत्वेनानूयाजाभावेऽपि चतुर्गृहीतान्याज्या-नीति बहुवचनं जौहवोपभृतचतुर्गृहीतयोः प्रयाजेषु समुच्चयात् ध्रौवचतुर्गृहीतमादाय सङ्गच्छते। इतरथा तयोर्विकल्पादनूयाजा-भावे ध्रौवमादाय चतुर्गृहीतद्वित्वापत्तेर्बहुवचनानुपपत्तिः। अतश्च प्रयाजद्वयं समानयनस्य तत्संस्कृताज्यस्य च प्रयोजकमिति सिद्धम्। सत्रादौ तु समानयनपदं तत्कालीनप्रयाजद्वयपरम्। आज्यसंस्कारस्य समानयनस्याज्यप्रयोजकत्वसिद्धान्तानुपपत्तेः ॥४॥१॥१५॥

तत्र ॥ एवं तावदौपभृतस्य प्रयाजार्थत्वमङ्गीकृत्य प्रयोज्यत्वं विचारितं, तदेव चाक्षिप्य समाधीयते। चतुर्जुह्वां गृह्णाति अष्टावुपभृति गृह्णाति चतुर्ध्रुवायां गृह्णातीत्यसंयुक्तोत्पन्नान्या-ज्यानि लिङ्गप्रकरणाभ्यां यावत्सर्वप्राकरणिकद्रव्यापेक्षकार्य्यार्थत्वेन विनियुज्यन्ते, तावच्चतुर्जुह्वां गृह्णाति प्रयाजेभ्यस्तदष्टावुपभृति गृह्णाति अनूयाजेभ्यस्तत्सर्वस्मै वा एतद्यज्ञाय गृह्यते तत् ध्रुवाया-

माज्यमित्यादिवचनैस्तत्तत्कार्य्यार्थत्वेन विनियोगादौपभृतस्यानूयाज-मात्रार्थत्वम् । यत्तु अष्टावुपभृति गृह्णाति प्रयाजानूयाजेभ्यस्तदिति वचनम् । तत्र प्रयाजत्वानूयाजत्वरूपोद्देश्यतावच्छेदकभेदे वाक्य-भेदापत्त्याऽनूयाजानां प्रयाजोत्तरत्वानुवादमात्रमिति प्राप्ते ।

उभयतोऽप्यनुवादावश्यकत्वे समानयनादिविधिदृष्टार्थत्वाद्यनु-रोधेन शुद्धानुवादवचनस्यैवानुवादत्वम् । न च वाक्यभेदः, ग्रहैकत्वा-धिकरणव्युत्पादितकौस्तुभोक्तरीत्याऽध्वर्युयजमानौ वाचं यच्छत इति वदवाक्यभेदात् । अत औपभृतं प्रयाजानूयाजार्थमिति सिद्धम् ॥ ४॥१॥१५॥

तदष्टसंख्यं ॥ अष्टावुपभृतीत्यनेनाष्टसंख्याकं ग्रहणं विधीयते, उत चतुःसंख्याकग्रहणद्वयमिति चिन्तायाम् । श्रुतत्वादष्टसंख्यैव विवक्षिता न चतुःसंख्याद्वयं, लक्षणापत्तेः । न चानारभ्याधीतेन चतुर्गृहीतं जुहोतीत्यनेनानिर्दिष्टद्रव्यकसर्वहोमानुवादेन चतुर्गृही-तविधानात्प्रयाजादिष्वपि तत्प्राप्तेः प्रयाजानूयाजार्थचतुर्गृहीतद्वयो-द्देशेनोपभृत्पात्रमात्रस्यात्र विधिप्रतीतेरष्टपदं चतुष्कद्वयलक्षणार्थ-मिति वाच्यम् । अनारभ्यविधिना जुहोतिचोदनाविहितप्रधान-भूतहोमोद्देशेन चतुर्गृहीतविधानेऽपि प्रयाजादिषु यजतिचोदना-चोदितेषु प्रक्षेपाख्यहोमस्य तदीयद्रव्यसंस्कारकत्वेन तमुद्दिश्य चतु-र्गृहीतविधानानुपपत्तेः । अत एवोपांशुयाजादौ चतुर आज्यस्य गृह्णान आहेत्यादिविध्यन्तरादेव ध्रुवादितश्चतुर्गृहीतविधानम् ।

अस्तु वैतादृशविषये तत्प्राप्तिस्तथापि वाचनिकेन प्राकरणिकेन वा अष्टत्वेन बाधात् तस्य प्रयाजाद्यतिरिक्तविषयत्वमेवावश्यकम् ।

न च होमाङ्गभूतचतुःसंख्यायाः प्रधानाश्रितत्वादङ्गाश्रितया ग्रहणाङ्गभूतयाष्टसंख्यया बाधासम्भवः, उभयोरपि ग्रहणाङ्गत्वात् ।

अस्तु वा चतुःसंख्याया होमाङ्गत्वं, तथापि होमस्याप्यत्राङ्गत्वादेव न तदङ्गचतुःसंख्याया बलवत्त्वम् । किञ्च होमोद्देशेन चतुर्गृहीतविधिना प्रतिव्यक्ति तद्भेदापत्तेर्यावत्प्रयाजानूयाजव्यक्तिभेदेन चतुर्गृहीतभेदात् तावच्चतुर्गृहीतोद्देशेनैकपात्रविधावष्टत्वानुवादानुपपत्तिः । न हि तत्राज्यभागयोरिवावयवशो होमे किञ्चिन्नियामकमस्ति ।

अस्तु वा तत्तथापि यथैवावयवशो होमेऽपि चतुर्गृहीतस्य प्रयाजानूयाजसाधनत्वाविघातस्तथैवाष्टसंख्याकग्रहणेनानुष्ठितेऽपि तदन्तर्गतत्वेन चतुष्कद्वयस्य सत्त्वादुभयोरपि संख्ययोः साधनत्वाविघातः । किञ्चैवं तव प्रयाजद्वयानुयाजत्रये मिलित्वैकं चतुर्गृहीतमवयवशः प्राप्येतेत्यष्टत्वानुवादानुपपत्तिः । अतस्तत्तत्संख्याकग्रहणसंस्कृताज्यान्येवैतैर्वाक्यैस्तत्तत्कार्य्योद्देशेन विधीयन्ते । न चास्मन्मतेऽपि प्रतिप्रधानं भेदप्रसङ्गः । विनियोगवाक्यानुसारेण तथा प्राप्तावपि पृथगुत्पत्तिवाक्यवैयर्थ्यान्यथानुपपत्त्या तथोत्पन्नस्यैकस्यैवावयवशो विनियोगाङ्गीकारात् । अतोऽष्टत्वं विवक्षितमिति प्राप्ते ।

चतुर्गृहीतान्याज्यानि भवन्ति न ह्यत्रानूयाजान्यक्ष्यन् भवति इत्यातिथ्यायामिडान्तायां श्रुतस्य चतुर्गृहीतस्य बहुत्वे अनूयाजसामान्याभावरूपस्य हेतोरेव तात्पर्य्यग्राहकतया अष्टत्वमविवक्षितम् । अयं हि न तेन ह्यवं क्रियत इति वदर्थवादोऽपि तु लक्षणाद्यभावाद्धेतुविशिष्टचतुर्गृहीतबहुत्वविधिरेव चतुर्गृहीतनिवृत्तिफलकः ।

अतस्तद्बलेन व्याप्तिकल्पनायां यत्र यत्रानूयाजसामान्याभावोऽन्यत्रापि, तत्र चतुर्थचतुर्गृहीतनिवृत्तिरूपसाध्यसिद्धिः। अतश्च व्यतिरेकमुखेन चतुर्थचतुर्गृहीतमनूयाजार्थमितरच्च प्रयाजार्थमिति सिद्धं भवति। तच्चाष्टत्वस्य चतुष्कद्वयलक्षणार्थत्वे उपपद्यत इति तत्सिद्धिः। इतरथा ह्यनूयाजाभावेऽप्यष्टगृहीतस्यानिवृत्तत्वेन जौहवभ्रौवरूपचतुष्कद्वयस्यैव प्राप्तेर्बहुत्वानुवादानुपपत्तिः। कथञ्चित् प्राप्तावपि वा समस्तवाक्या-नर्थक्यम्। न च वाचनिकबहुत्वे विधेरेवायमर्थवादः हेतुपरत्वे सम्भवति। स्तुतिलक्षणाभावात्। वस्तुतस्तु नाष्टपदेऽपि लक्षणा। हेतुबलेनैवार्धस्यानूयाजार्थत्वेऽर्धस्य प्रयाजार्थत्वे चावगते आतिथ्यादा-वनूयाजाभावेनैवाष्टत्वस्य बाधोपपत्तेः। अस्तु वा सा। प्रयोजनं, पूर्वपक्षे प्रयाजद्वयार्थे अर्धन्यूनसमानयनम्। अष्टगृहीतस्य समं स्यादश्रुतत्वादिति न्यायेन पञ्चस्वपि विभागात्। सिद्धान्ते त्वर्धं समानेयम्॥ ४॥१॥१६॥

इति भाट्टदीपिकायां चतुर्थस्य प्रथमः॥

स्वरुः॥ ऐन्द्रे पशौ, यूपस्य स्वरुं करोति स्वरुणा पशुमनक्तीति श्रुतम्। तत्र स्वरुशब्दवाच्यस्याप्रसिद्धत्वादाद्यवाक्येन स्वरुकर्मका* भावनैव विधीयते। तत्र च साधनीभूतद्रव्यापेक्षायां, तत्र यः प्रथमः शकलः परापतेत्तत् स्वरुरिति वचनेन शकलस्य साधनत्वावगमा-दितिकर्त्तव्यतापेक्षायां यूपपदेन तद्धर्मलक्षणया अञ्जनप्रोक्षणादयो-विधीयन्ते। अथ वा यथैव यूपावयवकत्वं सिद्धान्ते षष्ठ्यर्थस्तथैव मन्मते यूपधर्मकत्वसम्बन्धः षष्ठ्यर्थ इति न लक्षणा। एवमुत्पन्नस्य

* इत्थमेव पाठः सर्व्वत्र। स्वरुकर्म्मिका,—इति तु भवितुं युक्तम्।

च द्वितीयवाक्येन विनियोगः। अस्तु वा द्वितीयवाक्याक्षिप्तस्वरु-कर्मकभावनानुवादेन यूपधर्ममात्रविधिरिति न विशिष्टविधिरपि।

न चैवमपि प्रकृतशब्दस्य सम्बन्धिकत्वादेवोत्तरार्धादिवद्यूपी-यत्वोपपत्तेरप्रयोजकत्वोपपत्तिः। स्वतन्त्रकाष्ठाप्रयोजकत्वेऽपि स्वरु-निष्ठाञ्जनप्रोक्षणादिधर्मप्रयोजकत्वोपपत्तेः। अतएव धर्मप्रयोजनक-त्वेन काष्ठान्तरप्रयोजकत्वशङ्कायां तन्निवर्त्तकत्वेन, यदन्यस्य* वृक्षस्य स्वरुं कुर्यादन्येऽस्यां† लोकमन्वारोहेयुरिति निन्दाऽपि सङ्गच्छते। धर्मप्रयोजकत्वेऽपि च यूपैकादशिन्यां यथानुपूर्व्यं स्वरुभिः पशून् समंज्येति यूपभेदेन स्वरुभेदे दर्शनं नानुपपन्नम्। न चैवमपि षष्ठ्या यूपावयवकत्वसम्बन्धेनाप्युपपत्तेर्यूपधर्मकत्वयूपसम्बन्धपरत्व एव नियामकाभावः। प्रकृतकरणकत्वादेव यूपीयत्वसिद्धेराद्यवाक्यवैय-र्थ्यापत्तेरेव नियामकत्वादिति प्राप्ते।

न यूपधर्मकत्वसम्बन्धः षष्ठ्यर्थः। आनुशासनिकयूपावयवकत्व-सम्बन्धस्यैव तदर्थत्वोपपत्तेः। अतएव यथाशक्ति प्रयोगादौ यूपा-भावेऽपि स्वर्वर्थमेव वनगमनादिसिद्धिः पश्चाररत्निलसिद्ध्यर्थम्। न च प्रकृतश्रुत्यैव प्राप्तत्वात्तद्विधिवैयर्थ्यम्। एतद्विध्यभावे यूपपदरहितानां परश्वादान-वनगमन-वृक्षच्छेदन-शाखाऽऽहृत्यादीनां यूपार्थत्ववत् स्वर्व-र्थत्वस्यापि सम्भवेन प्रकृतश्रुतेर्वृक्षप्रतियोगितयैवोपपत्तेः। द्वितीय-यूपच्छेदनादि, यूपश्छिन्नत्तीत्यादिवाक्येन विहितं यूपाभावे परं निवर्त्तताम्। न तु वनगमनाद्यपि। अतस्तन्निवृत्तिफलकयूपानु-

---

* यद्यन्यस्य,—इति भाष्यधृतः पाठः।

† अन्यस्य, इत्यादर्शपुस्तके पाठः।

निष्पन्नत्वसिद्ध्यर्थं यूपावयवकत्वविधिरर्थवानेव। अतएव यूपानु-निष्पन्नप्रथमशकलमात्रे येन केनचित्काष्ठेनाञ्जनं पशोः। तेन प्रोक्षणादेः स्वर्वर्थत्वे प्रमाणाभावाच्च स्वरुस्तेषां प्रयोजकः। सूत्राणि च सुधीभिरस्मिन्नेवार्थे व्याख्येयानि न तु भाष्यकारोक्ते॥ ४॥२॥१॥

शाखायां॥ दर्शपूर्णमासयोः शाखामधिकृत्य, प्राचीमाहरतीति श्रुतम्। तत्र प्राचीशब्दस्तावद्दिग्विशेषवाची। प्राचीमुदेति सवितेति प्रयोगात्। देशवाची वा, न तु तद्देशस्थशाखावाची। अतश्चोप-क्रमस्थप्रातिपदिके लक्षणाऽपेक्षया वरं द्वितीयैव सप्तम्यर्थे व्याख्यातुं युक्ता। प्रतिशब्दाध्याहारो वा। (१)कर्माकाङ्क्षायां च प्रकृतत्वादेव शाखा तत्त्वेन सम्बध्यते। प्राग्देशस्य च पूर्वोत्तरावध्यपेक्षायां प्रत्यक्षो-पस्थितत्वात्सामर्थ्याच्च वन-विहारदेशौ तत्त्वेन सम्बध्येते। तेन वना-द्विहारोपलक्षितप्राचीं प्रति शाखामाहरतीति वाक्यार्थो न तु वृक्षस्य प्राचीं शाखामिति। तथात्वे छिनत्तीति स्यान्न त्वाहरतीति प्राप्ते।

प्रधानभूतविभक्तौ लक्षणायाः प्रतिशब्दाध्याहारस्य वा कर्माध्या-हारस्य पूर्वोत्तरावध्यध्याहारस्वहृतस्यापेक्षया एकस्मिन् प्रातिप-दिकएव प्रकृतशाखालक्षणया वाक्यार्थोपपत्तेः, प्राक्त्वस्य वृक्षावयव-विशेषत्वरूपशाखात्वेनैवोपस्थितवृक्षावधिकतयाऽप्युपपत्तेः शाखावाद-एवायम्। तेन वृक्षस्य प्राग्देशभवां प्राचीं शाखां छित्वा आहर-तीत्यर्थः। प्रयोजनानुरोधात्तु विहारदेशं प्रतीति लभ्यते। शाखायां

(१) प्रतिशब्दाध्याहारे प्राचीं प्रति आहरतीति लभ्यते। तत्र च किमाहरतीत्यस्याहरणस्य कर्म्माकाङ्क्षा। तत्र प्रकृता शाखैव कर्म्मत्वेन संबध्यते इति भावः।

प्राग्देशभवत्वमात्रविधानफलकत्वाच्च लाघवम्। तत्र तु शाखाहरणो-द्देशेन प्राग्देशभव-विहारावधिकत्वविधाने गौरवम्। याज्ञिकास्तु दिग्वादमेव वदन्ति ॥ ४॥२॥१॥

शाखायां ॥ तत्रैव, शाखामाच्छिनत्ति, शाखामाहरति, मूलतः शाखां परिवास्योपवेशं* करोतीति श्रुतम्। तत्र शाखाशब्दस्ता-वदाद्यवाक्ययोः समूलस्यैव वाचको न लग्नमात्रस्य। अतस्तृतीयवाक्ये-ऽपि तत्पर एव। तदर्थं च परिवासनं अग्रमूलविभागार्थम्। अत-स्तृतीयवाक्ये मूलत इति पदं द्वितीयार्थे तृतीयार्थे वा तसिं व्याख्यायोपवेशं करोति इत्यत्रान्वेति। न त्वपादानार्थकं सत्परि-वासने। तथात्वे अग्रस्याप्युपवेशत्वप्रसङ्गेन मूलत इत्यस्योत्तरत्रान्वया-वश्यकत्वात्। अतः परिवासनेनाग्रं मूलं च शाखापदाभिधेयं विभज्य मूलमुपवेशसंज्ञमुपादत्त इति तृतीयवाक्यार्थः। तस्य च विनियोगापेक्षायामग्रस्य वत्सापाकरणादौ मूलस्य कपालोपधानादौ वचनाद्विनियोगः। अत उभयमपि छेदनाहरणपरिवासनादीनां प्रयोजकम्।

अस्तु वा शाखाशब्दोऽग्रमात्रवाची। तथापि मूलत इति द्वितीयार्थे परिवासनस्य कर्मेति परिवासनमुभयप्रयुक्तम्। यद्वा वा मूलापादनकपरिवासनमुपवेशकरणार्थं विधीयत इति सोऽपि प्रयो-जक इति प्राप्ते।

मूलत इति तसिः पञ्चम्यर्थक एव। सार्वविभक्त्यर्थकत्वानुशासनं तु लाक्षणिकम्। अन्यथा विशिष्य पञ्चम्यर्थकत्वानुशासनवैयर्थ्य-

* उपवेषशब्दो मूर्द्धन्यषकारयुक्तो भाष्ये सर्व्वत्र।

प्रसङ्गात्। अतो मूलापादानकं परिवासनं द्वितीयाश्रुत्या शाखा-संस्कारकमेव। न तु वाक्यादुपवेशकरणाङ्गम्। न चोभयसंस्कारकम्। द्वितीयाश्रुतेर्बलीयस्त्वात्। उद्देश्यानेकत्वप्रसङ्गाच्च। अतः शाखा-शब्दोऽपि मूलापादानकपरिवासनसिद्ध्यर्थं न विरुध्यते। अतएव वत्सापाकरणादौ शाखापदेनैवाशविनियोगः। अतो मूलं परिवास-नाङ्गमेव। एवं च व्यवहितकल्पनाऽपि न प्रसज्यते। अतएव परिवास-नानुनिष्पन्नमूलस्यैवोपवेशरूपं संज्ञान्तरकरणम्[१]। अन्यस्य शाखा-पदेनैव सर्वत्र विनियोगेन संज्ञान्तरवैयर्थ्यापत्तेः। अतो न व्यवहित-कल्पनाया आवश्यकत्वम्। अतः संज्ञाकरणमात्रफलक उपवेशं करोतीत्ययमनुवादो ल्यबन्तापेक्षितक्रियान्तरप्रदर्शनार्थः। अतो न मूलं छेदनादीनां प्रयोजकम्। प्रयोजनं, पौर्णमास्यां शाखाऽभावेन येन केनचित्काष्ठेन कपालोपधानं न तूपवेशकरणम्॥ ४॥२॥२॥

हरणे॥ तत्रैव, सूक्तवाकेन प्रस्तरं प्रहरतीति सह शाखया प्रस्तरं प्रहरतीति च श्रुतम्। तत्राद्यवाक्ये तावन्मान्त्रवर्णिकदेवतासम्बन्धा-द्धोमविधिरित्युक्तम्[२]। न तु द्वितीयवाक्यविहितप्रहरणानुवादेन प्रस्तरमुद्दिश्य सूक्तवाकविधिरिति तन्त्रसारोक्तम्। यागस्यापि विधौ वाक्यभेदापत्तेः। यागविधायकवाक्यान्तरककल्पने गौरवाच्च। अतश्च द्वितीयवाक्ये प्रहरतिना होममनूद्य शाखासाहित्यमात्रविधिः। सहशब्दस्य निपातत्वेन परस्परान्वयव्युत्पत्तेश्च न शाखा साहित्यं

(१) योऽयं समाहृतायाः पलाशशाखायाः परिवासनानुनिष्पन्नो मूल-भागः प्रादेशमितः, तस्यैवोपवेशसंज्ञेत्यर्थः।

(२) तृतीयाध्यायस्य द्वितीयपादे सूक्तवाके चेति पञ्चमाधिकरणे।

चेति विधेयानेकता । अतश्च यथैव होमे प्रस्तरो गुणभूत एवं शाखाऽपि । तत्र त्वेतावान्विशेषः । प्रस्तरस्य द्वितीयया प्रक्षेपांशं प्रति प्रतिपाद्यत्वावगमाच्च त्यागांशस्तस्याक्षेपक इत्युक्तम् । शाखायास्तु वत्सापाकरणादाविव गुणत्वस्यैवावगतेः प्रस्तरहोमः प्रयोजक एवेति पौर्णमास्यामपि तदर्थं शाखोत्पादनीयेति प्राप्ते ।

आद्यवाक्ये सूक्तवाकान्वयानुरोधेन प्रहरतिना होमलक्षणायामपि द्वितीयवाक्ये प्रहरतिना होमलक्षणायां प्रमाणाभावात् प्रहरणस्यैव शाखासाहित्यसम्बन्धमात्रं क्रियते । अतश्च यथैव प्रहरणं प्रति प्रस्तरस्य कृतार्थस्य संस्कार्यत्वं, तथा शाखायाः । कृतार्थत्वाविशेषात् । न च तृतीयया तस्याः करणत्वावगतिः । सह-शब्दयोगेन तस्याः करणत्वानभिधायकत्वात् । न चैवं शाखां प्रहरतीत्येवमेव वक्तव्यत्वावगतेः प्रस्तरादिपदवैयर्थ्यम् । प्रस्तरप्रहरणकालीनैतत्प्रहरणविध्यर्थत्वात् । अतएव प्रस्तरप्रहरणकालविशिष्टप्रहरणस्यैव शाखोद्देशेनाच विवक्षितत्वा विधानम् । न तु प्रस्तरप्रहरणव्यक्तेरेव शाखोद्देशेन विनियोगः । तथात्वे यथाशक्ति प्रयोगादौ प्रस्तराभावेऽपि शाखाप्रहरणानापत्तेः । अतश्च प्रतिपत्तित्वात् प्रहरणमपि न शाखायाः प्रयोजकम् । तेन पौर्णमास्यां न शाखोत्पादनम् । यथा तु प्रस्तरप्रहरणव्यक्तावेव शाखाया न गुणत्वम्, तथा षष्ठे वक्ष्यते ॥ ४॥२॥४ ॥

उत्पत्त्यसंयोगात् ॥ तत्रैवापः प्रणयतीत्यनेन विहितप्रणयनसंस्कृतानामपां, प्रणीताभिर्हवींषि संयौतीति वचनेन संयवनार्थत्वेन विनियोगवदन्ते, अन्तर्वेदि प्रणीतानिनयनार्थत्वेनापि विनियोगादुभयप्रयुक्तत्वम् । न च निनयनवाक्ये द्वितीयानिर्देशात् प्रतिपत्तित्व-

ग्राह्या। कुशलेनाध्वर्युणा यावत्संयवनोपयोगिनीनामेवापां प्रणयनेन शेषाभावात् प्रतिपत्तित्वानुपपत्तेः। अतः सक्तुन्यायेन निनयनस्यार्थ-कर्मत्वात् प्रयोजकत्वमिति प्राप्ते।

द्वितीयासंयोगादाकीर्णकराणां प्रतिपत्तिरेवेयम्। न च शेषा-भावः, तस्यावर्जनीयत्वात्। अनन्यथासिद्धप्रतिपत्तेर्धारणप्रयोजकत्वाच्च। अतः संयवनमेव प्रयोजकम्। अत्र चाग्नेयादिहविःपाकत्वेनैव संयवनस्य उद्देश्यता। तेन चर्वादावपि प्रणीताः भवन्त्येव। अत एवाभ्युदितेऽष्टौ दधिपयसोरपि प्रणीताधर्मावच्छ्यन्ते। वस्तुतस्तु कपालं प्रति स्वोष्म-जन्यपाकत्वेनैव पिण्डसंयवनत्वेनैवोद्देश्यता। अतिप्रसक्तधर्मेण तदङ्गी-कारे प्रमाणाभावात्। दधिपयसोः प्रणीताधर्मास्तु क्वत्वाचिन्तया। याज्ञिकास्तु चर्वादावपि प्रणीताः कुर्वन्ति। प्रयोजनं, संयवनोत्तरं प्रणीतानाग्ने निनयनार्थं तदनुत्पत्तिः॥ ४॥२॥५॥

प्रासनवत्॥ सोमे, दण्डेन दीक्षयतीत्यनेन दण्डस्य दीक्षाभि-व्यञ्जकत्वं विधाय, क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति श्रुतम्। तत्र पूर्ववदेव द्वितीयासंयोगात् मैत्रावरुणसम्बन्धि दानं दण्डप्रतिपत्तिः चतुर्थी षष्ठ्यर्थलक्षका*। वेदविदे गान्ददातीति वद्वा प्राधान्याभावेऽपि सम्प्रदानार्थिकैव। अतश्च दीक्षितदण्डस्य दानमात्रेण प्रतिपत्तिसिद्धेर्नावश्यं स एव दण्डो दण्डी प्रैषानन्वाहे-त्यनेन प्रैषानुवचने विनियुज्यते। तेन न प्रैषानुवचनं दण्डदानस्य प्रयोजकमिति निरूढपश्वादावपि न तदनुष्ठेयमिति प्राप्ते।

---

* इत्थमेव पाठः सर्व्वत्र। लक्षिका,—इति तु भवितुमुचितम्।

कर्मणा यमभिप्रैति स सम्प्रदानमिति स्मृत्या क्रियां प्रति व्याप्यमानं कर्मकारकं प्रत्यपि,सम्प्रदानस्य व्याप्यमानत्वावगतेर्विधि-बलेन कस्य चिद्व्याप्यमानस्येप्सितत्वे कल्प्यमाने व्याप्यव्याप्यस्य सुतरां व्याप्यत्वमिति न्यायेन मैत्रावरुण एव तदवगतेस्तस्यैवोद्देश्यत्वम्। सम्भवति च मैत्रावरुणस्योपयोगादुद्देश्यत्वम्। वेदविदादौ तु बाधात् स्वर्गादेरेवोद्देश्यता। दृष्टश्चावलंबनं दण्डस्य प्रयोजनमिति नादृष्टार्थ-त्वमपि। न चैवं दण्डमिति द्वितीयाऽनुपपत्तिः, सक्तुवत्करणत्व-लक्षणार्थत्वात्।

यत्तु मूलेऽनीप्सितकर्मत्वेन तदुपपत्तिरित्युक्तम्। तज्जुहोतेरपि, तृतीया च होश्छन्दसीत्यादिश्रुत्या* सकर्मकत्वावगतेः सक्तुष्वपि तदापत्तेरनीप्सितकर्मत्वेऽपि चोद्देश्यानेकत्वनिमित्तकवाक्यभेदापरि-हार्यत्वस्य कौस्तुभ एवोक्तत्वादुपेक्षितम्।

अस्तु वा दण्डस्यानीप्सितकर्मत्वेनैवान्वयः। सम्प्रदानस्य च सत्यपि प्राधान्ये सम्प्रदानत्वेनैवान्वयात् न द्विकर्मकत्वापत्तिरित्यपि बोध्यम्। अतश्च दण्डविशिष्टदानस्योपयोगापेक्षायां दण्डी प्रैषा-नन्वाहेत्यादिना प्रैषानुवचनार्थत्वेन विनियुज्यते। अतो निरूढ-पश्वादौ दीक्षासोमक्रयाभावेऽपि दण्डदानानुष्ठानं तस्य प्रैषानुवचन-प्रयुक्तत्वान्नानुपपन्नम्।

इदन्त्विह वक्तव्यम्। प्रदानस्य दण्डं प्रत्यर्थकर्मत्वे दीक्षादण्डस्य कथं दानाङ्गत्वम्। न हि स्वत्वत्यागे कृते यजमानेन पुनः स्वयं

* इत्यमेव पाठः सर्व्वत्र। स्मृत्या इति तु भवितुमुचितम्। तृतीया च होश्छन्दसि इति हि पाणिनिसूत्रम्। न त्वियं श्रुतिः।

व्यवहर्त्तुं शक्यम्। न चैतावतैव दण्डकार्यदीक्षाभिव्यञ्जकालंबन-समाप्तिः, येनोपादानलाघवानुरोधेन प्रकृत एव गृह्येत। न च दानविध्यनुरोधेन कार्यसङ्कोचः, तस्य लौकिकदण्डेनाप्युपपत्तेः। प्रतिपत्तित्वे तु कृष्णविषाणावदेव युक्तस्तत्सङ्कोच इति।

अत्र ब्रूमः। श्रौतविधेरर्थकर्मपरत्वेऽप्यस्मदुक्तप्रयाजशेषाभिधारण-न्यायेनार्थिकदानप्रतिपत्तिविध्यन्तरकल्पनया प्रकृतेऽपि कार्यसङ्को-चोपपत्तिः। न चात्र मध्ये प्रतिपत्त्यपेक्षाऽभावात्कल्पकाभावेन तन्न्यायवैलक्षण्यम्। दानविधेर्दण्डान्तरप्रयोजकत्वशक्तिकल्पनाभिया कार्यसङ्कोचमङ्गीकृत्यापि मध्ये तदपेक्षोपपत्तेः। दृष्टश्च लोकेऽन्यानु-रोधेनाप्यवश्यापेक्षविषये स्वकार्यसङ्कोचेनाकाल एव तदाकर्षः। शक्यते चात्र त्यागांशस्य मैत्रावरुणोपकारकत्वाभावात्तदंशे दण्ड-प्रतिपत्त्यर्थत्वं वक्तुम्। स्वत्वत्यागाभावेऽपि समर्पणमात्रेणापि प्रैषानु-वचनोपपत्तेः। अतश्च प्रतिपत्त्यनुरोधेन दीक्षितदण्डविषयत्वसिद्धिः। अत एव सत्रे सर्वेषां दण्डानां दानम्। एवं च परप्रयुक्तदण्डोप-जीवित्वाच्च श्रौतदानविधिः, प्रैषानुवचनादेर्वा दीक्षितदण्डसत्त्वे दण्डान्तराक्षेपकत्वम्। तन्नाशादौ तु दण्डान्तराक्षेपकत्वम् अक्षा-भ्यञ्जनन्यायेनेष्टमेव। श्रौतदानविधावेकत्वश्रवणादेकदण्डदानमेव मैत्रावरुणोपकारकमिति सत्रे प्रैषानुवचन एक एव दण्ड इत्यपि बोध्यम्।

इदं च दीक्षितदण्डप्रापकवचनस्य पार्थसारथ्यादिमीमांसकैर-लिखनात्तदभावमभिप्रेत्योक्तम्। वस्तुतस्तु तैत्तिरीयशाखायां, यद्दी-क्षितदण्डं प्रयच्छतीति सार्थवादकवाक्यान्तरश्रवणात् क्रीत इति

दीक्षितपदरहितवाक्ये प्रतिपत्तिविध्यन्तराकल्पनेऽपि न क्षतिः । तैत्तिरीयवाक्येनैव मैत्रावरुणपदाश्रवणेन दानस्य प्रतिपत्तित्वसिद्धेः । क्रीतवाक्ये तु मैत्रावरुणपदश्रवणेन तत्प्राधान्यावगतेः तदुपकारार्थत्वमेव । अतश्च तैत्तिरीयवाक्ये श्रुतसम्प्रदानापेक्षया क्रीतवाक्ये स्वतन्त्रदण्डाक्षेपशक्तिकल्पनागौरवपरिहारार्थं च परस्परापेक्षिततया दीक्षितदण्डस्यैव मैत्रावरुणोपकारार्थत्वसिद्धिः ।

न च क्रीतवाक्यविहितदण्ड एव तैत्तिरीयवाक्येन दीक्षासम्बन्धविधानोपपत्तेः न प्रतिपत्तिविधायकत्वमिति वाच्यम् । तथात्वे दण्डोद्देशेन दीक्षितत्वविधावेकप्रसरताभङ्गापत्तेः । न चैवमप्येतद्वाक्यविहितप्रतिपत्त्यनुवादेन क्रीतवाक्ये राजक्रयोत्तरकालत्वस्यैव विधानोपपत्तेरनार्थकर्मत्वम् । मैत्रावरुणसम्प्रदानस्यापि विधौ वाक्यभेदापत्तेः। अत उभयत्रापि दानविधिः । तत्र च दीक्षितवाक्ये प्रतिपत्तिविधिः । सम्प्रदानाश्रवणात् । दीक्षितपदश्रवणाच्च । क्रीतवाक्ये उक्तयुक्त्याऽर्थकर्मत्वमेव । उभयप्रयोजनं पूर्ववत् ।

वस्तुतस्तु क्रीतवाक्येऽपि प्रैषानुवचनोपयोगिदण्डसंस्कारकत्वमेव दानस्येति दण्डस्यापीप्सितकर्मत्वमेव । न त्वेतावता दण्डप्रतिपत्तित्वं, उपयोक्ष्यमाणसंस्कारस्य न्याय्यत्वात् । मैत्रावरुणस्य तु सम्प्रदानत्वेनैवान्वय इति न कश्चिद्दोषः । यद्वा मैत्रावरुणोद्देशेनैव दण्डदानं मैत्रावरुणसंस्कारकम् । कल्पितेन विधिना उपयोक्ष्यमाणदण्डसंस्कारकमपि । अपेक्षावशात् । सर्वे प्रैषादौ दण्डैकत्वं तु दण्डी प्रैषानन्वाहेति दण्डिपदे प्रथमातिक्रमे कारणाभावादेकवचनान्तेन व्युत्पत्तिमङ्गीकृत्य समर्थनीयमिति दिक् ॥४॥२॥६॥

उत्पत्तौ ॥ सोमे, कृष्णाविषाणया कण्डूयते इति कण्डूयनाङ्गत्वेन कृष्णाविषाणां विधाय पुनराम्नातम् । नीतासु दक्षिणासु चात्वाले कृष्णाविषाणां प्रास्यतीति । तच्च निनयनवत्प्रासनं प्रतिपत्तिरेव, द्वितीयासंयोगात् । न च दक्षिणादानोत्तरकालमपि दीक्षितस्य कण्डूयनसम्भवात् कृतकरत्वाभावेन न प्रतिपत्त्यर्हता । अनन्यथासिद्धप्रतिपत्तिविधिबलादेव दक्षिणादानप्राक्कालीनकण्डूयनस्यैव कार्यत्वावधारणात् ।

न च प्रतिपत्तिमात्रे कार्यस्य जातत्वेन संस्कारवैयर्थ्यापत्तेर्विनियोगभङ्गेन सक्तुवदर्थकर्मत्वमेव स्यादिति वाच्यम् । जातेऽपि कार्ये उपयुक्तादि क्व निक्षेप्तव्यमिति अपेक्षाऽस्त्येवेति प्रतिपत्तिनियमविधेरुपयोगोपपत्तेः । तज्जन्यनियमादृष्टस्य चोत्पत्त्यपूर्वे जातेऽपि तद्व्यवहितकार्योत्पत्त्युपयोगियागापूर्वनिष्ठयोग्यताजनन एवोपयोगः । न तु एतदकरणस्य तत्कार्यनाशकत्वकल्पनम् । प्रयाजादावश्यकरणस्याग्नेयादिकार्यानुत्पादकत्वकल्पनापत्तेः । अकरणत्वादेः कारणतावच्छेदकत्वादिकल्पने गौरवाच्चेत्यादि कौस्तुभे अपूर्वाधिकरणे स्पष्टम् । अत एवाहिताग्नेः परिभ्रानीये कर्मणि पात्रासादनादिरूपप्रतिपत्तेरपि ऐहिककर्मातिरिक्तकर्माङ्गत्वस्यैव फलबलेन कल्पनादैहिकफलोत्पत्तावपि न क्षतिरित्यपि तत्रैव स्पष्टम् ॥४॥२॥७॥

सौमिके च ॥ सोम, एव वारुणेनैककपालेनावभृथं यन्ति इत्यनेनावभृथसंज्ञकं कर्म विधाय, यत्किञ्चित्सोमलिप्तं तेनावभृथं यन्तीति श्रुतम् । तच्च तृतीयया सोमलिप्तस्य करणत्वावगमात्तस्य च पानेऽसम्भवेऽप्यवभृथं प्रत्युपपत्तेः न द्वितीयार्थलक्षणया प्रतिपत्ति-

कर्मत्वम् । न च प्रतिपत्त्यपेक्षत्वाद्दृष्टार्थत्वलाभाय तल्लक्षणायामपि न दोषः । निषादस्थपत्यधिकरणन्यायेन लक्षणानुपपत्तेः । यत्तु कैश्चिद्भावनाभेदमात्राङ्गीकारेण तस्मिन्नेवावभृथे समुच्चयेन निवेशः पूर्वपक्षितः, तद्वाजिनेऽपि तथापत्तेरुपेक्षितम् । अतोऽवभृथस्यापि दीक्षोन्मोचनरूपैककार्यत्वेनं विकल्पापत्तेः द्रव्याणामपि विकल्पः । अदृष्टार्थत्वे तु तन्त्रेणानुष्ठानात्समुच्चय इति प्राप्ते ।

कर्मान्तरत्वेऽवभृथशब्दस्य नामातिदेशकत्वे गौणत्वापत्तेः वाचकत्वेऽनेकशक्तिकल्पनाप्रसङ्गाद्देवताऽभावेन चारूपत्वापत्तेः[१] वारुणेनेत्यनुषङ्गस्य देशलक्षणयाऽप्युपपत्तावन्याय्यत्वाद्यानरूपधात्वर्थ एव सोमलिप्तप्रतिपत्तित्वेन विधीयते । एवं च धात्वर्थाविवक्षा परपदार्थसम्बन्धविधानं कर्मान्तरत्वादिकल्पना च नाश्रिता भवति । न च तेनेत्यनेन करणत्वत्यागेन कर्मत्वलक्षणा । आनुशासनिकसहयोगतृतीयाऽङ्गीकारेण साहित्यमात्रोक्तौ कर्मत्वेनैव तदाश्रयणाल्लक्षणायाअप्रसक्तेः । अवभृथपदं परं देशलक्षणार्थमिति न कश्चिद्दोषः ॥४॥ २॥८॥

कर्त्तृ ॥ तत्र तत्र कर्त्तारोऽध्वर्य्वादयः, कालाः पौर्णमास्यादयो, देशाः समादयो, द्रव्याणि व्रीह्यादीनि, गुणाः शुक्लादयः, संस्कारा अवघातादयस्तत्तद्वाक्ये श्रुताः कर्मचोदनयैवाक्षेपेण प्राप्तत्वान्न विधीयन्ते । अतो न कर्मविधिभिर्नियमेन प्रयुज्यन्त इत्याशङ्काऽऽभावे प्राप्ते ।

---

(१) अन्यदेवते हि यागस्य रूपमित्यनुपदं वक्ष्यते ।

यावदाक्षेपेणानियताः प्राप्यन्ते, तावदृचनेन नियमफलकविधिकरणान्नियमेनैव प्रयोजकत्वम् । नियमविधिप्रकारस्तु सर्वोऽप्यनागतावेक्षणन्यायेनात्र कौस्तुभे च मन्त्राधिकरण एव दर्शितः ॥४॥२॥९॥१०॥११[१] ॥

यजतिचोदना ॥ प्रसङ्गाद्यागादिपदार्थाविध्यनुष्ठाप्याः के इति विचार्यन्ते । यत्र प्रक्षेपाङ्गको देवतोद्देशपूर्वको द्रव्यत्यागोऽनुष्ठीयते, स यागपदार्थः । प्रयाजादिषु प्रक्षेपसिद्ध्यर्थमाद्यं विशेषणम् । तत्र यागाक्षेपेणैव प्रक्षेपसिद्धिः । शक्यतावच्छेदकं चोक्तविधत्यागत्वसमव्यापकं जातिरूपमखण्डोपाधिरूपं वा सामान्यमित्युक्तमेव । प्रक्षेपप्रधानक उक्तविधस्त्यागो होमपदार्थः । सम्प्रदानस्वत्वापादनपूर्वको-द्रव्यत्यागोदानपदार्थः । उभयत्रापि शक्यतावच्छेदकं तत्तद्धर्मसमव्यापकं पूर्ववदेव सामान्यम् । एतत्सूत्रव्याख्यानान्तराणि तु गतार्थत्वान्न लिखितानि ॥४॥२॥१२॥१३॥

विधेः ॥ सोमे, यदातिथ्यायां बर्हिस्तदुपसदान्तदग्नीषोमीयस्येति श्रुतम् । तत्र देवदत्तस्य गौर्यज्ञदत्ताय दीयतामिति वद्यदातिथ्यायां बर्हिस्तत्तत आच्छिद्य उपसदाद्यर्थे विधीयते । तेनातिथ्यायां बर्हिष उपादानमात्रं प्रयुज्यते । अन्ये धर्मा आस्तरणादिकार्यस्त्वेतराभ्यामिति प्रथमः पक्षः ।

उपादानमात्रस्यातिथ्याप्रयुक्तत्वे अप्राकृतकार्यकारित्वापत्तेरति-

---

(१) अत्र भाष्यकारेण त्रीण्यधिकरणानि कल्पितानि । प्रथमं कर्तृदेशकालानां नियमार्थम्, द्वितीयं द्रव्यगुणयोः, तृतीयं संस्कारविधानस्य । ग्रन्थकृता तु त्रयमेकत्र संगृहीतम् । एवमुत्तरापि संग्रहो द्रष्टव्यः ।

देशप्राप्तधर्मादिलोपे प्रमाणाभावाच्छिद्य विधानानुपपत्तेराति-थ्यायामुपयुक्ताया एव बर्हिर्य्यक्तेरुभयोद्देशेन निरिष्टिकोपदेशः । ततश्च बर्हिर्धर्माणामातिथ्यार्थं कृतानान्तदपूर्वोत्पत्तौ नाशात्तस्यामेव व्यक्तावुपसदाद्यर्थं पुनः पुनरुपादानवर्ज्यं करणम् । यद्यपि च कृप्तो-पकारकप्राकृताघारपुनःश्रवणादुपसदामपूर्वत्वं वक्ष्यते, तथापि प्रकृतौ बर्हिषोऽङ्गप्रधानसाधारणत्वात् स्रौवाघारार्थमेव तत्करणम् । बर्हि-र्य्यक्तेरपि च तेनैव सम्बन्धेनोपसदुद्देशेन विधानम् । इतरथा प्राकृत-कार्यकारितापत्तेः । बर्हिःप्रतिपत्तेस्तु दाशाख्यायाः प्रकृतावुत्पत्त्यपूर्व-निष्ठयोग्यतासम्पादकतयेह तस्य नाशादग्नीषोमीयान्ते करणेऽपि नातिथ्योपसदर्थत्वम् । खण्डेष्टित्वाद्वा तयोस्तल्लोपः । तेन निरिष्टि-कोपदेश इति द्वितीयः पक्षः ।

विना वचनमन्यत्रोपयुक्तस्यान्यत्रोपदेशे शिष्टाचारविरोधादति-देशप्राप्तलवनादिबाधे प्रमाणाभावाच्च आतिथ्याप्रकरणपठिततदङ्गाश्व-वालादिबर्हिर्धर्माणामुभयोरतिदेशो वाचनिक इति तृतीयः पक्षः । अस्मिंश्च पक्षे न क्वचिदपि व्यक्त्यैक्यम् ।

सिद्धान्तस्तु । बर्हिःपदे लक्षणायां प्रमाणाभावात् क्वचिदपि व्यक्त्यैक्यविधानम् । ततश्चातिथ्योपक्रमे श्रूयमाणं बर्हिस्त्रितयसाधा-रणमिति तत्र क्रियमाणधर्मा अपि प्रतिपत्तिवर्जं सर्वसाधारणाः । न चाश्ववालादिधर्माणां प्रकरणेन तन्मात्रार्थत्वापत्तेः प्रसङ्गे चोप-कारकत्वेऽपि* इतरार्थत्वे प्रमाणाभावः । आश्ववालादिवाक्यानामेत-

---

* इत्थमेव पाठः सर्वत्र । मम तु प्रसङ्गेनोपकारकत्वेऽपि,—इति पाठः प्रतिभाति ।

दाक्याव्यवधानेन चितयापूर्वसाधनीभूतैतद्व्यक्तिरेवोद्देश्यत्वात् । अत्र च लक्षणया एतत्त्वमेवोद्देश्यतावच्छेदकम् । अतो न वाक्यभेदः । बर्हिःपदेन च तद्व्यक्त्यैक्यं लक्षणया विधीयते । न चैवं लक्षणाद्वयावश्यकत्वे धर्मातिदेशपक्षात्कोविशेषः । अजहत्स्वार्थलक्षणाया विशेषात् । आश्वबालादिधर्माणामुपसदाद्यर्थत्वस्य वाक्यीयत्वेन प्राकरणिकातिथ्यार्थत्वबाधापत्तेश्च । अतस्तदुद्देशेनापि विधाने त्रिष्वपि पदेषु चितत्वरूपोद्देश्यतावच्छेदकलक्षणाया आवश्यकत्वाच्च । यथा च व्याप्त्यवृत्तिधर्मस्योद्देश्यतावच्छेदकत्वेऽप्येकैकविकारेऽतिदेशस्तथा कौस्तुभे यष्टैकत्वाधिकरणे निरूपितम् ॥४॥२॥१४॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां
चतुर्थस्य द्वितीयः पादः ।

अथ चतुर्थोऽध्यायः ।

तृतीयः पादः ।

द्रव्य ॥ अनारभ्य, यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति श्रुतं द्रव्यम् ; सोमे, यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इति श्रुतः संस्कारो, वर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजानूयाजा इज्यन्ते वर्म भ्रातृव्यस्याभिभूत्यै इति श्रुतं कर्म च, नापापश्लोकश्रवणादिरूप-फलार्थम् । कामशब्दाद्यभावेन वर्त्तमानापदेशस्य फलपरत्वानुपपत्त्या-ऽर्थवादत्वस्यौदुम्बराधिकरणे साधितत्वात् । न च स्तुतिपरस्याप्यस्य लक्षणया फलपरत्वम् । एकस्यार्थद्वयपरत्वे वाक्यभेदात् । न च रात्रि-सत्रवदुपस्थितत्वेन कामयुक्तपदान्तरकल्पनया फलार्थत्वम् । तद्वदिह वाक्यादिप्रमाणेन जुह्वाद्यर्थत्वस्यावगततया फलाकाङ्क्षाविरहात् ।

न च कर्मोदाहरणे प्रकरणगम्यक्रत्वर्थत्वापेक्षया स्ववाक्योप-स्थितफलपदकल्पनायामेव वैमृधवल्लाघवमिति वाच्यम् । विजातीय-फलसद्भावकल्पनातः क्लृप्तक्रतूपकारस्यैव फलत्वौचित्यात् । इत एव हि प्रबलप्रमाणेनोपस्थापितसाकाङ्क्षावश्यकवैकृताङ्गत्यागेनापि दुर्बलनिराकाङ्क्षप्राकृताङ्गग्रहणं विकृतौ क्लृप्तत्वमात्रेण । अतो नैते फलप्रयुक्ता उभयप्रयुक्ता वा, अपि तु क्रतुप्रयुक्ता एवेति फल-कामनायामसत्यामप्यनुष्ठेयाः । औदुम्बराधिकरणसिद्धस्याप्यस्यार्थ-प्रयुक्तत्वरूपप्रयोजनसूचनार्थं पुनरुक्तिः ॥४॥३॥१॥

नैमित्तिके ॥ काम्यं गोदोहनादि कामाभावेऽपि नित्यप्रयोगे

उपस्थितत्वेऽपि न ग्राह्यम्। तथा, बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात् पार्थुरश्मं राजन्यस्य रायोवाजीयं वैश्यस्येति ब्राह्मणाद्यधिकारकत्वे निमित्ते द्वादशाहसम्बन्धि-ब्रह्मसामस्तोत्रोद्देशेन विहितं बार्हद्गिरादि नैमित्तिकं निमित्ताभावेऽनुलोमाधिकारके प्रयोगे न ग्राह्यम्। निमित्ताभावेऽप्यनुष्ठाने निमित्तसम्बन्धस्य वैयर्थ्यापत्तेः।

न च कामाभावे तत्साधनानुष्ठाने फलानुत्पत्तावपि क्रतुसाद्गुण्योपपत्तेर्न कश्चिद्विरोध इति वाच्यम्। तस्य क्रत्वर्थत्वे प्रमाणाभावेन तदा तदनुष्ठाननैयत्ये प्रमाणाभावात्। क्रत्वपेक्षायास्त्वार्थाक्षिप्त-यत्किञ्चित्-साधनग्रहणेनैव निवृत्त्युपपत्तेः। अत एव प्रबलप्रमाणेनाङ्गत्वेऽवगतेऽपि प्राकृताङ्गानां विकृत्यङ्गत्ववदस्यापि नित्यप्रयोगार्थत्वमित्यपास्तम्।

यदा तु कामनिमित्तसम्बन्धरहितं वारणाभीवर्त्ताद्याम्नातमेव, तदा कः प्रसङ्गः काम्यनैमित्तिकग्रहणस्य। यत्र तु तन्नाम्नातं, तत्रार्थाक्षिप्तस्य यस्य कस्यचिद् ग्रहणम्। सिद्धोऽप्ययमर्थः प्रयोज्यत्वरूपप्रयोजनकथनार्थमुच्यत इति न विरोधः ॥४॥३॥२॥

एकस्य॥ यत्र तु विध्यन्तरं दध्ना जुहोतीत्यादि श्रुतम्, तत्र काम्यस्यापि द्रव्यान्तरेण विकल्पः। द्रव्यान्तरविध्यभावे तु तस्यैव ग्रहणम्। न च दध्ना जुहोतीत्यादिर्दध्यादेरुत्पत्तिविधिः। उक्थ्यव्यूढादिवदस्यालौकिकत्वाभावात्। नापि काम्यदध्यादेराश्रयविधिः। तस्य प्रकरणालभ्यत्वेन वैयर्थ्यात्। अतो नित्यप्रयोगेऽङ्गताबोधार्थमेव स विधिरिति तस्योभयप्रयुक्तत्वम् ॥४॥३॥३॥

द्रव्याणां॥ सोमे, पयोव्रतं ब्राह्मणस्य यवागूराजन्यस्यामिक्षा

वैश्यस्येति श्रुतम् । ज्योतिष्टोमापूर्वसाधनीभूतब्राह्मणादिरूपाधि-कारिसंस्कारार्थत्वेन विहितं प्रयोव्रतादि तत्प्रयुक्तमित्यविवादमेव । अत्र च न बार्हद्गिरादिवद् ब्राह्मणस्य निमित्तत्वम् । दृष्टविधया तस्योद्देश्यत्वे सम्भवति निमित्तत्वकल्पने प्रमाणाभावात् । अत एव रागप्राप्तभक्षणद्वारैव पयोनियमाद्यस्य रोगादिनाऽशनाप्रसक्तिः, तस्य न पयःप्रयोजकतेति ध्येयम् ॥४॥३॥४॥

चोदनायां॥ विश्वजिता यजेतेत्येकाहकाण्डपठितविश्वजिदादा-वश्रुतफलके भावनायां भाव्यापेक्षायां समानपदश्रुत्युपनीतोऽपि यागो न भाव्यः । ततोऽप्यन्तरङ्गविधिश्रुत्यवगतप्रवर्त्तकत्वबलेन पुरुषार्थस्यैव भाव्यत्वावगतेः[१] । तृतीयान्तनामधेयसामानाधिकरण्येन यागस्य करणत्वावगतेश्च । अतोऽश्रुतेऽपि फले तद्वाचककामपदान्त-फलपदाध्याहारेण पुरुषार्थफलकत्वमेव । तच्च पदमध्याहृतमपि वेदाकाङ्क्षयाऽध्याहृतत्वाद्वैदिकमेव । वेदतुल्यं वा ।

तच्च फलमेकमेव कल्प्यते न सर्वाणि, एककल्पनयैव निरा-काङ्क्षत्वात् । तदप्येकं स्वर्ग एव न तु पुत्रपश्वादि । यन्न दुःखेन सम्भिन्नमित्यादिवाक्यात् स्वर्गशब्दस्य सुखविशेषमात्रवाचित्वेन विजातीयस्वर्गत्वस्यैव[१] अन्यतावच्छेदकत्वे लाघवात् । पुत्रादीनान्तु सुखसाधनतया पुरुषार्थत्वस्य विलम्बोपस्थितिकत्वाच्च । स्वर्गस्य

(१) यागस्य क्लेशरूपतया स्वतः पुरुषार्थत्वाभावेन फलस्यैव भाव्यत्व-मुचितमिति भावः ।

(२) इत्यमेव पाठः सर्व्वत्र । विजातीयसुखत्वस्यैव इति तु समीचीनः प्रतिभाति ।

बहुभिः प्रार्थ्यमानतया शास्त्रस्य महाविषयत्वलाभाच्च। लाघवाद्य-विशेषेऽपि च न सुखत्वस्यैहिकामुष्मिकसाधारणस्य, विलम्बोप-स्थितिकत्वाच्च जन्यतावच्छेदकत्वम्। स्वरसतोदुःखासम्भिन्नसुखस्यैव इच्छाविषयत्वाद्दुःखसम्भिन्नसुखस्य फलत्वानुपपत्तेः(१)। व्याप्यधर्मेण जन्यत्वसम्भवे व्यापकधर्मस्यान्यथासिद्धत्वाच्च व्यभिचारेण सुखत्वस्य स्वर्गत्ववदेव कार्यतावच्छेदकत्वानुपपत्तेः(२)। अतो विश्वजित्त्वावच्छिन्न-कारणतानिरूपितजन्यतावच्छेदकत्वं विजातीयस्वर्गस्यैव(३) युक्तम्।

मोक्षोऽपि च यद्यपि दुःखध्वंसरूपस्तदा पापक्षयादिवदेव न विश्वजिज्जन्यः जन्यतावच्छेदकत्वे गौरवात्(४)। यदि त्वानन्दावाप्तिरूप-स्तदा तस्य ज्ञानैकजन्यत्वान्न विश्वजिज्जन्यत्वम्(५)। यदापि हि,

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।

इत्यादिवचनात्कर्ममात्रजन्यत्वं ज्ञानकर्मसमुच्चयो वा प्रामा-णिकः(६), तदापि त्यक्त्वा कर्मफलासङ्गम् इत्याद्युपक्रमोपसंहारपर्या-

(१) ऐहिकसुखन्तु दुःखसम्भिन्नमेवेत्याशयः।

(२) अन्यथासिद्धत्वं व्यभिचारे, व्यभिचारश्च जन्यतावच्छेदकत्वानुपपत्तौ हेतुः। विजातीयसुखत्वपर्य्यवसितं स्वर्गत्वं यथा कार्य्यतावच्छेदक-मुपपद्यते, तथा सुखत्वं नेति व्यतिरेके दृष्टान्तः।

(३) इत्यमेव पाठः सर्व्वत्र। "विजातीयस्वर्गत्वस्येति भवितुमुचितम्। विजातीयसुखत्वस्येति तु युक्तं प्रतिभाति।

(४) अभावस्य प्रतियोगिज्ञानाधीनज्ञानविषयत्वेन तस्य जन्यतावच्छेदकत्वे गौरवमिति भावः"।

(५) ज्ञानादेव मुक्तिरिति हि वेदान्तडिण्डिमः।

(६) मोक्षस्य कर्म्ममात्रजन्यत्वमिति मतन्तु दार्शनिकैर्नादृतं। समुच्चित-ज्ञानकर्म्मकार्य्यत्वं प्राचामनुमतमपि शङ्कराचार्य्येण निराकृतम्। इत्यत उक्तं यदापि प्रामाणिक इति।

लोचनया कर्मशब्दस्य सर्वकर्मपरत्वावगमादश्रुतफलकविश्वजिदादि-मात्रपरत्वे प्रमाणाभावः ।

न चैवमपि कर्मान्तरसाधारण्येनास्यापि तत्फलकत्वोपपत्तेर्विश्व-जिद्वाक्यस्योत्पत्तिपरत्वेनापि चरितार्थत्वात् फलकल्पनाऽनुपपत्तिरिति वाच्यम् । उक्तवाक्येन कल्पनालाघवानुरोधेन क्लृप्तप्रयोगविधिका-नामेव कर्मणां मोक्षफलकत्वावगमेनाक्लृप्तप्रयोगकस्य विश्वजिदादे-र्ग्रहणे वैरूप्यप्रसङ्गेन विश्वजिद्वाक्येऽपि प्रयोगविधिसिद्ध्यर्थं फल-कल्पनाया आवश्यकत्वात् । एतेन विविदिषन्ति यज्ञेनेत्यादिवाक्या-त्कर्मणा पितृलोक इत्यादिवाक्याद्वा विविदिषादिमात्रार्थत्वं पितृ-लोकमात्रार्थत्वं वा विश्वजिदादेरपास्तम् । अत एव प्रयोगान्तर-कल्पनाभियैव प्रयाजादीनां न विविदिषाद्यर्थत्वम् । एतेन धर्मेण पापमपनुदतीत्यादि वाक्येन पापक्षयफलकत्वं विश्वजिदादेरपास्तम् । तस्य नित्यस्थले निमित्तप्रयुक्तनैमित्तिकानुषङ्गिकत्वेन विश्वजिति प्रयोजकत्वकल्पने वैरूप्यापत्तेः ॥४॥३॥५॥६॥७॥

क्रतौ ॥ ज्योतिर्गौरायुरित्यादिवाक्योत्पादितानि सौत्यानि कर्माणि विधाय, प्रतितिष्ठन्ति ह वा य एताराचीरुपयन्तीत्यादि श्रुतम् । तत्र रात्रिसत्रादौ पूर्ववत् स्वर्गकल्पने स्वर्गोपस्थितिस्तद्वा-चकपदोपस्थितिः कामपदान्ततत्कल्पना चेति गौरवापत्तेर्लाघवात् श्रुतप्रतिष्ठादेरेव भाव्यत्वकल्पनम् ।

तत्र त्वियं व्यवस्था । यत्र श्रुतानामेव पदानां लक्षणया फल-परत्वसम्भवो यथोदाहृते वाक्ये तिप्प्रत्ययस्य लडर्थत्वं कल्पयित्वा भविष्यत्कालवृत्तित्वेन साध्यत्वावगतौ प्रतिष्ठादिस्वाभाव्यादौचित्यत्व-

सिद्धा भाव्यत्वम् । धातोरेव वा समंतत्वं परिकल्प्येच्छाविषयत्वावगतौ स्वर्गादिवदेव साध्यत्वावगतिः । तत्र प्राथमिकफलापेक्षायां श्रुत-वाक्यस्यैव लक्षणया फलपरत्वे प्रमिते पश्चात् स्तुत्यपेक्षायां अप्राप्ति-फलत्वविधेरेव स्तावकत्वम् ।

यत्र श्रुतेष्वर्थवादपदेषु न स्तावकत्वकल्पनां विना फलपरत्व-मात्रेणोपपत्तिः, यथा यदष्टाकपालो भवति गायत्रियैवैनमित्यादौ । तत्र तेषां स्तावकत्वमेव । फलाकाङ्क्षायां तु उपस्थितपदसमान-जातीयपदान्तरस्यैव कामपदयुक्तस्य कल्पनेति न सर्वथा स्वर्ग-प्रयुक्तत्वम् ॥ ४ ॥ ३ ॥ ८ ॥

काम्ये ॥ यत्र श्रुतब्रह्मवर्चसादिफलकेष्वपि शास्त्रस्य महा-विषयत्वलाभार्थं स्वर्गफलकत्वकल्पना । ब्रह्मवर्चसादिकन्त्वायुरादि-वदानुषङ्गिकम् । तत्र किं वाच्यम् । रात्रिसत्र इति शङ्काभ्रान्द-विषन्यायेन शिष्यहितार्थं परिहर्त्तुं सूत्रम् । फलाकाङ्क्षायाः श्रुत-पदेनैव शान्तेरुद्देश्यानेकत्वनिमित्तकवाक्यभेदप्रसङ्गाच्च न स्वर्गकल्पना । महाविषयत्वाभावस्तु विशेषश्रवणे न दोषः । आयुरादौ प्रमाण-द्वयसत्त्वादानुषङ्गिकत्वेऽपि प्रकृते तदनुपपत्तेश्च ॥ ४ ॥ ३ ॥ ९ ॥

सार्वकाम्यं ॥ एकैकस्मै कामायान्ये यज्ञक्रतव आह्रियन्ते सर्वेभ्यो-ज्योतिष्टोमः, एकैकस्मै कामायान्ये यज्ञक्रतव आह्रियन्ते सर्वेभ्यो-दर्शपूर्णमासाविति श्रुताभ्यां वचनाभ्यां संयोगपृथक्त्वन्यायेन सर्व-फलार्थत्वम् । न तु तत्तत्प्रकरणस्थगुणकामानामपि दर्शादिप्रयोज्य-त्वात्तदभिप्रायेणानुवादत्वम् । वैयर्थ्यादौपचारिकत्वाङ्गीकारे ताद-र्थ्यस्य प्रमाणाभावाच्च । अतोऽप्राप्तार्थत्वादेव विधिभावनावाच्य-

पदाध्याहारेण सर्वफलार्थत्वेन विनियोगः। न चैवं स्वर्गार्थत्वबोधकविधिवैयर्थ्यम्। गोबलीवर्दन्यायेन भिन्नविषयत्वकल्पनयाऽभ्युदयशिरस्कत्वार्थत्वोपपत्तेः।

अत्र चाविशेषत्वात् सर्वफलानि ज्ञेयानि। न तु यान्यर्थवादगतानि अन्यशब्दस्य सदृशत्राचित्वाज्ज्योतिष्टोमदर्शपूर्णमाससदृशसोमयागान्तरेष्वन्तरजन्यफलानि, तन्मात्रपरस्तत्र तत्र यथायोगं सर्वशब्दः। अर्थवादस्य स्तुत्यर्थत्वेनैवोपपत्तौ हारियोजनगतसर्वशब्दन्यायेन सङ्कोचकत्वानुपपत्तेः। अत एव सर्वशब्दस्य सर्वनामत्वाद्वैदिकफलमात्रपरत्वमपि नाशङ्क्यम्। वैदिकानामपि पूर्वमनुपस्थितत्वात्। कथञ्चिदुपस्थितेर्लौकिकेऽप्यविशेषात्। यानि तु शशविषाणप्राप्त्यादीनि केनापि प्रमाणेनाप्रसिद्धानि, तेषां न सर्वशब्देन ग्रहणम्।

यत्त्वतीन्द्रियार्थापरोक्षज्ञानत्वलक्षणसार्वज्ञ्यादेरपि न सर्वशब्देन ग्रहणं, तस्य लोकवेदयोः क्वचिदप्युपायान्तरजन्यत्वादर्शनादित्युक्तं तन्त्रसार-तन्त्ररत्नादौ। तत् प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानं, भुवनज्ञानं सूर्यसंयमादित्यादिपातञ्जले ;

चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि।
मां तत्र मनसा ध्यायन्विश्वं पश्यति चक्षुषा॥

इत्यादिपुराणेषु च सिद्धिमात्रे योगधारणाविशेषस्य साधनत्वेनोक्तत्वादुपेक्षितम्। निरतिशयसार्वज्ञ्यस्याजन्यत्वेऽपि भुवनज्ञानादेः सम्भवेन ग्रहणोपपत्तेः। न चैवमपि मन्वादीनामपि सर्वज्ञत्वोपपत्तेः स्मृतीनां वेदमूलत्वानापत्तिः। अष्टकास्वर्गसाधनत्वस्य प्रमाणान्तरेणासिद्धौ योगेनापि द्रष्टुमशक्यत्वात्॥४॥३॥१०॥

तत्र सर्वे॥ एकस्मिन् प्रयोगे किं सर्वाणि फलान्युत्पद्यन्ते उतैकमिति चिन्तायाम्। सर्वस्यैकोद्देश्यतावच्छेदकत्वेन कार्यतावच्छेदकत्वात्कारणेन च तदवच्छिन्नोत्पत्तिनियमात्सर्वाण्युत्पद्यन्ते। अस्तु वा तच्छब्दादाविव पुत्रत्वादिनैवोद्देश्यता। सर्वत्वञ्च तद्विशेषणत्वादविवक्षितम्। तथाप्येकस्मिन् प्रयोगे कारणसत्त्वात्सकलकार्योत्पत्तौ बाधकाभावः। न ह्येकं कारणं कार्यद्वयं नोत्पादयति। एकस्माद्यपि* घटाद्रसरूपक्रियाद्यनेकोत्पत्तिदर्शनात्।

एककार्यतावच्छेदकावच्छिन्नोत्पत्तौ तदवच्छिन्नान्तरस्यानुत्पत्तिदर्शनात्तु पुत्राद्यन्तरन्नोत्पद्यताम्। कार्यतावच्छेदकान्तरावच्छिन्नस्य तु पश्चाद्युगपत् क्रमेण वोत्पत्तौ बाधकाभावः। न च सर्वेषां युगपत्कामनाऽभावादनुत्पत्तिः। कामनायाः कर्माङ्गत्वे फलं प्रति जनकत्वे वा प्रमाणाभावेन तदभावेऽप्युत्पत्तौ बाधकाभावात्। प्रवृत्तिं प्रति परं फलेच्छायाः कारणत्वादन्यतरफलेच्छामात्रेण प्रवृत्तौ जातायां कारणसत्त्वेन सर्वकार्योत्पत्तौ न किञ्चिद्बाधकम्। अतएव विध्यवगतसमीहितसाधनत्वमप्यन्यतरसमीहितत्वबोधनेनोपपन्नम्। न च सर्वफलोत्पत्तौ तेषां भोक्तव्यत्वेन मोक्षानुपपत्तिरिति तन्त्रसारोक्तं युक्तमिति वाच्यम्। ज्ञानेन तदपूर्वाणां नाशात्।

यदा स्वर्गवाक्यवैयर्थ्यापत्तेस्तस्यैव मुख्यफलत्वम्। अन्येषान्त्वेकैकस्मै कामायेत्यर्थवादादन्ये क्रतव एकैकस्मै, अयन्तु नैकैकस्मा एव, किन्तु सर्वेभ्योऽपीत्यर्थावगतेरानुषङ्गिकत्वमिति तन्त्रसारोक्तमाश्रीयते।

---

* इत्थमेव पाठः सर्व्वत्र। एकस्मादपि,—इति तु भवितुमुचितम्।

तदा तेषां कामनाऽभावेऽप्यायुरादिवदुत्पत्तौ नैव किञ्चिद्बाधकम्। वस्तुतस्तु सर्ववाक्यस्याभ्युदयशिरस्कत्वेनाप्युपपत्तेरर्थवादस्य च साध्यत्वसमुच्चायकत्ववन्मुख्यत्वसमुच्चायकत्वस्याप्युपपत्तेरिदं मतमुपेक्षितमिति पूर्वोक्तयुक्त्यैव सर्वोत्पत्तिः। अस्तु वा अकाम्यमानस्यानुत्पत्तिः। तथापि यत्र द्विरात्राणामेव फलानां कामना, तत्र तावतामुत्पत्तिः केन वार्यते। न चायमेव सिद्धान्त इति तन्त्रसारोक्तं युक्तम्। भाष्यादिष्वकथनेनापसिद्धान्तात्।

अत एव यद्यप्यनुपस्थितत्वान्न पुत्रत्वादिकमुद्देश्यतावच्छेदकम्। सर्वशब्दस्य विशेष्यसाकाङ्क्षत्वान्न सर्वत्वमपि। अपि तु पूर्ववाक्ये कामशब्दोपादानात्तस्यैव सर्वशब्देन सर्वनाम्ना परामर्शात्कामनाविषयत्वमेवोद्देश्यतावच्छेदकं कार्यतावच्छेदकं चेत्याश्रीयते। तदापि यत्र समूहालम्बनात्मिकाऽनेकविषयिणी कामना, तत्र तावतामुत्पत्तिरनिवार्यैवेति प्राप्ते।

उक्तयुक्त्या प्रवृत्तिप्रयोजककामनाविषयत्वमेवोद्देश्यतावच्छेदकम्। अनुष्ठानोत्तरकालभाविकामनाविषयत्वावच्छिन्नोत्पत्तिवारणाय प्रवृत्तिप्रयोजकतया क्लृप्ताया एवोद्देश्यतावच्छेदककोटिप्रवेशार्थं प्रवृत्तिप्रयोजकेति कामनाविशेषणम्। अतस्तस्यानुष्ठानोपक्रमे या कामना तद्विषयत्वावच्छिन्नस्यैकस्यैवोत्पत्तिर्नान्यस्य।

न च समूहालम्बनस्थले विषयताया व्यासज्यवृत्तित्वादनेकोत्पत्तिप्रसङ्गः। समूहालम्बनज्ञान इव समूहालम्बनेच्छायामपि प्रत्येकविषयत्वस्यावश्यकत्वात्। इतरथा तादृशकारणात् समूहालम्बनात्मकयोरेव स्मृतियत्नयोरुत्पत्त्यापत्तेः। अत एककार्यताव-

च्छेदकावच्छिन्नस्यैवोत्पत्तिनियमादेकमृदादिभ्यो घटान्तरानुत्पत्ति-
वत्फलान्तरस्याप्यनुत्पत्तिरित्येकप्रयोगे एकमेव फलम्।

निमित्तस्थले च तस्यैव प्रवृत्तिप्रयोजकत्वात्पापक्षयकामनाया-
स्तत्त्वाभावेन पापक्षयस्योक्तविधकार्यतावच्छेदकावच्छिन्नत्वाभावेन
युगपन्नित्यकाम्यप्रयोगे पापक्षयेण सह स्वर्गादिफलोत्पत्तावपि न
क्षतिः।

अत एव स्वातन्त्र्येण यत्र विविदिषापरमेश्वरप्रीत्याद्यर्थत्वेन
तत्तद्विधिबलेन यज्ञानुष्ठानं, तत्र कारणसत्त्वेन स्वर्गाद्युत्पत्तौ
प्रसक्तायां, त्यक्त्वा कर्मफलासङ्गमित्यादि स्मृत्या फलान्तरद्वेष-
स्यापि तत्राङ्गत्वेन विधानादितरफलाभावविशिष्टविविदिषादेरेव
वा, अकामः सर्वकामोवेत्यादिना फलत्वाभिधानात् न तदुत्पत्तिः।
सार्वकाम्यवाक्येन पश्वाद्यन्यतरत् स्वर्गवाक्येन स्वर्ग इति तु दृष्टमेव।
इदमपि तु स्वर्गवाक्यस्य प्रयोजनमित्यपि ध्येयम्। प्रयोजनं, तत्त-
त्कामोल्लेखः॥४॥३॥१ १॥

एवं वा—

स्वर्गस्तावदामुष्मिक एव।

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्॥

इति वाक्यशेषावगतनिरतिशयप्रीतिरूपस्य तस्येह जन्मन्य-
सम्भवात्। तत्रार्थवादादौ* देशविशेषभोग्यत्वप्रसिद्धेश्च। पशु-
पुत्रादीनां लौकिकामुष्मिकत्वम्। न तु केवलामुष्मिकत्वम्। तत्रापि

* इत्यमेव पाठः सर्व्वत्र। तस्यार्थवादादौ,—इति तु समीचीनं प्रतिभाति।

भोगप्रतिबन्धकदुरितसत्त्वे तु आमुष्मिकत्वम्। तदभावे ऐहिकत्वमेव। न च कर्मणां शरीरान्तरारम्भद्वारैव फलसाधनतेत्यत्र किञ्चिन्नियामकमस्ति। येन केवलामुष्मिकत्वं भवेत्। न चैषां केवलैहिकत्वम्। इह जन्मनि पुत्रपशुराज्यादिसत्त्वे तदयोग्यत्वे वा जन्मान्तरे तन्मे स्यादिति कामनायादुरपह्नवत्वात्। अतोऽमुमूर्षुणाऽपि पश्वाद्यर्थं चित्राद्यनुष्ठेयमेव। यत्र तु वृष्ट्यादावैहिक्येव कामना, तत्र केवलैहिकत्वम्। अस्तु वा वृष्ट्यादेरपि तादृशकामनासत्त्वे उभयरूपत्वम्। केवलैहिकत्वं तु पुत्रगतपूतत्वादावाहवनीयादौ च द्रष्टव्यम् ॥४॥३॥१२॥

समवाये॥ अग्निं चित्वा सौत्रामण्या यजेत, वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यग्नि-वाजपेयप्रकरणे श्रुतम्। तत्र प्रकरणान्तरन्यायेन प्रसिद्धसौत्रामणी-बृहस्पतिसवापेक्षया कर्मान्तरमेव तत्तद्धर्मकं अग्नि-वाजपेय-पूर्वकालत्वविशिष्टं विधीयते। तस्य च फलापेक्षायां प्रकरणादिनाऽग्नि-वाजपेयाङ्गत्वमविवादमेवेति तत्तत्प्रयुक्तत्वं तत्तत्कर्मान्तरस्य। समाप्तेऽपि बृहस्पतिसवाद्यतिरिक्ताङ्गविशिष्टवाजपेयादिप्रयोगे तदुत्तराङ्गमिदं फलानुकूलयोग्यतायाः परमापूर्वनिष्ठायाजननार्थं न॰ विरुध्यते।

अत्र च पूर्वपक्षोनिर्बीजोगतार्थश्चेति नातीव तत्रादरः। तत्तदधिकरणादेः प्रयोजनमात्रं तु शिष्यहितार्थं कथ्यत इति द्रष्टव्यम्। एवं यत्राप्यन्यत्र पूर्वपक्षानुक्तिः, तत्रेदमेव प्रयोजनम्॥ ॥४॥३॥१३॥

उभयार्थं॥ दर्शपूर्णमासयोः, संस्थाप्य पौर्णमासीं वैमृधमनुवर्त्त-

यतीति श्रुतोवैमृधोऽपि प्रकरणादुभयोर्दर्शपूर्णमासयोरङ्गम् । न च वाक्येन पौर्णमासीमात्राङ्गत्वावगमः । वाक्यस्थ-पौर्णमासीपदस्य ल्यप्प्रत्ययोपात्तकालप्रतियोगिसंस्थापदवाच्यसमाप्तिविशेषणत्वेनाङ्गि-परत्वाभावात् । तत्त्वेऽपि वा संस्थाप्येतिपदस्य साकाङ्क्षताऽऽपत्तेः । न च फलापेक्षायामङ्गार्थमप्युपात्तस्योपस्थितत्वाद्रात्रिप्रतिष्ठावत्तद्वाचक-पदान्तरकल्पनया पौर्णमासीमात्राङ्गत्वमिति वाच्यम् । प्रयाजादि-वत्प्रकरणेनोभयार्थत्वक्लृप्तौ भ्रातृव्याभिभूतिवदेव पदान्तरकल्पनाऽनुप-पत्तेः । अतः स्वतन्त्रकालविधानात् पौर्णमास्युत्तरमेव तद्दिने क्रिय-माणोऽयमुभयाङ्गमुभयप्रयुक्त इति प्राप्ते ।

प्रयाजेष्वक्लृप्तभ्रातृव्याभिभूतेः कल्पने गौरवात् युक्तं विलम्बोप-स्थितस्यापि क्लृप्तक्रतूपकारस्यैव फलत्वम् । प्रकृते पौर्णमास्युपकारस्यापि क्लृप्तत्वाद्युक्तं स्ववाक्योपस्थिततत्पदकल्पनया वाक्येनैव तन्मात्रार्थत्वम् । अतश्चात्र पौर्णमासीप्रयोगसमाप्त्युत्तरकालविशिष्टं कर्मैव पौर्ण-मास्युद्देशेन विधीयते । न चैवं तस्यापि विकृतित्वादतिदेशेन य इष्ट्येति वचनेन वा अमावास्याकालकत्वापत्तिः । अनुशब्देन पौर्णमास्यानन्तर्यस्यापि विधेयत्वेन तद्बाधात् । न चैवमप्यनुनि-र्वाप्यदेविकाहविर्वत् प्रधानमात्रोत्तरत्वस्यैवापत्तेः प्रयोगबहिर्भावाना-पत्तिः । संस्थाप्येत्यस्य वैयर्थ्यापत्तेः, यच्छकुयात्तद्दद्यादिति दक्षिणा-भेदाम्नानाच्च, प्रयोगभेदस्य सङ्कर्षे वक्ष्यमाणत्वात् ।

उपयोगस्तु परमापूर्वजननानुकूलायां फलानुकूलायामेव वा समुदायापूर्वनिष्ठायां योग्यतायां द्रष्टव्यः । प्रयोजनं, पूर्वपक्षे अमा-वास्यायां तन्त्रमध्ये वैमृधः कार्य इति तन्त्रसारः । तत्र, स्वतन्त्र-

कालक्रमयोराम्नानात् । अतोऽमावास्याविकारेष्वतिदेशः प्रयोजनम् । यदा तु पार्वणहोमवदस्यापि विकृतावतिदेशो नेष्यते, तदा सङ्कल्पे उभयोरुल्लेखः, सिद्धान्ते पौर्णमासस्यैवेति द्रष्टव्यम् ॥४॥३॥१४॥

अनुत्पत्तौ ॥ सोमे, प्रहृत्य परिधीन् हारियोजनं जुहोति, आग्निमारुतादूर्ध्वमनूयाजैश्चरन्तीति श्रुतम् । तत्र प्रहरणान्तावद्-द्वितीयया परिधिसंस्कारकम् । परिधयश्च यद्यपि न सोमयागाङ्गं, तथापि तदङ्गभूतसवनीयाद्यङ्गत्वेन प्राप्ता एवेति तेषां फलवत्त्वम् । अतश्च हारियोजनस्यापि यद्यपि नेदमुत्पत्तिवाक्यं, तथापि तदुत्पत्तिवाक्ये फलाश्रवणात्तस्य परिधिप्रहरणाङ्गत्वम् । यद्यपि चायं सोमयागाभ्यास एव, तथाप्येतदभ्यासस्य परिधिग्रहणाङ्गत्वम् । अभ्यासान्तराणां स्वर्गाद्यर्थत्वेऽपि उद्गात्रपच्छेदनिमित्त-पुनःप्रयोगस्येव न विरुध्यते ।

एवं द्वितीयवाक्ये अनूयाजायद्यपि न सोमयागे प्रकृताः, तथापि तदङ्गसवनीयाद्यङ्गत्वेन सन्त्येव फलवन्तः । आग्निमारुतशस्त्रस्य तु यागवत्प्रकरणात्[१] क्रत्वङ्गत्वं कल्प्यते, तावद्वाक्येनैवानूयाजाङ्गत्वम् । न वा तत्र वैमृधवत्पदान्तरकल्पनाऽपि । अङ्गभूतकालविशेषणत्वेनैवाङ्गत्वोपपत्तेः । न च वैमृधवदस्यानुत्पत्तिवाक्यत्वादुत्पत्तिवाक्ये च फलाकाङ्क्षायां प्रकरणात् क्रत्वङ्गत्वकल्पनेति मूलोक्तं युक्तम् । उत्पत्तिवाक्ये तदपेक्षायामपीष्टिसामान्यस्य भाव्य-

---

(१) इत्थमेव पाठः सर्वत्र । मम तु, यावत् प्रकरणात्,—इति पाठः प्रतिभाति ।

त्वमङ्गीकृत्य वाक्यान्तरेण विनियोगोपपत्तौ दुर्बलप्रमाणेनाङ्गत्वकल्प-
नाऽनुपपत्तेरिति प्राप्ते।

हारियोजनस्य तावज्ज्योतिष्टोमत्वेनैव स्वर्गादिरूपस्य फलस्य
कॢप्तत्वान्न वैमृधन्यायेन पदान्तरकल्पनया प्रहरणाङ्गत्वे प्रमाणमस्ति।
आग्निमारुतस्य यद्यपि विशिष्य वाक्येन न क्रत्वङ्गत्वम्, तथापि
द्वादशस्तोत्रोऽग्निष्टोम इत्याद्यनन्यथासिद्धलिङ्गोपष्टब्धप्रकरणवशेनैव
क्रत्वङ्गत्वसम्भवे वाक्येनाङ्गत्वकल्पनाऽयोगात्।

वस्तुतस्तु, प्राप्तानूयाजोद्देशेनोर्ध्वत्वस्याग्निमारुतस्य च विधौ
वाक्यभेदापत्तेः परस्परान्वयवादिनां प्राचामपि विशेषणविधि-
कल्पनागौरवापत्तेर्नानेन वाक्येनाग्निमारुतस्यानूयाजाङ्गत्वेन विधा-
नम्। अत एवाग्निमारुतादूर्ध्वमित्यत्र पदद्वयेन लक्षणया तत्प्र-
तियोगिकोर्ध्वकाल एवानूयाजोद्देशेन विधीयते। दर्शपूर्णमा-
साभ्यामिष्ट्वेत्यादौ तु तृतीयान्तस्येष्ट्वेत्यत्रैवान्वयान्न लक्षणेति
ध्येयम्।

वस्तुतस्तु, न प्रकृतेऽपि लक्षणा, तां चतुर्भिरितिवदिष्टि-
भावनाबोधेऽप्यूर्ध्वत्वमात्रविधिफलतया विधेयानेकत्वाभावात्। प्रयो-
जनं, पूर्वपक्षे सवनीयविकारे 'सोमयाजानङ्गे हारियोजनाग्निमा-
रुतयोः करणं, सिद्धान्ते नेति ॥४॥२॥१५॥

उत्पत्ति॥ सोमप्रकरणे एव, दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन
यजेतेति श्रुतम्। तत्र यद्यपि फलार्थतया सोमयागस्य कॢप्तत्वात्
प्रकृते प्रत्यभिज्ञानबलेन न कर्मान्तरत्वशङ्का, तथापि प्रकरणान्त-
रन्यायेन दर्शपूर्णमासधर्मकस्यैव कर्मान्तरस्य फलवत्सोमयागोद्देशेन

विधेयपूर्वकालविशेषणतया विधानम् । न चात्र वाक्यभेदः । परस्परान्वयस्य व्युत्पन्नत्वादिति प्राप्ते ।

सर्वेभ्यो दर्शपूर्णमासावित्यादौ आख्यातासमानाधिकरणत्वेन व्यवहितपरामर्शकत्वस्य कौस्तुभादौ स्थापितत्वात्कर्मान्तरत्वानुपपत्तेः स्वफलप्रयुक्तदर्शपूर्णमासपूर्वकालत्वस्यैव सोमयागोद्देशेन विधानमिति कालार्थ एवायं संयोगः । प्रयोजनं, पूर्वपक्षे सोमारम्भात् पूर्वस्मिन् पर्वणि दर्शपूर्णमासधर्मकं कर्मान्तरं सद्यस्कालं कृत्वा शुद्धकालं दर्शो वा पूर्णमासो वा कार्यः, सिद्धान्ते नेति ॥४॥३॥१६॥

फलसंयोगः ॥ वैश्वानरेष्टिस्तावत् पूतत्वाद्यार्थवादिकफलार्था । सत्यपि निमित्तसंयोगेनाकरणे प्रत्यवाये भावनाभाव्यत्वेन पापक्षयापेक्षया पूतत्वादेरेव लघुभूतस्यान्वयात् ।

तत्र पुत्रगतपूतत्वादिफलप्रयुक्ता सा, उत कर्तृगतपूतत्वादिप्रयुक्तेति चिन्तायाम् । विधानात् कर्तृसमीहितस्यैवाक्षेपादाधानगतात्मनेपदेन चाग्निप्रयोज्यफलस्याधातृगामित्वावगतेरिष्टिकर्त्तुर्यैव फलम् । न च यस्मिन् जाते इत्यादिना धर्मिग्राहकप्रमाणेन पूतत्वादेः पुत्रगतत्वावसायः । तस्यापि स तेजस्वीति सर्वनाम्ना निर्वपतिकर्त्तुरेव समानाधिकरणविभक्तिनिर्दिष्टस्य परामर्शनाविरोधित्वादिति प्राप्ते,।

यच्छब्दसमभिव्याहारे सति तच्छब्दस्य तदर्थपरामर्शित्वनियमेन पुत्रगतपूतत्वादेरेव फलत्वावसायात्तस्यापि कर्तृसमीहितत्वेन विध्यात्मनेपदयोरविरोधात् पुत्रगतपूतत्वादिप्रयुक्तैव सा । प्रकरणे

प्रत्यवायस्तु कर्त्तृनिष्ठ एव। प्रयोजनं, पुत्रमरणेऽपि जातेष्टिः पितरि फलिसंस्काराय पूर्वपक्षे, सिद्धान्ते नेति ॥४।३॥१७॥

एवं वा—

इयमिष्टिः पुत्रजननानन्तरमेव कार्या सप्तम्या जननस्य निमित्तत्वावगमेन निमित्तानन्तरं नैमित्तिकस्योचितत्वात्। न चात्र सप्तम्या जननोत्तरकालविधिरिति तन्त्रसारोक्तं युक्तम्। पुत्र इति सामानाधिकरण्यानुपपत्तेः। अतोभिन्न इतिवन्निमित्तपरैव सप्तमी। सापेक्षत्वाच्च हविरार्त्तिन्यायेनोभयविवक्षा। यद्यपि पुत्रमात्रं निमित्तं स्यात्तथापि निमित्तानन्तर्यलाभेन नैमित्तिकस्याशौचकालबाधेनाप्यनन्तरमेव करणम्।

न च स्तन्यपानाभावे पुत्रमरणेन श्रेष्ठिविरोधापत्तिः। जातकर्माङ्गभूतस्य घृतमधुप्राशनपूर्वकस्य वैधप्राथमिकदक्षिणस्तन्यप्राशनस्यौत्तरकालिकत्वेऽपि रागतोयत्किञ्चित्प्राशनस्य सम्भवेन मरणानापत्तेः। न च जननानन्तर्यस्य जातकर्मण्यप्यावश्यकत्वादविनिगमनाविरहः। प्रत्यक्षश्रुतिविहितत्वस्यैव विनिगमकत्वादिति प्राप्ते।

जातकर्मणोनालच्छेदपूर्वभावविधानात्, अच्छिन्ननालस्य च प्राशननिषेधादिष्टेर्जननानन्तरमेव करणे मरणापत्तेः श्रेष्ठिविरोधापत्त्योत्कर्ष एव। तच्च निमित्तश्रुत्यनुरोधेन स्मार्त्तनिषेधस्यानाहिताग्निपरत्वम्[१]। भूतनिमित्तस्थले निमित्तस्य नैमित्तिकानुष्ठाप-

---

(१) इत्थमेव पाठः सर्व्वत्र। मम तु, ततश्च निमित्तश्रुत्यनुरोधेन स्मार्त्तनिषेधस्य नाभाहिताग्निपरत्वम्,—इति पाठः प्रतिभाति।

समाप्ते विधेस्तात्पर्येणानन्तरानुष्ठानस्यासति बाधके उत्सर्गसिद्धत्वेन निमित्तश्रुत्यनुरोधान्निषेधसङ्कोचानुपपत्तेः।

वस्तुतस्तु, निमित्तत्वमनन्तरावश्यानुष्ठापकत्वमेव। अन्यथा भेदनहोमादेरपि पदार्थगतक्रमबाधानुरोधेनान्ते करणापत्तेः। जातकरणनामकरणादौ मलमासादावनुष्ठानानुपपत्तेश्च। अतो निमित्तश्रुतिविरोधेऽपि जातकर्मणोऽपि निमित्तानन्तर्यश्रवणादवश्यमन्यतरस्य तद्बाधे निषेधस्यापि सङ्कोचापत्त्या जातेष्टावेव तद्बाधः। वरं हि स्मार्त्तानामप्यनेकेषां बाधे श्रौतस्याप्येकस्य बाधः। प्रमेयबलाबलस्य बलवत्त्वात्। अतोयत्रैवैतादृशबलवद्बाधकं कालविधिर्वाऽगत्या तत्रैवानन्तर्याघटितमेव निमित्तत्वं लक्षणयाऽऽश्रीयते। अतश्च तत्रातिदेशप्राप्तानां सामान्यविहितानां वा शौचकालादीनां बाधे प्रमाणाभावादाशौचापगमे मलमासादिरहिते शुद्धे पर्वणि जातेष्टिः कार्या॥४॥३॥१८॥

प्रधानेन॥ बृहस्पतिसवोवाजपेयोत्तरं शरद्येव कार्यः। यद्यपि हि क्त्वाप्रत्ययेन नानन्तर्यमभिधीयते, पूर्वकालमात्रे स्मरणात्। तथाप्यौपदेशिकशरत्कालस्य साङ्गप्रधाने विहितत्वेनाग्निः प्रयाजादिष्विवाग्नेरिवातिदेशिकस्य वसन्तादिकालस्य बाधोपपत्तिः। एवं सौत्रामण्यपि चयनाङ्गत्वात्तदुत्तरकालमेव कार्या। न तु पर्वणि यागप्रयोगोत्तरकालीना। तदानीं चयननियमादृष्टस्य नष्टत्वे सौत्रामण्या अनुपयोगात्। न हि स क्त्वर्थः, धातुसम्बन्धाधिकारविहितेन क्त्वाप्रत्ययेन चयनमात्राङ्गत्वप्रतीतेरिति प्राप्ते।

शरत्कालस्य वाजपेयप्रयोगविशेषणत्वेन विधेयत्वाद्वाजपेयेने-

इति तृतीयया च वृहस्पतिसवस्य तद्वहिर्भावावगतेस्तत्र शर-द्विध्यभावात्कालापेक्षायां नामातिदेशप्राप्तवसन्तादिकालबाधे प्रमा-णाभावः । एवं सौत्रामण्यामपि पर्वबाधे । अग्निं चिन्वीतेत्यनेन हि चयनेन क्रतुपूर्वसाधनीभूताग्निं संस्कृत्येत्यर्थावगतेरग्न्याधानभाव-नोत्तरकालत्वसिद्धिः । न चानुपयोगः । चयनप्रयोज्यक्रतुपूर्वं एवो-पयोगेऽपि चयनाङ्गत्वोपपत्तेः । न त्वेतावता क्रत्वङ्गत्वमिति तन्मध्या-रोक्तं मन्तव्यम् । प्रमाणाभावात् । क्रत्वङ्गं वा चित्यङ्गत्वेनोपपद्यत-इति सङ्कर्षसूत्रं क्रतुपूर्वोपयोगाभिप्रायं व्याख्येयम् । अत एतेऽपि कालप्रयोजकाः ॥४ ३॥१९॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
चतुर्थस्य तृतीयः पादः ॥

अथ चतुर्थस्याध्यायस्य
चतुर्थः पादः ।

प्रकरणं ॥ राजसूयप्रकरणे, इष्टिपशुसोमयागा अथायास्य होमविदेवनादयः सर्वे फलाकाङ्क्षा अपि श्रुतेन न स्वाराज्येन फलेन सम्बध्यन्ते । भावार्थाधिकरणन्यायेन यजेरेव फलभावनाकरणत्वाद्यागानान्तदङ्गत्वोपपत्तेः । राजसूयपदस्य यजिसामानाधिकरण्येन तन्मात्रनामत्वाच्च । न च राजा सोमः सूयतेऽभिषूयते अस्मिन्निति व्युत्पत्त्या राजसूयशब्दस्य सोमयागमात्रवाचित्वात्तेषामेव फलसम्बन्धोऽस्त्विति वाच्यम् । राज्ञा क्षत्रियेण सूयते निष्पाद्यत इति व्युत्पत्त्या सर्वेष्वप्यनुपपन्नत्वेन(१) यजिसङ्कोचे प्रमाणाभावात् । अत एव राजा क्षत्रियः सुनोति स्नाति यत्रेति व्युत्पत्त्याऽभिषेचनीय एव तन्मात्रे रूढस्तोचकालाभिषेकवत्त्वसम्बन्धेन राजसूयपदप्रसिद्धेस्तस्यैवफलसम्बन्ध इत्यपास्तम् । उक्तव्युत्पत्त्या सर्वपरत्वसम्भवे यजिसङ्कोचे प्रमाणाभावात् । अतः सर्वे यागा एव फलप्रयुक्ता इति विदेवनादीनान्तदङ्गतावतिदेशः ॥ ४ ॥ ४ ॥ १ ॥

मध्यस्थं ॥ विदेवनादीनामङ्गत्वे सिद्धे सन्निधानादवान्तरप्रक-

---

(१) असमीचीनोयं पाठः सर्व्वेष्वप्युपपन्नत्वेन,—इति तु समीचीनः प्रतिभाति ।

रणाद्वाऽभिषेचनीयमात्राङ्गत्वस्य तृतीये एव निराकृतत्वात्सर्वराज-सूयाङ्गत्वस्यैव महाप्रकरणादवगतेः सर्वप्रयुक्तत्वम्। तार्त्तीयाधिक-रणप्रयोजनकथनार्थश्चेदमधिकरणम् ॥४॥४॥२॥

प्रकरणविभागे॥ राजसूये एव, सौम्यश्चरुर्भवति दक्षिणेति विधाय, पुरस्तादुपसदां सौम्येन प्रचरतीति श्रुतम्। तत्रापि सत्यप्युपसदां राजसूयान्तर्गतदशपेयाख्यसोमयागाङ्गतया फलवत्त्वे चरोः पुरस्ता-च्छब्दवैयर्थ्यप्रसङ्गेन वच्यतमर्थप्रत्ययेनेति सूत्रानुसारात् दिग्योगनि-मित्तायास्तादर्थ्यपरत्वाभावात्सौम्यस्यैतदर्थत्वानुपपत्तेर्वैमृधवत्पदान्तर-कल्पनया तदर्थत्वस्य चानुत्पत्तिवाक्यतयाऽनुपपत्तेरुत्पत्तिवाक्ये च फलापेक्षायां सामान्यविधिनाऽपि कृत्स्न स्वाराज्यफलार्थत्वस्यैवावग-मात्कालार्थ एव संयोगः।

वस्तुतस्तु, उत्पत्तिवाक्येऽपि प्रवर्ग्यन्यायेन तन्निष्ठफलवत्त्वज्ञानस्य स्वाराज्यवाक्याधीनत्वात्तदर्थत्वमेव युक्तम्। अतः सौम्यः फलप्रयुक्त एव पाठक्रमात् स्वपूर्वपठितकर्मानन्तरं कर्त्तव्यत्वेन प्राप्नोति देश-प्राप्त्योपसत्पूर्वं विधीयते। ततश्च न तद्विकृतौ कर्त्तव्यः। पूर्वपक्षे-ऽस्यापि तद्विकृतौ कर्त्तव्यता प्राप्ताऽपोद्यत इति सङ्गतिः। तेन संगत्यभावादिदमधिकरणं त्रिदेवनाधिकरणात् पूर्वं द्रष्टव्यमिति तन्मतसारोक्तिः परास्ता। आचार्योक्तत्वादिति हेतूक्तिस्त्वनुपलब्धि-बाधितैव ॥४।४॥३॥

फलवद्वा॥ वैश्वदेवीं साङ्ग्रहणीं निर्वपेद्ग्रामकाम इति प्रकृत्यामनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोतीति श्रुतम्। तत्रामनहोमानां साग्रहण्यङ्गत्वम्। तस्याविकृतित्वेन प्रकरणा-

भावेऽपि सन्निधानादेव तदङ्गत्वोपपत्तेः । यत्प्रयाजानां पुरस्ता-ज्जुहुयाद्बहिरात्मनः सजातानां दध्याद्यदनूयाजानामुपरिष्टाज्जुहुयात् स्वर्गलोकमपक्रामेन्मध्ये जुहोतीति प्रकृताङ्गमध्यवर्त्तित्वश्रवणादपि तदुपपत्तेश्च ।

वस्तुतस्त्वकाङ्क्षाऽनुवृत्तौ प्रमाणाभावान्नेदं प्रकरणमिति ध्येयम् । एवं प्रयोजनवत्त्वोपपत्तौ न ग्रामकामपदानुषङ्गेण स्वतन्त्रफलार्थत्व-कल्पना । प्रमाणाभावात् । इध्माङ्गपरिधिपरिधानाङ्गभूतवैशेषिक-मन्त्रैर्व्यवायाच्च । अतः सांग्रहणीप्रयुक्ता एव ते । न तु सौम्यवत्स्व-तन्त्रप्रयुक्ताः । अतः सर्वदैव प्रयाजानूयाजमध्येकर्त्तव्या न तु ग्रामान्त-रकामनायामेव ॥४॥४॥४॥

दधिग्रहः ॥ सोमे, यां वै काश्चिदध्वर्युश्च यजमानश्च देवता-मन्तरितस्तस्या आवृश्च्यते प्राजापत्यं* दधिग्रहं गृह्णातीति दधि-ग्रहो नैमित्तिक एव । यद्यपि चायं यच्छब्दो न निमित्तत्वप्रतिपा-दकः, देवतापदसमभिव्याहृतस्य तस्यान्तरायनिष्ठनिमित्तत्वाप्रतिपा-दकत्वात् । देवतायाश्चान्तरायाश्चितायानित्यायाः स्वरूपेण निमि-त्तत्वायोगाच्च । तथापि देवतान्तरायनिमित्तदोषपरिहारफलत्वाव-गमात्तस्य च कादाचित्कत्वान्नैमित्तिकत्वम् । अर्थवादान्वयार्थं यदा तदा पदाध्याहारस्यावश्यकत्वाद्वा नैमित्तिकत्वम् । ज्येष्ठो ह वा एष ग्रहाणां यद्दधिग्रह इति तु वैगुण्यपरिहारार्थत्वेनापि श्रेष्ठत्वादुपपन्नमिति प्राप्ते ।

---

* तस्या आवृश्च्येत यत्प्राजापत्यं,—इति भाष्यधृतः पाठः।

न तावदार्थवादिकं फलं, पर्णमयीन्यायविरोधात् । अर्थवादान्वयस्तु, यत्र देवताभावे प्रधानस्यैव लोपापत्तेस्तन्निमित्तकमपि वैगुण्यं परिह्रियते, तत्रेतराङ्गवैगुण्यपरिहारे प्रधानसाद्गुण्ये वा का सम्भावनेत्येवं नानुपपन्नः । न चान्तरायजनितवैगुण्यध्वंसस्य क्लृप्तत्वेन तं प्रत्येवार्थवादिकफलजनकत्वस्य कल्पनयोपपत्तौ द्वारीभूतादृष्टान्तरकल्पने गौरवमिति वाच्यम् । ज्येष्ठत्वसंस्तवस्याङ्गस्यानुपपत्तेः । पक्षद्वयेऽप्यन्यतरार्थवादस्यानाङ्गस्यावश्यकत्वे प्रकरणपाठस्य पाक्षिकत्वपरिहारार्थं अन्तरायार्थवादस्य तदौचित्याच्च । लाघवस्य प्रमाणानुग्राहकत्वेन प्रमाणविरोधेऽकिञ्चित्करत्वात् । अतो देवतान्तरायनिमित्तवैगुण्यपरिहारस्य दधिग्रहेण कर्त्तुमशक्यत्वान्नित्यमेवाङ्गं दधिग्रहः ॥४॥४॥५॥

वैश्वानरः* ॥ अग्नौ, यो वै संवत्सरमुख्यमभृत्वाऽग्निञ्चिनुते यथा सामि गर्भो विपद्यते तादृगेव तदार्त्तिमार्च्छेद्वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेदिति श्रुतो यागस्तालस्यादिना वत्सरपर्यन्तमुख्यधारणासम्भवे प्रायश्चित्तरूपः नैमित्तिक एव । कर्त्तृसमानाधिकरणेन यच्छब्देन क्रियाकर्त्तृत्वस्योद्देश्यत्वावगमान्निमित्तत्वप्रतीतेः । अतोभेदनहोमादिवदयं सम्वलितक्रतुनिमित्तोभयप्रयुक्तः ॥४॥४॥६॥

षट्चितिः ॥ योऽग्निञ्चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथ षष्ठीञ्चितिञ्चिनुत इति श्रुता षष्ठी चितिरपि उपक्रमस्थकर्त्तृसमानाधिकरण-यच्छब्दबलेनाप्रतिष्ठाया निमित्तत्वावगतेर्नै-

---

* वैश्वानरो,—इत्यशुद्धः पाठ आदर्श पुस्तकेषु । वैश्वानरश्च नित्यः स्यान्नित्यैः समानसंख्यत्वादिति हि सूत्रम् ।

मित्त्येव। यत्तूपसंहारे षष्ठीमिति षष्ठ्यां पूरणार्थकः प्रत्ययः, सोऽभिधानापेक्षो न त्वनुष्ठानापेक्षः। पञ्च चितयः पूर्वमभिहिता इदानीमियं षष्ठ्यभिधीयत इति। तस्मादग्निचयनोत्तरमप्रतिष्ठायां निमित्ते एकैव चितिरियमदृष्टार्था, चयनाङ्गतया प्रयोगभेदेन प्रतिष्ठाफलार्थतया वा विधीयते ॥४॥४॥७॥

पितृयज्ञः॥ अनारभ्य श्रुतममावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति। तत्रायं पिण्डपितृयज्ञः दर्शाङ्गम्। अमावास्यापदेन कर्मवाचिना तत्र जयां जुहुयादितिवद्वाक्याद्दर्शाङ्गत्वप्रतीतेः। यद्यपि चायं कालेऽपि मुख्यस्तथापि फलकल्पनाभिया अत्र कर्मपरत्वमेव युक्तम्। यद्यपि काले एव मुख्यः कर्मणि तद्योगान्निरूढलक्षणा, प्रकृते च कालपर एव अपराह्णसामानाधिकरण्यात्। तथापि तस्मात्पितृभ्यः पूर्वेद्युः करोतीति वाक्ये दर्शेष्टिपूर्वेद्युःकालश्रवणादैन्द्रधन्यायेन दर्शेष्टेरुपस्थितत्वात्तदङ्गत्वमिति प्राप्ते।

अमावास्याशब्दस्य कर्मपरत्वं भवतैव निराकृतम्। लक्षणा तु प्रमाणाभावात्कालसामानाधिकरण्यविरोधाच्च दूरापास्तैव। पूर्वेद्युर्वाक्यमपीष्टेरनुपस्थितत्वाच्च तत्प्रतियोगिकं कालं विधत्ते। अपि तु तिथिद्वैधे पूर्वेद्युः कालम्,

यदा ऽस्तं सविता याति पितरस्तामुपासते।

इति स्मृतिप्राप्तमनूद्य देवतामात्रम्। केचित्तु द्वैधे चन्द्रदर्शनात् पूर्वेद्युरिति व्याख्याय खण्डपर्वणि परेद्युः पितृयज्ञमनुतिष्ठन्ति।

सर्वथा न दर्शाङ्गं पितृयज्ञः। एवञ्च पौर्णमासीमेव यजेत भ्रातृव्यवानामावास्यां हत्वा भ्रातृव्यममावास्यया यजेत पिण्ड-

पितृयज्ञेनैवामावास्यायां प्रीणातीति दर्शेष्ट्यभावेऽपि पिण्डपितृयज्ञदर्शनं सङ्गच्छते। एतद्बलेनैव पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानो देवेभ्यः प्रतनुत इत्यादि पिण्डपितृयज्ञार्थवादे यज्ञोपस्थितावपि न क्षतिः। यत्तु,

न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः।

इति मनुवचनम्। तच्छ्राद्धं 'कृष्णपक्षश्राद्धं दर्शनाममावास्यया विनाऽऽहिताग्नेर्न भवति अनाहिताग्नेरिव तिथ्यन्तरेष्विति व्याख्येयम्। न तु दर्शेष्टिं विना श्राद्धं पितृयज्ञो न भवतीत्येवं व्याख्येयम्। दर्शपदे लक्षणायां प्रमाणाभावात्। तेनायं स्वर्गार्थ इति मूलानुयायिनः।

वस्तुतस्तत्करणे सप्तहोतृहोमरूपप्रायश्चित्तस्यापस्तम्बादिभिः स्मरणात् ज्योतिष्टोमादिक्रतुभिस्तुल्यत्वश्रवणाच्च नित्य एवायम्। प्रयोजनं, दर्शाभावेऽपि करणम्, तद्विकारेषु च नातिदेशः।

यत्तु भाष्यकारेण पौर्णमास्यामाधाने कृतेऽग्निमावास्यायां दर्शेष्ट्यभावात् पूर्वपक्षे अकरणमित्युक्तम्। तद्बादशरात्रिषु पवमानेष्टिपक्षे आधानोत्तरदिने पौर्णमासकालाभावे च बोध्यम्। यदा तु तदुत्तरदिने कालसत्त्वं पौर्णमासस्य, तदाऽऽधान एव सेष्टि सान्वारम्भणीयं पौर्णमासान्वाधानं कृत्वा श्वोभूते पौर्णमासेनेष्ट्वाऽग्निमदर्शेष्ट्युक्ततयैव पिण्डपितृयज्ञानुष्ठाने न कश्चिद्विरोधः॥४॥४॥८॥

पञ्चकम्॥ सवनीयसन्निधावाश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य*

---

* इत्थमेव पाठः सर्व्वत्र। निष्क्रम्य,—इति तु भवितुमुचितम्। भाष्ये तु आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोति,—इति पठितम्।

यूपं परिव्ययतीति श्रुतेन वचनेन पशुत्रयार्थसाधारणयूपपरिव्याणा-पेक्षया यूपपरिव्याणान्तरं सवनीयाङ्गतया प्रकरणान्तरन्यायेन दार्ढ्यप्रयोजनकं[१] विधीयते । आश्विनोत्तरकालता उपनिष्क्रमणस्य पाठादर्थाच्च प्राप्तमनूद्यत इत्युक्तमेव । अतश्चाश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं पशुमुपाकरोतीति उत्पत्तिवाक्ये पुनः श्रुतं परिव्याणं न यूपसंस्कारार्थम् । वैयर्थ्यापत्तेः । किन्तु यूपमिति द्वितीया सप्तम्यर्थे । परिवीयेत्यस्य कर्माकाङ्क्षायां पशुमित्यस्यानु-षङ्गः । तथा च त्रिवृत्करणक-यूपाधिकरणक-पशुसंस्कारक-परि-व्याणोत्तरकालविशिष्टयागविधानात्पश्वर्थमेव परिव्याणं पश्वुप-क्रमणार्थमिति प्राप्ते ।

द्वितीयया परिव्याणस्य दृष्टविधयैव यूपार्थत्वे सम्भवति लक्ष-णाऽनुषङ्गयोः प्रमाणाभावः । न च वैयर्थ्यम् । रशनाधर्माणां दर्भमयीत्वादीनां एतत्परिव्याणसाधारणसिद्ध्यर्थमनुवादत्वस्य तृतीये साधितत्वात् । अन्यथा रशनाधर्माणामौपवसथ्येऽहन्यनुष्ठीयमानयू-पपरिव्याणाङ्गत्वस्यैवानुष्ठानसादेश्यादापत्तौ अप्राकृतकार्यतत्परिव्या-णार्थत्वासिद्धेः । सति तस्मिन् त्रिवृत्करणकयूपपरिव्याणानुवादत्वे-नैव प्रकृतयागीययूपव्यक्तिसम्बन्धिपरिव्याणमात्रस्यैवोद्देश्यताऽवगमा-त्साधारण्यसिद्धिः । अस्तु वा निर्वपतिवदेव प्रकृतिलिङ्गसादृश्येन प्राकृतपरिव्याणातिदेशसिद्ध्यर्थमस्मिन् यूपपरिव्याणे त्रिवृत्त्वानुवादः । सर्वथा न परिव्याणं पशुसंस्कारार्थम् । प्रयोजनं, यूपे द्वैरशन्यसत्त्वेऽपि

---

(१) यूपस्य दृढतासम्पादकमित्यर्थः ।

पशावपि दैरमन्यं पूर्वपक्षे प्रकृतौ विकृतौ च, सिद्धान्ते तु नेति ॥ ४॥४॥९॥

स्वरुश्च ॥ यूपस्य स्वरुङ्करोतीति षष्ठ्या स्वरोर्यूपार्थत्वावगमात् स्वरुणा पशुमनक्तीत्यञ्जनं प्रतिपत्तिर्यत्किञ्चित् सोमलिप्तं तेनावभृथं यन्तीति वदिति प्राप्ते । स्वरोर्यूपार्थत्वेऽदृष्टार्थत्वापत्तेः षष्ठ्याश्चाव-यवत्वेनाप्युपपत्तेः स्वरुणेति तृतीयादिवशात्पश्वञ्जनार्थत्वमेव । सोम-लिप्ते तु अवभृथपदे गौणत्वाद्यनेकदोषभिया तदङ्गीकरणमित्युक्त-मेव । प्रयोजनं, पूर्वपक्षे एकयूपके पशुगणे एकस्यैव पशोः समञ्जनं, सिद्धान्ते सर्वेषामिति । पार्थसारथिमते तु प्रयाजशेषाभिघारणन्या-येनाधारनियमस्य पशुसंस्कारार्थत्वोपपत्तेः पूर्वपक्षेऽपि सर्वेषामञ्ज-नप्रसङ्गात् प्रयोजनानुपपत्तिरिति । भाष्यविरोधोऽपि ॥४॥४॥१०॥

दर्शपूर्णमासयोः ॥ प्रयाजादिसर्वयागसाधारण्येन दर्शपूर्णमासाभ्यां स्वर्गकामोयजेतेत्यनेन वचनेन राजसूयवद्यजिना न सम्बन्धः, किं त्वाग्नेयादीनां षण्णामेव । दर्शपूर्णमासनाम्ना अग्नेयादिषड्यागेष्वेव प्रसिद्धार्थकेन यजेरवच्छेदात् । तथा च* दर्शपूर्णमासनाम्नः प्रसि-द्धार्थकत्वं, तथोपपादितं पौर्णमास्यधिकरणे । तदधिकरणप्रयोज-नकथनार्थन्त्विदमधिकरणं प्रयुक्तिसिद्ध्यर्थं न विरुध्यते । राज-सूयनाम्नस्तु यथा प्रकृतसर्वयागपरत्वं, तथा तदधिकरणे स्पष्टमेव । अतश्च प्रयाजादीनामङ्गत्वादिकृतावतिदेशः ॥४॥४॥११॥

ज्योतिष्टोमे ॥ ज्योतिष्टोमेन स्वर्गकामोयजेतेत्यनेन स्वर्गफलस-

---

* इत्थमेव पाठः सर्व्वत्र । यथा च,—इति तु भवितुमुचितम् ।

न्बन्धो न सोमयागस्यैव। अपि तु प्रायणीयादीनां सर्वेषामेव। यागत्वाविशेषेण सर्वेषामेव यजिना फलोद्देशेनोपादानात्। सर्वेषां ज्योतिष्टोमनामकत्वाविशेषाच्च।

न च स्ववाक्यविहितस्यैव ज्योतिष्टोमसंज्ञकस्य फलोद्देशेन विधानादितरेषामन्यदङ्गत्वमिति वाच्यम्। अग्नीषोमीयाद्यपेक्षया कर्मान्तरे प्रमाणाभावात्। अत एवैतद्वाक्यविहितकर्मणोऽप्रसिद्धत्वादग्नीषोमीयाद्यनुवादेन च सोमविधानायोगात् सोमवाक्येऽपि सोमविशिष्टयागस्यैव विधानम्।

न च विशिष्टविधिगौरवभिया लाघवसहकृतवाक्यान्तरोपात्तगुणादेव ज्योतिष्टोमवाक्येन कर्मविध्यङ्गीकारः। तथात्वेऽपि नित्यवाक्येऽपि कर्मान्तरस्य विनिगमनाविरहेणापत्तौ सोमवाक्ये एवोत्पत्त्यन्वयिगुणेन विशिष्टविध्यङ्गीकारस्य न्याय्यत्वात्। अतश्च प्रकृतत्वाविशेषाद्वाजसूयवत्सर्वेषां फलसम्बन्धः।

न च तानि वाएतानि ज्योतींषि य एतस्य स्तोमा इति वाक्यशेषात्सोमयागस्यैव ज्योतीरूपत्रिवृदादिस्तोमसम्बन्धेन ज्योतिष्टोमनामकस्यैव प्रसिद्धार्थकत्वाद्दर्शपूर्णमासपदवद्व्यवच्छेदकत्वोपपत्तेस्तस्यैव फलसम्बन्धोपपत्तिरिति वाच्यम्। एतस्यार्थवादत्वेन गौणतयाऽप्युपपत्तौ अर्थान्तरवाचिनो ज्योतिःशब्दस्य स्तोमवाचित्वाभावात्। ज्योतीरूपस्तोमाङ्गत्वस्य च फलसम्बन्धोत्तरकालीनत्वेनाविशेषात्।

न च यद्वं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोतीत्यनेन वचनेन स्तोत्रोपकरणस्य सोमयागाङ्गभूतग्रहणाद्यङ्गत्वावगमात् स्तोमा-

नामपि स्वसाध्यस्तोत्रोपाकरणद्वारा सोमयागसम्बन्धावगतेर्विशेष-कत्वोपपत्तिरिति वाच्यम् । उपाकरणस्य दृष्टविधया स्तोत्रोपकारकत्वेन द्वितीयया च स्तोत्राङ्गत्वावगमेनास्य कालार्थत्वात् ।

न च कालद्वारैव सम्बन्धेन विशेषकत्वम् । कालस्य फलसम्बन्धोत्तरापेक्षत्वात् तस्य च स्तोत्रगतफलवत्त्वज्ञानाधीनत्वात्तस्यापि च यागगतफलवत्त्वबोधकवाक्याधीनत्वेन तत्प्रवृत्तेः पूर्वमेतद्वाक्यप्रवृत्त्यभावेनैतत्सम्बन्धानवगतेर्नाम्नो विशेषकत्वाभावात् । यद्यपि च पदार्थानां प्राप्तत्वेनास्य वाक्यस्य क्रमविधायकत्वं स्यात् । तथापि वेदं कृत्वा वेदिं करोतीतिवच्छ्रौतक्रमविधायकत्वात्तस्य च प्रातिस्विकविधिविधेयत्वेनेतरक्रमवत्प्रयोगविधिविधेयत्वाभावेऽपि क्रमस्यानुष्ठानावगमोत्तरापेक्षत्वात्तस्य च फलवत्त्वज्ञानोत्तरकालीनत्वेनोक्तविधया न विशेषकत्वमिति प्राप्ते ।

क्रमादेरुत्तरकालमाकाङ्क्षायामपि निराकाङ्क्षत्वज्ञानाभावमात्रेण वाक्यस्य पूर्वप्रवृत्त्युपपत्तेस्तेन च कालस्य क्रमस्य वा विधेयत्वेन विशिष्य तद्घटितसम्बन्धस्य सोमयागेऽवगमान्नाम्नः प्रसिद्धार्थकत्वेन तस्यैव फलसम्बन्धावगमेन प्राधान्यम्, अन्येषां च तदङ्गत्वमिति तद्विकृतावतिदेशः । तदेवं प्रयोज्यवर्गो निरूपितः ॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां
चतुर्थाध्यायस्य चतुर्थः पादोऽध्यायश्च समाप्तः ॥

श्रीगणेशाय नमः ।

पञ्चमोऽध्यायः ।

प्रथमः पादः ।

श्रुति ॥ तदेवमङ्गप्रधानसाधारण्येन प्रयोज्यवर्गेऽवगतेऽधुना-प्रयोगाश्रितः क्रमो निरूप्यते । एकादशे ह्यङ्गानां प्रधानानाञ्चैकेनैव प्रयोगविधिना विधानमिति वक्ष्यते । अतश्चैकविधिविषयत्वेन सर्व-साहित्यस्य विवक्षितत्वादेकेन कर्त्रा युगपत्सर्वकरणाशक्तेरवश्यम्भाविनि कस्मिंश्चित्क्रमे नियामकानि श्रुत्यर्थपठनस्थानमुख्यप्रवृत्त्याख्यानि प्रमाणानि निरूपयिष्यन्ते ।

तत्र क्रमो नामाव्यवहितोत्तरत्वरूपमानन्तर्य्यम् । तच्चैकप्रति-योगिकमेकवृत्ति । यथा वेदं कृत्वा वेदिं करोतीत्यत्र वेदकरण-प्रतियोगिकमानन्तर्य्यं वेदिकरणवृत्ति । अत्र दर्शपूर्णमासोत्तरत्वस्यापि सोमाङ्गत्वात्तद्व्यावृत्त्यर्थमव्यवहितेति विशेषणम् । तत्र दर्शपूर्णमास-पूर्वकाव्यवहिततत्कालमात्रं क्रमार्थः न त्वव्यवहितांशोऽपि ।

न च सोमविधेस्तदपेक्षा । येनाव्यधान एव तत्पर्यवस्येत । सोमविधेर्भिन्नप्रयोगविधिविधेयदर्शपूर्णमासप्रतियोगिकक्रमानपेक्ष-त्वात् । अतस्तत्रोत्तरकालत्वमेव विधेयं न क्रमः । क्रमश्च सर्वत्रो-त्तरपदार्थाङ्गम् । तस्यैव, क्वाहं कर्त्तव्य इत्यपेक्षणात् । न तु पूर्व-पदार्थाङ्गम् । मदुत्तरं कः पदार्थः कर्त्तव्य इत्यपेक्षायाः कस्यचिदप्य-

दर्शनात् । पूर्वपदार्थस्तु प्रतियोगितया क्रमविशेषणं, दर्शपूर्णमासादि-रिव पूर्वकालतया । एतेनोभयपौर्वापर्यरूपक्रमः पदार्थद्वयाङ्गमिति केषाञ्चिदुक्तमपास्तम् । प्रमाणाभावात् । अस्तु वा प्रथमभक्ष इत्यादौ प्राथम्यं पूर्वपदार्थाङ्गमेव क्रमपदार्थः ।

तत्तत्पदार्थानन्तरं तत्तत्पदार्था इत्येवमनेकपदार्थवृत्तिपौर्वापर्य-समुदायरूपविततिरेव क्रम इति तु मूलोक्तः पक्षोऽशक्त्वादिकृतौ क्वचिदेकपदार्थलोपे तावत्पदार्थवृत्तिपौर्वापर्यसमुदायस्यासम्भवाद्युत्-क्रमेणानुष्ठानेऽपि वैगुण्यानापत्तेरुपेक्षितः ।

अस्य च क्रमस्य प्रयोज्यनिष्ठत्वात् तन्निरूपणोत्तरमारम्भः । तन्नियमे च षट् प्रमाणानि श्रुत्यादीनि । तेषां लक्षणानि तत्त-न्निरूपणावसरे वक्ष्यन्ते । तत्र श्रौतः क्रमः प्रातिस्विकविधिना-विधीयते, आर्थादिक्रमास्तु प्रयोगविधिनैवेति मूलानुयायिनः । वस्तुतस्तु श्रौतक्रमस्थले क्त्वादिनाऽवगतेरुत्पन्नस्य वाक्येन विनियोगः । क्रमान्तरे त्वर्थादिनोत्पन्नस्य प्रकरणादिकल्पितश्रुत्या विनियोगः । प्रयोगस्तु सर्वत्रैवाङ्गान्तरवत्प्रयोगविधिनैव । इदञ्च तत्र तत्र स्फुटी करिष्यते । युज्यतेऽत्र क्रमस्यापि द्रव्यगुणादिवत्पदार्थविशेषणत्वेन विधानम् ।

तदिह श्रुतिर्नाम वृत्त्या क्रमबोधकः कृत्नः शब्दः । स चाथ-शब्दादिः । तत्राथशब्दस्यानन्तर्यवाचित्वं प्रसिद्धैव । क्त्वाप्रत्ययादीनान्तु पूर्वकालवाचिनामपेक्षाऽनुरोधात् क्रमपरत्वं लक्षणया । अर्थादिषु कल्प्यशब्दस्यैव क्रमबोधकत्वात् कृत्नेति विशेषणम् । तत्र वषट्कर्तुः प्रथमभक्ष इत्यादौ क्रमविशिष्टभक्षविधानात् प्रथमपदोक्तक्रमस्य वाक्या-

ङ्गत्वाङ्गत्वम्। वेदं कृत्वेत्यादौ तु वेदिकरणस्य वाक्यान्तरेण प्राप्तत्वात् तदनुवादेन क्त्वाप्रत्ययोक्तक्रममात्रविधानाद्वाक्यादेव तदङ्गत्वम्।

यत्र तु पाठादिप्रमाणेन सम्भवत्प्राप्तिकता, धात्वर्थस्य सम्भवत्प्राप्तिकोऽपि भावार्थाधिकरणन्यायेन प्रयोजनार्थं विधीयते। तत्र क्रमबोधिका श्रुतिरप्यनुवाद एव। न तु क्रमे प्रमाणम्। विशिष्टविधिगौरवापत्तेः। यथैन्द्रवायवाग्रान् ग्रहान् गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्। हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षस इत्यादौ। अत्र हि ग्रहणावदानादेरेव फलार्थं हृदयादिमात्रविशिष्टधात्वर्थस्य विधिरिति वक्ष्यते।

यत्र तु धात्वर्थस्य क्लृप्तप्रमाणेन प्राप्त्यभावेऽपि कथञ्चित् सम्भवप्राप्तिकस्य पुनर्विधाने न किञ्चित्प्रयोजनं विधेयान्तरस्य नान्यत्किञ्चित्, तत्र क्रम एव श्रुत्युक्तो विधीयते। यथा सत्रात्मके द्वादशाहेऽध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारं ततो होतारं ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्धिनो दीक्षयति ब्राह्मणाच्छंसिनं ब्रह्मणः प्रस्तोतारमुद्गातुर्मैत्रावरुणं होतुः ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति आग्नीध्रं ब्रह्मणः प्रतिहर्तारमुद्गातुरच्छावाकं होतुस्ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति पोतारं ब्रह्मणः सुब्रह्मण्यमुद्गातुर्ग्रावस्तुतं होतुस्ततस्तमन्यो ब्राह्मणो दीक्षयति ब्रह्मचारी वाऽऽचार्यप्रेषित इति श्रुते वाक्ये। अत्र हि न दीक्षायाः स्वरूपेण तत्तत्संस्कारकत्वेन वा विधिरतिदेशप्राप्तत्वात्। प्रकृतौ हि यजमानसंस्कारार्था दीक्षाऽतिदेशेनैव सत्रे प्राप्यते। सत्रे च ये यजमानास्त ऋत्विज इति वचनेन ऋत्विक्कार्यातिदेशेन

यजमानविधानात्कृत्स्नादीनां यजमानत्वेनैव प्रतिप्रधानावृत्तिन्यायेन तत्तत्संस्कारकत्वप्राप्तेः।

न च ऋत्विक्कार्ये यजमानविधानादेव वरणादिनिवृत्त्या ब्रह्माद्यप्राप्तिः। तद्विधानेन वरणादिनिवृत्तावपि ऋत्विक्निवृत्तौ प्रमाणाभावेनाध्यवसायमात्रेणैव ब्रह्मत्वादेरुपपादितत्वात्। न च प्राप्यमानाया अपि दीक्षाया अपूर्वत्वाद्यर्थं पुनः श्रवणम्। ब्रह्मादिप्राप्त्यर्थमतिदेशस्यावश्यंकतया निवारयितुमशक्यत्वात्। न च दीक्षायामध्वर्युविधिः। अतिदेशादेव सिद्धेः। न च दीक्षान्तरेऽध्वर्युनिवृत्त्या प्रतिप्रस्थात्रादिविधानम्। अध्वर्युदीक्षायामध्वर्यो त्वा तिस्त्वा पुनात्विति मन्त्रवर्णविरोधादेवाप्राप्तेः। न चाध्वर्युकर्तृकत्वानुरोधेनोहेन मन्त्रप्रयोगः। कर्तुः साङ्गप्रधानाङ्गत्वेन चरमापेक्षितत्वेन च कर्त्रनुरोधेन त्वापदोहायोगात्। अतो मन्त्रमनूहितमेव प्रयुञ्ज्याध्वर्युकर्तृकत्वबाधावश्यम्भावे इतरमन्यस्तेषां यतो विशेषः स्यादिति न्यायेनाध्वर्युपुरुषाणामाद्यः प्रतिप्रस्थातैवाध्वर्युदीक्षायां प्राप्नोति।

ब्राह्मणाच्छंस्यादिदीक्षासु तु अध्वर्योर्न पूतः पावयेदिति वचनेन सत्रप्रकरणपठितेन दीक्षासु दीक्षाख्यसंस्काररहितपुरुषकर्तृविधायकेन पर्युदासात्प्रतिप्रस्थातृप्राप्तिः सुलभैव। एवं प्रतिप्रस्थात्रादिदीक्षासु नेष्टुः प्रतिप्रस्थात्रनन्तरस्य, नेष्ट्रादिदीक्षासु पोतुर्नेष्ट्रनन्तरस्य प्राप्तिर्न्यायादेवेति न विधेयान्तराशङ्का। अतः क्रम एवात्राप्राप्तस्तत्तद्दीक्षोद्देशेन विधीयते श्रौतः क्त्वाप्रत्ययोक्तः ततः-पदोक्तश्च। अत एवैतानि द्वादश वाक्यानि श्रौतक्रमविधायकानि। अखिलाद्युद्देश्यतावच्छेदकमङ्गीकृत्य षडेव वा। उक्तदीक्षा-

वाक्ये तु वैकल्पिकब्राह्मणादिविधानाद्धृदयादिन्यायेन पाठादेव क्रमसिद्धेस्तत इत्यनुवादः। निपातत्वाच्च वा-शब्दस्य ब्राह्मणादिविशेषणत्वेन न वाक्यभेदः। अभावपक्षे च ब्राह्मणानामेवार्त्विज्यविधानाद्ब्राह्मण इत्याद्यनुवादः। ब्राह्मणादिपाठस्याचार्याधीनत्वस्मृतेराचार्यप्रेषित इत्यपि।

यत्तु मूले विततिरूपक्रमपक्षमङ्गीकृत्य सर्वस्याप्येकवाक्यत्वमुक्तम्। तद्वाशब्दार्थाविततेर्विधेयत्वायोगादनेकदीक्षोद्देशेन विधाने वाक्यभेदापत्तेरनेकदीक्षायां कर्तृविधेरावश्यकत्वाच्चोपेक्षितम्। वस्तुतस्तु आनन्तर्यरूपक्रमपक्षेऽपि तत्तत्संस्कार्यविशिष्टदीक्षोद्देशेन क्रमविधाने वाक्यभेदापत्तेः संस्कार्यमात्रोद्देशेन विधौ च दीक्षानिष्ठत्वालाभादुक्तवाक्य एव तदुद्देशेन कर्तृविधिः। इतरस्तु सर्वोऽपि पदसमुदाय औचित्येन तत्स्तुत्यर्थोऽनुवादः। कर्तुर्दीक्षानिष्ठत्वलाभस्त्वनुवादबलादिरापदस्येव नानुपपन्नः। एवञ्च सर्वस्याप्येकवाक्यत्वलाभः। क्रमस्त्वनुवाद एव तादृशपाठादवधेयः। निषादस्थपत्यधिकरणन्यायेन श्रूयमाणवाक्ये वाक्यभेदाभावेन पाठगम्यानेकवाक्यकल्पनस्यादोषत्वात्। अन्यथा हृदयादिवाक्येष्वपि विशिष्टविध्यापत्तेः। न च श्रौतक्रमस्य पाठक्रमस्य च कश्चिदनुष्ठाने विशेषः। अतो मूलोक्तं श्रुतिक्रमोदाहरणमनादरणीयमिति ध्येयम् ॥ ५ ॥ १ ॥ १ ॥

. अर्थाच्च ॥ अर्थः प्रयोजनम्। तच्च व्युत्क्रमेऽनुपपद्यमानत्वात्क्रमे प्रमाणम्। यथाऽग्निहोत्रं जुहोति यवागूं पचतीति यवागूपाकस्य पाठक्रमेण पश्चात्करणे पाकसंस्कृतायाः यवाग्वाः होमरूपस्य यवाग्वाऽग्निहोत्रं जुहोतीति वचनसिद्धस्य प्रयोजनस्यानिष्पत्तेः

पाकस्य च यवागूत्पादकत्वेऽपि अनुपयुक्तायास्तस्याः प्रयोजनत्वानुप-पत्तेस्तदन्यथाऽनुपपत्त्या पूर्वं पाकः पश्चाद्धोमः। न च तृतीया च होश्छन्दसीति स्मरणाद्धोः कर्मणि तृतीया चकाराद्द्वितीया चेत्यर्थाद्यवाग्वा जुहोतीत्यत्र यवाग्वाः तृतीयया कर्मत्वावगमेन होमस्य प्रयोजनत्वासिद्धिः। तथात्वे यवाग्वा अन्यत्रोपयोगाभावेन होमवाक्य एव सक्तुन्यायेन विनियोगभङ्गाङ्गीकारात्। पाकस्य तु दृष्टार्थकत्वात् संस्कारकर्मत्वमेव।

वस्तुतस्तु करणत्वे एव तृतीयायाः शक्तिः। कर्मत्वे तु आनु-शासनिकी लक्षणा। न चात्र तद्बीजमस्ति। अत एव यत्र चतुर-वत्तादौ उपयोगक्लृप्तिस्तत्रैव चतुरवत्तेन जुहोतीत्येतादृशवाक्य-सत्त्वेऽपि कर्मत्वप्रतीतिरित्येवम्परं स्मरणम्।

अत्र चार्थोपस्थितः क्रमः प्रयोगविधिनैव विधीयते। एवं पाठादिष्वपीति प्राञ्चः। अङ्गान्तरवत्तु अर्थकल्पितश्रुत्या विनियोगः, प्रयोगमात्रं प्रयोगविधिनेत्यपि शक्यं वक्तुम्। वस्तुतस्तु प्रयोजनवशेन पदार्थानुष्ठाने विहिते आनुषङ्गिकः क्रम इति न तदंशे विधान-मिति ध्येयम्।

अर्थोऽपि क्रमनियामक इति प्राञ्चः। वस्तुतस्तु अर्थाविरोधि-पाठस्थले अन्यलभ्यत्वादनुवाद एव। विरोधिस्थले चापूर्वस्यैव तस्य ज्ञापक इत्यप्यनुसन्धेयम्॥ ५॥ १॥ २॥

अनियमोऽन्यत्र॥ यत्रोक्तवक्ष्यमाणक्रमनियामकप्रमाणाभावस्तत्रा-नियम एव। यथा प्रयाजानुमन्त्रणानां वसन्तमृतूनां प्रीणामीत्या-दीनां एको ममेत्यादीनाञ्च शाखाभेदेनाम्नातानां परस्परम्।

अत्र हि यद्यपि वसन्तादिप्रकाशकानां न देवताकल्पकत्वम् । उभयाकाङ्क्षाप्रमाणकाङ्गभावस्याख्यासम्बन्धकल्प्यसमिदादिदेवतावरोधेऽन्यतराकाङ्क्षाप्रमाणकाङ्गभावानुमन्त्रणेन तत्कल्पनाऽनुपपत्तेः । एवमेको ममेत्यादीनामपि न फलकल्पकत्वम् । निर्ज्ञातपारार्थ्यात् । श्रुत्यविनियुक्तत्वाच्च । न चोत्कर्षः । प्रयाजानुमन्त्रणसमाख्ययाऽचैवान्वयेनान्यत्र सामान्यसम्बन्धबोधकप्रमाणाभावात् । तथापि मनोतामन्त्रवल्लक्षणया प्रयाजीयक्रतूपकाराख्यफलदेवताप्रकाशकत्वेन दृष्टार्थत्वेऽपि भिन्नकार्यत्वात् समुच्चय एवोभयोरेकैकस्मिन् प्रयाजे ।

यत्तु तन्त्ररत्नादौ अदृष्टार्थत्वेन समुच्चयाभिधानम् । तद्दृष्टार्थसम्भवे तदयोगात् ।

मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरन् ।
शेषिणं तन्मनाभूत्वा स्यादेतदनुमन्त्रणम् ॥

इत्यनुमन्त्रणलक्षणाऽनुपपत्तेश्चोपेक्षितम् । तत्र चैकैकस्मिन् प्रयाजे द्वयोर्द्वयोर्मन्त्रयोः पठ्यमानयोः न क्रमनियमः । प्रमाणाभावात् ।

ननु समित्प्रयाजे नियामकाभावेऽपि येन क्रमेण समिदनुमन्त्रितस्तेनैव तनूनपातादयोऽपि प्रवृत्तिक्रमादिति चेत् । प्राजापत्यपशुषु हि एकप्रयोगविधिपरिगृहीतेषु पदार्थानुसमये सति प्रकृतौ पाठेन क्लृप्तक्रमयोरुपाकरणनियोजनयोरौपदेशिकपशुसाहित्यानुरोधेन षोडशक्षणव्यवधानेऽपि तदधिकव्यवधाने प्रमाणाभावाद्येनैव क्रमेणोपाकरणं तेनैव क्रमेण नियोजनमिति प्रवृत्तिक्रमो युक्तः । प्रकृते तु एकप्रयाजगतयोर्नानाशाखास्थानुमन्त्रणयोः पाठाद्यभावेनाक्लृप्तक्रमत्वात् सत्यपि च सर्वप्रयाजानामेकप्रयोगविधि-

परिग्रहे पदार्थानुसमयासम्भवादेकैकस्मिन् प्रयाजे द्वयोर्द्वयोर्मन्त्रयोः पठनीयत्वाच्च प्रयाजान्तरीयमन्त्रस्य प्रयाजान्तरीयमन्त्रेण प्रवृत्तिक्रमः ।

न च नानाशाखास्थयोः क्लृप्तक्रमत्वाभावेऽपि एकशाखास्थानां पञ्चानामपि मन्त्राणां पाठेन क्लृप्तक्रमत्वाच्छाखान्तरीयेणाप्यनियत-व्यवधाने प्रवृत्तिक्रमबाधापत्तिः । पञ्चानां मन्त्राणां पञ्चप्रयाजाङ्गत्वे-नैकग्रंथ्यङ्गत्वाभावाद्वान्तरप्रयोगविधिभेदेन भिन्नप्रयोगविधिपरि-गृहीतानां पाठेन क्रमानियमात् । दृश्यते च पाशुकानूयाजानामै-ष्टिकपिष्टलेपफलीकरणहोमस्य च महाप्रयोगैकत्वेऽपि भिन्नावान्तर-प्रयोगविधिपरिगृहीतत्वेनाक्लृप्तक्रमत्वम् । तस्मादनियमः ॥५॥१॥२॥

क्रमेण ॥ पदार्थबोधकवाक्यपाठक्रमोऽपि पदार्थक्रमनियामकः । न च विधीनां तत्पदार्थविधायकत्वात् क्रमस्य च स्वाध्यायत्व-सिद्धार्थत्वेनाध्ययनविध्युपयुक्तत्वाच्च पदार्थक्रमनियामकत्वम् । पदा-र्थानामनुष्ठानकाले स्मारकापेक्षायां मन्त्रादीनामुपस्थितत्वेन स्मार-कत्वनियमात् तत्क्रमेणैवानुष्ठानक्रमनियमोपपत्तेः । अत एव यत्र मन्त्राम्नानं, तत्र तत्क्रम एव नियामकः । यत्र तु न तत्तत्र विधा-यकत्वेनोपयुक्तस्यापि विधिवाक्यस्यैवोपस्थितस्य स्मारकत्वेन नियमात् तत्क्रमस्यापि पदार्थक्रमनियामकत्वम् । पाठोपस्थितस्य च क्रमस्य विनियोजकवाक्यकल्पनयाऽङ्गत्वेऽवगते प्रयोगविधिना प्रयोगविधा-नम् । लक्षणे पदार्थबोधकत्वञ्च क्वचिदनुष्ठेयपदार्थबोधकत्वं क्वचित्त-त्सम्बन्धिद्रव्यदेवतादिबोधकत्वम् । तेन च द्विविधेनापि अनुष्ठेयपदार्थ-क्रमनियमः । अत एव देवताबोधकयाज्यादिक्रमादपि यागक्रमः । अतः पाठोऽपि क्रमनियामकोऽपेक्षितत्वात् । अत एव यत्र न क्रमा-

पेक्षा यथा साम्नाय्यादौ। एकप्रयोगविधिपरिग्रहेऽपि सम्प्रतिपन्न-देवताकत्वेन सहानुष्ठीयमानत्वात्। यत्र वा भिन्नप्रयोगविधिपरिग्रहः यथा तत्तत्काम्यकर्मणाम्। तत्र न पाठोऽपि नियामकः। तत्र तु स स्वाध्यायत्वसिद्ध्यर्थ एवोपयुज्यत इति द्रष्टव्यम् ॥५॥१॥४॥

प्रवृत्त्या ॥ एवं सप्तदश 'प्राजापत्यान्पशूनालभतेत्यादावेकैकस्मि-न्पशा उपकरणादीनां पदार्थानामावर्त्तनीयानां पदार्थानुसमयस्य वक्ष्यमाणत्वादाद्य उपाकरणपदार्थो येन क्रमेण कृतस्तेनैव क्रमेण नियोजनादिद्वितीयप्रभृतिपदार्थाः कर्त्तव्याः। अन्यथा प्रकृति-प्राप्तस्योपाकरणनियोजनयोरव्यवहितानन्तर्यस्यौपदेशिकपशुसाहि-त्यानुरोधेन षोडशक्षणव्यवधानेऽप्यधिकक्षणव्यवधानापत्तेः। अत्र ह्युत्पत्तिवाक्ये वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीति प्रयोगवाक्ये च साङ्गानां सप्तदशानां साहित्यावगमादङ्गसाहित्यानुरोधेनैकैकाङ्गेन सप्तदशयागानां युगपदुपकर्त्तव्यत्वावगतेरावर्त्तनीयाङ्गेषु चैकेन कर्त्रा युगपदुपकारासम्भवादवश्यं 'षोडशक्षणव्यवधानेऽपि तदधिक-व्यवधाने औपदेशिकसाहित्यस्यातिदेशिकानन्तर्यस्य च बाधः स्पष्ट-एव। अत एव केषु चित्पशुषु न्यूनक्षणव्यवधानमपि दोष एव।

अत एव पूर्वपदार्थक्रम एव प्रयोगविध्यवगतप्रत्यासत्त्यनुगृहीतो-त्तरपदार्थक्रमनियमे प्रमाणम्। अत्र पूर्वेत्युपलक्षणम्। उत्तरपदार्थ-प्रवृत्तिक्रमेणापि पूर्वपदार्थक्रमनियमस्य न्यायतौल्येन वक्ष्यमाणत्वात्। अयञ्च प्रवृत्तिक्रमोऽनुष्ठानकालीनोऽपि प्रयोगविधिप्रवृत्तेः पूर्व-मपेक्षावशादवगम्यमानस्तदवगम्य-प्रवृत्त्यासत्त्यनुगृहीतः पदार्थान्तर-क्रमं बोधयति। ततश्च तद्विनियोजकवाक्यकल्पनया तस्याङ्गत्वेऽव-

धारिते प्रयोगविधिना प्रयोगविधानम् । तदुत्तरञ्च प्रयोगविधेः पर्यवसानमिति ध्येयम् ।

न चेदं सर्वसाहित्यानुरोधेन स्यात् तत्रैव प्रमाणाभावो बोधकशब्दाभावादिति वाच्यम् । एकेन पदेनानेकोपस्थितौ क्रियान्वये एककालावच्छिन्नत्वरूपसाहित्यस्यानुभूयमानस्य शाब्दत्वसिद्ध्यर्थं लक्षणाऽङ्गीकारात् । प्रतीयते हि शतावधानवांश्चैत्रः पृथिव्यां राजानो बहव इत्यादौ बहुत्वावच्छिन्नानामवधानादीनां चैत्राद्यन्वयोऽसति बाधके एककालावच्छिन्नः । अतः प्राजापत्यपदादौ तल्लक्षणेत्यपि ध्येयम् ॥५॥१॥५॥

स्थानाच्च ॥ स्थानं च क्रमनियमे प्रमाणम् । तच्च कृतक्रमकपूर्वपदार्थोपस्थितिः । सा चैकसम्बन्धिदर्शनेनापरसम्बन्धिस्मरणमिति न्यायेनोत्तरपदार्थस्य झटित्युपस्थापिका । अतस्तत्साहित्येन विहितानामन्येषां पदार्थानां तदनन्तरानुष्ठानसिद्धिः । यथा प्रकृतावग्नीषोमप्रणयनानन्तरमौपवसथ्याहे दैक्षः पशुः, आश्विनग्रहणोत्तरकालञ्च सौत्याहे सवनीयः, उदयनीयानन्तरं सुत्योत्तरमानुबन्ध्यः, साद्यस्क्रे च सर्वमग्नीषोमप्रणयनादि सौत्ये ऽहन्येव क्रियते ।

तत्राचनिकातिदेशाभावेऽपि तत्र सह पशूनालभत इति श्रुतम् । तच्च प्रधानेनात्यन्तप्रत्यासत्तिलाभादाश्विनोत्तरमेवेति स्थितं तृतीये । अतस्त्वाश्विनस्योपस्थापकस्य सत्त्वात्सवनीयस्यैव स्थानात्प्रथमत उपाकरणम् । न तु दैक्षस्य । तदुपस्थापकस्य भ्रष्टत्वेन स्थानाभावात् । प्राकृतपाठस्य च व्यवधायकपदार्थान्तरसत्त्वेन नियामकत्वाभावात् । अत एवोपाकरणोत्तरभाविनियोजनादिपदार्थेषु

प्रधानसहितेष्वपि प्रवृत्त्यैव क्रमसिद्धेर्न स्थानोदाहरणता । प्रधाने स्थानाभावाच्च नोपाकरणे मुख्यक्रमाशङ्का । अतः स्थानादेव सवनीयस्य प्रथममुपाकरणं, तदुत्तरं दैवस्य, तदुत्तरमानुबन्ध्यस्य । प्रकृतिदृष्टपूर्वापर्यस्यैव* नियामकान्तराभावे नियामकत्वाङ्गीकारात् । अत्रापि स्थानावगतस्य क्रमस्य कल्पितवाक्येन विनियोगेऽवगते प्रयोगविधिना प्रयोगविधानम् ॥५॥१॥६॥

मुख्यक्रमेण ॥ मुख्यक्रमोऽप्यङ्गक्रमनियमे प्रमाणम् । मुख्यत्वञ्च प्रधानत्वम् । यत्र ह्यनेकेषां साङ्गानां प्रधानानां सहकर्त्तव्यता, तत्र प्रयोगविधिनाऽङ्गप्रधानयोः साहित्यावगतावपि प्रधानान्तरसाहित्यानुरोधेन यावदनुज्ञातव्यवधानस्वीकारेऽपि तदधिकव्यवधाने प्रमाणाभावात् प्रधानप्रत्यासत्त्यनुग्रहाय मुख्यक्रमेणैवाङ्गे क्रमनियमः । अत एव प्रवृत्तावङ्गनिरूपितप्रत्यासत्त्यनुग्रहो बीजम्, मुख्यक्रमे तु प्रधाननिरूपितप्रत्यासत्त्यनुग्रह इति तयोर्भेदो वैपरीत्येन बलाबलञ्चेति वक्ष्यते ।

मुख्यक्रमोदाहरणञ्च सारस्वतौ भवत एतद्वै दैव्यं मिथुनं यत्सरस्वती सरस्वांश्चेति वाक्यविहितप्रधानद्वयक्रमात् तन्निर्वापक्रमः । अत्र हि द्रव्यसामान्याधिकरण्याभावेऽपि सम्बन्धसामान्यवाचिनस्तद्धितस्य दैव्यमिति वाक्यशेषाद्देवतापरत्वोपपत्तेर्द्विवचनेन देवताकल्पितयागद्वयं विधीयते । अत एव न यागद्वयेऽपि सरस्वानेव देवता । अर्थवादस्य 'विरूपैकशेषतात्पर्यग्राहकत्वेन सरस्वतीसरस्वद्देवत्यत्वावगमात् ।

---

* इत्थमेव सर्व्वत्र पाठः । पौर्व्वापर्य्यस्यैव,—इति तु भवितुमुचितम् ।

न चैवमपि सरस्वती सरस्वांश्च सरस्वन्तौ, सरस्वन्तौ देवते ययोस्तौ इति व्युत्पत्त्या एकैकस्य द्विदेवत्यत्वं किं न स्यादिति वाच्यम् । एकैकदेवत्ययाज्यानुवाक्यापाठेनैकैकदेवत्यत्वावगतेः । अत एव प्राजापत्यवत्संप्रतिपन्नदेवताकत्वाभावेन मन्त्रपाठक्रमात्प्रधानक्रमे सति मुख्यक्रमेणैव तन्निर्वापयोः क्रमः ।

वस्तुतस्तु तुल्यन्यायतया पूर्वपदार्थप्रवृत्तेरिवोत्तरपदार्थप्रवृत्तेरपि पूर्वपदार्थक्रमनियामकत्वस्योक्तत्वात् प्रकृते च याज्यानुवाक्यादिरूपोत्तरपदार्थप्रवृत्त्यैव निर्वापक्रमोपपत्तेर्यद्यपि नेदं मुख्यक्रमस्यासंकीर्णमुदाहरणम् । तथापि दध्नः पूर्वं ग्रासाहरणादयो धर्माः पठिताः पश्चादाग्नेयस्य निर्वापादयः, याज्यानुवाक्ययोस्तु विपरीतः पाठः, ततश्च पूर्वोत्तरभाविप्रवृत्तिद्वयवशात् प्रयाजशेषाभिघारणेऽनियमप्रसक्तौ मुख्यक्रमेणाग्नेयस्य प्रथममभिघारणं पश्चाद्दध्न इत्युदाहरणं वक्ष्यमाणं द्रष्टव्यम् ॥५॥१॥७॥

प्रवृत्तौ ॥ तदेवं षट् प्रमाणानि निरूपितानि । तेषाञ्चाद्याधिकरणोक्तक्रमेण पारदौर्बल्यं द्रष्टव्यम् । न तु सूत्रक्रमेण । तत्र श्रुतिविरोधेऽर्थस्यैवान्यथाकल्पनाद्दौर्बल्यम् । अर्थविरोधे पाठस्य वक्ष्यते । एवं वैकृतपाठविरोधे प्राकृतस्थानबाधोऽपि । प्राकृतक्लृप्तस्थानविरोधे प्रधानप्रयोगविध्याश्रितमुख्यक्रमस्य दौर्बल्यं वक्ष्यत एव । मुख्यक्रमविरोधे प्रवृत्तिक्रमस्यापि दौर्बल्यं तथैव ।

तदिह पाठक्रममुख्यक्रमयोर्बलाबलं चिन्त्यते । दर्शपूर्णमासयोराग्नेयोपांशुयाजाग्नीषोमीयरूपमुख्यक्रमादाज्यस्योपांशुयाजीयस्य प्रथमं निर्वापः पश्चादग्नीषोमीयद्रव्यस्य । पाठक्रमात्तु विपरीतः

क्रमः । तत्र पाठस्य स्मारकवाक्यवर्त्तित्वेन प्रत्यक्षत्वाच्छीघ्रोपस्थितेश्च बलवत्त्वम् । मुख्यक्रमस्तु मुख्ययोरेव प्रथमं केनापि प्रमाणेनावगम्य तदपेक्षया तत्प्राथम्यसम्पत्तये कल्प्यमानो विलम्बित इति दुर्बलः ॥ ५ ॥ १ ॥ ८ ॥

मन्त्रतस्तु ॥ पाठयोस्तु मन्त्रब्राह्मणगतयोर्मन्त्रपाठो बलीयान्न तु ब्राह्मणपाठः । तस्योत्पत्तिविनियोगविधिगतत्वेन प्रथमोपस्थितत्वेऽपि पाठस्य स्मारकक्रमविषयैव क्रमनियामकत्वोक्तेः मन्त्रसत्त्वे च तस्यैव स्मारकतया विधानोपयुक्तत्वाभावत्वर्थस्य च विधेः स्मारकत्वाभावान्मन्त्रपाठक्रम एव बलीयान् । तेन याज्यानुवाक्यादिमन्त्रपाठक्रमादाग्नेयस्य प्रथमानुष्ठानं पश्चाच्चोपांशुयाजोत्तरमग्नीषोमीयस्य । न तु ब्राह्मणपाठक्रमादग्नीषोमीयस्य प्रथमं पश्चादुपांशुयाजोत्तरमाग्नेयस्य । अत एव तत्र पाठक्रमः स्वाध्यायादावुपयुज्यते ॥ ५ ॥ १ ॥ ९ ॥

वचनात्तु ॥ इदानीमातिदेशिकपाठक्रमापेक्षया विकृतौ मुख्यक्रमस्य बलाबलं चिन्त्यते । अध्वरकल्पायामाग्नावैष्णवमेकादशकपालं निर्वपेत्सरस्वत्याज्यभागावार्हस्पत्यश्चरुरिति श्रुतम् । अत्र सत्यपि वाक्यत्रयेण यागत्रयविधाने, एतयैव यजेताभिचर्यमाण इति वाक्यान्तरेणाभिचाराख्यफलोद्देशेन विहितानां विधानात्त्रयाणामप्येकप्रयोगविधिपरिग्रहः ।

अत्राद्यस्य यागस्य द्विदेवत्यत्वौषधद्रव्यकत्वादैन्द्राग्नाग्नीषोमीयान्यतरविकृत्वम्ः । केचित्तु आनान्तरतद्धितान्तपदकत्वसादृश्यादग्नीषोमीयस्यैवेति वदन्ति । द्वितीयस्याज्यद्रव्यकत्वादुपांशुयाजविकृत्वम्ः । तृतीये एकदेवताकत्वौषधद्रव्यकत्वादाग्नेयविकृत्वम्ः । तत्राज्यद्रव्यक-

यागधर्मापेक्षया आग्नावैष्णवस्य धर्माः आतिदेशिकपाठमुख्यक्रमयो-रविरोधादेव प्रथमतः कार्याः । बार्हस्पत्यस्य तु मुख्यक्रमात्पश्चा-त्कार्या उतातिदेशिकपाठक्रमात्पूर्वमिति चिन्तायाम् ।

मुख्यक्रमस्यौपदेशिकप्रयोगविध्युन्नीतत्वेनौपदेशिकत्वात्तत्यप्यति-देशोत्तरकालकत्वे शरादिवद्बाधोपपत्तेर्मुख्यक्रमस्य बलवत्त्वमिति प्राप्ते ।

प्रयोगविधेरौपदेशिकत्वेऽपि स्वरूपेण मुख्यक्रमस्य कल्प्यत्वा-च्छरन्यायानुपपत्तेः कल्पनायाश्चापेक्षायामूलत्वेन प्रयोगविध्युपजीव्य-प्राथमिकातिदेशप्रापितपाठक्रमेणैवाकाङ्क्षाया उच्छेदात् श्येनादावा-तिदेशिकेनानर्त्विक्त्वादिवदेवातिदेशिकपाठक्रमप्रापितक्रमस्यैव बलौ-यस्त्वम् । तदेतत्सिद्धमपि चोदकस्य प्रयोगविध्यपेक्षया बलवत्त्वं स्पष्टीकरणार्थं क्रमलक्षणे पुनरुच्यते इति मन्तव्यम् ।

न चैवमाग्नावैष्णवबार्हस्पत्यधर्माणामपि प्राकृतक्लृप्तक्रमेणैवाष्टाना-पत्तेर्याज्ञिकानां वैकृतमुख्यक्रमानुरोधेनाग्नावैष्णवस्य प्रथमं निर्वा-पाद्यनुष्ठानं विरुध्येतेति वाच्यम् । प्रकृतौ हि यत्र पाठादिप्रमाणकः क्रमस्तत्र तत्पदार्थानन्तरं तत्पदार्थः कार्यं इति विशिष्यैव वाक्य-कल्पनम् । मुख्यक्रमे तु लाघवाद्धर्मिग्राहकप्रमाणबलाच्चाद्यप्रधान-धर्मानन्तरमुत्तरप्रधानधर्मा अनुष्ठेया इत्येव कल्पनम् । न तु विशिष्य, न वा आग्नेयत्वादिप्रवेशः ।

अत एव विकृतावपूर्वाङ्गप्रवेशेऽपि न वाक्यान्तरकल्पनमित्यपि लाघवम् । एवं प्रवृत्तिक्रमेऽपि क्लृप्तक्रमकाङ्गप्रवृत्तिक्रमेणेतरे पदार्थाः कर्त्तव्या इत्येव वाक्यकल्पनम् । अतश्च विकृतावपि आद्यप्रधान-

धर्मानुष्ठानोत्तरमेव द्वितीयप्रधानधर्मानुष्ठानमित्याश्वावैष्णवस्य प्रथमं निर्वापः पश्चाद्वार्हस्पत्यस्य । एवं साद्यस्के स्थानगम्यक्रमक्रमकोपाकरणस्य वाचनिकातिदेशवत्यां कस्यांचिद्विकृतौ वाचनिकोपाकरणव्यत्यये व्यत्यस्तोपाकरणप्रवृत्त्यैव नियोजनादिक्रमः । एवं च केषाञ्चिदेतादृशविषयद्वयेऽपि याज्ञिकाचारे मूलं चिन्त्यमिति प्रकृतिक्रमक्रमेणैव सिद्धान्तकरणं मूलस्योक्तत्वादुपेक्ष्यम् । अत आतिदेशिकपाठविरोध एव मुख्यक्रमादेर्दौर्बल्यमिति स्थितम् ॥ ५ ॥ १ ॥ १० ॥

विकृतिः ॥ चातुर्मास्येषु साकमेधस्तृतीयं पर्व । तच्च कार्त्तिक्यां पौर्णमास्यां काश्चिदिष्टयो विहितास्तासु वक्ष्यमाणेनैव न्यायेन यद्व्येति वाक्यवशेनान्येष्टिवत्सद्यस्काल एवेत्यविवादम् । यानि तु द्व्यहं साकमेधेन यजेतेति वचनेन तत्पूर्वदिनकर्त्तव्यानि कर्माणि— अग्नयेऽनीकवते प्रातरष्टाकपालं निर्वपेन्मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुं मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायमोदनमित्येवं विधवाक्यत्रयविहितानि, तानि किं द्व्यहकालान्युत सद्यस्कालानीति क्रमविशेषौपयिकतया सन्देहे, प्रकृतिप्राप्तत्वात् द्व्यहकालत्वम् । न चाचान्यविकृतीष्टिन्यायः । तत्र हि यद्व्येत्यादिवाक्येन साङ्गप्रयोगस्य पौर्णमास्यादिकालविधानादातिदेशिकद्व्यहकालत्वानुग्रहे च तद्बाधप्रसङ्गादुक्तं सद्यस्कालत्वम् । प्रकृते तु प्रातरादिकालकलस्य दिनद्वयेऽपि सम्भवात् द्व्यहकालत्वमेव ।

अतश्च चयोदश्यां प्रातरादिकालेषु चयाणामप्यन्वाधानं कृत्वा चतुर्दश्यां प्रातरादिकालेषु याग इति द्रष्टव्यम् । कर्ममध्ये कर्मा

न्तरारम्भस्तु त्र्यहं साकमेधेन यजेतेति वचनादेव दुष्यति। यदि तु प्रसङ्गसिद्धिरापद्येत, तदाऽस्तु* त्रयोदश्यां प्रातः सहदेवान्याधाय चतुर्दश्यां प्रातरादिकालेषु यागाः। अङ्गानुष्ठानं तु पूर्वाङ्गानामनीकवत्या सहोत्तराङ्गानां सान्तपनीयया। गृहमेधीयस्य त्वपूर्वत्वादेव साङ्गापेचा। अन्वाधानं त्वाज्यभागार्थमिति द्रष्टव्यम्। केचित्तु एकादशीप्रभृतित्र्यहकालं पृथक्प्रयोगमिष्टिचयं पूर्वपक्षे कर्त्तव्यमिति वदन्ति। तेषां त्र्यहं साकमेधेनेति वचनानुपपत्तिरिति प्राप्ते।

एकस्मिन् प्रातरादिकाले विहितस्य साङ्गतत्तत्प्रयोगस्य त्र्यहकालत्वपक्षे औपदेशिककालैकत्वबाधापत्तेः सद्यस्कालत्वम्। न च सायंप्रातःशब्दयोर्व्ययत्वेनैकवचनान्तत्वे प्रमाणाभावः। एकवचनान्तमध्यन्दिनपदप्रायपाठादेवैकवचनान्तत्वनिर्णयोपपत्तेः। त्र्यहं साकमेधेनेति साङ्गस्यैव त्र्यहकालत्वश्रुतेश्च। अतश्च विशेषणस्यैकत्वस्य विवचितत्वात् सद्यस्काला एवैता इष्टयः॥ ५॥ १॥ ११॥

आङ्गानां॥ दैचपशौ प्रकृतितोहविरासादनोत्तरभाविनां प्रयाजानां अपकर्षस्तिष्ठन्तं पशुं प्रयजन्तीति वचनेन श्रुतः। तथा सवनीये हविरुद्वासनोत्तरभाविनामनूयाजानामुत्कर्षः आग्निमारुतादूर्द्धमनूयाजैश्चरन्तीति श्रुतः। तौ किमुत्कर्षापकर्षौ तन्मात्रविषयावुत तदन्तस्यापकर्षस्तदादेश्चोत्कर्ष इति चिन्तायां, प्रयाजादिग्रहणस्योपलचणत्वे प्रमाणाभावात् पूर्वोत्तरपदार्थानां च प्रयाजाद्यनङ्गत्वेन तदुत्कर्षापकर्षयोरुत्कर्षापकर्षशङ्काऽनुपपत्तेस्तत्तत्पदार्थानां प्रधानप्रत्यासत्तिबाधापत्तेश्च तन्मात्रस्यैवोत्कर्षापकर्षाविति प्राप्ते।

---

* इत्थमेव पाठः सर्वत्र। तदा सन्तु,—इति तु भवितुमुचितम्।

प्रकृतौ पाठादिक्रमेण पदार्थानां क्लृप्तक्रमत्वात्पूर्वपदार्थोपस्थापितस्यैवोत्तरपदार्थस्यानुष्ठेयत्वावगतेः श्रुतवचनयोस्तन्मात्रविषयत्वेऽप्यनूयाजोत्तरपदार्थस्य सूक्तवाकादेरनूयाजानन्तर्यानूयाजोपस्थापितत्वादिधर्मानुग्रहलोभेनोत्कर्षः। न च प्रधानप्रत्यासत्त्यनुरोधेन तदभावः। तस्याः प्रयोगविधिना क्लृप्तप्रमाणगम्यक्रमानुरोधेनैव प्रकृताविव विकृतावपि कल्पनीयत्वात्। एवमपकर्षेऽपि प्रयाजानामाघारादिरूपपूर्वपदार्थानन्तर्यस्य तदुपस्थापितत्वस्य च बाधे प्रमाणाभावेन पूर्वपदार्थभाविनामपि तदुपपत्तेः। न चापकर्षे पूर्वभाविनां काचित् क्षतिः। प्रधानप्रत्यासत्तेः प्रकृताविवाकिञ्चित्करत्वात्। न चापकर्षे हविरासादनोत्तरक्रियमाणपदार्थस्य सामिधेन्यादेस्तदानन्तर्यतदुपस्थापितत्वादिरूपधर्मबाधापत्तेरपकर्षानुपपत्तिः। तद्बाधस्योत्तरकालिकत्वेनाविरोधात्। सामिधेनीनाञ्च प्रयाजाङ्गत्वादपि हविरासादनानन्तर्यादिबाधेऽप्यदोषः॥ ५॥ १॥ १२॥

प्रवृत्त्या॥ सोमे सुत्यायां प्रातरनुवाकप्रैषं प्रातर्यावभ्यो देवेभ्यो होतरनुब्रूहीत्येवंविधं होत्रे दत्वा प्रतिप्रस्थातः सवनीयान् निर्वपस्वेति प्रेष्यतीति प्रैषं विधाय होत्रा प्रातरनुवाके उच्यमानेऽध्वर्योरुपास्तिर्विहिता आप्रातरनुवाकसमाप्तेः। सा च वचनादेव वैकल्पिकी। ततो यत्र होतुरभिजानादभूदुषारुशत्पशुरिति तत्प्रचरण्यां स्रुचि चतुर्गृहीतं जुहोतीत्यादिना प्रचरणीहोमादिकान् पदार्थान्विधाय सवनीयहविर्विधिः। ततो बहिष्पवमानाद्यन्ते अग्नीदग्नीन्विहर बर्हिः स्तृणाहि पुरोडाशानलंकुर्विति प्रैषः समाम्नातः। तत्र सवनीयहविष्षु धानादिषु दार्शिकविध्यन्ते निर्वापप्रोक्षणादिरूपे प्राप्ते

निर्वापान्तस्य प्रैषविधानादपकर्षोऽलङ्करणादेस्तोत्कर्षोऽविवाद एव। मध्यतनानां प्रोक्षणादीनां त्वलङ्करणात्प्रागेव करणं न तु निर्वापोत्तरं, प्रधानाङ्गानां प्रचरणीहोमादीनां क्लृप्तकालत्वेन तैर्व्यवधानादिति प्राप्ते।

प्रोक्षणादीनां निर्वापरूपपूर्वपदार्थोपस्थितानामतिक्रमे प्रमाणाभावान्निर्वापोत्तरमेव करणम्। न च सौमिकैर्व्यवधानम्। उपास्तिपक्षे तावत्प्रधानाङ्गभूतायामुपास्तावध्वर्युकर्तृकत्वस्यावश्यकत्वादतिदेशप्राप्तनिर्वापसमानकर्तृकत्वानुरोधाच्च प्रोक्षणादावितरमन्य इति न्यायेन प्रतिप्रस्थातृकर्तृकत्वावगतेः सौमिकस्य व्यवधायकत्वानुपपत्तेः।

नैवं सति निर्वपस्वेति प्रैषे प्रोक्षणादिलक्षणापत्तिरित्यादितन्त्ररत्नोक्तदूषणावकाशः। न्यायेनैव तत्प्राप्त्यङ्गीकारेण लक्षणादावापादकाभावात्। उपास्त्यभावपक्षे तु यद्यप्यध्वर्युरेवातिदेशप्राप्तः प्रोक्षणादौ कर्तेति निर्वापेण भिन्नकर्तृकेण न शक्यते प्रोक्षणादिकमुपस्थापयितुं, तथापि अध्वर्योरपि निर्वापे प्रैषद्वारा प्रयोजककर्तृत्वेन समानकर्तृकत्वोपपत्तेर्युक्तमेव निर्वापोपस्थापितत्वं प्रोक्षणादौ। न चास्मिन् पक्षे प्रधानाङ्गप्रचरणीहोमादिभिर्व्यवधानम्। तस्याभ्युदयेत्यादिप्रातरनुवाकपरिधानीयाकालकत्वेन प्रोक्षणाद्युत्तरत्वात्। प्रातरनुवाकस्यापि बहुत्वेन तन्मध्य एवैष्टिकपदार्थसमाप्त्युपपत्तेश्च।

यत्त्वत्र तन्त्ररत्नस्वरसादन्यैरपि वक्ष्यमाणामैष्टिकपदार्थानां बहुत्वात् प्रचरणीहोमकालविधिरुपास्तिपक्षाभिप्रायेणैवेत्युक्तम्। तत् प्रचरणीहोमस्य उपास्त्यभावपक्षे कालविध्यभावे प्रतिप्रस्थातरित्यादिप्रैषोत्तरभाविपाठक्रमेण क्लृप्तक्रमकाणां प्रचरणीहोमादीनां प्रधा-

माङ्गतया क्रमबाधे प्रमाणाभावात् प्रोक्षणादीनां सौमिकपदार्थो-त्तरत्वस्य प्रतिप्रस्थातृकर्तृकत्वस्यैव वाऽऽपत्तेरपेक्षितम्। इतरथो-पात्तिपक्षेऽपि तस्या एव प्रतिप्रस्थातृकर्तृकत्वापत्त्या प्रोक्षणादौ तद्-नापत्तेश्च।

यत्तु ऐष्टिकानां बहुत्वाद्भूदुषेत्येतदुत्तरमपि तदापत्तेः प्रचरणी-होमकालवाक्यस्य सङ्कोच इत्युक्तम्। तदस्तु नाम तथा। तथापि यावन्त एवैष्टिकास्तत्कालावधि कर्तुं शक्यास्तावतां पूर्वं करणापत्ते-रन्येषां च तदुत्तरं प्रतिप्रस्थात्रा वा करणापत्तेर्वाक्यसङ्कोचे प्रमाणा-भावः। वस्तुतस्तु सर्वे पूर्वं कर्तुं शक्या एवेत्युक्तम् ॥ ५ ॥ १ ॥ १३ ॥

असंयोगात्तु ॥ सौमिकाग्नीषोमप्रणयनानन्तरं पश्वङ्गतया यूपं छि-नत्ति इत्युत्पन्नं यूपछेदनं दीक्षासु यूपं छिनत्तीत्यनेनापकृष्टं प्रथा-जन्यायेन प्राचोऽपि पदार्थानग्नीषोमप्रणयनादीनपकर्षतीति प्राप्ते।

भिन्नप्रयोगविधिपरिगृहीतत्वेनाच पाठस्य क्रमानियामकत्वा-न्महाप्रयोगविध्यैक्येऽपि वा उत्पत्तिविधिवेलायां प्रयोज्यत्वानवगमेन क्रमानाकाङ्क्षत्वात् पाठस्य क्रमाकल्पकत्वेन बहुक्रमत्वाभावाद्दीक्षा-कालविधिवाक्ये च प्रयोज्यत्वावगमेन तत्रैव क्रमापेक्षतया भिन्न-प्रयोगपरिगृहीतैरपि सोमाङ्गदीक्षाकालीनपदार्थैः पाठेन क्रम-कल्पनात्तत्रैव सप्तहोतृहोमानन्तरं यूपछेदनमात्रं यूपोत्पादकधर्म-मात्रं चाऽपकृष्य कार्यं, न तु तदन्तापकर्षः। एतेन यूपछेदनस्य दीक्षान्ते करणमिति केषाञ्चिदुक्तमपास्तम्। दीक्षासु यूपं छिनत्ती-त्यस्य सप्तहोतृहोमानन्तरं पठितत्वात् ॥ ५ ॥ १ ॥ १४ ॥

प्रासङ्गिकञ्च ॥ सवनीयपश्वङ्गतन्त्रं सवनीयहविष्षु प्रसज्यते, ऐष्ट-

पशुतन्त्रस्य पशुपुरोडाशे इति वक्ष्यते। प्रसङ्गे च ये उपकाराः प्रयाजानूयाजादिजन्यास्तन्त्रितो लब्धास्तज्जनकीभूतपदार्थांशे नातिदेशापेक्षा। ये तु न लब्धा आज्यभागपिष्टलेपफलीकरणहोमादिजन्यास्तत्पदार्थांशेऽस्त्येवातिदेश इत्यपि वक्ष्यते। तदिह पाशुकानूयाजानां दैक्षे हृदयादियागोत्तरत्वात् सवनीये चाग्निमारुतशस्त्रोत्तरत्वात्तत्पूर्वभाविसवनीयहविःपशुपुरोडाशादीनामङ्गभूताः पिष्टलेपफलीकरणादिहोमाः किमनूयाजोत्तरं उत्कर्ष्टव्या उत नेति चिन्तयाम्। प्रकृतौ दर्शपूर्णमासयोः पिष्टलेपफलीकरणहोमानां परप्रयुक्तानूयाजैरेव बद्धक्रमत्वादिहापि सत्यपि भिन्नप्रयोगविधिपरिग्रहे अङ्गभूतस्यान्याङ्गभूतानूयाजोत्तरत्वस्यापि सम्भवेनोत्कर्षे प्राप्ते।

न तावदिहकृतावेव क्रमक्लृप्तिः। भिन्नप्रयोगविधिपरिग्रहात्। पुरोडाशादिप्रयोगविधिना विहितानां पिष्टलेपफलीकरणहोमेडाभक्षणानां व्यवधायकाभावविशिष्टप्रकृतिदृष्टपौर्वापर्यस्य क्रमकल्पकत्वेनोत्कर्षे तत्क्रमबाधप्रसङ्गाच्च। पाशुकप्रयोगविधिविहितानां समिष्टयजुःपत्नीसंयाजानामुक्तप्रमाणेनैव क्रमक्लृप्तेस्तद्बाधस्यापि प्रसङ्गाच्च। नापि प्रकृतितोऽनूयाजोत्तरत्वक्लृप्तिः। प्रकृतौ हि पाठकल्पितवाक्येन क्रमनियम एव विधीयते, न तु क्रमोऽपि। तस्य प्रयोगविध्याक्षेपादेव प्राप्तेः। अतश्च प्रकृते भिन्नप्रयोगविधिपरिगृहीतानां सामान्यतः क्रमस्याप्राप्तौ तदाश्रितस्य नियमस्याप्राप्तिः। न ह्याक्षेपात्पूर्वमेवावघातविधिवत्प्रवृत्त्यङ्गीकारेण कल्पितवाक्यस्य क्रमविधायकत्वमेवेति शक्यं वक्तुम्। तदिह पाठकल्प्यस्य विधेः

क्रमत्वाभावेन समानतया आक्षेपप्रतिबन्धायोगात्। इतरथा दधियागपयोयागयोरपि पाठेन क्रमापत्तेः। अतश्च प्रकृतेऽप्यनूयाजोत्तरत्वस्याप्राप्तेः पुरोडाशाद्यङ्गिडाभक्षणोत्तरमेव पिष्टलेपफलीकरणहोमौ ॥ ५ ॥ १ ॥ १५ ॥

तथाऽपूर्वम् ॥ दर्शपूर्णमासयोर्हविरभिवासनोत्तरं वेदिकरणमाम्नातम्। तस्य च पूर्वेद्युरमावास्यायां वेदिं करोतीति वचनेनापकर्षः अतः पूर्वभाविनोऽपि हविरभिवासनादेर्नापकर्षेत्। एकप्रयोगविधिपरिगृहीतत्वेन पाठस्य क्रमकल्पकत्वात्। अमावास्यापदस्य कर्मपरत्वे लक्षणाप्रसङ्गेन कालपरत्वावसायाद्धविरभिवासनोत्तरभाविवेदिकरणविधेरेव पौर्णमासाङ्गताबोधकत्ववद्दर्शाङ्गताबोधकत्वाच्च। न च कालद्वयविधाने वाक्यभेदः। सामर्थ्यादिदं कृत्वा वेदिं करोतीति श्रुतवेदकरणानन्तर्यबलेनैव च पूर्वेद्युष्ट्वस्य प्राप्तत्वेनानुवादात्। प्रधानप्रत्यासत्तिलाभात् पौर्णमासस्यातीतत्वाच्च दार्शिकवेदिकरण एवायं विधिः। अतश्च पौर्णमाससाधारण्येन पाठस्य क्रमकल्पकत्वावश्यम्भावात्। अत एव च यूपच्छेदनवैलक्षण्यात्तदन्तापकर्षे प्राप्ते।

कालपरत्वेऽपि कालविधेः प्रयोगविधित्वेन दार्शिकवेदिकरणस्य तत्रैव प्रयोज्यत्वावगमात्तदवगमोत्तरञ्च क्रमापेक्षायां पाठस्य नियामकत्वासम्भवाच्छ्रौतक्रमान्तरसत्त्वाच्च न हविरभिवासनेन बद्धक्रमत्वम्। अतश्च पाठोऽपि परिशेषात् पौर्णमासविषय एव। यदि तु खण्डपर्वणि चतुर्दश्यां प्रातरग्न्याधानदिने वेदिकरणसिद्ध्यर्थं लक्षणामप्यङ्गीकृत्यामावास्यापदेन कर्मैवोच्येत, तदा दार्शिकवेदिकरणस्याय-

मेव विनियोगविधिरिति हविरभिवासनेन दार्शिकवेदिकरणस्य सुतरां न बहुक्रमता । न चैवं पूर्वेद्युःकालविशिष्टवेदिकरणस्य दर्शाङ्गतया वाक्येन विनियोगात् प्रकरणेन पौर्णमासाङ्गत्वायोगः । वेदेः सर्वसाधारण्येन तत्करणस्याप्यङ्गतयाऽपेक्षासद्भावात्पौर्णमासप्रकरणेन गर्दभाभिधान्यां आदानस्येवाक्षेपोपपत्तेः । अत एव वाक्येन श्रुत्या वोभयत्र न प्रकरणस्यार्थाक्षेपस्य वा बाधः । तयोः पूर्वेद्युःकालमन्त्ररूपगुणमात्रविधिफलकतया क्रियाविधिफलकत्वाभावात् । अतो न प्रकृते तदन्तापकर्षः ॥ ५ ॥ १ ॥ १६ ॥

सान्तपनीया ॥ दैवान्मानुषाद्वा प्रतिबन्धान्मध्यन्दिने क्रियमाणसान्तपनीयाया उत्कर्षे स्वकालेऽग्निहोत्रहोमः कर्त्तव्यो न वेति चिन्तायां, स्वकालकरणे सान्तपनीयायां प्रणीतस्याग्नेः* पुनः प्रणयनासम्भवान्मन्त्रवत्प्रणयनलोपेन वैगुण्यापत्तेः कालस्य च पदार्थगुणत्वेन प्रयोगविधिविविशेषणतयोत्तरकालप्रतीतिकत्वेन च लोपेऽपि वैगुण्याभावादुत्कर्ष इति प्राप्ते ।

अनुपादेयत्वात्कालस्य नित्ये यथाशक्ति उपादेयाङ्गत्यागस्यैव तदनुरोधेन षष्ठे वक्ष्यमाणत्वात् प्रणयनलोपेनापि कालानुग्रह एव न्याय्यः । कालस्य निमित्तविशेषणत्वेन सुतरामनुग्राह्यत्वाच्च । वस्तुतस्तु अग्निहोत्रस्यान्यतः प्रणयनजन्योपकारलाभे तदनाक्षेपकत्वस्य दर्शादौ क्लृप्तत्वात्तल्लोपेऽपि न वैगुण्यम् । अतः स्वकाल एवाग्निहोत्रं हुत्वा

---

* प्रणिहितस्याग्नेः,—इत्यादर्शपुस्तकेष्वशुद्धः पाठो लिपिकरप्रमादज इत्यनुमीयते ।

सान्तपनीया कर्त्तव्येति सान्तपनीयाग्रानां नैव क्रम आदरणीयः। अत्र च सान्तपनीयेत्युपलक्षणं प्रारब्धकर्ममात्रस्य, अग्निहोत्रेत्यपि आवश्यकमात्रस्य। अनावश्यकविषये अपवाद* एतद्यज्ञस्य क्रियते यदन्यस्य तन्त्रे विततेऽन्यस्य तन्त्रं प्रतायत इति निषेधात्। न चैवमनीकवत्युत्कर्षेऽपि मध्यन्दिने सान्तपनीयाऽऽपत्तिः। तथात्वे सान्तपनीयाया-अनीकवत्युत्तरकालत्वस्यैकप्रयोगविध्यवगतस्य प्रणयनस्य च बाधेन वरमेकस्यैव मध्यन्दिनकालस्य बाधात्।

केचित्तु निमित्तविशेषणीभूतकालस्यैवानुपादेयत्वं न तु कालमात्रस्येत्यङ्गीकृत्य सान्तपनीयायाः काम्यवन्मध्येऽनावश्यकत्वादकरणमिति वदन्ति। तन्न, चातुर्मास्यानामपि नित्यत्वान्मध्यन्दिनस्यापि निमित्तविशेषणत्वापत्तेरुपेक्षितम्॥ ५॥ १॥ १७॥

षोड़शी॥ देवान्मानुषाद्वाऽपराधादेवोक्थ्येषूत्कृष्टेषु षोड़श्युत्कृष्यते न वेति चिन्तायां, समयाध्युषिते सूर्ये षोड़शिनस्तोत्रमुपाकरोतीति वचनविहितसमयाध्युषितकालबाधे प्रमाणाभावादुत्कर्षः। न च तं पराञ्चमुक्थ्येभ्यो गृह्णाति षोड़शिनमिति वचनेन ग्रहणे उक्थ्यपरभावस्य विहितत्वात् स्तोत्रस्य च ग्रहं वा गृहीत्वेति वचनेन ग्रहग्रहणोत्तरकालत्वात्तदनुरोधेन समयाध्युषितकालबाधः। तं पराञ्चमित्यनेन षोड़शिग्रहयागाभ्यासस्यैवोक्थ्यपरभावविधानेन ग्रहग्रहणस्य स्तोत्रपूर्वकालत्वेऽपि बाधकाभावात्। अतएवात्र गृह्णाति

---

* इत्यमेव पाठः सर्व्वत्र। मम तु अप वा,—इति पाठः प्रतिभाति। वै,—इति प्रसिद्धियोतकोनिपातः। अपच्छिद्यते इति व्यवहितेन संबन्धः।

निर्वपतिवद्यागपर एव*। अस्तु वा ग्रहणपरस्तथापि तैत्तिरीय-शाखायां षोड़शिनः सवनत्रयेऽपि आम्नानात्सवनान्तरविषयकं तं पराञ्चमिति वाक्यम्। अस्तु वैतदपि सर्वविषयं, तथापि ग्रहं वेत्यस्य सामान्यविषयत्वादुक्थ्योत्तरकालं ग्रहणेऽपि समयाध्युषिते स्तोत्रकरणे न कश्चिद्विरोधः।

यदि तु सामान्यविशेषरूपबाधस्य यथावस्थितशास्त्रार्थविषय-त्वेन दैवाद्यपराधे अप्रवृत्तेः सर्वपदार्थानां तुल्यबलत्वमुच्यते। तथा-प्युक्थ्यपरभावस्य क्रमत्वेनोपादेयत्वात् पूर्वाधिकरणन्यायेन बाधोप-पत्तेः समयाध्युषितकालानुग्रहो न्याय्य एव। न च कालस्याङ्ग-त्वेन प्रधानाङ्गक्रमापेक्षया दौर्बल्यम्। उभयोरप्यङ्गाङ्गत्वात्। न च ग्रहणस्याचावदानवत् प्रदानोपक्रमता। तद्वदिहैकपदार्थत्वाभावा-दिति प्राप्ते।

ग्रहणस्य षोड़शियागाभ्यासकल्पकत्वेनान्तरङ्गत्वात्तत्क्रमस्य प्राब-ल्यम्। वस्तुतस्तु तं पराञ्चमित्यस्यापि कालपरत्वमेवेत्यन्तरङ्गतद्बा-धोन्याय्य एव। न च ग्रहणस्योत्तरकालं करणेऽपि स्तोत्रस्यैव काला-नुग्रहः शक्यः। तथात्वे स्तोत्रग्रहणोत्तरकालत्वस्य प्रधानप्रत्यासत्तेश्च बाधप्रसङ्गेनैकस्यैव समयाध्युषितकालबाधस्य न्याय्यत्वात्। अतस्त-स्याप्युत्कर्ष इति सिद्धम्॥ ५॥ १॥ १८॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां

पञ्चमस्य प्रथमपादः॥

---

* इत्यमेव पाठः सर्व्वत्र। मम तु, उद्गातिर्निर्व्वपतिवद्यागपर एव,— इति पाठः प्रतिभाति।

अथ पञ्चमोऽध्यायः ।

द्वितीयः पादः ।

सन्निपाते ॥ यत्रानेकेषां प्रधानानामङ्गानां वा एकेन प्रयोगविधिनोपसङ्ग्रहात् साङ्गानां साहित्यावगमः, तत्र दर्शपूर्णमासप्राजापत्यादौ किं एकस्य प्रधानस्य सन्निपत्योपकारकाङ्गकाण्डं कृत्वेतरस्य कर्त्तव्यमित्येवं काण्डानुसमयोऽथ वा “एकैकमङ्गं एकैकस्य कृत्वेतरस्य कर्त्तव्यमित्येवं पदार्थानुसमय इति चिन्तायां, प्रधानप्रत्यासत्त्यनुग्रहात् प्रकृतितः परस्परसंश्लिष्टानामेवोपाकरणनियोजनादीनामेकैकस्मिन् पशौ प्राप्तत्वाच्च काण्डानुसमयः । एकप्रयोगत्वञ्च आरादुपकारकाङ्गाभिप्रायेणेति न कश्चिद्विरोध इति प्राप्ते ।

प्रत्यक्षवचनेनैकस्मिन् काले साङ्गानां सर्वेषां प्रयोगविधानात् प्रधानसाहित्यवदङ्गेष्वपि साहित्यावगमादेकैकाङ्गेन सर्वप्रधानानां युगपदुपकर्त्तव्यमित्यर्थावगमेनैकमुपाकरणाख्यमङ्गं सर्वपशूनां कृत्वा नियोजनं कार्य्यम् । प्रधानप्रत्यासत्तिस्तु प्रत्यक्षवचनावगतोक्तसाहित्यानुरोधेनैव कल्पनीया । उपाकरणानन्तरमेव च नियोजनमिति यथाप्रकृत्येवानुष्ठानम् । आवृत्तानामावृत्तत्वं तु प्रधानसाहित्यानुरोधेनेति न कश्चिद्विरोधः । अतः पदार्थानुसमयः । प्रवृत्तिक्रमविचारश्चैतदधिकरणोत्तरं द्रष्टव्यः ॥ ५ ॥ २ ॥ १ ॥

कारणात् ॥ यत्र तु प्रधानविरोधो यथाऽश्वप्रतिग्रहेष्ट्यां व्रते सहस्रे वाऽश्वदाने तावत्सु पुरोडाशेषु श्रप्यमाणेषु यदि सर्वेषा-

मधिश्रयणं हलोद्वासनं क्रियेत, ततो दद्ध्रेरन्। अतस्तत्र काण्डानु-समय एव कतिपयाङ्गानाम्।

यत्त्वत्र वार्त्तिके निमित्तगतस्य यावत्त्वस्याविवक्षितत्वान्नैमित्तिक-गतस्य च तावत्त्वबहुत्वादेः पृष्ठग्रमनीयन्यायेनानुवाद्यगतत्वेनाविव-क्षितत्वात्साहित्यबोधकवचनाभावेनानेकेष्वपि अश्वदानेषु प्रत्येक-प्रयोगेनैव वारुणेष्टिकर्त्तव्यत्वावगतेर्भाष्यस्थमेतदुदाहरणं साहित्य-बोधकवचनान्तरसम्भावनयेत्युक्तम्।

तन्न। सत्यादुदवसाय पृष्ठग्रमनीयेन यजेरन्नित्यत्र हि उद-वसानसमानकर्त्तृकत्वबलेनैव पृष्ठग्रमनीये बहुत्वादेः प्राप्तत्वाद्युक्ता साहित्याविवक्षा। प्रकृते तु निमित्तसमसङ्ख्याकत्वस्यैव तावच्छब्दा-र्थस्य नैमित्तिकविशेषणतया अप्राप्तस्य विधेयत्वाद्युक्तमेवानेक-निमित्तसन्निपाते नैमित्तिकसाहित्यम्। तावच्छब्दाभावे हि युगपदनेकनिमित्तसन्निपाते तन्त्रेण नैमित्तिकेष्टिरेकैव प्रसज्येतेति युक्त एव तावच्छब्दार्थविधिः।

यत्रापि हि पुरुषार्थतया न क्रत्वन्तःपातित्वं यथा युगपदनेक चाण्डालादिस्पर्शादावनेकगृहदाहादौ च, तत्रापि नैमित्तिकस्य सकृदनुष्ठानं। किमुत क्रतुप्रयोगमध्यवर्त्तितदङ्गवारुणीष्टेः। अतश्चा-ग्नेयादिभेदेऽपि प्रयाजाद्यङ्गतन्त्रत्ववद्युगपदनेककपालभेदने होम-तन्त्रत्ववच्च वारुणीष्टेस्तन्त्रत्वप्रसक्तौ निमित्तसमसङ्ख्याकत्वविधानेन तावत्त्वप्रतीतावपि एकप्रयोगविधिपरिगृहीतत्वेन साहित्यप्रतीतेर्युक्त-मेवोदाहरणत्वम्।

तत्र चारादुपकारकेषु बहुधा प्रसङ्ग एव। सन्निपातेषु बहुधा

पदार्थानुसमय एव । क्वचिदेव तु प्रधानविरोधे काण्डानुसमयः । प्रधाने तु सम्प्रतिपन्नदेवताकत्वात्तन्त्रत्वमेव । पुरोडाशमात्रे तु निमित्तसमसङ्ख्याकत्वं प्राजापत्यवदिति द्रष्टव्यम् ॥ ५ ॥ २ ॥ २ ॥

मुष्टि ॥ पदार्थानुसमयप्रसङ्गात् क्रियानेकः पदार्थ इति चिन्त्यते । किमेकैकमुष्टिनिर्वाप एकः पदार्थस्तेन चाग्नेयाग्नीषोमीयनिर्वापयोरनुसमयः, किं वा चतुर्मुष्टिनिर्वाप एकः पदार्थस्तावता चानुसमयइति चिन्तायाम् । एकैकमुष्टिनिर्वापे यत्नसमाप्तेर्मन्त्रसत्त्वाच तस्यैवैकपदार्थत्वमिति प्राप्ते ।

अङ्गपर्यायः पदार्थशब्दस्तस्यैव प्रयोगविधिना विधानात् । विहितस्य चाङ्गत्वम् । न चैकमुष्टिनिर्वापोविहितः, किन्तु चतुर्मुष्टिनिर्वापएव । चतुरश्चतुरोमुष्टीन् निर्वपतीति विधानात् । अत्र हि अर्थप्राप्तनिर्वापानुवादेन न गुणमात्रविधानम् । संख्यामुष्ट्युभयविधाने वाक्यभेदात् । पुरोडाशमात्रपर्याप्तव्रीहिमतः पृथक्करणरूपनिर्वापस्य नियमेनाप्राप्तत्वाच । अतश्चतुर्मुष्टिनिर्वापेनैवानुसमयः । अत एव वीप्साऽप्युपपद्यते ।

एवं कपालान्युपदधाति* अष्टौ दक्षिणत एकादशोत्तरत इति संख्यादिविशिष्टोपधानविधानात् सर्वकपालोपधानेनानुसमयः । यद्यपि कपालगतबहुत्वमुद्देश्यविशेषणत्वादविवक्षितं, तथापि अष्टत्वादिसंख्याया उपधानविशेषणत्वादिवक्षोपपत्तिः । यद्यपि च तत्तन्मन्त्रादिभेदादेकैकोपधानविधिरपि कश्चिदुन्नीयेत, तथापि

* भाष्ये तु, कपालानुपदधाति,—इति पाठः ।

वक्ष्यमाणकण्डिकाभिधारणन्यायेनैकपदार्थत्वं सर्वोपधानस्य द्रष्टव्यम् ।
अतः आग्नेयस्य सर्वाण्युपधायाग्नीषोमीयस्योपधेयानि ।

एवं द्विर्हविषोऽवद्यतीत्यत्रापि द्वित्वविशिष्टावदानविधानाद्विर-वदानेनानुसमयो न त्वेकैकावदानेन । न च मध्यादवद्यति पूर्वार्धा-दवद्यतीति वाक्याभ्यामेव द्विरवदानप्राप्तेस्तद्विधिवैयर्थ्यम् । एत-द्विध्यभावे चतुरवत्तवाक्यस्य चतुःसंख्या मध्याद्भिः पूर्वार्धाद्भिरित्येवं हविष एव सम्पाद्येत । एतत्सत्त्वे तु तद्विरोधादुपस्तरणाभ्यभि-घारणाभ्यामिति तद्वाक्यस्था चतुःसंख्याऽनुवाद एव ।

इदञ्च सान्नाय्यविषयं द्विरवदानानुसमयकथनम् । आग्नेया-दावबदानादिप्रदानान्तेनानुसमयस्य वक्ष्यमाणत्वात् । सान्नाय्ये तूपस्तरणाभिघारणयोस्तन्त्रत्वाद्दध्नोऽद्भ्यवदानं गृहीत्वा पयसोग्रहणम् । कल्पसूत्रेषु तु पयसोऽद्भ्यवदानं गृहीत्वा पश्चाद्दध्न इत्युक्तम् । तैत्ति-रीयश्रुतौ तादृशक्रमस्य वाचनिकत्वात् । होमस्तन्त्रेणैव सम्प्रतिपन्न-देवताकत्वात् ।

एवमञ्जनाभ्यञ्जनपवनपावनेष्वपि तत्तद्विधिसत्त्वान्नैकैकेन नेत्रेण शरीरावयवेन वाऽनुसमयोऽपि तु अनेकयजमानकेऽहीने एकत्र-नेत्रद्वयेऽप्यञ्जनं कृत्वा यजमानान्तरे तत्कार्यम् । सर्वावयवोपेताभ्य-ञ्जनादिना च प्रत्येकमनुसमयः । सत्रे त्वध्वर्युर्गृहपतिं दीक्षयि-त्वेत्यादिना तत्तत्संस्कारकदीक्षोत्तरकालत्वविधानात् काण्डानु-समय एव ५ ॥ २ ॥ ३ ॥

संयुक्ते ॥ सान्नाय्यवदाग्नेयाग्नीषोमीयादौ भिन्नदेवत्येऽपि द्व्यव-दानेनानुसमय इति प्राप्ते ।

चतुरवत्तं जुहोतीत्यनेनावत्तोद्देशेन होमाख्यसंस्कारविधानादर्था-देवावदाने प्राप्ते द्विर्हविषोऽवद्यतीत्यनेन द्वित्वमात्रविधानादुक्तविध-चतुरवत्तहोमस्यैवैकपदार्थत्वेनावदानादिप्रदानान्तेनानुसमयः। वस्तु-तस्तु अवत्तस्योद्देश्यत्वेन ततः पूर्वमवदानप्राप्तेर्दुरुपपादत्वाद् द्व्यवदान-वाक्ये चावदानमात्रे द्वित्वविधानेऽलङ्करणाद्यर्थाज्यावदानेऽपि स्रुव-वद्द्वित्वप्राप्त्यापत्तेर्हविरुद्देशेनैव द्वित्वविधाने होमादावपि तदापत्ते-र्हविर्विशिष्टोद्देशेन तद्विधाने च वाक्यभेदापत्तेरवश्यं द्वित्वविशिष्टाव-दानविधिस्वीकारेऽपि उपस्तरणादिनिधिन्यायेन दृष्टार्थत्वलाभाय चतुरवत्तहोमविध्युपपादकत्वस्याप्यङ्गीकारादवदानादिप्रदानान्तस्यैवैक-पदार्थत्वावगमेन तेनैवानुसमयः ॥ ५ ॥ २ ॥ ४ ॥

वचनात्तु ॥ यूपधर्माञ्जनोच्छ्रयणसम्मानपरिव्याणादयो यूपगणेऽतिदेशप्राप्ताः पृथक्पदार्था अपि न प्रत्येकमनुसमेयाः। अञ्जना-दिपरिव्याणान्तं यजमानो यूपं नावसृजेदिति प्रकृतावनवसर्गस्य विहितस्येहाप्यतिदेशात्। न चानेन रागप्राप्ते कादाचित्कयूपसंयोगे सति त्यागनिषेधविधिः। पाक्षिकत्वाद्यापत्तेः। अपि तु संयोगा-भावाभावरूपसंयोगाख्यस्यानवसर्गस्यैव साहायार्थं नियमविधिः। अतश्च तदनुरोधेन सत्त्वातिरिक्ते यूपगणे तावत्काण्डस्यानुसमयः। सत्त्वे तु येन केनापि यजमानेन धारणसम्भवात् पदार्थानुसमय एव। अन्यत्रापि तावदतिरिक्तपदार्थानां प्रत्येकमेवानुसमयः ॥ ५ ॥ २ ॥ ५ ॥

पशुगणे ॥ प्रकृतौ सान्नाय्येऽवदानादिप्रदानान्तस्यैकपदार्थत्वा-दतिदेशेन दैक्षेऽपि तथैव प्राप्तौ, दैवतान्यवदाय न तावत्येव होतव्यं, सौविष्टकृतान्यवद्यति, सौविष्टकृतान्यवदाय न तावत्येव होतव्यं,

ऐडान्यवद्यतीति* वचनेन क्रमान्यत्वविधायिना पदार्थभेदावगतिः।
न असम्बन्धिपदार्थान्तरव्यवधाने प्राकृतैकपदार्थता सम्पद्यते।
अतस्त्वैकदेवत्ये पशुगणे प्राजापत्यन्यायेन दैवतावदानादिना प्रत्येक-
मनुसमयः। अन्ते च तन्त्रेण दैवतहोमः।

न च प्रकृतावेकस्य पशोर्दैवताद्यवदानत्रयमानन्तर्येण कृतमिती-
हापि तथैव कार्यमिति शङ्क्यम्। प्राजापत्यन्यायेनैव पश्वेकत्वस्य
प्रकृतावार्थिकत्वेन चोदकविरोधाभावात्। अत एव यत्र विभिन्न-
देवताके पशुगणे चोदकविरोधस्तत्रावदानत्रयं होमश्चैकस्य कृत्वा-
ऽपरस्याप्यवदानत्रयपूर्वकप्रदानान्तं कार्यम्। स्विष्टकृदिडाभक्षणे तु
तन्त्रेणैव; तत्रापि पदार्थानुसमये द्वितीयहोमस्यातिदेशप्राप्तैडाव-
दानानन्तर्यबाधापत्तेः।

वस्तुतस्तु असम्बन्धिपदार्थान्तरव्यवधानेऽपि पश्वावत्तहोमसम्पा-
दकत्वेन दैवतावदानस्याचापि प्रदानावयवत्वोपपत्तेर्विभिन्नदेवताक-
स्थलेऽपि दैवतावदानादिप्रदानान्तेनानुसमयः। एकदेवताके तु
पदार्थावयवानामेवानुसमय इति न कोऽपि विरोधः॥५॥२॥६॥

नानाबीजेषु॥ राजसूये, अग्नये गृहपतयेऽष्टाकपालं कृष्णानां
व्रीहीणां सोमाय वनस्पतये श्यामाकञ्चरुमिति नानाबीजेष्टिरा-
म्नाता। तत्रातिदेशप्राप्तानि कृष्णाजिनास्तरणोलूखलाधिवर्त्तन-
बीजावापाद्यवघातपरावपनविवेचनफलीकरणाद्यधिकरणकतण्डुल-

---

* इत्थमेव पाठः सर्व्वत्र। भाष्ये तु, दैवतान्यवदाय न तावत्येव होतव्यं सौविष्टकृतान्यवदेयानि सौविष्टकृतान्यवदाय न तावत्येव होतव्यं ऐडान्यवदेयानि,—इति प्रकृतौ श्रूयते, इत्युक्तम्।

प्रक्षालनानि तत्तद्विधिविहितत्वेन पृथक्पदार्थत्वात् प्रत्येकमनु-षञ्जेयानि। न चात्र ध्रुवदानस्यावत्तहोमविध्याक्षिप्तत्ववत्सर्वेषामव-घातविध्याक्षिप्तत्वं, येनैकपदार्थत्वं शङ्क्येत। तद्व्यतिरेकेणापि अवघात-सम्भवात्। नापि सर्वेषामवघातपदार्थत्वम्। उलूखलमुसलसंयोग-विशेषस्यैव सर्वौषधावघातवत्तत्पदार्थत्वात्। अतः प्रत्येकानुषङ्गे प्राप्ते।

तत्तद्विधिविधेयत्वेऽपि पृथक्पदार्थत्वे अदृष्टार्थत्वापत्तेः सर्वेषा-मेषां तण्डुलनिष्पत्तिफलकावघातविधिविशेषत्वेनैव विधेयत्वादेक-पदार्थत्वावगतेस्तावताऽनुषङ्गः। एवं सत्युलूखलमपि एकमेवेति सिध्यति, पात्री च। इतरथा हि कृष्णाजिनमुसलशूर्पाणां एकत्वेनोपकारकत्वसम्भवेऽप्युलूखलपात्र्योर्भेदावश्यंभावात्। तस्मात् कृष्णाजिनास्तरणादिप्राप्तिचे तत्प्रक्षालननिनयनान्तेनानुषङ्गः। उत्करे तत्प्रतिपत्तिस्तु तन्त्रेणैवेति विवेकः। एवं कृष्णाजिनास्तर-णादिपेषणान्तेन तस्याप्यनुषङ्गः। तेषामपि पेषणविध्येकवाक्यतया एकपदार्थत्वात्।

नन्वत्र किमनुषङ्गेयपदार्थानां पदार्थत्वम्? न तावदनुष्ठेयत्वम्, एकमुष्टिनिर्वापादावतिव्याप्तेः। नापि विहितत्वघटितमङ्गत्वम्, द्रव्यादावतिव्याप्तेः। नापि क्रियात्वविशेषितं तत्, उपस्तरणकृष्णाजि-नास्तरणादावतिव्याप्तेः। नापि परानवयवत्वे सति निरुक्तं क्रियात्वम्, अवयवत्वस्यापि निर्वक्तुमशक्यत्वात्। दृष्टविधया क्रियान्तरोपकारक-त्वमिति चेत्। अवघातस्यापि दृष्टविधया यागपेषणाद्युपकारकत्वेना-वयवत्वापत्तावघातादिपेषणान्तेनानुषङ्गापत्तेः। अवघातकालीन-

तदङ्गजपादिमन्त्राणामदृष्टविधयोपकारकत्वेनावयवत्वानापत्तेश्च । किं च सत्यप्यवयवत्वे कृष्णाजिनास्तरणोपस्तरणादीनां विहितत्वेनाङ्गत्वात् प्रयोगविध्युपसङ्ग्रहेण साहित्यावगतेः प्रत्येकानुसमयः किं न स्यात् । एवं ध्रुवदानस्यापि होमवद्धविःसंस्कारकत्वात्पेषणावघातन्यायेन प्रत्येकानुसमयः किं न स्यादिति चेत् ।

न । सत्यपि कृष्णाजिनास्तरणादीनां स्वतन्त्रविधिविधेयत्वे अङ्गत्वेन प्रयोगविधिप्रयोज्यत्वे वा अवघाताद्यङ्गत्वेन तद्द्वारैव प्रयोज्यत्वावगमात्तदनुसमयेनैवानुसमय इति न प्रत्येकमनुसमयः प्रत्येकं साहित्यानवगतेः । एवं, परावपनादिप्रक्षालननिनयनान्तानामपि तण्डुलरूपावघातफलोपयोगितयाऽवघातार्थत्वान्न पृथक्पदार्थता । अत एवादृष्टार्थमपि तदङ्गं न पृथक्पदार्थः । एवमुपस्तरणादेरपि स्रुच्यसंसर्गद्वारा होमार्थत्वान्न स्वातन्त्र्येण प्रयोज्यतेति न पृथगनुसमयः । ध्रुवदानस्य तु हविःसंस्कारकस्याप्यवत्तोद्देशेन होमविधानाल्लाघवेनावत्तहोमस्यैव प्रयोज्यत्वेऽवदानांशेऽपि पृथक्प्रयोज्यत्वाकल्पनान्न पृथक्पदार्थत्वम् । अत एव पदार्थत्वं नाम स्वातन्त्र्येण प्रयोगविधिविधेयत्वम् । पदार्थावयवत्वेन सम्मतानां हि कृष्णाजिनास्तरणादीनां नावघातादिनिष्ठप्रयुक्तिविषयत्वज्ञानं विना प्रयुक्तिविषयत्वं ज्ञायते । अवघातादीनां तु नान्यनिष्ठप्रयुक्तिविषयत्वज्ञानोत्तरकालत्वनियतन्तज्ज्ञानम् । प्रयोगविधिनाऽङ्गप्रधानोभयविशिष्टभावनाप्रयुक्तिज्ञापनेनाङ्गप्रयुक्तेरपि प्रधानप्रयुक्त्यन्यथानुपपत्तिप्रसूतत्वाभावात् । अतश्च यत्प्रयुक्त्यन्यथानुपपत्तिं विनैव यत्प्रयुक्तिविषयत्वज्ञानं, स ततः पदार्थान्तरमिति सिद्धम् ॥ ५ ॥ २ ॥ ७ ॥

विकारे ॥ दृष्टे पश्चावनूयाजानां पृषदाज्येनानूयाजान्यजतीति पृषदाज्यं श्रुतम् । प्रयाजानां शुद्धमेवाज्यं प्रकृतिप्राप्तम् । प्रकृतौ चोपभृत्येकस्मिन्नेव पात्रे प्रयाजाङ्गभूतं चतुर्गृहीतं गृहीत्वा तस्मिन्नेव कालेऽनूयाजार्थं चतुर्गृहीतं गृहीतमासीत् । अत्रापि तथैव ग्रहणे प्रयाजाज्यस्य दधिसंसर्गेणोत्पवनावेक्षणयोरदृष्टार्थत्वप्रसङ्गेनाप्राकृतकार्यकारिताऽऽपत्तेः । समानयनवेलायां प्रयाजाज्यस्य न्यूनत्वापत्तेश्च । अतोऽवश्यं पात्रैकत्वमनुगृह्य क्रमो बाध्यतां, विपरीतं वेति चिन्तायाम् ।

पात्रैकत्वस्य श्रुतत्वात् पदार्थत्वाच्च बाधानुपपत्तेः क्रमस्यैव मन्त्रपाठकल्प्यत्वेन पदार्थगुणत्वेन च दौर्बल्याच्छिष्टाकोपाधिकरणन्यायेन बाधः । एवमष्टावुपभृतीत्येतद्वाक्यावगतचतुष्कद्वयसाहित्यबलकल्प्यैककालत्वस्यापि । न च प्रकृतौ तयोः क्लृप्तकल्प्यत्वादिना बलाबलेऽपि विकृतावतिदेशेन प्राप्तयोस्तयोः समत्वान्न बलाबलमिति वाच्यम् । क्लृप्तकल्प्यत्वादिरूपबलाबलस्य विकृतावसम्भवेऽपि पदार्थतद्गुणत्वादिकृतबलाबलस्य विकृतावपि नियामकत्वोपपत्तेः । सम्भवति च विकृतौ नियामकान्तरासत्त्वे प्राकृतस्यापि बलाबलस्य सप्तदशशरावे चरौ चतुःसंख्यामुष्टिनिष्ठप्राथम्यजघन्यत्वस्यैव नियामकता । अतस्तस्मिन्नेव पात्रे अनूयाजकरणवेलायां पृषदाज्यग्रहणमिति प्राप्ते ।

पात्रैकत्वस्य पदार्थत्वेऽपि अनुष्ठेयपदार्थमात्रवृत्तिक्रमस्य तद्धर्मत्वाभावात् प्रत्युत साक्षाद्ग्रहणाङ्गभूतक्रमकालाद्यपेक्षया ग्रहणाङ्गभूतपात्राङ्गत्वैकस्याङ्गगुणविरोधन्यायेन दौर्बल्यात्तदैवोपभृद्द्वयं सम्पाद्य शुद्धं दधि संसृतञ्च चतुर्गृहीतद्वयं ग्राह्यम् ॥ ५ ॥ २ ॥ ८ ॥

प्रकृतेः॥ अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेदिति नक्षत्रेष्टिं विधाय सोऽत्र जुहोतीत्युपहोमा विहिताः। प्रकृतौ च प्रधानस्विष्टकृतोर्मध्ये वाचनिकानारिष्ठहोमाः* समाम्नाताः। तद्-त्रोपहोमानां नारिष्ठेभ्यः पूर्वमनुष्ठानम्। औपदेशिकप्रधानपाठ-क्रमेण प्रधानानन्तर्यस्य विहितत्वात्। उपहोमानामौपदेशिकत्वेन नारिष्ठेभ्यः प्रथममन्वितत्वाच्चेति प्राप्ते।

उपकारसाकाङ्क्षया विकृतिभावनया क्लृप्तोपकारणामातिदेशि-कानामङ्गानां प्रथमं गृहीतत्वेनोपहोमानामन्यतराकाङ्क्षया पश्चादन्व-यादतिदेशस्य च प्रधानवाक्यशेषत्वस्यैव लाघवादभ्युपगमेनोपहोमा-नामातिदेशिकाङ्गयुक्तप्रधानोत्तरमेव पाठेन क्रमावगतेः पश्चादेव करणम्। तत्रापि ब्राह्मणतर्पणान्ते कर्त्तव्यत्वे प्राप्ते मध्ये जुहोतीति वचनेनोपहोमसमाख्यया चात्रेति स्थाननिर्देशाच्च नारिष्ठेभ्योऽनन्तरं कार्याः॥ ५॥ २॥ ९॥

कृतदेशात्तु॥ राजसूये अभिषेचनीयसोमयागानन्तरं वाग्द-शपेयादिदेवनाद्योभिषेकान्ता राजसूयधर्मा अक्षैर्दीव्यति राजा-नञ्जिनाति शौनःशेपमाख्यापयति अभिषिञ्चत इत्यादिभिर्विहिताः। तत्राभिषेकस्तावद्वचनादेव माहेन्द्रस्य स्तोत्रं प्रत्यभिषिञ्चत इत्यभि-षेचनीयमाहेन्द्रकालेऽपकृष्टः। तदपकर्षेऽपि च न तत्पूर्व्वपठितानां-मपि विदेवनादीनामपकर्षः। वेदिकरणन्यायेनापूर्व्वाणामेषां बहु-

---

* भाष्ये जैमिनीयन्यायमालाविस्तरे च नारिष्टहोमाः इति पाठः। दश ते तनवो यज्ञयज्ञिया इत्यादिमन्त्रैराम्नाता आज्याहुतयो-नारिष्टहोमा इति माधवाचार्य्याः।

क्रमत्वाभावात्। अभिषेचनीयोत्तरमपि पाठस्य सत्त्वेन पूर्व्ववत् प्राकृताङ्गोत्तरमेव करणमिति प्राप्ते।

पूर्व्वं प्रयाजादिवद्बद्धक्रमत्वाक्लृप्तावपि इदानीमेव प्रत्यक्षेण पाठेन एकराजसूयप्रयोगविधिपरिगृहीतानां विदेवनाद्यभिषेकान्तानां बद्धक्रमत्वोपपत्तौ अभिषेचनीयपाठेन प्राकृताङ्गानामानुमानिकत्वेन तैः सह विदेवनादीनां भिन्नप्रयोगविधिपरिगृहीतानां क्रमकल्पनानुपपत्तेरभिषेकापकर्षेणापकर्ष एव विदेवनादीनाम्॥ ५॥२॥१०॥

प्राकृताच्च॥ दीक्षणीया ज्योतिष्टमप्रकरणे समाम्नाता, चयनश्चानारभ्याधीतं, वैकल्पिकं सोमयागाङ्गम्। तत्प्रकरणे च सावित्रहोमाख्यासम्भरणादयश्चयनाङ्गभूताधर्माः श्रुताः। पश्चाच्च सचयनज्योतिष्टोमाङ्गदीक्षणीयाप्रयोगोद्देशेन केचिद्गुणाः श्रुताः। तदत्र दीक्षणीयायाः सामान्यतः सोमप्रकरणाम्नातदीक्षणीयाऽपूर्व्वपदार्थैः सह पाठेन बद्धक्रमत्वावगमाच्चयनप्रकरणे दीक्षणीयाया गुणमात्रश्रवणेन पाठाभावाच्च सावित्रादीनामागन्तुकानां दीक्षणीयादिनकृत्यान्ते निवेश इति प्राप्ते।

गुणेनापि गुणिन उपस्थितेस्तद्वाक्ये गुणिन उद्देश्यतया सङ्कीर्त्तनाच्च गुणगुणिनोरेकस्यानावगतेः प्रत्यक्षेण विशेषरूपेण च पाठेन सामान्यरूपस्य पाठस्य बाधात् पूर्व्वं सावित्रादयः पश्चाद्दीक्षणीयेति सिद्धम्॥ ५॥२॥११॥

सन्निपातः॥ चयनप्रकरण एव तत्रैव दीक्षणीयागुणश्रवणानन्तरं रुक्मप्रतिमोचनादि चयनाङ्गं श्रुतम्। ज्योतिष्टोमप्रकरणे च सामान्यतो दीक्षणीयोत्तरं दीक्षितसंस्कारादण्डदानादयः। तदत्रापि

विशेषपाठेन सामान्यपाठस्य बाधाद्दीक्षणीयोत्तरं वत्सप्रतिमोच-नादि कृत्वा दीक्षितसंस्कारा इति प्राप्ते ।

विशेषपाठस्य पश्चाद्भावमात्रबोधनेनान्यथासिद्धस्यावर्जनीयतया-ऽप्युपपत्तौ दीक्षणीयानन्तर्यानियामकत्वात्सामान्यपाठेन क्लृप्तक्रमान् दीक्षितसंस्कारानेव दीक्षणीयानन्तरं कृत्वा तद्दिनकृत्यान्ते वत्स-प्रतिमोचनादि कार्य्यम् ॥ ५ ॥ २ ॥ १२ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
पञ्चमस्य द्वितीयः पादः ।

अथ पञ्चमोऽध्यायः।

तृतीयः पादः।

विवृद्धिः॥ विकृतावेकादश प्रयाजान्यजति षडुपसद इत्यादि-वैकृती अनेकत्रश्रितत्त्वधिकसंख्या श्रुता। सा प्रतिप्रधानं गुणावृत्ति-न्यायेन पृषदाज्यादिवदेकैकस्मिन् प्रयाजादौ प्रत्येकमभिसम्बध्यत इति एकैक एकादशवारमावर्त्तनीय इति प्राप्ते।

द्वित्वादिसंख्यायाः पृथक्त्वनिवेशित्वादेकैकस्मिन् पञ्चस्वपि वा पृषदाज्यवदावृत्तिं विना एकादशत्वानुपपत्तेरुत्पन्नवाक्यगतत्वेन च कर्मभेदकत्वायोगादावश्यके जघन्ये प्रयाजपदे प्रयोगलक्षणया संख्या-विधौ वरं सहितैरेव प्रयाजैस्तल्लक्षणात्सहितप्रयाजप्रयोगाणां सहि-तानामेवोद्देशात्सर्वसंपाद्या संख्येति प्राञ्चः।

वस्तुतस्तु प्रयोगो नाम न पदार्थान्तरं येन लक्षणा स्यात्, अपि तु प्रयाजानामेव व्यक्त्यन्तरम्। अतश्च यथैव प्रकृतौ पञ्च प्रयाजा इत्यादौ तत्तद्व्याप्यजात्यवच्छिन्ना एव व्यक्तयः प्रयाजत्वरूप-व्यापकजात्यवच्छेदेनोच्यन्ते। तथाऽत्रापि एकादशत्वसंख्यासम्पत्त्यर्थं तावद्व्यक्तीनामुक्तौ क्व लक्षणा। अतस्तदभावेऽपि व्यापकधर्मा-वच्छिन्नोद्देशेन विहितैकादशत्वादिसंख्या अनेकत्र व्यासज्यवृत्तित्व-स्वाभाव्या व्यक्त्यन्तराण्याक्षिपन्ती लाघवात् प्रकृतिकॢप्तव्यक्त्यधिक-व्यक्तीः षडेवाक्षिपति नाधिका इति सर्वसम्पाद्यसिद्धिः। न चैवं प्रयोगलक्षणाभावे तिस्र आहुतीरित्यादावपि व्यक्तिभेदापत्तिः। तत्र

विधेयतावच्छेदकविजातीयहोमत्वस्यैकस्य पूर्वमकॢप्तत्वेन भेदप्रति-
योगितावच्छेदकतया त्रयाणामेव तेषां कल्पनयोपपत्तौ तत्तद्व्यक्ति-
त्वस्य प्रतियोगितावच्छेदकीभूतस्य विधेयतावच्छेदकत्वकल्पने गौर-
वात् । प्रकृते तु कॢप्तप्रयाजत्वस्योद्देश्यतावच्छेदकत्वात् संख्यायाश्च
विधेयत्वान्न काचित्कल्पनेति विषमम् ॥ ५ ॥ २ ॥ १ ॥

स्वस्थानात्तु ॥ तत्र प्रयाजैकादशत्वादिसंख्या स्वसम्पत्त्यर्थं व्यक्त्यन्त-
राण्याक्षिपन्ती चतुर्थोत्तमप्रयाजजातीयान्येवाक्षिपति । तदङ्गभूतयोः
प्राकृततदङ्गदेवताप्रकाशकयोरपूर्वयोः प्रैषयोर्मध्ये पञ्चानामन्येषाम-
प्राकृतदेवत्यमन्त्राणां पश्वावाम्नानात् । तद्यद्याद्यानां त्रयाणामभ्यासः
स्यात्तर्हि, मन्त्राणामपकर्षापत्तिः । समिद्यागत्वस्यानुपस्थितेश्च । अतः
सन्निधानाविशेषाच्चतुर्थोत्तमप्रयाजयोरेव चतुश्चतुर्वारं आवृत्तिः ।
उभयत्राभ्यासत्वे च प्राकृतदेवताबाधो लक्षणया वा तद्देवता-
प्रकाशनमित्यन्यदेतत् ।

एवमनूयाजेष्वपि मन्त्रलिङ्गवशादेव प्रथमानुयाजस्याद्यास्त्वारो-
दशमश्च द्वितीयस्याष्टमपर्यन्तं पञ्चमप्रभृत्यभ्यासः नवमैकादशौ
तृतीयस्येति । यत्र तु न किञ्चिद्गमकं, तत्र विषमसम्पाद्यसंख्याक-
स्थले अवश्यकल्प्याया अधिकार्था आवृत्तेरन्तिमविषयत्वात् सर्वस्या-
अप्यन्तिमविषयकत्वमेवेत्यपि वक्ष्यते ।

यत्र तु समसंख्याकैवावृत्तिर्यथा तिसृषूपसत्सु षट्त्वश्रवणे, तत्रै-
कैकस्य द्विरावृत्त्याऽपि षट्त्वसम्पत्तौ नान्तिमाया एव चतुरावृत्तिः ।
समुदाये विहितकार्य्यान्यथानुपपत्त्या कल्प्यमानाया आवृत्तेः सर्व-
विषयत्वौचित्यात् । तत्र च त्रिरनूवाकः पठ्यतामित्यादौ सम्पूर्णानु-

वाक्यस्यावृत्तिदर्शनेन प्रकृतेऽप्युपसत्त्रयमेकवारं कृत्वा पुनः कार्यमिति दृष्टकल्पितवदावृत्तिरिति प्राप्ते ।

प्रथमद्वितीययोर्हि तृतीयातः पूर्वं करणं कृप्तं, तद्दृष्टकल्पितवदावृत्तौ बाध्येत । अतः प्रथमां द्विःकृत्वा द्वितीयाञ्च द्विरभ्यस्य तृतीयाऽपि तथैव कार्येति स्वस्थानविवृद्धिरेवेति सिद्धम् ॥५॥२॥२॥

समिध्यमानवतीम् ॥ पञ्चदशसामिधेनीनां यत्रैकविंशतिरनुब्रूयादित्यत्राधिका संख्या श्रुता, तत्रागमेन संख्यापूरणं दशमे वक्ष्यते । तदत्रागम्यमानानां स्वर्णां, यद्यपि न्यायेनान्ते निवेशः प्रसज्यते, तथापीयं वै समिध्यमानवती असौ समिद्धवती यदन्तरा तद्धाय्या इति द्यावापृथिव्यन्तरालत्वेन स्तुतस्य समिध्यमानवतीसमिद्धवत्यन्तरालस्याप्राप्तिबलकल्पितविधिविहितस्य सत्त्वात्तदन्तराल एव सर्वासामागम्यमानानां निवेशः । न च धाय्यापदपरिभाषितानामेव मन्त्रविशेषाणामन्तरालनिवेशोऽन्येषां त्वन्त इति वाच्यम् । धीयमानत्वयोगेन सर्वेषामेव धाय्यापदवाच्यत्वादिति प्राप्ते ।

नायं यौगिकः, स्तोत्रादावागम्यमानास्वपि धाय्याशब्दप्रयोगापत्तेः । पाणिनिना सामिधेनीष्वेव धाय्याशब्दस्यानुशिष्टत्वाच्च । अतो रूढ एवायम् । सोऽपि यत्रैव वेदे पृथुपाजवत्यौ धाय्ये इत्यादिना परिभाषितस्तत्रैव । तेषामेव चान्तराले निवेशः, अन्येषां त्वन्ते इति । अत एव चैधातव्यायामधाय्याशब्दकाया अग्ने वीत इत्यस्याश्चपत्रिष्टुभा परिदधातीत्यन्तनिवेशदर्शनमुपपद्यते ॥५॥२॥३॥

स्तोम ॥ प्रकृतौ बहिष्पवमाने नवस्तृचाः स्तोत्रीयोऽनुरूपः पर्यासइत्येवंसंज्ञाः । विवृद्धस्तोमकायाञ्च विकृतौ बहिष्पवमाने

च्छगागमो वक्ष्यते। तचागम्यमानानामृचां प्राक् पर्यासात् निवेशः। पर्यासशब्दस्य नद्रीपर्यासः चेचपर्यास इत्यादावन्तवचनत्वेन प्रसिद्धेः समाख्ययैवान्तिमस्थानत्वावगतेस्तद्बाधार्थं प्राक् पर्यासादागन्तूनां निवेशकल्पना। अत एव द्वादशाहे पार्ष्टिके द्वितीयेऽहनि पञ्चदशस्तोमके स्तोचीयानुरूपौ पठित्वा 'वृषण्वन्तौ तृचौ समाम्नाय पश्चात्पर्यासः पठित इति प्राप्ते। '

प्रकृतिकृप्तस्थानुरूपानन्तर्यस्य पर्यासे बाधे 'प्रमाणाभावात् समाख्यायाश्च प्रकृतौ पाठप्राप्तान्तिमस्थानत्वानुवादकत्वेन स्थानविधिकल्पकत्वाभावादन्त एवागन्तूनां निवेशः। द्वादशाहे पार्ष्टिके द्वितीयेऽहनि तु वाचनिकं वृषण्वतोस्तृचयोः प्राक् पर्यासादनुष्ठानं, तदपि तयोरेव। तद्विकारेष्वन्येषामागमस्त्वन्त एव॥ ५॥ २॥ ४॥

अन्ते तूत्तरयोः॥ यच तु विरुद्धस्तोमकेष्वेव क्रतुषु उत्तरयोर्माध्यन्दिनार्भवपवमानयोर्वक्ष्यमाणः सामागमस्तच स नान्ते। अनारभ्याधीतेन चीणि ह वै यज्ञस्योदराणि गायची बृहत्यनुष्टुप्च ह्येवावपन्त्यत एवोद्वपन्तीति वचनेनाप्राप्तिबललब्धविधिशक्तिकेन गायत्र्यादिष्वेव सामावापविधानात्। अतो नान्त इति प्रत्युदाहरणमाचमिदम्॥ ५॥ २॥ ५॥

ग्रहेष्टकम्॥ यानि प्राकरणिकानि ग्रहणान्यैन्द्रवायवादीनि, तानि यथापाठमेव व्यवस्थितानीति न तेषु चिन्ता। यानि त्वनारभ्याधीतानि °तेष्वपि यचांशुदाभ्यादौ प्राकरणिको विनियोगस्तच विनियोगविधिपाठबलादेवानुष्ठानसिद्धेर्न चिन्ताविषयत्वम्। अत एव न तयोरन्ते करणम्। अपि तु प्रातःसवन एव

धारायहेभ्यः पूर्वमेव । यच्च त्वनारभ्याधीतमेव तेषां यागाङ्गतयाऽपि विनियोजकं वाक्यं, तत्र ग्रहणस्य यागाभ्यासोपकारकस्य सामर्थ्यादभ्याससमुदायात्मकसवनद्वारकतयैव यागाङ्गत्वाद्द्वारीभूतसवनभेदेन प्रतिसवनं ग्रहणानुष्ठानं निर्वापाङ्गस्य मन्त्रस्येव मुष्टिरूपद्वारभेदेन । एवमनारभ्याधीतानां चित्रिणीरुपदधातीत्यादीनामपि प्रतिचिति भेदेनानुष्ठानम् । चित्रिण्यादीष्टकानां हि अनारभ्याधीतानामपि उपधानसंज्ञतानामुपयोगापेक्षायां तस्मादग्निचित्सर्वमायुरेतीत्याद्यर्थवादवशादग्न्यङ्गत्वप्रतीतावपि अग्निपदाभिधेयस्थण्डिलारम्भकचितिद्वारकतयैव तदङ्गत्वावगतेः प्रतिचित्यावृत्तिः । यां काञ्चिदिति वचनन्तु प्राकरणिकेष्टकाभिप्रायमिति प्राप्ते ।

ऐन्द्रवायवादिग्रहणवदेवाभ्याससंपादनद्वारा यागोपकारकत्वस्यैव सिद्धेः सवनारम्भस्यानुषङ्गिकत्वेऽपि द्वारत्वे प्रमाणाभावान्न प्रतिसवनमावृत्तिरपि त्वन्त एवानुष्ठानम् । एवं चित्रिण्यादेरपि न प्रतिचित्यनुष्ठानम् ॥ ५ ॥ ३ ॥ ६ ॥

अन्ते ॥ चित्रिण्यादीनान्तु यां काञ्चन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यादिति वचनेन मध्यमचितावुपधानम् । अत्र ह्यभिपूर्वस्य जानातेः प्रत्यक्षज्ञानवाचित्वाद्वाक्यार्थत्वाच्च प्रत्यक्षब्राह्मणविहितेष्टकोद्देशेन मध्यमचितिरूपदेशविधानम् । उपधानन्तु प्रकरणप्राप्तमाश्रयः । प्रत्यक्षब्राह्मणवत्त्वञ्च इष्टकावाचिश्रुतशब्दविनियुक्तमन्त्रोपधेयत्वमित्युक्तमेव भूमाधिकरणे । न च प्रत्यक्षब्राह्मणवत्त्वस्योद्देश्यविशेषणता । तच्छब्देन विशिष्टपरा-

मर्शकेन विशिष्टोद्देशोपपत्तेः । अतो मध्यमचितावेवोपधानम् । न चेदं प्राकरणिकविषयम् । अविशेषात् ॥ ५ ॥ २ ॥ ७ ॥

प्राक् लोकंपृणायाः ॥ मध्यमायामपि प्राकरणिकेष्टकोपधानानन्तरमेवोपधानं चित्रिण्यादीनाम् । न तु प्राक् लोकंपृणायाः । आगन्तुकत्वात् । न च यदेवास्योनं यच्छिद्रं तदेतया पूरयति लोकं पृण छिद्रं पृणेति वचनेन लोकंपृणायाः पूरणार्थत्वात्तस्यान्ते निवेशावगतेः ततः प्राङ्निवेशश्चित्रिण्यादीनाम् । लिङ्गादेव मन्त्रस्य छिद्रपूरणार्थत्वे अस्य वचनस्य तदर्थताविधायकत्वाभावात् । कथञ्चिन्मन्त्रस्य तद्विधायकत्वेऽपीष्टकायास्तदर्थत्वे प्रमाणाभावाच्च ।

अस्तु वा मन्त्रे छिद्रपूरकत्वस्येष्टकायास्तत्पूरकत्वं विनाऽनुपपत्तेस्तस्या अपि तत् । तथापि तस्य चित्यन्तरे सावकाशत्वाच्च चित्रिण्यादीनामन्ते निवेशन्यायस्य निरवकाशस्य बाधः । न च लोकंपृणाया अपि प्रत्यक्षब्राह्मणवत्त्वात् मध्यमचितिमात्रविषयत्वम् । इति करणविनियुक्तत्वेनास्य मन्त्रस्येष्टकावाचिश्रुतपदविनियुक्तत्वाभावात् । न च तथापि तत्तच्चित्यवान्तरप्रकरणपठितत्वेन तत्रैव निवेशापत्तेश्चयनमहाप्रकरणपठितत्वे चाग्निमचितावेव निवेशापत्तेः कथं सावकाशत्वमिति वाच्यम् । पूरणार्थत्वलिङ्गादेव द्वारभेदेन भेदोपपत्तेः सर्वविषयत्वादिति प्राप्ते ।

चित्रिण्यादीनामन्ते निवेशे लोकंपृणायां छिद्रपूरणरूपफलस्यैव बाधापत्तेर्वरं पूर्वपठितेष्टकोपधानोत्तरत्वरूपक्रमबाधेन चित्रिण्यादीनां प्राक् लोकंपृणाया अभिनिवेशः ॥ ५ ॥ २ ॥ ८ ॥

संस्कृते ॥ आधानस्य नैरपेक्ष्येणोत्पत्तिवाक्येऽग्निनिष्पादकत्वाव-

गमादाधानमात्रेणैवाग्निनिष्पत्तिरिति सिद्धत्वादग्नीनामाधानमात्रा-
नन्तरमेवोत्तरक्रतूनां प्रवृत्तिः । पवमानेष्टयस्तु यदि भाष्यकार-
मतादङ्गभूताः, तदा स सिद्धेष्वेवाग्निषु स्वोत्तरभाविक्रतूपयोगितया
संमार्गवत्संस्कारविशेषाधायकाः । यदि तु वार्त्तिककारमतादाधा-
नाङ्गं, तदा बृहस्पतिसववद्दैवता अग्नीनां स्थापका इति न
तेषाञ्चिल्क्रतूनामाधानानन्तरमेव करणेऽपि पवमानेष्टीनां वैयर्थ्या-
पत्तिः । अग्निं वै सृष्टमग्निहोत्रेणानुद्रवतीति पवमानेष्टिभ्यः
प्रागेवाग्निहोत्रप्रवृत्तिं दर्शयति । अतश्चाहिताग्निर्न क्रियन्दारंभ्या-
दध्यादित्याद्याहिताग्निव्रतवदेवाधानोत्तरमेव क्रतुप्रवृत्तिरिति प्राप्ते ।

भाष्यकारमते तावत्तत्तद्वाक्ये नैरपेक्ष्यश्रवणेऽपि एकस्योत्पाद-
कत्वमितरस्य संस्कारकत्वमित्यत्र प्रमाणाभावः । प्रत्युत पवमानेष्टी-
नामेव स्वविनियोजकवाक्ये आहवनीयोत्पादकत्वावगतेराधानस्य
गुणवाक्यावगताहवनीयोत्पादकत्वं विलम्बोपस्थितिकम् । न चैव-
मस्तूभयोरुत्पादकयोर्विकल्पः । यथो निर्वपेद्दादशराचिषु निर्वपे-
दित्यादिकालविधिवशादेव समुच्चयसिद्धेः । वार्त्तिककारमते साङ्ग-
स्यैवाधानस्याग्न्युत्पादकत्वान्न तदभावेऽग्निसिद्धिः । न च स्थापकत्वं
बृहस्पतिसववत् । पवमानेष्टीनामाधानप्रयोगवहिर्भावेऽपि तद्व-
दाधानकरणभावनावहिर्भावस्याश्रुतत्वेन स्थापकत्वकल्पनानुपपत्तेः ।
अतः पवमानेष्टिव्यतिरेकेणाहवनीयनिष्पत्तेरभावात्तदुत्तरमेवाग्नि-
होत्रादीनि । आहिताग्निव्रतेषु तु आधानोत्तरमेव पुरुषस्याहि-
ताग्निपदवाच्यत्वोपपत्तेस्तदनन्तरं करणम् ।

यत्तु निदर्शनमुक्तं, तत्तूष्णीं होमस्याधानाङ्गभूतस्य स्तुत्यर्थं

नाग्निहोत्रस्य पूर्वप्रवृत्तिसूचकम् । तूष्णीं होमो हि नाग्निहोत्र-होमः । प्रमाणाभावात् । नाप्यग्निहोत्रधर्मकः । अर्थवादगतस्य नाम्नोऽनतिदेशकत्वात् । एतद्धोमस्याप्याधानद्वाराऽग्निप्रयोजकस्याग्नि-सम्बन्धित्वाविशेषात्प्रायणीयादिपदवदनतिदेशकत्वाच्च । अतोऽपूर्वस्यैव होमस्यैवं स्तुतिरिति नाग्निहोत्रस्य पूर्वप्रवृत्तौ लिङ्गम् । भिन्न-प्रयोगपरिगृहीतानामपि च पौर्वापर्यमात्रं प्रसङ्गान्निरूपितम् । व्यवहिताव्यवहितसाधारणेन पौर्वापर्यमेवाध्यायार्थ इत्यपि ध्येयम् ॥ ५ ॥ २ ॥ ८ ॥

सञ्चिते ॥ वर्षति न धावेदित्यादीन्यग्निचिद्व्रतान्यामरणं वर्षमात्रं, वा चयने निमित्ते पुरुषार्थतया, आधाने निमित्ते आहिताग्निव्रतवदेव विहितानि । अत्र व्रतपदश्रवणादेवोभयथापि संकल्प*लक्षणा । पुरुषार्थत्वञ्च वाचनिकफलश्रवणाद्द्रष्टव्यम् । तदिद-मग्निचिद्व्रतं भूतचयनमात्रस्यैव भूताधानवन्निमित्तत्वाच्चयनमात्रे कृते कर्त्तव्यमाहिताग्निव्रतवदिति प्राप्ते ।

कर्मणि, भूत इति चानुवर्त्तमानेऽग्नौ चेरिति सूत्रेण कर्त्तरि-चिनोतेः क्विप्प्रत्ययविधानात्कर्मत्वाद्यन्यथानुपपत्त्या च भावनाक्षेपा-दग्निकर्मकचयनकरणकभावनायां एव भूताया निमित्तत्वावगतेरग्नि-शब्दवाच्यस्य च ज्वलनाख्यस्याग्नेः स्वरूपेण चयनकर्मत्वाभावाच्चयन-निष्पादितस्थण्डिलाधारत्वद्वारा कर्मत्वावगतेराधारतायाश्च साङ्ग-यागसमाप्तिं यावदनिष्पत्तेः क्रत्वन्त एवाग्निकर्मकचयनकरणक-

* संकल्प,—इत्यशुद्धः पाठ आदर्शपुस्तकेषु ।

भावना*भूतत्वावगतेस्तदन्त एवाग्निषिद्भुतानि । आहिताग्निपदे तु यद्यपि क्त-प्रत्ययेन तथैव लक्षणया भावनावगतेस्तस्या एव भूताया-निमित्तत्वावगतिः, तथापि ज्वलनाख्यस्याग्नेराधानकर्मत्वस्य तज्जन्या-वान्तरापूर्वाधारत्वेनैव वाच्यत्वात्तादृशस्य चाधानान्ते एव निष्पत्ते-स्तदन्त एवाहिताग्निव्रतानि । न च्चाहवनीयत्वादिना कर्मत्वं श्रुतं, येन पवमानेष्ट्यन्ते तन्निष्पत्तिः शङ्क्येत ॥ ५. ३ ॥ १० ॥

परेण ॥ आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इति दीक्षणीयेष्टेस्तावद्दीक्षार्थत्वं लृट्प्रत्ययस्य क्रियार्थायां क्रियायामुपपदे विहितस्य श्रवणादवगम्यते । दण्डेन दीक्षयति मेखलयादीक्षयति कृष्णविषाणया दीक्षयतीत्यादिना तृतीययैव दण्डादीनां दीक्षार्थ-त्वम् । न च दण्डादीनामभिव्यक्त्यर्थत्वं, दीक्षाभिव्यक्तेरश्रुतत्वात् । अनेकेषु दीक्षयति-पदेषु तल्लक्षणायां प्रमाणाभावाच्च ।

किञ्चादृष्टरूपयमनियमपरिग्रहानुकूलयोग्यतारूपाया दीक्षाया अभिव्यक्तिर्न तावदनुमित्यात्मिका । दण्डादीनां व्यभिचारित्वात् । नापि स्मरणात्मिका । सम्बन्धित्वस्य प्रागज्ञानात् । अस्तु वा दीक्ष-णीयायाएव दीक्षोत्पादकत्वं, तथापि न तदन्ते दीक्षितधर्मायम-नियमादयः । दीक्षितोऽयं दीक्षितंवादं वद सत्यमेव वद नानृत-मित्याद्यावेदनप्रैषेण दण्डादिदानोत्तरमेव यमनियमपरिग्रहविधा-नात् । इतरथा आवेदनस्यादृष्टार्थत्वापत्तेः । अत एव यमनियम-परिग्रह एव दीक्षेति *पार्थसारथिलिखनमप्यपास्तम् । आवेदनप्रैषे दीक्षासम्बन्धोत्तरकालं यमनियमपरिग्रहाभिधानात् । स्वयमेव

---

* इत्यमेव पाठः सर्व्वत्र । भावनायाः,—इति तु समीचीनं प्रतिभाति ।

दीक्षाया अदृष्टरूपत्वाभिधानाच्च। अतो दण्डादीनामपि दीक्षार्थ-त्वात्तद्वत्त्वे सा। न चैवं नैरपेक्ष्यश्रवणादिकल्पापत्तिः। अदृष्टार्थ-तयैकप्रयोगविधिपरिग्रहेण समुच्चयावगतौ अवान्तरकार्ये नैर-पेक्ष्योपपत्तेरिति प्राप्ते।

दीक्षणीयावाक्ये दीक्षिष्यमाण इति लृट्प्रत्ययेन तस्यादीक्षार्थत्वं तावदवगन्तव्यम्। दण्डादीनां तु णिजन्त-दीक्षयति-पदश्रवणान्न दीक्षार्थत्वमवगम्यते। अपि तु तदनुकूलव्यापारार्थत्वमेव प्रथम-मवगम्यते। पश्चात्तु तत्सम्बन्धात्प्रयोज्यव्यापाररूपदीक्षार्थत्वं दण्डेन घटं कारयतीत्यादिवत्कथञ्चित्कल्प्येत। न च प्राथम्यावगतदीक्ष-णीययैव कृतार्थत्वाद्दीक्षायादण्डादिजन्यत्वकल्पनाऽवसरः। सिद्धरूप-त्वाच्च दण्डादीनां न क्रियाव्याप्तत्वज्ञानमन्तरेण दीक्षार्थत्वसम्भवः।

न च प्रथमावगतप्रयोजकव्यापारार्थत्वमेव वचनैव कारयती-त्यादिवत्तदर्थत्वस्त्विति वाच्यम्। तथात्वे साक्षाद्दीक्षणीयार्थत्वाङ्गीकारे-ऽदृष्टार्थत्वापत्तेः। तद्वरं दीक्षाफलीभूतयमनियमपरिग्रहोपयोगि-दीक्षावत्त्वज्ञानजनकतयैव दीक्षणीयार्थत्वम्, दीक्षार्थत्वमेव वाऽङ्गीकर्त्तुमुचितम्। अगम्येति मन्त्रस्य यागफलप्रकाशकतया यागाङ्गत्वमिव। अत एव परम्परासम्बन्धस्य सम्बन्धविधयैव बोधो-पपत्तेर्न लक्षणाऽपि। ज्ञानजनकत्वञ्च स्मारकविधया। सम्बन्धस्य च मानान्तरादनवगमेऽपि विध्यन्यथानुपपत्त्यैवावगमात् स्मारकत्वोप-पत्तिः। तत्तद्विध्यन्तरैरेव च दण्डादीनां धारणकण्डूयनादिरूप-क्रियाविधानान्नाक्रियाविष्टानां स्मारकत्वसम्भव इति शङ्कनीयम्।

अत एव तत्तत्क्रियार्थानामप्येषां दीक्षाऽभिव्यञ्जकत्वमप्यानु-

षङ्गिकम्। अत एव दण्डादीनां दीक्षाऽभिव्यक्तौ समुच्चयः। अतश्चान्त एव दीक्षितधर्मा दीक्षितो न जुहोति न दीक्षितस्यान्नमश्नीयादित्यादयः। न चैवमावेदनवैयर्थ्यमभिव्यक्तिवैयर्थ्यं चेति वाच्यम्। तद्विध्याम्नानबलेन तत्प्रैषपठितधर्माणामेव तदुत्तरत्वप्रतीतेः॥ ५॥ ३॥ ११॥

अङ्गवत्॥ काम्यानामुद्भित्सौर्यादीनां नैमित्तिकानाञ्च भेदनहोमादीनां समिदादिवदेव पाठक्रमात्क्रमे प्राप्ते।

उपायप्रवृत्तित्वावच्छिन्नं प्रति फलेच्छायाः कारणत्वान्नैमित्तिकानुष्ठानस्य च निमित्ताधीनत्वात्तदनुरोधेनैव क्रमावगतेर्न पाठस्य नियामकता। वस्तुतस्तु यत्रैकप्रयोगविधिपरिग्रहोऽनेकेषां, तत्रैव क्रमापेक्षायां पाठादीनां क्रमनियामकता। न तु यत्र भिन्नप्रयोगविधिपरिग्रहः। अत एव तादृशस्थले पाठः पारायणादावुपयुज्यते॥ ५॥ ३॥ १२॥

य एतेन॥ स्थिते भिन्नप्रयोगविधिपरिगृहीतानां क्रमानियमे क्वचिद्वचनात्पौर्वापर्यम्। यथा एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः य एतेनानिष्ट्वाऽथान्येन यजते गर्त्तपत्यमेव तद्भवतीति। तत्रैतच्छब्दो यद्यपि ज्योतिष्टोममात्रपरामर्शी, तथापि न सर्वसंस्थस्य ग्रहणम्। अपि त्वग्निष्टोमसंस्थस्यैव। संस्थान्तराणामन्यशब्देनाभिधानस्याग्रिमाधिकरणे वक्ष्यमाणत्वेन, तास्वपि ज्योतिष्टोमोत्तरत्वस्यावश्यकत्वात्परिशेषादेवाग्निष्टोमसंस्थस्य पूर्वकरणसिद्धेः। अत एवातिरात्रसंस्थाकस्यातिरात्रमेके प्रथममाहरन्तीति वचनादेव प्रथमं करणम्।

अस्तु वाऽग्निष्टोमसंस्थाकज्योतिष्टोमपरामर्शकत्वमेवैतच्छब्दस्य । अग्निष्टोमसंस्थामभिप्रेत्यैव ज्योतिष्टोमे सकलधर्मविधानात् । अत-एव तस्य नवतिशतं स्तोत्रिया इत्युपपद्यते । अग्निष्टोमसंस्थाकज्योति-ष्टोम एव हि तावत्यः स्तोत्रिया न संस्थान्तरयुक्ते । एवञ्चातिरात्र-प्रथमाहारोत्तरमपि[१] अग्निष्टोमसंस्थां कृत्वा एवोद्भिदादयः कार्या इति द्रष्टव्यम् ॥ ५ ॥ ३ ॥ १३ ॥

अथान्येनेति ॥ एतच्छब्दार्थे निरूपितेऽन्यपदार्थो निरूप्यते । अन्यशब्दस्य पूर्वप्रकृतादितरद्यत्सन्निहितं तद्वाचित्वात्संस्थानाञ्च सन्निहितत्वेन तास्वेवाऽग्निष्टोमोत्तरत्वस्य विधिरिति प्राप्ते ।

न तावत्संस्थानां प्रकरणेन सन्निधानं विकृतित्वात् । अधि-कारोऽपि ज्योतिष्टोमस्यैव । एष वावेत्यादिवाक्यशेषे तस्यैव संकीर्त्त-नाच्च । यज्ञानां ज्योतिष्टोमोद्भिदादीनां मध्येऽग्निष्टोमसंस्थाक एव प्रथममित्युक्तेऽन्येषामप्युद्भिदादीनां यज्ञपदेनोपादानाच्च ।

न चैवं संस्थानामयज्ञत्वादग्रहणम् । तासामप्याश्रयस्य यज्ञत्वात् । अतश्चाग्निष्टोमसंस्थाकज्योतिष्टोमान्य-तद्विकारमात्रे तदुत्तरकालत्व-विधिः । न च ज्योतिष्टोमे यज्ञान्तरापेक्षया प्राथम्यमेव प्रकरणा-नुग्रहाय विधीयतामिति वाच्यम् । एष वावेत्यस्यार्थवादत्वेना-विधायकत्वात् । अथान्येनेत्यनेन तृतीयविधिप्रकारलिप्सया यागा-न्तरेष्वेवाग्निष्टोमपूर्वकालकत्वस्य तदुत्तरत्वसमनियतस्य विधानसम्भवे प्रकरणबाधस्यादोषत्वाच्च ।

न च प्रकरणान्तरन्यायेनात्र कर्मान्तरत्वशङ्का । एष वावेत्यने-

(१) अतिरात्रस्य प्रथमं य आहार आहरणं ततुत्तरमपीत्यर्थः ।

नार्थवादेनोद्भिदादीनां यज्ञान्तराणां सन्निहितत्वात्। न च तत्रैव कर्मान्तरत्वशङ्का। तस्योत्तरकालत्वाच्छिन्नप्राथम्यस्तावकत्वेनोपादेयत्व-सामानाधिकरण्येन विधेयत्वानाक्षेपकतया कर्मान्तरानापेक्षकत्वात्। अतः सिद्धमग्निष्टोमसंस्थाकज्योतिष्टोमान्यतद्विकारमात्रे तदुत्तर-कालत्वविधिरिति ॥ ५ ॥ ६ ॥ १४ ॥

एकस्तोमो वा* ॥ ननु यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति यः पञ्चदशः स तं यः सप्तदशः स तं य एकविंशः स तमिति वाक्यशेषे एकस्तोमकानामेव संकीर्त्तनात्तेषामेवान्यशब्देन ग्रहणात्तत्रैवोत्तरकालत्वविधिरक्ताधिकरणन्यायेनेति चेन्न। वाक्य-शेषस्यान्यथाऽप्युपपत्तेः। यो हि त्रिवृत्स्तोमः प्रकृतावनुष्ठितः चोदके-नान्यं क्रतुमापद्यते प्राप्नोति स स्तोमस्तं यज्ञक्रतुमभ्यस्तत्वाद्दीपय-तीति तस्यार्थः। सम्भवति च स्तोमान्तरसत्त्वेऽपि त्रिवृदादेरपि सत्त्वादनेकस्तोमकक्रतुदीपकत्वम्। पुत्रान्तरसत्त्वेऽप्येकस्य गुणवत्त्वविव-क्षया पितृदीपकत्ववत्।

वस्तुतस्तु गुणविशेषस्य प्रकृते अविद्यमानत्वात्त्रिणवादिमात्रस्तोम-कक्रतौ च त्रिवृदादेरभावेन दीपकत्वानुपपत्तेर्वाक्यशेषस्य क्रतु-विशेषोपस्थापकत्वेऽपि विधौ प्रतिप्रधानावृत्तिन्यायेन सर्वार्थत्वप्रतीतेः सन्देहाभावेनाक्ताधिकरणन्यायाभावान्न वाक्यशेषस्य विधिसंकोच-कत्वकल्पनाऽवसरः। अतस्त्रिवृदादिग्रहणं ज्योतिष्टोमीयाङ्गमात्रोप-लक्षणम्। तदङ्गमात्रस्य तद्विकृतावभ्यस्तत्वेन तद्विकृतिदीपकत्वा-

---

* एकस्तोमे वा;—इति भाष्यपुस्तके पाठः।

त्तदुत्तरकालत्वस्तुत्युपपत्तेः। अत एवान्यपदेन न, सौर्यादिग्रहणम्। तत्र यौमिकाङ्गाभ्यासाभावात्। अतस्तद्विकृतिमात्रस्योत्तरकालतेति सिद्धम्॥५।३॥१५॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां पञ्चमस्य तृतीयः पादः।

पञ्चमोऽध्यायः ।

चतुर्थः पादः ।

क्रमकोपः ॥ तदेवं निरूपितेषु क्रमप्रमाणेषूत्तरोत्तरस्य दौर्बल्यं प्रागेवास्माभिर्निरूपितम्। सुबोधत्वात्तु न सूत्रकारेणोच्यते। शिष्यानुग्रहार्थन्तु क्वचिदुच्यते। श्रुतिविरोधे पाठस्य दौर्बल्यम्। यथाऽऽश्विनो दशमो गृह्यते तं तृतीयं जुहोतीत्यत्र। पाठादैन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णाति आश्विनं गृह्णातीत्येवंविधादाश्विनग्रहणस्य तृतीयस्थाने प्राप्तस्य श्रुत्या दशमस्थानेऽनुष्ठानम्। तं तृतीयमिति तु पाठप्राप्तानुवाद एव। प्रवृत्तेः पाठेन बाधात्। एवमर्थेनापि पाठस्य बाधः। यथाऽग्निहोत्रं जुहोति यवागूं पचतीति। व्याख्यातं पूर्वमिदम् ॥ ५ ॥ ४ ॥ १ ॥

अवदान ॥ एवं मुख्यक्रमेण प्रवृत्तिक्रमस्य बाधः। यथा दर्शः पाठादर्थाच्च पूर्वं धर्मादोहनादयः, पश्चादाग्नेयस्य निर्वापादयः। तत्प्रवृत्तिक्रमेणैव हविरासादनप्रयाजशेषाभिधारणस्विष्टकृदवदानान्यपि कर्तव्यत्वेन प्राप्तानि मुख्यक्रमात्प्रथममाग्नेयस्य कार्याणि पश्चाद्दध्नः। प्रधानानां हि पाठादेव प्रथममाग्नेयस्य पश्चात्सान्नाय्यस्यानुष्ठानम्।

यद्यपि चासादनादीनां याज्यापुरोऽनुवाक्याप्रवृत्तिक्रमात्तादृग्यानुष्ठानमपि प्रवक्ष्यत इति भूतभाविप्रवृत्तिक्रमाभ्यामनियमप्रसक्तौ मुख्यक्रमस्य नियामकत्वमात्रमिति नेदं विरोधोदाहरणं सम्भवति,

तथाप्यन्यदेतादृशमुदाहरणं मृग्यम्। दृष्टकताबीजन्तु मुख्यक्रमे प्रधानप्रत्यासत्त्यनुग्रहः। प्रवृत्तिक्रमे त्वङ्गानां परस्परप्रत्यासत्तिः। अतस्तस्य बाधः। अत्र च न प्रधानावदानमुदाहरणम्। तस्य प्रधानेनैकपदार्थत्वस्य स्थापितत्वात्॥ ५॥ ४॥ २॥

वचनात्॥ आधानप्रकरणे यः सोमेन यक्ष्यमाणोऽग्निमादधीत नर्त्तुं प्रतीक्षेत न नक्षत्रमिति श्रुतम्। न च तेन सोमस्याधानानन्तर्यं विधातुं शक्यम्। आनन्तर्यस्याश्रवणात्। आधानानन्तर्य-कालानादरोभयविधाने वाक्यभेदप्रसङ्गाच्च। अतो विहितकालानादरमात्र-माधानोद्देशेन विधीयते। सोमेन यक्ष्यमाण इति त्वनुवादः। तेन दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्येतद्वाक्यविहितदर्शपूर्णमासो-त्तरकालत्वमेव सोमस्येति प्राप्ते।

आधानमात्रोद्देशेन विहितकालानादरविधाने सोमेन यक्ष्यमाण-इत्यस्य वैयर्थ्यापत्तेः, आधानकर्त्तुः सर्वस्यापि सोमाधिकारित्वाद्वि-शेषणस्य व्यावर्त्त्याभावेन वैयर्थ्यापत्तेः, सोमेनाधानान्तरं यक्ष्यमाणो-ऽग्निमित्यर्थावगतिः। न च रथकाराधानव्यावृत्त्यर्थं विशेषणोपपत्ते-र्नानन्तर्यकल्पना युक्तेति वाच्यम्। यक्ष्यमाण इत्यद्यतनवाचिप्रत्यय-श्रवणेनानन्तर्यस्याकल्पनीयत्वात्। रथकाराधानस्यादृष्टार्थत्वेनाग्नि-मिति द्वितीयाऽनुपपत्तेश्च। रथकाराधाने कालानादरस्य यद्व-रेवैनमिति वचनेनैव सिद्धतया तस्य प्रसक्त्यभावेन निवारणीयत्वा-नुपपत्तेश्च।

अतोऽत्र सोमाव्यवहितपूर्वकालीनाधाने निमित्ते विहितकाला-नादरो विधीयते। कर्तृसमानाधिकरणेन भाष्यकारोदाहृतेन

यच्छब्देन निमित्तत्वावगतेः सकलकारकाणामन्वयस्य व्युत्पन्नत्वाच्च न विशिष्टोद्देशे वाक्यभेदः। अतश्च सिद्धवन्निर्देशान्यथानुपपत्त्या कल्पितेन विध्यन्तरेणोपरि हि देवेभ्यो धारयतीति वत्सोमाङ्गतया आधानानन्तर्यं विधीयते।

अथवा अहतपाप्मानो 'वा ऋतव असौ खलु वाव आदित्य-स्तद्येषां पाप्मानमपघ्नन्ति तस्माद्यदहरेवैनं श्रद्धोपनमेद्यादधीताथ यजेतेति वचनेनाथ यजेतेत्यनेनाधानानन्तर्यं सोमे विधीयते। यजेतेत्यनेन सोमस्यैव परामर्शात्। अत एवाथादधीतेत्यनेनाधान-एव कालबाध इति वक्ष्यते। अतश्च निमित्तश्रुत्यन्यथानुपपत्त्याऽपि न विध्यन्तरकल्पनम्।

अत एवेष्टिपूर्वत्व एव यदेष्युत्तरमग्निविनाशादिनिमित्ताधाना-व्यवहितोत्तरं सोमकरणं, तदा सोमे कालानादरविधानोपपत्तेर्न विध्यन्तरकल्पनया विकल्पाङ्गीकरणं युक्तमित्यप्यपास्तम्। प्रत्यक्ष-विधिनैवापूर्वाधानानन्तर्यस्य विहितत्वात्। न. ह्यथादधीतेत्यत्र पुनराधानप्रसङ्गोऽस्ति। तस्य निमित्तवशवर्त्तित्वेन तत्र कालानादरविधिवैयर्थ्यात्। अतश्चापूर्वाधानानन्तर्य एव कालानादरविधा-नादिष्टिपूर्वत्वस्य सोमपूर्वत्वेन युक्त एव विकल्पः।

केचित्तु सोमेन यक्ष्यमाण इति भिन्नं वाक्यम्। नर्तुं पृच्छेदिति भिन्नम्। तत्राद्येन प्रकरणात्तृतीयविधिप्रकारे लाघवादाधानोद्देशेन सोमाव्यवहितपूर्वकालता विधीयते। सोमपूर्वकालमात्रविधाने वाक्यवैयर्थ्यात्। अतश्च वाचनिकेन सोमपूर्वत्वेनेष्टिपूर्वत्वस्य विकल्प-इत्याहुः।

तन्न । वाक्यभेदे प्रमाणाभावात् । आधानाङ्गभूतसोमपूर्वत्वेन सोमाङ्गभूतेष्टिपूर्वत्वस्य विकल्पापादनायोगाच्च । किञ्चैवमस्मिन्नेव वाक्ये विशिष्टाधानविधिराधानमात्रविधिर्वाऽस्तु । सोमेन यक्ष्यमाण-इत्यस्यैन्द्रवायवाग्रानितिवदनुवादोपपत्तिः । न चेष्टापत्तिः । वसन्तादिवाक्यानां निमित्तार्थत्वापत्तेः । न च यच्छब्दस्य धात्वर्थांश-एव विधिप्रतिबन्धकत्वं न विशेषणांश इत्यत्र प्रमाणमस्ति । प्राप्तमात्र एव तस्य विधिप्रतिबन्धकत्वात् ।

न चास्याधानोत्पत्तिविधित्वे अग्निमित्येकवचनादाधानस्यैकाग्न्युत्पादकत्वापत्तिः । अग्निगतस्यैकत्वस्य बहुत्वस्येवोद्देश्यगतत्वेन प्रमाणान्तरसिद्धसंख्योपलक्षणार्थत्वात् । अनेकाग्न्युत्पादकत्वन्तु आयतनेषु सम्भारान्निदधातीत्यायतनबहुत्वविवक्षाबलादित्युक्तं ग्रहैकत्वाधिकरणे कौस्तुभे ।

किञ्चैवं विहितकालानादरः शूद्राधानेऽपि स्यान्न सोमाव्यवहितपूर्वाधान एव । उत्तराधिकरणवक्ष्यमाणरीत्या कालानादरस्य सोमाङ्गत्वेऽपि चेष्टिपूर्वत्वपक्षेऽपि स्यान्न सोमपूर्वत्वपक्ष एव । अतश्चास्मदुक्तप्रकार एव श्रेयान् । आधानानन्तर्येऽपि न पवमानेष्टिभिर्न वा अधिकारपशूनां व्यवधानम् । तेषां सोमोपकारकत्वात् । अत एव सोमाधानपक्षे पवमानेष्टीनां सद्य एव करणम् । सोमेनायक्ष्यमाणस्यैव संवत्सरादिकालाम्नानात् ॥ ५ ॥ ४ ॥ २ ॥

उत्कर्षात् ॥ एवं स्थिते कल्पद्वये आग्नेयो वै ब्राह्मणो देवतया

स सोमेनेष्ट्वाऽग्नीषोमीयो भवति यदेवादः पौर्णमासं हविस्तदनु* निर्वपेदिति वचनेन ब्राह्मणकर्तृकत्वे निमित्ते एकदेशोत्कर्षेण समस्त-दर्शपूर्णमासोत्कर्षप्रतीतेर्ब्राह्मणस्य सोमपूर्वत्वमेव। न हि सहितयाग-साध्यत्वेन श्रुतं फलं एकदेशाद्भवितुमर्हति । न च सोमोत्तरं तन्त्रेण क्रियमाणोत्कृष्टहविर्मात्रसहकृतपूर्वयागेभ्यः फलसिद्धिः । दर्शपूर्ण-मासाभ्यामिष्ट्वा सोमेनेत्यनेन दर्शपूर्णमासपदवाच्यसर्वयागोत्तरत्वस्यैव सोमे विहितत्वेन तथा कल्पनाऽनुपपत्तेः । दर्शपूर्णमासाभ्यामिति तृतीयाबलेन परमापूर्वोत्पत्तेरप्यवगतत्वाच्च । अत इतरयोः क्षत्रिय-वैश्ययोः कल्पद्वयमिष्टिपूर्वत्वमेवेति प्रथमः पक्षः ।

द्वितीयस्तु नैकदेशोत्कर्षेण सर्वदर्शपूर्णमासोत्कर्षः । प्रमाणा-भावात् । सान्नाय्याधिकरणे ऐन्द्राग्नविध्यनुपपत्त्या फलवाक्ये सर्व-साहित्यस्याविवक्षितत्वाच्च । अतो यस्य यावत्स्वधिकारस्तस्य तावद्भ्य एव फलसिद्धिः । अतश्च ब्राह्मणस्याप्युत्कृष्टहविर्भिन्नयागकरणोपपत्तेः कल्पद्वयम् । उत्कर्षः परम्पौर्णमासीहविर्मात्रस्य । विधावविशेषश्रुत-स्योद्देश्यपरस्य पौर्णमासपदस्यार्थवादेन संकोचानुपपत्तेः । यदेवेत्य-नेन साकल्यप्रतीतेश्चेति प्राप्ते ।

पौर्णमासीमात्रस्थत्वेनाच पौर्णमासपदव्यपदेशादाग्नेयस्योभयत्र विद्यमानत्वेन विशिष्य तात्पर्यग्राहकाभावे व्यपदेशानुपपत्तेः, प्रत्यु-तोपक्रमस्थार्थवादस्यैवाग्नीषोमीयहविर्मात्रतात्पर्यग्राहकस्य सत्त्वेन तस्यैवोत्कर्षः । यदेवेत्यनेकापेक्षन्तु वचनमुपांशुयाजस्याप्यग्नीषोमी-यदेवताकत्वात्तदभिप्रायेण न विरुध्यते ।

---

* तन्नद्धानु,—इति भाष्ये पाठः ।

अत्र च सोमोत्तरकालत्वविधावुद्देश्यसमर्पकं पदं समभिव्याहृतसर्ववाचि-तच्छब्द एव । न त्वग्नीषोमपदं हविःपदं वा । तस्यार्थवादस्थत्वेन पौर्णमासपदवत्तच्छब्दार्थतात्पर्यग्राहकत्वात् । विशिष्टोद्देशे वाक्यभेदप्रसङ्गाच्च । उद्देश्यतावच्छेदकमपि च नाग्नीषोमदेवताकत्वविद्यम् । तथात्वे यागे उत्तरकालताया अङ्गतानापत्तेः । नापि तद्देवताकयागत्वं तद्देवताकप्रकृतयागत्वं वा । तद्देवताकत्वस्य विशेषणत्वे तद्विकृतौ देवतान्तरयुक्तायां सोमोत्तरत्वस्यातिदेशानापत्तेः । उपलक्षणत्वे च विष्णुप्रजापतिदेवत्यस्याप्युपांशुयाजस्य सोमोत्तरत्वापत्तेः । किन्त्वग्नीषोमदेवतानिष्ठकारणतानिरूपितकार्यतावच्छेदकीभूतो यस्तत्तदपूर्वसाधनतावच्छेदकव्याप्यो धर्मस्तद्वत्त्वम् । अस्ति हि व्रीहियवादिवैकल्पिकसाधनस्थले व्यभिचारपरिहारायाग्नेयत्वोपांशुयाजत्वादिव्याप्योधर्म इत्युक्तं तेषामर्थाधिकरणे कौस्तुभे ।

तस्य यद्यपि नान्यत्रावघातादिसंस्कारविधावुद्देश्यतावच्छेदककोटिप्रविष्टत्वं गौरवात्तथाप्यत्रार्थवादवशात्तस्योद्देश्यतावच्छेदकत्वाविघातः । अतश्च विष्णुप्रजापतिजन्यतावच्छेदकव्याप्तधर्मयोर्व्यापकधर्मोपांशुत्वस्य च स्वव्याप्यस्याप्यग्नीषोमजन्यतावच्छेदकत्वाभावान्नोद्देश्यतावच्छेदकत्वम् ।

अग्नीषोमीयपुरोडाशे तु अपूर्वसाधनतावच्छेदकीभूतस्याग्नीषोमीययागत्वस्यैवाग्नीषोमजन्यतावच्छेदकत्वात्स्वव्याप्तत्वाच्च नोद्देश्यतावच्छेदकत्वविघातः । तत्तद्विकृतौ देवतान्तरयुक्तायां तत्तद्विकृतित्वस्यैव तत्तद्देवताजन्यतावच्छेदकस्य तत्तद्व्याप्तधर्मस्यानापन्नतयोक्तविधव्याप्यत्वसत्त्वान्नोद्देश्यतावच्छेदकत्वविघात इति ध्येयम् ।

अत्र चानुपादेयगुणयोगेऽपि न कर्मान्तरत्वाशङ्का। दर्शपूर्ण-मासप्रकरणपठितत्वात् ॥५॥४॥४,६*॥

स्वकाले॥ एवं, यः सोमेन यक्ष्यमाणोऽग्निमादधीत नर्त्तुं प्रच्छेन्नानचत्रमित्यनेन विधीयमानः कालानादरोऽपि प्रकरणादा-धानोद्देशेनैव विधीयते। न तु सोमोद्देशेन। अङ्गगुणविरोध-न्यायेनोपकारके आधान एव कालबाधस्य न्याय्यत्वाच्च। तेन स्वकाले सोमं कुर्वता अव्यवहितपूर्वमाधाने क्रियमाणे नाधानकाल-प्रतीक्षा कार्येति प्राप्ते।

अस्यामेव शाखायां यदहरेवैनं श्रद्धोपनमेदथादधीतेति वचनान्तरेणाधानमात्रे कालानादरस्य विहितत्वात्तत एव सोमा-व्यवहितपूर्वाधानेऽपि कालानादरप्राप्तेरनेकवाक्येन स्ववाक्योपस्थितस्य सोमस्यैवोद्देश्यवाचकपदकल्पनयोद्देश्यत्वमिति तस्यैव कालानादरः।

यत्तु शतपथे अपहतपाप्मानो वेत्यादिवचनेनोभयोरपि काला-नादरविधानम्। तच्छाखान्तरत्वादाधानकालबाध इव न दोषः। वस्तुतस्तु तत्राथ यजेतेति वचनेनाधानानन्तर्यमेव सोमस्य विधीयते। अथादधीतेति पूर्ववचनेन त्वाधान एव कालबाध इत्युक्तमेव। अत्र चार्धमन्तर्वेदीतिवल्लक्षणया विहितकालमात्रस्यानादरविधा-

---

* आज्यस्य अनुत्कर्षाधिकरणं षष्ठं भाष्ये शुत्यादितम्। अनेन तु अत्रैवाधिकरणे तद्विचारितमित्यनुसन्धेयम्।

† नर्त्तुं स प्रतीक्षेत,—इति भाष्ये पाठः। नर्त्तुं सूक्ष्येत,—इति जैमिनीय-न्यायमालाविस्तरे पाठः। सूक्ष्यतिर्धातुरनादरार्थे वर्त्तते इति तत्रैव व्याख्यानम्।

मात्पौर्णमास्यादिपर्वणोऽप्यनादर इति केचित्। मन्त्रव्याख्यान-
वैयर्थ्यात्तु वाक्यभेदमप्यङ्गीकृत्य तत्कर्तृत्वमात्रानादर एव। अन्यथा
पञ्चाहत्वादेरपि बाधापत्तेरिति तत्त्वम् ॥ ५ ॥ ४ ॥ ५ ॥

विकृतेः ॥ य इष्ट्येति वचनेन न तावत्प्रतीष्टौ पौर्णमास्यादि-
कालविधिः। पञ्चात्ता उपवस्तव्याः पञ्चादयोऽभियष्टव्या इत्यादि-
वचनैस्तस्याः प्रतिपत्कालत्वविधानात्। अत एव पौर्णमास्यां पौर्ण-
मास्या यजेतेत्यादिवचनेषु पौर्णमास्यादिशब्दावपि आरम्भद्वारकौ,
पर्वप्रतिपत्समुदायलक्षकौ वा। अत एव प्रकृतौ द्व्यहकालत्वं प्राकर-
णिकम्। अतश्चेदमनारभ्याधीतं वचनं विकृतीष्टिविशेषपरं विकृति-
पशुपरञ्च। अग्नीषोमीयस्यौपवसथ्येऽहनि विहितत्वात्।

अतिदेशप्राप्तोऽपि च विकृतौ पौर्णमास्यादिकालोयथा
पौर्णमासीविकाराणां पौर्णमास्यां करणं अमावास्याविकाराणाममा-
मावास्यायां करणमित्येवं व्यवस्थया प्राप्तानां अव्यवस्थार्थं, तथा
साङ्गानान्तासां पौर्णमास्यादिकालविधानादातिदेशिकद्व्यहकालत्व-
बाधार्थमपि।

न च तत्तद्विकृतीनां तद्विधावेव प्रयोगस्य प्राप्तत्वादन्न प्रयोग-
विध्यभावेन प्रधानमात्र एव पौर्णमास्यादिकालविधानोपपत्तेः
प्रतिपत्कालत्वादिबाधेऽपि चतुर्दश्यामन्वाधानकरणेन प्राकृतद्व्यह-
कालत्वबाधे प्रमाणाभाव इति वाच्यम्। कालस्य प्रयोगान्वयितया
प्रयोगसम्बन्धित्वेन विधानादन्वाधानेऽपि पौर्णमास्यादिकालस्यौप-
देशिकत्वात्। अतः साङ्गमपि विकृतिप्रधानं पौर्णमास्यादिकाले
कर्त्तव्यम्।

तत्र पूर्णपर्वण्यपराह्णसन्धौ वा विकृतिं कृत्वा प्रकृतेरन्वाधानं निर्विवादमेव। अन्वाधाने प्रातःकालस्तु उपदिष्टोऽपि अङ्गगुणत्वादातिदेशिकेनापि विकृतिप्रधानाङ्गप्रातःकालेन बाध्यते। पूर्वाह्णसन्धावपि औदयिकपर्वणः प्रकृत्यत्रदङ्गत्वात्पूर्वपर्वण्येवोपदिष्टपर्वकालत्वानुरोधेनातिदेशप्राप्तप्रातःकालं द्व्यहकालत्वञ्च बाधित्वा विकृत्यनुष्ठानं ततः प्रकृत्यन्वाधानमिति बोध्यम्। एवं सोमेऽपि। पूर्वेद्युरेवाधिककालव्याप्तिलाभात्।

यत्तु धूर्त्तस्वाम्यादिभिर्वैदिकैरावर्त्तन-तत्पूर्वसन्ध्योः प्रकृत्यनुष्ठानानन्तरं सन्धिदिन एव विकृत्यनुष्ठानम्। पौर्णमास्यादिशब्दानां पर्वान्यलक्षणवचनत्वात्। यः परमो विप्रकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी, यः परमः सन्निकर्षः साऽमावास्येति गोभिलसूत्रात्। अतश्च सन्निकर्षविप्रकर्षलक्षणावच्छिन्नाहोरात्रस्यैव पौर्णमास्यमावास्यापदवाच्यत्वात्तस्य च पूर्वाह्णसन्धौ द्वितीयदिन एव सत्त्वात्तदैव विकृत्यनुष्ठानम्। तदपि न प्रकृतेः पूर्वन्तस्या द्व्यहकालत्वेन विकृतौ प्रसङ्गसिद्ध्यापत्तेः। अतोऽगत्या प्रातःकालबाध एवेत्युक्तम्।

तन्न। सोमस्य वै राज्ञोऽर्धमासस्य रात्रयः पत्नय आसन्नासाममावास्याञ्च पौर्णमासीञ्च नोपैदित्याद्यर्थवादादापामरप्रसिद्धेः ज्योतिःशास्त्रादिवशाच्च पौर्णमास्यादिशब्दानां तिथिवचनत्वात्। न हि सूर्याचन्द्रमसोः परमसन्निकर्षविप्रकर्षलक्षणावच्छिन्नाहोरात्रवाचित्वे पौर्णमास्यादिशब्दानां,

पर्वणो यश्चतुर्थोऽंश आद्याः प्रतिपदस्त्रयः।

इत्यादिर्व्यवहारस्य, द्वैधे पूर्वविद्धायाग्राह्यत्वाज्यत्वादिव्यवहारस्य

च कथमप्युपपत्तिः सम्भवति। द्वैधस्यैवाप्रसक्तेः। अतस्तिथिपरा एवैते शब्दाः। तिथिर्नामामासंज्ञकचन्द्रकलाव्यतिरिक्तचन्द्रकलानां मध्ये एकैकस्याः कलायाः सूर्यमण्डलेन आद्यावयवविप्रकर्षादारभ्यान्त्यावयव-विप्रकर्षं आद्यावयवसन्निकर्षादारभ्यान्त्यावयवसन्निकर्षौ वा(१)यावता कालेन जायते, तावान्कालो यथाक्रमं शुक्लकृष्णपक्षगतः प्रतिपद्द्वितीयादिशब्दप्रतिपाद्यः ।

अमा षोडशभागेन देवि. प्रोक्ता महाकला ।
संस्थिता परमा माया देहिनां देहधारिणी ॥
अमादिपौर्णमास्यन्ताया एव शशिनः कलाः ।
तिथयस्ताः समाख्याताः षोडशैव वरानने ॥
तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि ।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः ॥
पक्षत्याद्यास्तु तिथयः क्रमात्पञ्चदशैव ताः ।
दर्शान्ताः कृष्णपक्षे तु पौर्णिमान्ताश्च शुक्लके ॥

इत्यादि वचनात् । अत एव तिथिशब्दः प्रतिपदादिशब्दाश्च कलास्वेव शक्ताः काले तु निरूढलक्षणयेति ध्येयम् ।

एवञ्च पौर्णमास्यमावास्याशब्दावपि न योगेनान्निमक्षणवचनौ तदवच्छिन्नाहोरात्रविषयौ वा। गोभिलसूत्रमपि उक्तविधसन्नि-कर्षविप्रकर्षकालोपलक्षणमेव व्याख्येयम्। तस्सिद्धं न विहृतीनां शुद्धकालत्वमिति ॥ ५॥ ४ ॥ ७ ॥

(१) अत्र विप्रकर्षं सन्निकर्षौ शुक्लकृष्णपक्षीयतिथ्यभिप्रायेण ज्ञेयौ ।

साम्नाय्य ॥ नासोमयाजी संनयेदिति असोमयाजिनः साम्नाय्य-पर्युदासः। तेन तस्याप्यग्नीषोमीयवत्सोमोत्तरत्वमेव। अतस्तदुभय-विकारेष्वपि सोमोत्तरत्वमेव। न ह्यत्रासोमयाजिनोऽधिकारपर्युदासो-येन विकृतौ नातिदिश्येत। कर्तृसामानाधिकरण्यात्तु यागकर्तृत्व-पर्युदास एव। अतश्च युक्तोऽतिदेशः।

अत्र च ऐन्द्रस्य नोदाहरणत्वम्। औपदेशिकसोमप्राक्कालत्व-विधानात्। तद्विकाराणाञ्च प्रकृतावनङ्गत्वान्न सोमोत्तरत्वनियमः। न चान्वाहार्यस्येव प्रकृतावभावेऽपि ‚प्रकृति-प्रकृतितो ग्रहणमिति वाच्यम्। अपेक्षितविषय एव तथा ग्रहणेन सोमोत्तरत्वस्यानपेक्षि-तत्वात्। वस्तुतस्तु अपेक्षाया उपायान्तरेणापि निवृत्त्युपपत्तेर्नान्वा-हार्यांशेऽपि ग्रहणम्। अन्यथा पितृमेधविकारे होतृवरणस्याप्यति-देशापत्तेः। न चैवं ऐन्द्रविकाराणामनिर्दिष्टकालविशेषाणामौपव-सथ्यकालकत्वापत्तिः। तस्याङ्गत्वनिबन्धनतया तदभावे अप्राप्तेः। अतस्तद्भिन्नविकाराणां सोमोत्तरत्वमेव।

यत्तु याज्ञिकानां प्रागप्यनुष्ठानं, तच्छाखान्तरे साम्नाय्याग्नी-षोमीययोः प्रागपि विधानादवगन्तव्यम्। एवमैन्द्राग्नविकाराणामपि सोमप्राक्कालकत्वमेवेति सूत्रं तस्याप्युपलक्षणमिति केचित्। वस्तुतस्तु असञ्चयत इत्यस्य षष्ठ्यन्तस्य कर्तृसामानाधिकरण्याभावादधिकारि-विशेषणत्वस्यैव प्राधान्यादवगतेस्तस्य चानतिदेशाद्युक्तं तद्विकाराणा-मनियतकालत्वम् ॥ ५ ॥ ४ ॥ ८ ॥

तथा सोमे* ॥ सोमे इष्टिपूर्वत्वमाधानाव्यवहितोत्तरत्वञ्च

---

* तथा सोमविकारा दर्शपूर्णमासाभ्याम्,– इति भाष्यग्रन्थे सूत्रपाठः।

वैकल्पिकमङ्गम् । अतस्तद्विकारेषु तथैवातिदेशप्राप्तावपीष्टिपूर्वत्वमेव । एष वाव प्रथम इति वाक्यविहितज्योतिष्टोमोत्तरत्वबलेनाधाना-व्यवहितोत्तरत्वस्य तेषु कर्तुमशक्यत्वात् । अतश्चाधानानन्तर्यस्य प्रकृत्य-वद्भुत्वेनानतिदेशादिष्टिपूर्वकत्वमेवातिदेशिकं तेष्विति सिद्धं क्रमस्य पट्प्रमाणकत्वम् ॥ ५ ॥ ४ ॥ ८ ॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां पञ्चमस्य
चतुर्थः पादोऽध्यायश्च समाप्तः ।

श्रीगणेशाय नमः ।

षष्ठोऽध्यायः ।

प्रथमः पादः ।

द्रव्याणाम् ॥ एवं सक्रमके प्रयोज्यवर्गे निरूपितेऽधुना तत्राधिकारी निरूप्यते ।

तत्राधिकारो नाम फलभोक्तृत्वसमानाधिकरणं कर्तृत्वम् । श्राद्धादौ पित्रादेर्ऋत्विजाद्याधिकारव्यावृत्त्यर्थं विशेषणद्वयम् । न चैवं जातेष्टौ पितुः फलभोगाभावादधिकारानापत्तिः । मत्यप्यकरणे प्रत्यवाये करणस्य पूतत्वादिफलकत्वेन पापक्षयफलकत्वाभावादिति वाच्यम् । प्रवृत्तिप्रयोजकफलेच्छासमानाधिकरणकर्तृत्वस्यैव विवक्षितत्वात् । जातेष्टिश्राद्धादावपि फलस्यान्यनिष्ठत्वेऽपि तदिच्छाया यजमाननिष्ठत्वादधिकाराविघातः । ऋत्विजामपि यजमानस्य फलम्भूयादितीच्छायाः स्वनिष्ठकर्तृत्वसमानाधिकरणत्वात् अधिकारापत्तिरतः प्रवृत्तीत्युक्तम् । दक्षिणाप्राप्तिर्मे भूयादितीच्छाया एव ऋत्विक्प्रवृत्तिजनकत्वेन उक्तविधेच्छायाः प्रवृत्तिप्रयोजकत्वाभावात् ।

अयञ्चाधिकारोविध्याक्षिप्तत्वेष्टसाधनत्वसमानाधिकरणक्लृप्तिशाध्यत्वसम्भत्वादिधिप्रमाणकः । अयमेव चाधिकारविधिरित्युच्यते । तच्च चाधिकारस्येष्टरूपप्रवृत्तिफलघटितत्वात्तदेवेष्टरूपं फलं भावनायामस्ति न वेति प्रथमं विचार्यते ।

तच्च भावनायाभाव्यापेक्षायां पदश्रुत्या धात्वर्थस्यैव सर्वत्र भाव्यत्वं न स्वर्गादेः। अपि तु तस्य साधनत्वेनैव योग्यत्वात्। पश्वादिपदादेरिव स्वर्गशब्दस्यापि चन्दनं स्वर्ग इत्यादिप्रयोगात् द्रव्यवाचित्वमेव। सुखविशेषदेशविशेषवाचित्वग्राहकस्यान्यपरत्वाच्च। कामशब्दस्त्वर्जनकामनानुवादः। अथवा स्वर्गकामशब्दः कर्तृविशेषमेव यागाङ्गत्वेन विदधद्विशेषणीभूतं कामनामपि तदङ्गत्वेन विधत्त इति न कश्चिद्विरोधः। न च विधिश्रुतिविरोधादिष्टभाव्यकत्वावगमः। विधेः प्रवृत्तिजननस्वरूपयोग्यत्वस्यैव वाच्यत्वेन फलोपधाननयत्या-भावात्* वृत्तिविरहेऽपि अरण्यस्थदण्डवद्विधेः प्रवृत्तिजनकत्वोपपत्तेः। न हि फलोपहितप्रवृत्तिजनकत्वं विध्यर्थः। विधिश्रुतश्रवणेऽपि केषाञ्चित्प्रवृत्त्यदर्शनात्। अत एव प्रवृत्तिविषयस्येष्टसाधनत्वाक्षेपकत्वमपि विधेर्न प्रामाणिकम्। यदि तु प्रवृत्तिस्वरूपयोग्यत्वमात्रोक्तौ वाक्यस्य वैयर्थ्यापत्तिः शङ्क्येत, ततो यागस्य समानपदश्रुत्या भाव्यत्वावगमेऽपि यागे भ्रमप्रमासाधारणप्रवृत्तिकारणेष्टसाधनत्वज्ञानस्यैवाक्षेपात्। भ्रमात्मकेष्टसाधनताज्ञानादेव प्रवृत्तिसिद्धेर्नेष्टसाधनताऽऽक्षेपकत्वम्।

अथ वा, अस्तु स्त्रीकामः प्रायश्चित्तं कुर्यादिति वत्स्वर्गकामनाया अपि निमित्तत्वम्। ततश्च निमित्ते(१) नैमित्तिकाकरणे प्रत्यवायमात्रं, न तु करणे किञ्चिदिष्टम्। अकरणे प्रत्यवायभियैव

---

* इत्थमेव पाठः सर्व्वत्र। स च लेखकप्रमादजः। फलोपधाननैयत्याभावात्,—इति तु भवितुमुचितम्।

(१) निमित्ते सतीत्यर्थः।

च पुरुषप्रवृत्तिसिद्धेर्न विधिवैयर्थ्यमपि । सर्वथा यागस्यैव भाव्यत्वेनेष्टसाधनत्वाभावाच्च प्रवृत्तिप्रयोजकप्रवृत्तिविषयजन्यफलेच्छासमानाधिकरणकर्तृत्वरूपाधिकारसिद्धिरिति प्राप्ते ।

न प्रवृत्तिस्वरूपयोग्यत्वमात्रं विध्यर्थः । वैयर्थ्यापत्तेः । नापीष्टसाधनत्वानुमितेर्भ्रमत्वम् । ज्ञानानां स्वतः प्रमाणत्वेन बाधकं विना भ्रमत्वानुपपत्तेः । अतश्चोत्सर्गसिद्धप्रमात्वनिर्वाहार्थं यागे इष्टसाधनत्वं विषयोऽपि वक्तव्य एवेति भावनायामिष्टभाव्यकत्वमनपभ्रष्टमेव ।

यदपि कामनाया निमित्तत्वमङ्गीकृत्य विधेरकरणजन्यप्रत्यवायाक्षेपकत्वेन प्रवर्त्तकत्वमित्युक्तम् । तन्न । कामनायाः प्रवृत्तिजनकत्वेऽपि निमित्तत्वे प्रमाणाभावात् । स्त्रीकाम इत्यादावपि न तस्या निमित्तत्वम् । प्रायश्चित्ताकरणे प्रत्यवायान्तरप्रसङ्गात् । अपि तु प्रमाणान्तरसिद्धकामनाजनितप्रत्यवायनाशार्थत्वमेवेति तत्रापीष्टसाधनत्वाक्षेपकत्वमेव विधेः ।

अतश्च सर्वत्र नैमित्तिकस्थले अकरणे प्रत्यवायाक्षेपकत्वापेक्षया लाघवादिष्टसाधनत्वमेव विधिना आक्षिप्यत इति तद्ग्राह्यभावनायां इष्टभाव्यकत्वसिद्धिः । यथा चैवं श्रुति नैमित्तिकस्थले पापक्षयभाव्यकत्वं, तथा यावज्जीवाधिकरणे निरूपितम् ।

तच्चेष्टं स्वर्गपुत्रादि स्वर्गकामादिपदैः समर्प्यते । योग्यत्वात् । कामशब्दयोगाच्च । कामना हि स्वरसतः फले, द्रव्ये चौपचारिकी । अत एव स्वर्गशब्दोऽपि श्रुतिस्मृतिपुराणादिवशाद्दुःखासंभिन्नसुखयोग्यदेशविशेषवाची । आहत्यधिकरणन्यायेन वा तादृशसुखमात्रवाची । न तु चन्दनादिवाची । तत्रत्याधुनिकप्रयोगस्त्वौपचारि-

कत्वात्। अत एव स्वर्गकामादिपदमपि लक्षणया स्वर्गपरं, प्रथमा च कर्मत्वपरेति भावनान्वयोपपत्तेर्नान्योपसर्जनत्वेन स्वर्गस्य तदन्वयाशङ्का(१)।

स्वर्गकामोऽधिकारित्वेनाम्वीयीत* इति स्वर्गादिवाचकद्वितीयान्तपदाध्याहारेण तदन्वय इति केचित्। तन्न। फलापेक्षायाः प्राथमिकत्वात्। लक्षणाया अध्याहारापेक्षया लघुत्वाच्च। एवञ्च बलवत्तरविधिश्रुत्याद्यनुरोधेन स्वर्गादेरेव भाव्यत्वावगतेः सामान्यप्रवृत्ता पदश्रुतिरपि यागादेः करणत्वमेव लक्षणया प्रतिपादयतीति सिद्ध उक्तरूपाधिकारः। अत्र चोक्तविधेच्छाफलान्यतरसमानाधिकरणं कर्तृत्वं अधिकार इति बोध्यम्। तेन नित्यस्थले पापक्षयेच्छायाः प्रवृत्तिप्रयोजकत्वाभावेऽपि नाधिकारविघातः॥ ६॥ १॥ १॥

फलार्थत्वात्॥ सिद्धेऽधिकारे स केषामिति चिन्त्यते। तत्र

* इत्थमेव पाठः सर्व्वत्र। नान्वीयते इति तु समीचीनं प्रतिभाति।

(१) इदमत्र बोध्यम्। विधिवाक्येषु भावनैव विधिप्रत्ययार्थः। भावना चोत्पादना भावयितुर्व्यापारः। भावना च किं, केन, कथमित्यंशत्रयमपेक्षते। तत्र किमिति फलाकाङ्क्षा। सैव भाव्याकाङ्क्षेत्युच्यते। फलस्य भाव्यत्वात्। केनेति करणाकाङ्क्षा। करणस्योपकारकं इतिकर्त्तव्यतापरनामधेयं यत्, कथमिति तस्याकाङ्क्षा। तत्र स्वर्गकामपदेन लक्षणयाऽवगतः स्वर्गः भाव्यत्वेनान्वेति। स्वर्गकामपदोत्तरवर्त्तिनी प्रथमा कर्मत्वमवगमयति। सुपां सुलुगित्यादिना द्वितीयैकवचनस्य स्वादेशसम्भवात्। धात्वर्थो यागादिः करणत्वेनान्वेति। प्रयाजाद्यङ्गकलापश्चेतिकर्त्तव्यतात्वेन। तथा च प्रयाजादिभिरुपकारं सम्पाद्य यागेन स्वर्गं भावयेदित्यर्थः पर्य्यवस्यति। एवमर्थभावनाबोधः। शब्दभावनाबोधस्तु प्रकृतानुपयोगादिह न प्रदर्शितः।

स्वर्गकामत्वाविशेषाच्चेतनमात्रस्याधिकारः। न च तिरश्चां स्वर्गादिकामनाऽसम्भवः। परकीयेच्छाया अप्रत्यक्षत्वेन तदभावनिश्चयानुपपत्तेः। श्येनस्यादीनामष्टम्युपवासादिदर्शनेन तदनुमानाच्च। न च साङ्गकरणासामर्थ्यादनधिकारः। शक्यमात्रस्यैव करणोपपत्तेरिति प्राप्ते।

भावनाया अंशत्रयान्वयोत्तरं पश्चाद्विधिबलेनाधिकारिकल्पनात्पूर्वावगतसाङ्गप्रधानभावनाऽनुष्ठानसमर्थ एवाधिकारी। अतस्तासमर्थत्वादविद्वत्त्वादद्रव्यत्वाच्च तिरश्चामधिकारः। विष्णुक्रमणाद्यसमर्थत्वाच्च न पङ्ग्वन्धबधिरमूकादीनाम्। देवादीनान्तु विग्रहाद्यभावादेव नाधिकारः। ऋष्यादीनान्तु अनादित्वात्संसारस्य* प्रवरवरणादौ ऋष्यन्तरस्यापि सम्भवादधिकारोऽस्त्येवेति भाष्योक्तमनधिकारप्रतिपादनमनादर्त्तव्यम् ॥ ६ ॥ १ ॥ २ ॥

लिङ्ग ॥ क्रतुषु पुंस एवाधिकार उत स्त्रिया अपीति चिन्तायाम्।

स्वर्गकाम इति पुंलिङ्गश्रवणात्पुंस एव। न हीदमधिकारिविशेषणम्। कर्तृसमानाधिकरणत्वेन तद्विशेषणस्याख्यातश्रुतत्वादधिकारिविशेषणत्वानुपपत्तेः। अतस्त्वाख्यातोपात्तैकत्ववदेव पुंस्त्वस्याप्यस्य विवक्षा नानुपपन्ना। किञ्च अद्रव्यत्वादपि स्त्रिया नाधिकारः।

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः।
यत्ते समधिगच्छन्ति यस्यैते† तस्य तद्धनम् ॥

* आदित्वात् संसारस्येत्यशुद्धः पाठः आदर्शपुस्तकेषु वर्त्तते। तन्त्ररत्नेऽप्यत्रैवोक्तम्,—"अनादि र्हि कालोऽस्माकं मीमांसकानाम्",—इति।

† इत्थमेव पठितमिदमन्यत्र। आदर्शपुस्तकेषु, "तस्यैते"—इत्यसमीचीनः पाठः।

इति वचनात् । यतमधिरथं दुहितृमते*दद्यादार्षे विवाहे गोमिथुनमित्यादिना पित्रा भर्त्रे मौल्येन दासवद्विक्रीतत्वाच्च । अत-एव गर्भेणाविज्ञातेन हतेन भ्रूणहेति यज्ञसाधनपुंगर्भहननप्रवृत्त्या भ्रूणपदवाच्ययज्ञहन्तृत्वलिङ्गमवकल्पते । अन्यथा स्त्रीत्वेन विज्ञातेऽपि यज्ञहन्तृत्वाविशेषात् । तथाऽऽत्रेयीं हत्वा भ्रूणहेति लिङ्गम् । आत्रेयी सगर्भा । अतः पुमानेवाधिक्रियत इति प्राप्ते ।

यद्यपि कर्तृविशेषणं पुंस्त्वं, तथापि प्रमाणान्तरेण स्त्रिया अपि अधिकारावगतेर्विधिलाघवानुरोधेन साधुत्वार्थमवयुत्यानुवाद एव पुंस्त्वम् । यथा वसन्ते ब्राह्मण इत्यादौ[१] । प्रकृते त्वनपेक्षितत्वाच्चास्य कर्तृविशेषणत्वमपि तु योग्यत्वादधिकारिविशेषणत्वमेव । ततश्च तस्य फलं प्रत्यपि प्राधान्यादुद्देश्यत्वेन तद्विशेषणाविवक्षा ।

वस्तुतस्तु । प्रथमापेक्षितत्वात्स्वर्गकामादिपदस्य फलपरत्वमेवेति क्व पुंस्त्वस्य विवक्षाप्रसक्तिः । न चाद्रव्यत्वम् । कर्त्तनादिभिरर्जनसम्भ-वात् । पित्रादिदत्तस्य दायस्य वा स्मृतिपूक्तत्वाच्च । धर्मे चार्थे च कामे च नातिचरितव्येति स्मृत्याऽर्जितस्याप्युभयसाधारणत्वाच्च । भमदा वा एताः परगृहाणामैश्वर्यमवरुन्धत इति स्मरणाच्च । सं पत्नी पत्या सुकृतेन गच्छतामित्यादि मन्त्रवर्णात्पाणिग्रहणाद्धि सहत्वं कर्मसु, तथा पुण्यफलेष्विति स्मृतेश्च पत्न्या अप्यधिकारः । पत्युर्नो यज्ञसंयोगे इति स्मृतेः पत्नीशब्दस्य स्वामित्वाभावेऽनुपपत्तेश्च ।

---

* दुहितृमन्ते,—इत्यसमीचीनः लेखकप्रमादजः पाठः आदर्शपुस्तकेषु ।

---

(१) आधाने दम्पत्योः सहाधिकारस्यानुपदमेव वक्ष्यमाणत्वात् वसन्ते ब्राह्मणोऽग्निमादधीत इत्यत्र ब्राह्मण इति पुंस्त्वमवयुत्यानुवादो यथेत्यर्थः ।

यत्तु भार्या पुत्रश्चेति वचनं, क्रीतत्वादिवचनं च, तत्, न स्त्री स्वातंत्र्यमर्हतीति वचनान्तरानुसारादस्वातंत्र्यपरम् । मौल्यदानं त्वदृष्टार्थम् । कन्यायां कन्यात्वातिरिक्तस्वत्वाभावस्य वक्ष्यमाणत्वेन तद्दानस्याप्यौपचारिकत्वाच्च । आत्रेयी चाविगोत्रोत्पन्ना न त्वासन्न गर्भा । सत्यपि च स्त्रियाः कांचित्कर्माधिकारे अग्नौ गमकाभावे जपादिसकलवैदिककर्मानधिकारात् । अविज्ञातलिङ्गदर्शनं पुंवधे प्रायश्चित्तविशेषविधानार्थम् । तस्मात्सिद्धं स्त्रिया अप्यधिकारः ॥ ६ ॥ १ ॥ ३ ॥

स्ववतोः ॥ सिद्धे द्वयोरधिकारे किं दम्पती पृथक् पृथक् यजेयातामुत सहेति चिन्तायाम् । स्वर्गकामपदोपात्तस्यैकत्वस्य पुंस्त्ववदविवक्षितत्वेऽप्याख्यातोपात्तस्य तस्य गुणभूतोपादेयकर्तृगामित्वेन विवक्षितत्वादेकैकशः प्रयोग इति प्राप्ते ।

प्रत्येकप्रयोगे अन्यतरकर्तृकावेक्षणान्वारम्भादिपदार्थलोपेन वैगुण्यापत्तेरन्यतरेणान्यतरस्य परिक्रयादिनोपादाने च फलभोक्तृत्वाभावात् स्वामित्ववाचिपत्नीयजमानशब्दप्रयोगानुपपत्तेरङ्गसाकल्यार्थं सहैव प्रयोगः । न ह्याज्यावेक्षणादीनां कर्तृसंस्कारकत्वं, येन तत्तत्प्रयोगे व्यवस्थां लभेत । क्रतुधर्मत्वात्तूभयकर्तृकमवेक्षणद्वयं अदृष्टविधया क्रतोरङ्गम् ।

यत्त्वन्यतररोगविदृत्त्यर्थमेव दर्शादिप्रयोगस्तत्रेतरस्य पत्नीत्वाद्यभावेऽपि गुणलोपे चेति न्यायेन परिक्रयाद्युपात्तेतरकर्तृकाज्यावेक्षणेऽपि न सर्वत्र तथा कल्पनायां प्रमाणमस्ति । साहित्यस्य पुण्यफलेष्वपि स्मृत्यादिप्रमितत्वात्, धर्मे चेत्यादिवाक्यपर्या-

सोमयागे च तयोः संसृष्टद्रव्यत्वादविभागप्रतिषेधाच्च सहैव प्रयोगः । अतएव उभयस्वत्वस्य संसृष्टत्वाद्द्रव्यत्यागे दक्षिणादानादौ चोभयोरेव कर्त्तृत्वम् ।

यत्तु भाष्ये द्वादशशते षट्पञ्चाशदेकेनापरेणापि तावदेवेत्येवं विभागः कथितः । स द्वादशशतस्यैव विहितत्वात्तत्राप्युभयोः संसृष्टत्वोपपत्तेरुपेक्षितम्* । यदपि तत्स्वारस्यात् पुंस एव त्यागेऽपि कर्त्तृत्वं तस्यास्त्वनुमतिद्वारं तदिति केषाञ्चिन्मतम् । तदनुमतेः फलसम्बन्धाश्रवणात्तद्द्वारकत्वे प्रमाणाभावेन पूर्वाधिकरणव्युत्पादिताधिकारभङ्गापत्तेरुपेक्षितम् ।

*यत्त्वाख्यातोपात्तं एकत्वं सहाधिकारे नावकल्पत इति । तन्न, एकवचनश्रवणादेव दम्पत्योर्व्यासज्यवृत्त्येकस्यैव कर्त्तृत्वस्य कल्पनात् । इतरथा कर्त्तृभेदात्सत्त्ववद्बहुवचनाद्यापत्तेः । अतएव क्रियाऽऽश्रययोः कर्त्तृत्वतदाश्रययोर्मध्ये आवश्यकत्वात्कर्त्तृत्वांश एव शाब्दत्वसिद्ध्यर्थं लक्षणामङ्गीकृत्य तत्रैव पार्ष्टिक एकत्वाद्यन्वयः । क्षौमे वसाना-वित्यादौ लगत्या क्वचित्तदाश्रयेऽपि ।

अत्र च कर्त्तृत्वं कृत्याश्रयत्वसमनियतं अखण्डोपाधिरूपं द्रष्टव्यम् । न तु कृत्याश्रयत्वमेव । तस्य प्रत्यात्मं कृतिभेदेन भेदात् व्यासज्य-वृत्तित्वानुपपत्तेः । तस्मात्सह प्रयोगः ॥ ६ ॥ १ ॥ ४ ॥

द्व्याधानं ॥ आधानप्रकरणे, क्षौमे वसानावग्निमादधीयातामिति श्रुतम् । तेन चाधाने कर्त्तृत्वद्वित्वविधानात् द्वौ पुमांसौ सस्त्रीका-

* इत्यमेव पाठः सर्व्वत्र । उपेक्षित इति तु समीचीनं प्रतिभाति ।

† वसानमग्नि,—इत्यशुद्धः पाठ आदर्शपुस्तकेषु । भाष्यधृतः समीचीन-पाठ एवोपरि निवेशितः ।

वाधानेऽधिकारिणौ, एतेन राजपुरोहितौ सायुज्यकामौ यजेयाता-मितिवत्।

न चात्र कुक्कुटानानय मिथुनं करिष्याम इतिवत् पुमान् स्त्रियेत्याद्यनुशासनानुरोधेन स्त्रीसद्वितीयतया विरूपैकशेषस्याप्यु-पपत्तेर्वाक्यस्य क्षौमविधिमात्रपरत्वेनाप्युपपत्तावुत्पत्तिशिष्टकर्त्रैकत्व-बाधानुपपत्तिरिति वाच्यम्। सरूपैकशेषस्य सम्भवे लक्षणाऽऽपादक-विरूपैकशेषस्यान्याय्यत्वात्।

तथा हि। औकारस्तावद्‌द्वित्वं पुंस्त्वं चाभिधत्त इत्यव्यणैकहाय-नीवद्‌द्वित्वावच्छिन्ने पुंस्त्वं पुंस्त्वावच्छिन्ने च द्वित्वमिति परस्पर-नियमात् पुंद्वयप्रतीतिः सुलभा। विरूपैकशेषे तु पितरावित्यादौ मातृत्वादेः कुक्कुटौ इत्यादौ स्त्रीत्वस्य च प्रत्यायकाभावाल्लक्षणा आवश्यकीति तस्यास्ततो दौर्बल्यम्।

न च भवन्मतेऽप्युपक्रमस्थ-क्षौमपदे मलिनत्वसादृश्याद्गौणी तु चु शब्दे इत्यनुसाराद्वा युवयोग इति जघन्यवृत्त्याश्रयणमनुवादवैयर्थ्यं उत्पत्तिवाक्यस्थैकवचनस्य च साधुत्वमात्रार्थत्वमित्याद्यनेकदोषतादव-वस्थ्यमिति वाच्यम्। क्षौमवाक्य एवोभयविशिष्टाधानविधानाङ्गी-कारात्। वसन्तादिवाक्ये तु ब्राह्मणादिकर्त्तृकत्वे निमित्ते वसन्ता-दिकालविधानम्।

अतएव ब्राह्मण इत्येकत्वं पुंस्त्वं चाविवक्षितम्। आदधीतेत्यपि च ब्राह्मणो यदि शूद्रसहित आदधीत तदा वसन्त इत्येवं कादाचित्क-ब्राह्मणैकत्वादनुवादः। तस्माद्द्वौ पुमांसौ सस्त्रीकावधिकारिणौ।

यत्तु भाष्यादौ सरूपैकशेषसाधकं प्रमाणान्तरमुपन्यस्तं; इन्द्राप-

वादत्वादेकशेषस्य द्वन्द्वार्थ एवैकशेषार्थं इत्युच्यमन्यते। द्वन्द्वस्य युगपदधिकरणे द्वन्द्वो भवतीति कात्यायनस्मरणाद्युगपदधिकरणतावाची। अधिकरणं शब्दप्रतिपाद्योऽर्थः। स यत्रानेकोयुगपदेकेन पदेन बोध्यते, तत्र द्वन्द्वः।

तथा च धवखदिरावित्यत्र धवपदं लक्षणया खदिरसहितधवपरम्। इतरसहितधवपरमेव वा। इतरस्तु खदिरपदान्निर्णीयते। एवं खदिरपदमपि। सेयं युगपदधिकरणता। इतरेतरयोगोऽप्ययमेव। अस्मिन्नेव चार्थे द्वन्द्वः। चकारस्य हि चत्वारोऽर्थाः समुच्चयान्वाचयेतरेतरयोगसमाहाराः। तत्र विभक्त्यर्थान्वये परस्परनिरपेक्षत्वेऽपि क्रियान्वये दण्डचक्रादिवत्परस्परसापेक्षत्वे सति समत्वं समुच्चयः।

अतश्च नेतरेतरयोगेन विकल्पे अन्वाचये अतिव्याप्तिः। यथा अहरहर्नयमानोगामश्वं पुरुषं चेत्यादौ। अन्वाचये लिकस्य प्रयोजकत्वमपरस्य नेति न साम्यम्। यथा काष्ठान्याहर शाकञ्चाहरेति। इतरेतरयोगे तु व्यासज्यवृत्तिविभक्त्यर्थे परस्परसाहित्येनान्वयः। यथा अग्निश्च सोमश्च देवतेत्यादौ।

अत्र धवं च खदिरं चेत्यादावितरेतरयोगविवक्षायां युगपदधिकरणवचनता आवश्यकी। अन्यथा प्रत्येकविभक्त्यर्थान्वयेनेतरेतरयोगस्य समुच्चयाद्भेदानापत्तेः। अतएव निरपेक्षयोरेकक्रियान्वयित्वं समुच्चय इति तल्लक्षणोक्तमपास्तम्। अमावास्यायां पौर्णमास्यां वा यजेतेति एकवाक्योक्तविकल्पेऽतिव्याप्तेः।

इतरेतरयोगसमाहारयोस्तु साहित्यस्य पदार्थान् प्रति गुणत्वप्रधानत्वकृतोविशेषः; इतरेतरयोगत्वं तुल्यम्। एषु चार्थेषु इतरे-

तरयोग एव द्वन्द्वः । अतएव चार्थानामनेकत्वेऽपि इतरेतरयोगरूप-चार्थे द्वन्द्व इति चार्थे द्वन्द्व इति सामान्यसूत्रं महाभाष्यकारादिभिर्विशेषपरतया व्याख्यातम् । अतश्च युगपदधिकरणतावाचिद्वन्द्वापवादत्वादेकशेषस्यापि तद्वाचित्वप्रतीतेर्वचनानावित्यत्र पुंद्वयप्रतीतिरिति ।

नच, विरूपैकशेषाङ्गीकारेऽपि स्त्रीसहितपुंसः पुंससहितस्त्रियाश्च युगपदभिधानोपपत्तेः । न चैवं पुंद्वयं स्त्रीद्वयं चेति चतुष्टयापत्तिः । धवखदिरद्वयवत् स्त्रीपुंद्वयोपपत्तेः ।

वस्तुतस्तु कात्यायनोक्तं युगपदधिकरणतावाचित्वं पतञ्जलिनैव दूषितम् । तत्रायमाशयः । धवपदे खदिरपदे च लक्षणायां प्रमाणाभावात् । इतरेतरयोगस्य च शब्देनैव तात्पर्ये सति बोधोपपत्तेः । अतएव धवं च खदिरं चेत्यादौ तात्पर्य्यानुरोधेन धवखदिरवृत्तिव्यासक्तकर्मत्वे लक्षणेत्यपि बोध्यम् । द्वन्द्वे तु विभक्तेरेकत्वादेवेतरेतरयोगो लक्षणां विनैव निरपबाधः । यत्तु प्रमिचयोर्वरुणयोरिति वेदे क्वाचित्कं विग्रहप्रदर्शनम् । तच्छान्दसम् । अतएव विभक्त्यर्थासव्यवृत्तिधर्मपरत्वे द्वन्द्व एव तादृशस्थले तात्पर्यग्राहक इत्यपि बोध्यम् ।

किं च द्वन्द्वापवादत्वेऽप्येकशेषस्य न तदुत्तरविभक्त्यर्थासव्यवृत्तिधर्मपरत्वं वचनान्वयस्य विभक्त्यर्थान्वयोत्तरकालीनत्वेन ततः पूर्वमेकशेषत्वग्राहकप्रमाणाभावात् ।

वस्तुतस्तु एकशेषानुशासनमपि परिभाषामात्रमेव सरूपद्वन्द्वनिराकरणार्थम् । एकप्रातिपदिकार्थस्यैव द्विवचनादिबलेनानेकत्वप्रतीत्युपपत्तेः । विरूपैकशेषे तु तात्पर्यग्राहकानुरोधेनानुशासनिकी

श्रौकारे लक्षणेति शेषः । अतस्तत्स्त्रिया सहैकशेषस्यैवाङ्गीकारात्पुं-द्वयाधिकार इति प्राप्ते ।

वसन्तादिवाक्ये आदधीतेत्येकवचनस्य पाक्षिकानुवादत्वापत्ते-र्ब्राह्मणद्वयकर्तृकाधाने वसन्तप्राप्त्यनापत्तेरन्यसहितपदाध्याहारापत्तेश्च वसन्तादिवाक्येष्वेवाधानविधानम् । वसानवाक्ये तु एककर्तृविशिष्टा-धाने कर्तृत्वद्वित्व-क्षौमोभयविध्ययोगादानुशासनिकीं लक्षणामङ्गी-कृत्य वरं विरूपैकशेषोऽधिष्ठानलक्षणया तस्मिन्द्वित्वान्वयोऽपि पार्ष्ठिकोयुक्तः समाश्रयितुम् ।

अतएव तत्र क्षौममात्रं वसनक्रियोद्देशेन विधीयते । युक्तश्च तदुपात्तभावनायामपि कारकसम्बन्धः । विधायकत्वादधातिपर एव प्रत्यय उपक्रमस्थ-क्षौमपदे श्रुत्यर्थलाभाय च विप्रकृष्टस्यार्थस्यापि विधायकः । अन्यत्तु सर्वं प्रकरणप्राप्तत्वादनूद्यते ।

यद्यपि चोत्पत्तौ पुंस्त्वश्रवणात् स्त्रियमादाय द्वित्वं न प्राप्यते, तथापि विशिष्टगौरवपरिहाराय वसानवाक्ये वाक्यभेदपरिहाराय धर्मं चेत्यादिवाक्यसङ्कोचपरिहाराय च ब्राह्मणादेरधिकारित्वेनैवा-न्वयाङ्गीकारात्तस्य चोद्देश्यत्वेन तद्विशेषणपुंस्त्वस्याविवक्षोपपत्तेः स्त्रिय-मादाय द्वित्वप्राप्त्यविघातः । द्विवचनं चात्राधिष्ठानानेकत्वमात्र परम् । तेन पत्न्यनेकत्वेऽपि न कश्चिद्विरोधः । अतएव पुमान् स्त्री-सद्वितीय आधानेऽधिकारी ॥ ६ ॥ १ ॥ ५ ॥

तस्याः॥ स्थिते स्त्रिया सहाधिकारे यत्र तावत्स्वत्वत्यागस्तत्प्रदानं दक्षिणादानादि च द्वाभ्यां कार्यमित्युक्तमेव । अतएव वरणादिद्वारा आर्त्विज्येष्वपि उभयोरपि प्रयोजककर्तृत्वम् । ये च फलिसंस्काराः

कर्तृसंस्काराश्च, ते फलित्वकर्तृत्वयोरविशेषादुभयोरपि । तत्रापि यत्र योक्त्रेण पत्नीं सन्नह्यति मेखलया यजमानमित्यादौ प्रतिनियत-निर्देशः, तत्राधर्मन्तर्वेदि इति वत्तलक्षणया पुंस्त्वादेरपि उद्देश्यान्त-र्भावाङ्गीकारेण सत्यप्युभयोरेकापूर्वसाधनत्वे व्यवस्थैव । विशेषनिर्देशा-भावेऽपि च यत्र केशश्मश्रु वपत इत्यादौ केशश्मश्रुणोः शरीर-संस्कारार्थवपनं प्रति उपादेयत्वेन द्वन्द्वावगतसाहित्यविवक्षा, तत्रापि पत्न्याः श्मश्रुभावेन न केशानां वपनम् । न हि तत्केशश्मश्रु-संस्कारकं, तेषामनुपयुक्तत्वात् । अतस्तदपि यजमानस्यैव । अतएव यजमानानेकत्वे पत्न्यनेकत्वे च द्विविधस्यापि प्रत्येकं करणम् ।

यत्र तु ऋत्वर्थैष्वाज्यावेक्षणादिषु प्रतिनियतो निर्देशस्तत्रोपादेय-विशेषणस्य विवक्षितत्वात्तेन तेन प्रतिनियतेनैकेन च कर्त्रा करणम् । अतएव पत्न्यनेकत्वे सन्निहितया ज्येष्ठयैव । यत्र तु याजमानमिति विशेषसमाख्यया कर्तृनियमस्तत्र यजमानप्रातिपदिकस्योभयपरत्वो-पपत्तेर्विरूपैकशेषाङ्गीकारेण द्विवचनबहुवचनान्तविग्रहेण चोभयो-रपि वैकल्पिककर्तृत्वमिति प्राप्ते ।

यजमानशब्दस्य पुंस्येव प्रचुरप्रयोगाद्विरूपैकशेषद्विवचनान्तादि-विग्रहस्य चासति तत्तात्पर्यग्राहकप्रमाणे अनाश्रयणीयत्वात्प्रत्युत तदाश्रयणे तद्विषये ज्ञानाक्षेपशक्तिकल्पनापत्तेः प्रसिद्धज्ञानवन्तं पुमांसमादायैव समाख्योपपत्तेस्तस्यैव कर्तृत्वम् । यद्यपि स्वाध्यायविधौ लिङ्गविशेषानुपादानेन न स्त्रियो व्यावृत्तिप्रतीतिस्तथाप्युपनयन-वाक्ये तदुपादानात्तत्र च तस्योद्देश्यविशेषणत्वेऽपि अष्टवर्षत्वादिवदेव तमध्यापयीतेत्यत्र तच्छब्देन पुंस्त्वोपादानादध्ययने तद्व्यावृत्तिः ।

अत्र हि अध्यापनस्य वृत्त्यर्थत्वेन रागप्राप्तत्वात्तदन्यथा प्रयोज्य-
व्यापाररूपाध्ययन एव कर्त्तृविधिः। अतएवोपनयनवाक्ये तत्संस्कार-
त्वेनाचार्यकर्त्तृकमुपनयनं माणवककर्त्तृकमुपगमनमेव वा नियम्यते।
तेन चाचार्यसिद्धेरानुषङ्गिकत्वात्तामादायैवात्मनेपदोपपत्तेर्नाचार्य-
करणे नयतेर्धातोरात्मनेपदं भवतीत्यनुशासनबलादुपनयनस्याचार्या-
र्थत्वं तस्य रागप्राप्तत्वेन विधिवैयर्थ्यात्।

अतः उपनयनविधौ लिङ्गस्याविवक्षायामप्यध्ययने तस्य विव-
क्षितत्वात् न स्त्रियोऽधिकारः।

स्त्रीशूद्रद्विजबन्धूनां न त्रयी श्रुतिगोचरः। इति

प्रतिषेधाच्च तथा। अतश्च ज्ञानाक्षेपकल्पनाभिया यजमानस्ये-
दमित्येव विग्रहात् तस्यैव तत्र कर्त्तृत्वम्॥ ६॥ १॥ ६॥

चातुर्वर्ण्यं॥ यद्यपि कामश्रुतयोऽविशेषप्रवृत्तास्तथापि तासां
लाघवायाधानाध्ययनविधिसिद्धाग्निविद्योपजीवकत्वस्य द्वितीये साधि-
तत्वाच्छूद्रस्य तदाक्षेपकल्पनानुपपत्तेस्तस्य वेदाक्षरश्रवणप्रतिषेधाच्चाप-
शूद्राणां त्रयाणामेवाधिकारो न शूद्रस्य अग्निसाध्ये तदसाध्ये च
वैदिके कर्मणि। द्वितीयसिद्धस्यैव प्रयोजनाधिकरणमिति नातो-
वाच पूर्वपक्षादरः।

अतएव सर्वत्र वेदे त्रयाणामेव वर्णानामनुकीर्त्तनम्। यत्तु
पयोव्रतं ब्राह्मणस्येति वर्णत्रयमनुकीर्त्य मस्तु शूद्रस्येति कीर्तनं, तत्
मस्तु शूद्रस्यानधिकारिणो भक्ष्यमुचितं न तु ब्राह्मणादेरिति
तन्निन्दया पयआदिस्तुतिः॥ ६॥ १॥ ७॥

त्रयाणां॥ अग्निविद्ययोरिव द्रव्यस्यापि प्रतिग्रहादिपुरुषार्थे-

पायविधिवशादेव लभ्यतया क्रतुविधिभिरनापेक्षात्परप्रयुक्तसिद्ध-द्रव्यवत एवाधिकारो न त्वसिद्धद्रव्यस्य तदर्जयितेति प्राप्ते।

प्रतिग्रहाद्युपायविधेरभ्यनुज्ञाविधिमात्रत्वस्य स्थापितत्वात् द्रव्यस्य स्वतन्त्रविधिप्रयुक्तत्वाभावेन जीवनादिकार्य्येणेव क्रतुनाऽपि तदा-क्षेपोपपत्तेः प्रतिग्रहादेरपि संयोगपृथक्त्वन्यायेन क्रत्वर्थस्य स्थापित-त्वात्प्रयाजादिवत् क्रतुनाऽपि तदाक्षेपोपपत्तेस्साद्रव्योऽपि द्रव्यमर्जयि-त्वाऽधिक्रियत एव॥ ६॥ १॥ ८॥

अङ्गहीनः॥ एवं चक्षुराद्यङ्गहीनोऽपि आज्यावेक्षणादिमति कर्मणि प्रतिसमाधाय चक्षुराद्यङ्गमधिक्रियते। अप्रतिसमाधेयाङ्ग-वैकल्ये तु काम्ये नाधिक्रियते। नित्ये तु यथाशक्तिन्यायादधिक्रियत-एव। यत्तु पार्थसारथिना आहिताऽग्निर्नित्येऽधिक्रियत इत्युक्तम्। तदाधानस्यापि नित्यत्वेनोपेक्षितम्॥ ६॥ १॥ ९॥ १०॥

अनार्षेयस्य॥ दर्शपूर्णमासयोरार्षेयं वृणीते एकं वृणीते द्वौ वृणीते त्रीन्वृणीते न चतुरो वृणीते न पञ्चातिवृणीत इति श्रुतम्। तत्र तावदेकं विधायकं अन्येऽनुवादा इत्यविवादम्। अन्यथा सर्वेषां विधित्वे वाक्यभेदविकल्पयोरापत्तेः। अतस्त्रीन्वृणीत इत्येव विधिः एकं वृणीते द्वौ वृणीते इत्यवयुत्यानुवादस्त्रित्वस्तुत्यर्थः। न चतुरो-वृणीत इत्याद्यनुवादस्तदर्थ एव। अतश्च आर्षेयत्वं चार्षेऽयोपि* त्रीनेव वृणुयात्। एकद्व्यार्षेययोस्तु नास्मिन्पक्षेऽधिकारोऽपि तु

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, त्र्यार्षेयवत् पञ्चार्षेयोऽपि,—इति पाठः प्रतिभाति।

अथहैके मनुवदित्येवैकार्षेयं सार्ववर्णिकं प्रतिदिशन्तीति वचनान्तर-विहितमनुवत्पचाश्रयण एव।

तदेतद्भगवतो जैमिनेर्मतं सूत्रान्तरैरपि अभ्युपगतम्। तथाच कात्यायनः। मनुवदिति पुरस्तादर्वाञ्चि त्रीणि इति। आपस्तम्बोऽपि। त्रीन्यथर्षीन्मन्त्रकृतो वृणीत इति। तेषु पञ्चान्तराण्युक्तानि। यावन्तो वा मन्त्रकृत इति कात्यायनः। अपि चैकं द्वौ त्रीन् पञ्च वृणीते न चतुरोऽवृणीते न पञ्चातिवृणीत इत्यापस्तम्बः। यावन्तः स्युः परम्परं प्रथममित्याश्वलायनोऽपि। तेषां चायमभिप्रायः। आर्षेयं वृणीत इत्ययं विधिरितरेऽनुवादास्तत्स्तुत्यर्थाः।

अतश्च त्रीन्वृणीत इत्यप्यनुवाद एव। ईदृशोऽयं वरणसामान्य-विधिर्यत् तत्तदार्षेयं प्रति तत्तत्संख्याकवरणं प्राप्यत इति स्तुतिः। इतरथा भवन्मतेऽपि सामान्यवाक्येनैव वरणविधिमभ्युपगम्याप्येक-वाक्यतालाभात्पञ्चार्षेयस्यैवाधिकारापत्तेस्त्रयाणामप्येतेषां अवश्य-त्यानुवादत्वापत्तिः। न चैवं चतुःषडादीनामपि वरणप्रसक्तौ तन्निषेधेन वाक्यभेदापत्तिः। एकद्वित्रिपञ्चार्षेयाणामेव प्रवराध्याये समाम्नानेन चतुःषड़ादेरप्रसक्तेः। अतोऽस्मिन्नपि पचे वाक्यभेदाद्यना-पत्तेरेकद्व्यार्षेययोरधिकारः, प्रत्यार्षेयस्य च पञ्चानां वरणं न विरुद्धमिति।

यत्तु द्व्यामुष्यायणानामुभयतः कुलद्वयेऽपि वरणविधानादस्ति चतुःषडादीनां प्राप्तिरिति। तन्न। आश्वलायनेन द्व्यामुष्यायणा-ननुक्रम्य, तेषामुभयतः प्रवृणीते एकमितरतो द्वावितरतः द्वावेकत-स्त्रीनितरत इति आवश्यकश्रुत्यन्तरमूलकेनैव तन्निषधात्। अतो-

भार्गवच्यावनेत्यादिविशेषरूपेण वरणपक्षेऽपि मनुवत्पक्षवदेव एक-ब्राह्मर्षयोरप्यधिकार इति त्वप्यन्तरमतं बोध्यम् ॥ ६ ॥ १ ॥ ११ ॥

वचनात् ॥ त्रयाणां वर्णानामाधानं विधाय, वर्षासु रथकार-आदधीतेति श्रुतम्। तत्र विद्याक्षेपशक्तिकल्पने गौरवापत्तेर्ब्राह्मणा-दीनामेव रथकरणे निमित्ते आधानोद्देशेन वर्षाविधिरिति प्राप्ते।

रथकारशब्दस्य प्रसिद्धिबलेन सौधन्वनापरपर्याये जातिविशेषे रूढत्वात्तस्यैवायं कालविशिष्टाधानविधिः। न च तत्रापि योगेने-वोपपत्तौ रूढिकल्पनायां प्रमाणाभावः। रथमकुर्वत्यपि सौधन्वने प्रयोगेण तद्बाधात्। न च प्रोक्षणीशब्दवद्योग्यतामात्रेण तदुपपत्तिः। योग्ये ब्राह्मणादावप्रयोगेण रूढिकल्पनाया आवश्यकत्वात्। रथ-करणयोग्यतावच्छेदकमनुष्यत्वस्य कादाचित्कत्वाभावेन निमित्तत्वा-नुपपत्तेः रथकारपदवैयर्थ्यप्रसङ्गाच्च। अतः प्रसिद्धिबलात्सौधन्वन एव रथकारः। सुधन्वा च,

आत्यात्तु जायते वैश्यात्सुधन्वाऽऽचार्य्य एव च।

इत्यादिनोक्तत्रैवर्णिकात्किञ्चिन्न्यूनोवेदानधिकृतो जातिविशेषः। यद्यपि च रथकारपदं,

माहिष्येण करण्यां तु रथकारः प्रजायते।

माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात्।

शूद्रायां करणो वैश्यात्।

इत्यनेनोक्तेऽपि रूढम्। तथापि ऋभूणां त्वा देवानां व्रतपते व्रतेनादधामीति रथकारस्यादध्यादिति वाचनिके मन्त्रे ऋभुशब्द-प्रयोगात्तस्य च सौधन्वनां ऋभव इति मन्त्रान्तरे सामानाधिकर-

त्वनिर्देशात्सौधन्वन एवात्र रथकारपदेनाभिधीयते। अतश्च तस्या-विद्वत्त्वाद्विद्याक्षेपत्तावस्मात्त्वविषयमग्नीकृत्यापि कर्तृकालोभयविशि-ष्टमाधानान्तरमेव विधीयते। सर्वाधानेषु च प्रकरणात्साधारण्ये-नैव धर्मविधानम्।

यद्यपि च विद्याऽभावादस्योत्तरक्रतुष्वनधिकारस्तथाप्याधान-मात्रमरणिभाव्यलौकिकाग्निगुणकं कल्प्यस्वर्गफलं सधर्मकमनुष्ठेयम्। एवं चाहवनीयादेरनुपयोगादभावेन तदङ्गेन विहितानां गार्हपत्यमादधातीत्यादीनां धर्माणां लोपेऽप्येकस्मिन्नेव कुण्डे स्थण्डिले वा त्रिषु वा तेष्वग्न्याधानं इतराङ्गयुक्तं कार्यमिति तन्त्र-रत्नाभिप्रायः।

मम तु प्रतिभाति। नास्याधानस्यार्थकर्मत्वं, प्रमाणाभावात्। अग्निमिति द्वितीयान्तपदे लक्षणादेरावश्यकत्वे रथकारपदे योगाङ्गी-कारस्यैव न्याय्यत्वाच्च। अपि त्वाहवनीयाद्युत्पादकत्वमेव। न च तेषामनुपयोगः। अविद्वत्तया क्रत्वधिकाराभावेन तत्रानुपयोगेऽपि आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति वचनविहिते दाहे उपयोगसम्भवात्।

न ह्ययं दाहः कर्मोपयुक्ताहिताग्निशरीरप्रतिपत्त्यर्थो येन कर्मा-भावेनाभावः शङ्क्येत। तथात्वे आहिताग्निपदेनाधानस्यैवोपस्थिते-स्तदङ्गस्यैवापत्तौ क्रत्वङ्गत्वानापत्तेः। न चेष्टापत्तिः। तथात्वे प्रति-पत्तिं विना आधानफलाहवनीयादेरनिष्पत्त्यापत्तेः। अतः आज-श्रवणादर्थकर्मैवेदमिति युक्तस्तत्राहवनीयादेरुपयोगः। पवमानेष्ट्यङ्ग-भूतपात्रसत्त्वाच्च यज्ञपात्रसमुच्चयेऽपि न क्षतिः। अतएव पवमानेष्ट्य-

नन्तरं प्राक् क्रतुभ्यो मरणेऽग्निभिः पात्रैश्च दाहः । पवमानेष्टिभिः प्राक् मरणे तु केवलाग्निभिरेव दाहः ॥ ६ ॥ १ ॥ १२ ॥

स्थपतिः ॥ रौद्रं वास्तुमध्ये चरुं निर्वपेदिति प्रक्रम्यैतया निषादस्थपतिं याजयेदिति श्रुतम् । तत्र यद्यपि निषादः स्थपतिश्चेति बहुव्रीहौ पदद्वयेऽप्यन्यपदार्थलक्षणेति स नाश्रीयते । तथापि निषादानां स्थपतिरिति षष्ठीतत्पुरुषे तदभावाद्विद्याक्षेपकल्पनाभिया कर्मधारयानङ्गीकारेण स एवाश्रीयते । न च तत्रापि पूर्वपदे निषादसम्बन्धिलक्षणा । प्रमाणाभावात् । यद्यपि हि क्लृप्तावयवार्थयोगेनैवोपपत्तौ न समासे विशिष्टार्थशक्तिकल्पना प्रामाणिकी, तथापि कर्मधारये अभेदस्येव षष्ठीतत्पुरुषादावपि स्वस्वामिभावादिभेदसम्बन्धस्य संसर्गविधयैवाभानोपपत्तेर्लक्षणायामनुपपत्त्यभावः* । न च नैयायिकवदस्माकं नामार्थयोरभेदान्वय एवेत्यत्र प्रमाणमस्ति । राजा पुरुषोऽस्तीत्यादौ सर्वत्र नामार्थस्य विभक्त्यर्थे तस्य चाख्यातार्थेऽन्वयाङ्गीकारेण परस्परान्वयस्य समासातिरिक्ते क्वाप्यप्रसक्तत्वात् । अतः समास एव प्रसक्तस्य संसर्गविधयैव भानोपपत्तेर्न लक्षणेति प्राप्ते ।

समानाधिकरणपदस्थले राजपुरुषोऽस्तीत्यादौ क्रियान्वयोत्तरं पार्ष्ठिकान्वयस्याभेदसम्बन्धेनैवानुभवाद्राज्ञः पुरुषोऽस्तीत्यादौ व्यधिकरणपदस्थले च भेदसम्बन्धेनैवानुभवाल्लाघवेन नामप्रयोज्यतदर्थान्वयबोधस्याभेदविषयत्वमेवेति नियमकल्पनात्स्वस्वामिभावादिसम्बन्धस्य

* इत्थमेव पाठः सर्व्वत्र । मम तु, संसर्गविधयैव भानोपपत्तेर्लक्षणायां प्रमाणाभावः,—इति पाठः प्रतिभाति ।

षष्ठीतत्पुरुषादौ संसर्गविधया भानानुपपत्तेरवश्यं पूर्वपदे स्वार्थसम्बन्धिलक्षणामङ्गीकृत्य तस्योत्तरपदार्थे अभेदेनान्वय इत्यङ्गीकार्यम् ।

अतएव नामप्रयोज्यतत्तन्नामार्थविशेष्यकनामार्थप्रकारकाभेदसंसर्गकबोधत्वावच्छिन्नं प्रति एकाधिकरणवृत्तिप्रातिपदिकार्थतावच्छेदककनामद्वयसमभिव्याहारस्यं द्वन्द्वभिन्ननामद्वयसमभिव्याहारस्य वा तन्त्वमित्यपि बोध्यम् । तेन धवखदिरौ नीलघटावित्यादौ नाभेदबोध इत्यपि बोध्यम् ?

न चैवं सति समासे सम्बन्धिनः अभेदेनान्वयाद्विग्रहे च राज्ञः पुरुष इत्यत्र षष्ठ्यर्थसम्बन्धस्य भेदेनान्वयाद्वृत्तिवाक्ययोर्भिन्नार्थत्वापत्तेरेकविधानेनेतरनिवृत्त्यनापत्तौ विभाषासूत्रवैयर्थ्यापत्तिरिति वाच्यम् । एकतरबोधे इतरबोधस्यावश्यकत्वेनार्थैक्याभिप्रायात् ।

अतश्च षष्ठीतत्पुरुषे लक्षणापत्तेर्निषादश्चासौ स्थपतिश्चेति कर्मधारय एवायम् । तेन तावद्विषये विद्यामाचिप्यानाहिताग्नेरपि निषादस्यैवाधिकारः । अतएव कूटं दक्षिणा स्वं हि तन्निषादानामिति लिङ्गमपि सङ्गच्छते । तत्र च परप्रयुक्तोपजीवित्वादाहवनीयाद्यनाक्षेपेऽपि यत्र क्वच होष्यन् स्यात्पञ्च भूसंस्कारान्कृत्वा लौकिकाग्निं प्रतिष्ठापयेदिति स्मृतिवचनेनाग्न्यन्तराभावे होममात्रोद्देशेन लौकिकाग्निविधानात्तमेव तत्तद्देशे स्थापयित्वा तस्मिन्निष्टिः कर्त्तव्येति बोध्यम् ॥ ६ ॥ १ ॥ १३ ॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां
षष्ठस्य प्रथमः पादः ।

अथ षष्ठोऽध्यायः ।

द्वितीयः पादः ।

पुरुषार्थैक ॥ ऋद्धिकामाः सत्रमासीरन्नित्यादौ अनेककर्तृक-सत्रप्रयोगादिकं फलं सर्वैः कर्तृभिरवयवशो भुज्यते, उत कृत्स्नमिति विचारे ।

यद्यपि सर्वेषां प्रत्येकं कर्तृत्वं, यदि वा दम्पत्योरिव व्यासक्तं, उभयथाऽप्येकसत्रप्रयोगादनेकफलनिष्पत्तौ दर्शादावप्येकस्मादेव प्रयोगाद्युगपत् क्रमेण वाऽनन्तस्वर्गोत्पत्त्यापत्तेरेकप्रयोगादेकफलोत्पत्ति-नियमस्यावश्यं वाच्यत्वादेकमेव फलं सर्वैरवयवशो भुज्यत इति प्राप्ते ।

न तावदेकस्य फलावयविनो मुख्या अवयवाः सम्भवन्ति । सुखादिरूपस्य तस्यावयवासम्भवात् । सत्रजन्यतावच्छेदकधर्मित्वादेः तावत्पुरुषनिष्ठधर्मिषु व्यासज्यवृत्तित्वमात्रं परं वाच्यम् । न च तत्र प्रमाणमस्ति । श्रुतर्धिकामादिशब्दानां तावत्फलमात्रप्रतिपादनपरत्वात् । ऋद्धिकामकर्तृनिष्ठफलभोगप्रतिपादके कल्प्याधिकारविधावपि ऋद्धिकामनायां व्यासज्यवृत्तित्वस्य बाधितत्वेन व्यासज्यवृत्ति-कामनात्वरूपातिरिक्तधर्माङ्गीकारे प्रमाणाभावाच्च ।

अतः प्रत्येकमेव ऋद्धिकामत्वावसायात्प्रत्येकमेव फलावगतिः । न हि तत्र बहुवचनान्तर्द्धिकामपदेन बहुत्वावच्छिन्नानां ऋद्धिकामत्वं प्रतिपाद्यते, येन व्यासज्यवृत्तित्वावगतिर्भवेत् । अपि तु ऋद्धिकामत्वावच्छिन्नानां बहुत्वं पशूनित्यादिवत् । न च कर्तृत्वस्य

व्यासक्तत्वात्फलत्वस्यापूर्वत्वस्य च व्यासक्तत्वम्। फलादौ कर्त्तृत्वसामा-नाधिकरण्यस्य प्रत्येकं वृत्तित्वेऽप्युपपन्नत्वेनैतादृशनियमे प्रमाणा-भावात्। अतश्च दम्पत्योर्व्यासज्यवृत्तिकर्त्तृकत्वेऽपि अपूर्वं फलं च भिन्नमेव जन्यतावच्छेदकधर्मपर्याप्त्यधिकरणं वाच्यम्। प्रकृते तु बहुवचनश्रवणेन कर्त्तृत्वभेदस्यैवावगतेर्न फलत्वादेर्व्यासज्यवृत्तित्व-कल्पनावसरः।

न चैकप्रयोगादनेकफलानुपपत्तिः। समवायसम्बन्धेनैकफलत्वाव-च्छिन्नं प्रति फलत्वेन प्रतिबन्धकत्वकल्पनादात्मान्तरे तदुत्पत्तौ बाधकाभावात्। न चैवमपि प्रत्येकवृत्तित्वापेक्षया फलत्वादेर्व्या-सज्यवृत्तित्वकल्पने गौरवादेरभावान्नियामकाभावः। जन्यतावच्छेद-कद्वित्वादेर्व्यासज्यवृत्तित्वकल्पने तत्पर्याप्त्यधिकरणतावच्छेदकस्य पक्षे यावत्कर्त्तृनिष्ठतज्जन्यफलकूटत्वादेः कल्पनीयत्वेन गौरवापत्तेः। तदपरं पक्षजन्यफलत्वादेरेव तत्त्वकल्पनायां लाघवात् प्रत्येकमेव फलम्। प्रयोजनं, सङ्कल्पे तादृशानुसन्धानम् ॥ ६ ॥ २ ॥ १ ॥

प्रयोगे ॥ स्वर्गकामो यजेतेत्याद्येकवचनश्रवणे मूले तावदित्यस्य पूर्वपक्षः कृत इत्यत्राऽन्वयः। मूले तावदेकत्वमविवक्षितम्। स्वर्गकाम-पदस्य स्वर्गमात्रपरत्वात्। अधिकारिपरत्वेऽपि वा तस्योद्देश्यत्वेन तद्विशेषणस्याविवक्षितत्वात्।

अतश्च तत्सामानाधिकरण्यादाख्यातेऽपि, तदविवक्षितम्। किं चाख्यातस्य प्राप्तिमात्रमर्थः। ततश्च यागेन स्वर्गं पुरुषः प्राप्नुयादि-त्यर्थः। तेन तत्रापि तस्योद्देश्यत्वाद्विशेषणाविवक्षा। अस्तु वा करोतिना विवरणाल्लिङः प्रवर्त्तनाभिधायित्वाच्च तस्यै प्रवृत्तिरेवार्थः। तथापि

फलोद्देश्यकाया स्तस्याल्लोकतएव प्राप्तत्वात्तत्र यागमात्रविधानेन तस्या अनुवादत्वाच्च तद्विशेषणस्य तत्कर्त्तृविशेषणस्य चैकत्वस्याविवक्षेति द्वौ बहवो वा कर्त्तार इति पूर्वः पक्षः कृतः । तत्फलोद्देश्यकस्य विजातीयपुरुषप्रयत्नस्याप्राप्तत्वेन विधेयत्वेन तत्र तत्र स्थापितत्वात्तद्विशेषणस्य कर्त्तैकत्वस्य विवक्षोपपत्तेः स्वर्गकामपदेन तदविवक्षायामपि तत्सामानाधिकरण्ये बाधकाभावादुपेक्ष्यत् ।

अथ पूर्वपक्षोऽच्यते । आख्यातोपात्तस्यैकत्वस्य विवक्षायामपि अनेकेषां कर्त्तृत्वम् । तद्धि कर्त्तृत्वेऽन्वेति न तु तदाश्रये । अन्यथा दम्पत्योर्व्यासज्यवृत्तिकर्त्तृत्वानुपपत्तेः । अतश्च तदाश्रयाणामनेकत्वस्य पत्नीरादायावश्यकत्वे पुरुषानादाय तत्करणे बाधकाभावादनेकेषामपि कर्त्तृत्वमिति ।

असति विशेषग्राहकप्रमाणे तदाश्रस्यापि प्रथमातिक्रमे कारणाभावादेकस्यैव प्रतीतिरानुभाविकी । अतएव सन्ध्यावन्दनश्राद्धादावेकस्यैवाधिकारः । तत्र धर्मे चेत्यादिवाक्यस्य प्रमाणान्तरसिद्धपत्न्यधिकारककर्ममात्रविषयत्वे पत्न्या अपि ग्रहणे प्रमाणाभावे पुरुषान्तरस्याप्रसक्तेः ।

यत्र तु पत्नीग्राहकप्रमाणसद्भावस्तत्र सत्यपि तासां कर्त्तृत्वाधिष्ठानत्वे पुरुषस्यैकस्यैव तत् । प्रथमातिक्रमे कारणाभावात् । स्वर्गकामो यजेत, यजमानः केशश्मश्रु वपते, मेखलया यजमानमित्यादौ विना कारणं सबुपात्तैकत्वस्य पाक्षिकानुवादत्वानुपपत्तेश्च । अतः पुरुष एक एवाधिकारी । काम्यं कर्म कामनायां प्रक्रान्तं बीतायां फलेच्छायां अवाप्ते वा फले प्रयोजकाभावात्र समापनीयमिति ।

सत्यं, नास्ति फलरूपं प्रयोजकम् । तस्येच्छाविषयत्वेन प्रयोजकत्वात्[१] । तथापि प्रारम्भ एव समाप्तेर्निमित्तम् । न च तत्र प्रमाणाभावः । शिष्टविगर्हणस्यैव प्रमाणत्वात् । शिष्टा हि प्रारब्धापरिसमापने प्राक्रमिकोऽयमिति विगर्हन्ते । तेन शिष्टाचारमूलभूतश्रुतौ प्रारम्भे निमित्ते प्रयोगसमाप्तेर्नैमित्तिकत्वेन विधानात्तस्यावश्यकत्वम् ।

न च वस्तुतः शास्त्रेण कामनाया एव प्रयोजकत्वावगमादाचारस्य भ्रान्तिमूलकत्वमिति वाच्यम् । सर्वेषां शिष्टानां भ्रान्तिकल्पने प्रमाणाभावात् । देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेतेति प्रत्यक्षश्रुत्यैवाकरणे निन्दाप्रायश्चित्तयोर्विधानात्प्रारम्भे निमित्ते प्रयोगसमाप्तेरावश्यकत्वावगमाच्च । अतः प्रयोजकान्तराभावेऽपि निमित्तवशात्समापनीयमेव ।

समापनीये च तस्मिन् कारणसत्त्वात् फलमपि भवत्येव । एकफलप्राप्तावपि फलान्तरोपपत्तेः । न च कामनारूपाङ्गाभावाद्वैगुण्यशङ्का । तस्याः प्रवृत्तित्वावच्छिन्नं प्रति कारणत्वमात्रेणाङ्गत्वे प्रमाणाभावात् । प्रवृत्तिपूर्वक्षणे तस्याः सत्त्वाच्च । अन्यथा समापनोत्तरमिच्छाऽपगमेऽपि फलानुत्पत्तिप्रसङ्गात् ॥ ६ ॥ २ ॥ ३ ॥

लोके ॥ लौकिकस्य तु गृहरथकर्मादेरशास्त्रीयतयाऽसमापने च विशिष्टविगर्हणाभावात्* प्रयोजकाभावेनासमापनम् । न च

---

* इत्यसेव पाठ आदर्शपुस्तकेषु । शिष्टविगर्हणाभावात्,—इत्येवं पाठस्तु समीचीनः प्रतिभाति ।

---

(१) फलं खल्विच्छाविषयत्वेनैव प्रयोजकं भवति । वीतायां फलेच्छायां फलस्येच्छाविषयत्वाभावात् तदानीं तस्य न प्रयोजकत्वमित्यर्थः ।

तत्रापि शिष्टश्रुतिमूलत्वाच्छास्त्रीयत्वम्। तस्या अर्थसुखादिविषयप्रवृत्तितया लोकमूलकत्वेन श्रुतिमूलकत्वाभावात्।

यत्तु गृह्यकरणाद्याश्रितं पुरुषार्थं नैमित्तिकं वास्तुशान्त्यादिकमारम्भाद्ये इन्द्रवायुर्वद्धव्यः पायसं ब्राह्मणो भोजयितव्यः इत्यादि च, तस्य शास्त्रीयत्वादिष्टमेव समापनम् ॥ ६ ॥ २ ॥ ४ ॥

प्रतिषेधेषु ॥ न कलञ्जं भक्षयेदित्यादिषु किं स्वर्गकामस्याधिकार उत प्रवृत्तमात्रस्येति चिन्तायाम्। नञो निपातत्वेन क्रियान्वयनैयत्याभावात् क्रियान्वयाङ्गीकारे च प्रधानभूतायास्तस्या एवान्यथात्वापत्तेरानर्थक्यतदङ्गन्यायेन क्रियाविशेषणेष्वन्वयावगमात्तत्रापि कलञ्जान्वये सुबन्तसम्बन्धेन नञ्समासापत्तेः कलञ्जातिरिक्तभक्षणस्य च रागप्राप्तत्वेनाविधेयत्वात्पारिशेष्येण धातुसम्बन्धावगतेर्भक्षणाभावस्य च कर्तुमशक्यत्वेन प्रजापतिव्रतवदेव लक्षितस्य भक्षणाभावसङ्कल्पस्य विश्वजिन्न्यायेन स्वर्गार्थत्वेन विधानमिति प्राप्ते।

तस्य व्रतमित्युपक्रमानुसारात् प्रजापतिव्रतेषु लक्षणाङ्गीकारेऽपि प्रकृते लक्षणायां प्रमाणाभावात्प्रधानान्वयस्याभ्यर्हितत्वेन नञ्भाववाचकस्य प्रतियोगितासंसर्गेण भावनायामेव स्वकारकविशिष्टायामन्वयः। न चान्यथात्वापत्तिः। पुरुषे भावनानुत्पत्तावपि प्रत्ययेन तस्या एव बोधनेनान्यथात्वाभावात्।

अतएव निषेधस्थले लिङर्थभूतव्यापारस्य न विधिवाक्यवत् स्वप्रयोज्यत्वसम्बन्धेन भावनान्वयोऽपि तु नञस्तात्पर्यग्राहकस्य सत्वात्स्वप्रयोज्याभावप्रतियोगित्वेनेति तस्य निवर्त्तनारूपत्वसिद्धिः। स्वप्रयोज्यत्वं च प्रवृत्त्यभावे प्रवृत्तिविषयस्यानिष्टसाधनत्वज्ञानं विनाऽनुपपन्नमिति तस्य प्रत्यवायजनकत्वं कल्प्यते।

तेन पुरुषमात्रस्यैव रागतः प्रवृत्त्युन्मुखस्य, निषेधेष्वधिकारः ।
अतएव प्रत्यवायसाधनीभूतस्यानुष्ठेयस्य भक्षणस्य रागत एव ज्ञातत्वा-
त्तदनुष्ठाने सति प्रत्यवायोत्पत्त्युपपत्तेर्न तदंशे तन्निषेधांशे वा
ऽध्ययनविधिसिद्धज्ञानापेक्षाऽपि । यत्त्वत्र निवर्त्तनाप्रकारकथनं प्रका-
रान्तरेण तत्करणे कृतं, तदर्थवादाधिकरणे कौस्तुभ एव निरस्तम् ।
लोकरीतिश्च विस्तरेणोपपादिता ॥ ६ ॥ २ ॥ ५ ॥

तस्मिन् ॥ श्रौतेषु स्मृत्युक्तेषु च निषेधेषु, तथा स्मार्त्तेष्वेवानग्नि-
साध्येषु अमन्त्रसाध्येषु च विधिषूपनयनात्पूर्वमपि ब्रह्मस्याधिकारः ।
स्मार्त्तविधावुपनयनादिनियमे प्रमाणाभावात् । उपनयनस्य वेद-
मात्राध्ययनाङ्गत्वात् । निषेधेषु तु जातमात्रस्याधिकारो ब्राह्मणो न
सुरां पिबेदितिवत् परप्रेरणादिजन्याया अपि भक्षणादिभावनाया-
निषेधात् । तत्र च स्मृत्याद्यध्ययनस्यानुपयोगादिति प्राप्ते ।

स्मृत्यध्ययनस्यापि ब्राह्मणेन षडङ्गोवेदोऽध्येयो ज्ञेयश्चेत्यादिनोप-
नयनाङ्गत्वविधानात् स्मार्त्तविधीनामप्युपनीताधिकारकत्वम् । निषे-
धेषु तु प्रागुपनयनात्कामचारकामवादकामभक्षा इति स्मृत्यैवाभ्यनु-
ज्ञानादुपनयनोत्तरकालकत्वम् । अतएव वर्णपुरस्कारेणाम्नातानां
सुरापानादिनिषेधानां जातमात्राधिकारकत्वमेव स्मृतिसिद्धम् । येषां
तु शूद्रादीनामुपनयनाभावः, तेषां विवाहविधितः । तत्स्थानत्वेन
विवाहविधानात् ॥ ६ ॥ २ ॥ ६ ॥

अभ्यास ॥ जीवनादिनिमित्तकाग्निहोत्रादौ निमित्तस्य प्रति-
क्षणं भेदात्प्रतिनिमित्तं नैमित्तिकावृत्त्या सन्ततानुष्ठानप्रतीतेस्तदनु-
रोधेन चाग्न्यङ्गत्यागस्यवक्ष्यमाणत्वात्कालस्यापि चाङ्गत्वेन त्यागो-

पपत्तेः काम्यविषयत्वेन तस्य सार्थक्याच्च साल्तत्यानुष्ठानम् । अतएव सोमे वसन्तस्य निमित्तत्वात्तत्रैकैकस्मिन् सङ्कल्करणप्रतीतेः कालानुग्रहेऽपि न क्षतिरिति प्राप्ते ।

आहारविहाराद्यनुरोधेन निमित्तश्रुतेरवश्यं सङ्कोचनीयत्वादग्निविद्याभ्यामिव कालेनापि सङ्कोच्यते । न हि कालस्याङ्गत्वेऽपि यथाशक्त्युपबन्धविषयत्वम् । यस्यैव हि प्रयोगविधिप्रयोज्यत्वेन शक्तावनुष्ठानप्रसक्तिस्तस्यैवाशक्तौ निमित्तश्रुत्यनुरोधेन त्यागः । ततश्च यथैवाग्निविद्ययोर्विध्यन्तरप्रयुक्त्युपजीवकत्वेन प्रयोगविध्यप्रयोज्यत्वाच्च तत् । तथा कालस्यापि स्वरूपेणानुष्ठेयस्याप्रयोज्यत्वात्* यथाशक्त्युपबन्धविषयत्वानुपपत्तेः कालविधिनाऽपि निमित्तश्रुतिसङ्कोचाच्च साल्तत्येनानुष्ठानम् । अतएव यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपातयेदिति काले नैमित्तिकातिक्रम एव प्रायश्चित्तम् ॥ ६ ॥ २ ॥ ७ ॥

तेषाम् ॥ कालशास्त्रेण निमित्तशास्त्रस्य सङ्कोचेऽपि यदा कालावच्छिन्नस्य निमित्तस्य पुनः सन्निपातस्तत्र नैमित्तिकावृत्तिः । इतरथा स्वोत्पत्तौ अवश्यानुष्ठापकत्वरूपनिमित्तत्वानुपपत्तेः । अतएव यत्र तस्मिन्नेव निमित्ते कालमात्रस्यावृत्तिस्तत्र न नैमित्तिकावृत्तिः । यथा एकस्मिन्नेव वसन्ते पर्वावृत्तौ । अत्र च पूर्वपक्षस्यातितुच्छत्वात्तुच्छत्वोपदेश इति मन्तव्यम् ॥ ६ ॥ २ ॥ ८ ॥

---

* इत्थमेव पाठः सर्व्वत्र, स्वरूपेणाननुष्ठेयस्याप्रयोज्यत्वात्,—इति तु भवितुमुचितं प्रतिभाति ।

तथान्तः ॥ पुरुषार्थनैमित्तिकवदेव क्रत्वर्थं नैमित्तिकस्यापि भेदनहोमादेरेकस्मिन् प्रयोगे भेदनानेकत्वे यदि तावद्धोमात्पूर्वं तदनेकता, तदा अग्टह्यमाणविशेषत्वादश्वप्रतिग्रहेष्टिवन्न तावच्छङ्का-भावात् तन्त्रेणैव होमकरणेऽपि होमोत्तरं तदनेकत्वे नैमित्तिकावृत्तिः स्यादेव ।

न च तत्र क्रतुजन्यापूर्वोत्पत्तेः पूर्वं होमजन्यादृष्टस्य सत्त्वात्तेनैव सिद्धाशङ्का । तथात्वे निमित्ते सति नैमित्तिकाकरणे निमित्तत्व-व्याघातात् । अतएव निमित्ताभावे होमाभावेऽपि क्रतूपकारसिद्धिः, तत्सत्त्वे तदनुष्ठानेन, तदावृत्तावावृत्तेनेत्यपि बोध्यम् ॥ ६ ॥ २ ॥ ९ ॥

आचारात् ॥ आचारप्रमाणकेषु गुरुगमनादौ शिष्यानुगमनादिषु आवृत्तत्वेनाचारस्य दर्शनात्तन्मूलभूतश्रुतौ गुरुगमनादेर्निमित्तत्व-कल्पनावगतेः प्रतिनिमित्तमावृत्तिः । न चाचरितृणामावृत्तेर्दृष्ट-विधया गुरुप्रीत्यर्थत्वेनाप्युपपत्तेर्निमित्तत्वे प्रमाणाभावः । गुरु-प्रीतेरुपायान्तरेणापि सिद्धेरधीतविद्येनाप्यनुष्ठानान्नियतानुष्ठानबलेन नैमित्तिकत्वप्रतीतेः । यत्तु तन्त्ररत्ने शास्त्रेणैव सप्तमीशतृप्रत्ययादिना निमित्तत्वावगतिर्गुरुगमनादेरित्युक्तम् । तच्छ्रुतिस्मृतिरूपशास्त्रसत्त्वे सूत्रकारोक्तस्याचारप्रमाणकत्वस्यानुपपत्तेरुपेक्षितम् ॥ ६ ॥ २ ॥ १० ॥

ब्राह्मणस्य ॥ सोमस्य वसन्ते वसन्ते ज्योतिषा यजेतेति वचनादेव नित्यत्वम् । न चायं कालविधिः । वसन्ते ज्योतिषा यजेतेति वीप्सारहितवाक्येनैव तद्विधानात् । न च विनिगमनाविरहः । गुणभूतकालानुरोधेन प्रधानावृत्तेरप्राप्ततया वीप्सार्थस्यापि विधेयत्वे वाक्यभेदापत्तौ प्रतिनिमित्तं नैमित्तिकावृत्तिन्यायप्राप्तवीप्सार्थानु-

वादेवलादावश्यकाया एव सन्ध्या निमित्तत्वपरत्वावगमात् । अग्नि-होत्रादीनान्तु नित्यत्वं स्थितमेव । एवं विद्याया अपि अध्ययन-सहितायाः

स्थाणुरयम्भारहारः किलाय-
मधीत्यवेदं न विजानाति योऽर्थम् ।

अनधीयानाम्नात्याभवन्तीत्यादिनिन्दोन्नीताकरणे प्रत्यवायवत्त्वेन नित्यत्वम् । एवमुपनयनस्यापि षोडशादिवर्षोत्तरमकरणे प्रत्यवाय-श्रवणादेव नित्यत्वम् । यत्तु षष्ठेऽन्नाद्यकामस्योपनयीतेत्यादिफल-श्रवणं, तदुपनयनाश्रितषष्ठादिकालस्येति ज्ञेयम् ।

यत्तु तन्त्ररत्ने क्रतूनामावश्यकत्वात्तदपेक्षितविद्यादेरप्यावश्यकत्वे फलतो नित्यत्वमुक्तम् । तत्क्रतूनां विद्याप्रयोजकत्वस्य निरस्तत्वात्तद्गत-एवावश्यकत्वकरणे प्रत्यवायावगतेर्विद्यादेरकरणे क्रतूनामनधि-कारादेवानावश्यकत्वादुपेक्षितम् ।

एवं प्रजोत्पादनमपि,

अनुत्पाद्य सुतान्मोहान्मोक्षमिच्छन् व्रजत्यधः ।

इत्यविरक्तस्य प्रत्यवायश्रवणान्नित्यम् । अतएव जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इत्यपि सङ्गच्छते । न चात्र ब्राह्मणपदश्रवणात्तस्यैवैते नित्या इतरयोस्त्वनावश्यक इति भ्रमम् । अस्यावदानविधिशेषत्वेनार्थवादस्य विधायकत्वाभावेनाचत्यब्राह्मणपदस्योपलक्षणत्वात् ॥ ६ ॥ २ ॥ ११ ॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां
षष्ठस्य द्वितीयः पादः ।

अथ षष्ठोऽध्यायः।

तृतीयः पादः।

सर्व्वशक्तौ ॥ नित्यनैमित्तिकानां कर्मणां काम्यवत्सर्वाङ्गोपसंहारेणेव प्रयोगः। एकादशे सर्वेषामङ्गानां साहित्येन क्रतूपकारजनकत्वस्य स्थापयिष्यमाणत्वात्। तिर्यगधिकरणे यथाविनियोगमधिकारकल्पनस्य स्थितत्वाच्च। न चैवं नित्येऽपि तथा कल्पने सर्वाङ्गोपसंहारासामर्थ्ये सति अनुष्ठानाभावान्निमित्तत्वव्याघातः। अवश्यानुष्ठापकत्वरूपस्य निमित्तत्वस्य कालाग्निविद्यादिभिरवच्छेदवच्छक्त्याऽप्यवच्छेदोपपत्तेः। अतश्च यथैव कालाद्यवच्छिन्नजीवनादेरेव निमित्तत्वादकालादौ निमित्ताभावादेव नैमित्तिकाकरणे न प्रत्यवायस्तथा शक्त्यभावेऽपीति बोध्यम्।

न च कदाऽपि सर्वाङ्गोपसंहारासामर्थ्यम्। काम्येऽपि तदापत्तेः। न वा सकृदेव सर्वाङ्गकरणसामर्थ्यमिति नियमे प्रमाणमस्ति; येन वीप्साद्यनुपपत्तिराशङ्क्येत। काम्यस्याप्यावृत्त्यनुपपत्तेः। किञ्च निमित्तस्यानुष्ठापकतया कालदेशादिवत्प्रयोगान्वयित्वाद्यथैवाप्लवभक्षेण चरन्तीत्यादावपां देशत्वात्साङ्गप्रधानान्वयित्वं, तथा निमित्तस्यापि। अतश्चानेकेषु प्रधानेषु यथा न यथाशक्त्युपबन्धस्तदकरणस्य प्रत्यवायजनकत्वबोधनादेवमङ्गानामपीति न तेषु यथाशक्त्युपबन्धः। अतएव तद्देव तृतीयानिर्देशोऽपि सङ्गच्छते। प्रयोगान्वयितया च निमित्तश्रुतेरङ्गविनियोगोत्तरकालीनत्वाच्छक्त्यवच्छेदकल्पनेऽपि न दोष-

इति। एवं सत्यपि, यदि निमित्तस्य प्राधान्यं स्यात्, तदा तदनुरोधेनाङ्गेष्वेव शक्यवच्छेदः कल्प्येत, न त्वेतदस्तीति प्राप्ते।

न निमित्तस्यानुष्ठापकत्वम्। अपि तु विधिबोधितस्यैवानुष्ठानस्यावश्यकताबोधकत्वमात्रम्। तद्बोधस्य च फलं नैमित्तिकाकरणस्य प्रत्यवायजनकत्वबोधः। अन्यथा चेतनप्रवृत्तेरावश्यकत्वानुपपत्तेः। एवं चोक्तावश्यकत्वमेव सप्तम्यादिना बोध्यमानं नैमित्तिकान्वयि। क्षुधायाम्भुञ्जीतेत्यादौ तथा क्लृप्तत्वात्। अतश्च यथैव काम्ये प्रवर्त्तनाऽविशिष्टसाधनत्वं प्रधानांश एव न तु साङ्गे, तथैव निमित्ताविशिष्टप्रत्यवायजनकाकरणप्रतियोगित्वमपि प्रधान एव न तु साङ्गे। अतएव निमित्तस्यापि विनियोगविधावेवान्वयः। अतएव विनियोगोऽपि प्रवृत्तिजनकीभूतज्ञानविषयीभूतधर्मरूपोभयसाधारण एव। अत एवाङ्गान्वयोऽपि प्रधानस्यैतदुत्तरकालीन एव। तस्य प्रधानगतफलवत्त्वज्ञानाधीनत्वात्।

तत्र त्वयं विशेषः। यत्काम्ये विध्याविशिष्टसाधनत्वज्ञानोत्तरमेवाङ्गविनियोगः। नित्ये तु विधिसहकृतनिमित्ताविशिष्टप्रत्यवायजनकाकरणप्रतियोगित्वज्ञाने जातेऽपि नाङ्गान्वयोऽनपेक्षितत्वात्। अपि तु तदुत्तरं प्रधानकरणकभावनायाभाव्यापेक्षायां पूर्वकृतपापक्षयस्य भाव्यत्वेऽवगते स इति बोध्यम्।

अत्र हि पापक्षयस्यैव भाव्यत्वं नित्यस्थले धर्मेण पापमपनुदतीत्यादि वाक्येभ्यः प्रतीयते। अतएव विश्वजिन्न्यायेन न स्वर्गकल्पनं, न वा अपुरुषार्थस्यापि प्रागध्वंसस्यैव भाव्यत्वकल्पनं, यागस्यैव वा तत्। तृतीयानिर्देशात्। समानपदश्रुतेः करणत्वेनाप्युपपत्तेश्च।

न च दर्शपूर्णमासादौ कृतानामेव स्वर्गादीनां नित्येऽपि भाव्यत्वोपपत्तौ धर्मैनित्यस्यान्यपरत्वं ग्राह्यम्। तथात्वे मुमुक्षोः स्वर्गादीनामनिष्टत्वेन तदुत्पत्तौ शास्त्रस्याहितसाधनानुष्ठापकत्वे अप्रामाण्यापत्त्या यावज्जीवादिवाक्यस्यामुमुक्षुविषयतया सङ्कोचापत्तेः। पापक्षयस्य तु सर्वाभिलषितत्वान्निमित्तस्यैव प्रयोजकतया तस्य नैमित्तिकाप्रयोजकत्वेऽपि निमित्तप्रयुक्तनैमित्तिकानुषङ्गिकत्वे बाधकाभावः। न चोद्देश्यानेकत्वम्। तत्त्वेऽपि द्विकर्मकत्वाभावेनावाक्यभेदात्। अतश्च पापक्षयभाव्यकत्वावगमोत्तरमेवाङ्गान्वयात्पूर्वावगतनिमित्तान्वयानुरोधेनाङ्गेष्वेव शक्यवच्छेदकल्पनम्।

न चोत्पत्तिवाक्य एवाङ्गान्वयस्य वक्ष्यमाणत्वात्तत्र चेष्टसामान्यस्यैव भाव्यत्वात्तदवगमोत्तरत्वेऽपि न निमित्तसम्बन्धावगमोत्तरत्वमङ्गान्वयस्येति वाच्यम्। सामान्यगतविशेषापेक्षायां अन्तरङ्गत्वेन प्रथमं कामं यावज्जीववाक्यैकवाक्यतया विशेषावगमोत्तरमेवाङ्गवाक्यैकवाक्यतयाऽङ्गान्वयाङ्गीकारेण तत्रैव शक्यवच्छेदोपपत्तेः। अत एव काम्ये निमित्ते च यस्याधिकारिणो यावन्ति प्रमाणान्तरप्रमितान्यङ्गानि, तस्य तावद्भिः सहितेराग्नेयादेरुपकुर्यादिति महावाक्यार्थकल्पनात्काम्ये सर्वाङ्गसाहित्यं नित्ये च शक्यवच्छिन्नमित्यर्थलाभः। अतश्च यथैवैकस्यैव काम्यवाक्यस्य यावज्जीववाक्यस्य च सोमयाज्यसोमयाजिरूपाधिकारिभेदेन प्रधानसाहित्यभेदेऽपि यस्याधिकारिणो यावन्ति प्रमाणान्तरप्रमितानि प्रधानानि, तस्य तावतां कामे निमित्ते च विधायकत्वं, तथात्रापीति न कोऽपि दोषः। अतः सिद्धं निमित्तश्रुत्यनुरोधेन यथाशक्त्यङ्गत्यागेनापि प्रयोग इति। अत एव विध्य-

पराधे तदेव यादृक् तादृक् होतव्यमिति विगुणस्य समाप्तिं विध्यपराधे प्रायश्चित्तं च दर्शयति ॥ ६ ॥ ३ ॥ १ ॥

काम्येषु चैवं ॥ काम्ये तु यद्यपि फलसम्बन्धोत्तरमेवाङ्गान्वयस्तथापि साङ्गस्य प्रयोगविधिनाऽनुष्ठानावगमोत्तरं प्रवृत्तिकारणत्वेनोपस्थितायाः कामनाया अधिकारिविशेषणत्वकल्पने प्रमाणवच्छिन्नाया एव तत्कल्पनादकरणे प्रत्यवायाश्रवणाच्च सर्वाङ्गोपसंहारसमर्थस्यैवाधिकार इति प्रत्युदाहरणमात्रम् ॥ ६ ॥ ३ ॥ २ ॥

क्रियाणां ॥ एवं यथाशक्त्युपबन्धे निरूपिते तच्छेषत्वेन प्रतिनिधिविचारे कर्त्तव्ये उपोद्घाततयेदं विचार्यते । तत्र मूले तावद्द्रव्यस्य क्रियातोऽत्यन्तभेदाभावाद्द्रव्यभेदे कर्मभेदापत्तेर्न नीवाराद्युपादाने विहितक्रियासिद्धिरिति पूर्वपक्षिते ।

अत्यन्तभेदाभावेऽपि अत्यन्ताभेदस्याप्यभावात् कर्त्तृदेशकालादिवद्द्रव्यभेदेऽपि तदेवेदं चलनं यजनमित्यादिप्रत्यभिज्ञाबलात् क्रियैक्यप्रतीतेः प्रतिनिध्युपादानेऽपि न क्षतिः । तत्र च जगतीत्ववर्त्त्वैकैव कर्मव्यक्तिरभिव्यक्तिमात्रं तु भिद्यते । अथ वा शब्दान्तरादिप्रमाणैरेव व्यक्तिभेदः । द्रव्यदेशकालकर्त्तृव्यक्त्यादिभिस्तु तस्या एव व्यक्तेरभिव्यक्तिभेदमात्रम् । अथ वाऽस्तु तत्रापि व्यक्तिभेदः । शब्दान्तरादिप्रमाणैस्त्वाग्नेयत्वादिजातय एव भिद्यन्त इति सिद्धान्तितम् ।

तद्द्रव्याश्रितत्वेऽपि क्रियायाः तद्भेदे वैजात्यस्य शक्तित्वमशक्यत्वाद्युक्तैक्यसिद्धान्तस्य च पूर्वापक्षत्वापत्तेस्तस्याभिव्यक्तिजन्यत्वे च यजिपदे तल्लक्षणापत्तेरुपेक्षितम् ।

अत एवं विचारोऽवांश्यः । सत्यपि शब्दान्तरादिप्रमाणैराग्नेय-

त्वादिवैजात्ये विधेयतावच्छेदकविजातीययागत्वावच्छिन्नं प्रति व्रीहि-त्वादिनैव कारणत्वावगतेस्तस्यैव तज्जात्यभिव्यञ्जकत्वावसायाच्च नीवा-राद्युपादाने तज्जात्यवच्छिन्नासिद्धिरिति प्राप्ते ।

सत्यपि तज्जात्यवच्छिन्नं प्रति तत्त्वादिना कारणत्वे न तस्य प्रत्येकं तज्जात्यभिव्यञ्जकत्वम् । व्रीहित्वादिना कर्मान्तरेऽपि कारण-त्वेन व्यभिचारात् । अपि तु सामग्रीत्वेनैव । सामग्री च मुख्यस्य व्रीहित्वघटिता, अमुख्यस्य तु तदघटिता । अतश्च व्रीह्यभावे नीवाराद्युपादानेऽपि विजातीययागत्वापूर्वत्वफलत्वावच्छिन्नं जायत एव । फलं परं नित्य एव तारतम्येण जायते । काम्ये त्वारम्भोत्तर-मशक्तस्य शिष्टविगर्हणदोषपरिहारार्थं समापनेऽपि न फलोत्पत्तिः । सर्वाङ्गोपसंहारेणैव तदुत्पत्तेः । प्रयोगसमाप्त्यकरणे दोषमात्रोत्पत्तेः करणे फलान्तराभावाच्चापूर्वोत्पत्तिरिति केचित् । नैमित्तिकत्वा-विशेषात्तु तत्रापि पापक्षयकल्पनेति, तत्रापि तारतम्यमित्यपि ध्येयम् ॥ ६ ॥ ३ ॥ ३ ॥

श्रुतिप्रमाणत्वात् ॥ काम्ये आरम्भोत्तरं, नित्ये ततः पूर्वमपि श्रुतद्रव्याद्यलाभे द्रव्याद्यन्तरं प्रतिनिधेयं न वेति चिन्तायाम् । अमुख्यावलम्बनेन प्रयोगेऽप्यनङ्गग्रहणे प्रमाणाभावः । तथाहि । न तावद्व्रीह्यादिशास्त्रम्(१) । तस्य व्रीहित्वाद्यवच्छिन्नविधायकत्वेन नीवाराद्यविधायकत्वात् । न हि तेषु व्रीहित्वमस्ति । नापि कर्मशास्त्रं तदाक्षेपकम् । द्रव्यशास्त्रेण द्रव्यान्तरसाधारणाक्षेपप्रति-

(१) व्रीह्यादिशास्त्रमनङ्गग्रहणे न प्रमाणमित्यर्थः ।

बन्धेन व्रीह्यादिविधानाद्द्रव्यान्तराक्षेपानुपपत्तेः । न हि व्रीहिशास्त्रं प्रवृत्तो नियमविधिरपि तदाक्षेपप्रतिबन्धद्वारा फलतः । अतश्च यथैवाग्निविद्ययोः स्वविधिप्रयुक्तयोरेव लाभात्तदाक्षेपप्रतिबन्धेनाग्न्यन्तरस्य शूद्रादेर्वा न तदाक्षेपोऽपि तु अग्निविद्ययोरधिकारिविशेषणत्वमङ्गीकृत्य तद्वत एवाधिकारः । एवं द्रव्यांशे प्रधानविधिना अनाक्षेपाक्छृप्तव्रीह्यादिद्रव्यवत एवाधिकारित्वकल्पनेन न द्रव्यान्तरोपादानमिति प्रयोगोत्सर्गो युक्त इति प्राप्ते ।

द्रव्यशास्त्रेण द्रव्यान्तरसाधारण्येनाक्षेपप्रतिबन्धेऽपि व्रीह्यादीनामग्निविद्ययोरिव स्वतन्त्रप्रयोगविधिविधेयत्वाभावात्तथाआदिवत्प्रधानविधेरेव व्रीह्यादिप्रयोगविधायकत्वात्प्रयोगविधिविषयीभूतानां तेषामधिकारिविशेषणत्वानुपपत्तौ निमित्तवशाद्यक्तौ त्यागेनापि प्रधानकर्त्तव्यतावगतेस्तस्य च द्रव्यान्तरमन्तरेणायोगाद्युक्तं तदाक्षेपकत्वम् । अग्निविद्ययोस्तु स्वतन्त्रप्रयोगविधिसिद्धयोरेतत्प्रयोगविधिविषयत्वाभावेन यथाप्रत्युपबन्धविषयत्वाभावाद्युक्तमधिकारिविशेषणत्वमिति वैषम्यम् ।

न चैवमपि द्रव्यस्योत्पत्तिवाक्ये श्रुतस्य निमित्तान्वयात्पूर्वमेव यागान्वयात्पश्चादवगम्यमाननिमित्त एव द्रव्यावच्छेदकत्वमाद्द्रव्यावच्छिन्नजीवनादेरेव निमित्तत्वावगतेः कथं द्रव्यान्तरेण याग इति वाच्यम् । विशिष्टविधौ निमित्तान्वयात्पूर्वं भावनायामन्वितस्यापि द्रव्यस्य विशेषणविधौ यागाङ्गताबोधदशायां यागगतफलवत्त्वज्ञानार्थं कामयावज्जीववाक्याभ्यामेकवाक्यत्वाङ्गीकारेण निमित्तपापचयान्वयोत्तरमेव द्रव्यस्य यागाङ्गताबोधेन प्रयाजादिवत्तथापि यथा-

शब्दानुपबन्धोपपत्तेः । अतस्तदा कर्मशास्त्रेण विशदृशसाधारण्येन द्रव्यान्तराक्षेपाद्युक्तः प्रतिनिधिः । तस्य चाङ्गत्वाभावेऽपि उपकारकत्वमात्रेण ग्रहणं बोध्यम् । एवञ्च कर्मचोदनया यत्किञ्चिद्‌द्रव्यप्राप्तौ युक्त्यन्तरेण सदृशस्य वचनेन च पूतिकानां नियम इति वक्ष्यते ॥ ६ ॥ ३ ॥ ४ ॥

न देवता ॥ एवं सर्वत्र प्रतिनिधौ प्रसक्ते देवतायां स न सम्भवति । यदि हि अर्थमात्रस्यैव देवतात्वं त्यागकालीनोच्चारणकर्मीभूतशब्दप्रतिपाद्यत्वरूपं भवेत्, ततस्तस्य शब्दविशेषापेक्षायां प्रतिपादकत्वेन विधिगतस्योपस्थितस्य शब्दस्य नियमेऽपि रोगादिना तत्पदोच्चारणासम्भवे तादृशार्थस्य यागाङ्गत्वानपायात्तद्बोधकत्वेन तात्पर्यिकशब्दान्तरप्रसक्त्या भवेदपि प्रतिनिधिः ।

यदा तु दशमाधिकरणवक्ष्यमाणरीत्या विधिगतशब्दविशिष्टार्थस्य तादृशशब्दमात्रस्य वा देवतात्वं, तदा कः प्रसङ्गः शब्दान्तरस्य । न हि हविस्त्यागकालीनोच्चारणकर्मत्वविशिष्टविधिगतशब्दत्वसमनियतं अखण्डोपाधिरूपं शिष्टव्यवहारसिद्धं देवतात्वं शब्दान्तरे समस्ति ।

यदि त्वर्थस्यापि देवतात्वं कथञ्चिदङ्गीक्रियेत, ततस्तत्रापि तादृशविधिगतशब्दप्रतिपाद्यत्वसमनियतमेव तदङ्गीकृत्य प्रतिनिध्यभावः समर्थनीयः । अतएव यागस्य देवताऽपेक्षत्वेऽपि विधेयत्वघटिततद्विषये आक्षेपकत्वासम्भवाद्देवताविधिरपूर्वविधिरेव। तदसम्भवे च यागपदार्थस्य लोप एव । यदा तु देवताऽपचारे प्रजापतिरिति वचनं अभावे विधिविधया प्रामाणिकं, तदा तथैवानुष्ठानम् ।

एवमग्नेरपि होमाधिकरणस्य न प्रतिनिधिः । तथाहवनीयादि-

स्त्वादाधानविधिसिद्धत्वादेव क्रतुप्रयोगविध्यविषयत्वात्तेषामधिकारि-विशेषणत्वप्रतीतेर्यथाशक्तिन्यायाविषयत्वादेव न प्रतिनिध्याशङ्का। यत्र तु लौकिकाग्नेरेव वाचनिकमधिकरणत्वं, यत्र वा पदादेः, तत्रापि सत्यपि तस्य प्रयोगविधिविषयत्वे ऽदृष्टार्थत्वान्न तत्प्रतिनिधिः। न हि पूर्वदेशविभागानुकूलव्यापाररूपप्रक्षेपमात्ररूपस्य होमस्याधारापेक्षाऽस्ति। अतएव तद्विधिरप्यपूर्वविधिरेव। पदादिनाऽऽहवनीयादिबाधस्तु पतनप्रतिबन्धकत्वरूपाधिकरणताया एवादृष्टोत्पादकत्वादेकेन तत्सिद्धेः समुच्चयायोगादनुसंधेयः। अतश्च तत्प्रतिनिधेरदृष्टोत्पादकत्वे प्रमाणाभावान्न सः। क्वचित्तु वाचनिको-ऽश्मपाषाणादिरभावे विधिरेव।

एवमर्थप्रकाशनार्थेष्वपि मन्त्रेषु न प्रतिनिधिः, शब्दान्तरस्य मन्त्रान्तरस्य वा। स ह्युपायान्तरेण ध्यानादिनाऽर्थेऽनवगते तत्प्रतिपादकत्वज्ञानाभावादेव नाशङ्क्यः। अवगते तु तस्मिन् स्मारकानपेक्षत्वादेव न तदुपादानम्।

न चैवं यत्र स्वतएवार्थः स्मृतस्तत्र विहितमन्त्रपाठानापत्तिः। तत्र नियमादृष्टसिद्ध्यर्थं मन्त्रजन्यस्मृतेरेवाभ्युदयकारित्वकल्पनेन मन्त्रपाठावश्यकत्वात्। प्रतिनिधेस्तु कर्मचोदनाऽऽक्षिप्तस्य नियमादृष्टजनकत्वे प्रमाणाभावान्न पाठ इति वैषम्यम्।

एवमन्यस्मात्तददृष्टोत्पत्तौ प्रमाणाभावेनादृष्टार्थप्रयाजादिक्रियायामपि न प्रतिनिधिः दृष्टार्थावघातादिक्रियायास्तु स समस्त्येव।

वत्तत्र केचिददृष्टार्थस्य षोडशिग्रहणाभावादेरपि न प्रतिनिधिः। तेन षोडश्यभावयुक्तक्रतुप्रयोगसङ्कल्पे कृते यदि दैवादनृतमपि तत्र

षोड़शी क्रतस्तदा षोड़श्यभावस्याभावे तदङ्गत्वार्थं नाभावान्तरं प्रतिनिधेयमित्युक्तम्। तन्न। नातिरात्रे षोड़शिनं गृह्णाति इत्यनेन षोड़शिग्रहणाभावेऽपि इतराङ्गभावादेव क्रतूपकारसिद्धिरित्यवगमात् षोड़शिग्रहणाभावस्यादृष्टोत्पादकत्वे प्रमाणाभावात्। अतएव च तत्र षोड़शिग्रहणे वृथाचेष्टाक्षतप्रायश्चित्तमाचम्॥ ६॥ ३॥ ५॥

प्रतिषिद्धं च॥ अनारभ्य श्रुतेन अयज्ञिया वै माषावरकाः कोद्रवा इत्यनेन माषादीनां यज्ञाङ्गत्वप्रतिषेधाद्यच माषाणां विधानं तत्रैव विकल्पार्थं प्रतिषेधः। अथवा, यत्र धान्यत्वादिना सामान्यधर्मेण विधानं। तत्र स्वेच्छाप्राप्तमाषाद्यङ्गप्रतिषेधो बर्हिषि रजतं न देयमितिवत्।

अतश्च कर्मशास्त्रानुरोधेन माषादीनां प्रतिनिधित्वे साधनत्वेऽप्यङ्गत्वाभावान्न प्रतिषेधः। वक्ष्यमाणयुक्त्या द्रव्यशास्त्रानुरोधेन माषादिरूपसदृशप्रतिनिधित्वे श्रीह्यवयवत्वादिनैव तेषां ग्रहणाद्वर्जनीयतया माषाद्युपादानादङ्गत्वाभावेन न प्रतिषेधः। अतस्तेऽपि प्रतिनिधेया इति प्राप्ते।

अयज्ञिया इत्यर्हार्थप्रत्ययेन साधनत्वमात्रनिषेधाद्विशेषविहितातिरिक्तस्थले सर्वत्रैव माषादिप्रतिषेधप्रतीतेर्न प्रतिनिधेयाः। द्रव्यसामान्याभावे तु ग्राह्या एवेति ध्येयम्। अत्र च लक्षणया यज्ञोद्देशेन माषनिषेधविधानान्नैकप्रसरताभङ्गः॥ ६॥ ३॥ ६॥

तथा स्वामिनः॥ मृते तावद्यजमाने पत्न्यां वा नान्यतरेणान्यतरस्य प्रतिनिधिः। यजमाने मृते पत्न्या अन्यभावादेवानधिकारात्। पत्न्यां मृतायां यजमानस्यापि,

आधाने पूर्वमारिप्से दत्वाऽग्नीनन्यकर्मणि ।

इति पक्षे तावदग्न्यभावादेव विवाहात्पूर्वमनधिकारात् । तथापि विधुराधानपक्षे श्रौतस्मार्तवैदिककर्मणां पत्नीव्यतिरेकेणैव वाचनिकत्वेन पत्नीप्रतिनिध्यप्रसक्तिः । यदा तु नाग्नीनां पत्न्यै दानं, तदाऽपि तदाङ्गरपत्नीकोऽप्यग्निहोत्रमाहरेदिति वचनात्पत्नीव्यतिरेकेणैवाऽग्निहोत्रमात्रानुष्ठानमिति न प्रतिनिधिप्रसक्तिः । यदा तु कस्यचित्कर्मणो मध्येऽन्यतरस्य मृतिस्तदा दाहात्पूर्वमेव तत्समापने वक्ष्यमाणरीत्या प्रोषितादिवदेवानुष्ठानमिति न प्रतिनिधिप्रसक्तिः ।

रोगादिना अशक्तौ कार्यान्तरव्यापृते चान्यतराधिकारिककर्मसु यद्यपि स्वामिनः कालादिवत्प्रयोगविध्यविषयत्वाच्च तदेकत्वादिवदेव प्रतिनिधिप्रसक्तिस्तथापि,

संध्यामिष्टिं चरुं होममसगोत्रेण कारयेत् ।

इत्यादि वचनबलाच्छिष्टाचाराच्चानुमतिद्वारा कर्त्रन्तरेणाप्यनुष्ठानम् । स्वत्वत्यागमात्रं तु यति सम्भवे स्वयं कार्यं, नो चेत्तदपि तेनैवाद्यप्रभृति इदं न मदीययजमानस्येत्येवं कार्यम् । उभयाधिकारिकेषु दर्शादिषु तु त्यागघटितं कर्मान्यतरेणैव कार्यम् । द्वयोरपि संसृष्टस्वत्वात् । अतएव त्यागोऽपि तादृशस्थले मम यजमानस्य च नेत्यादिरूपः । उभयोरप्यशक्तावध्वर्युणैव । असति बाधे सामान्यसमाख्यया तत्प्राप्तेः । एवं यजमानप्रवासेऽपि । पत्न्यास्तु प्रवासेऽग्निविच्छेद एव । एवमाध्यावेक्षणादियाजमानपदार्थानामध्वर्युणैव करणं पत्नीपदार्थानां च । सामान्यसमाख्याऽनुरोधेन यजमानस्याप्राप्तेः । एवं पत्निसंस्कारेष्वपि क्रियमाणे फलाभावाच्च प्रतिनिध्याशङ्का ।

अतस्तेषामग्न्याद्यौ लोप एव। न तु दम्पतीभ्यां परस्परमपि करणम्। तत्तद्वाक्ये यजमानत्वादेरुद्देश्यतावच्छेदककोटिप्रविष्टत्वात्। अध्वर्य्यादीनामग्न्यादौ अध्वर्य्याद्यन्तरमेवोपादेयमिति न तत्र प्रतिनिधिः ॥ ६ ॥ ३ ॥ ७ ॥

बहूनां ॥ एवं तावत्स्मृत्याचारप्रमाणात् कचित्कर्मान्तरसत्त्वेऽपि न्यायेन न प्रतिनिधिरिति स्थितेऽपवादः क्रियते। सत्त्रमध्ये कस्यचिद्यजमानस्य मरणे तत्प्रतिनिधिरन्यः कार्य एव। काम्यस्यापि प्रारब्धस्यावश्यं समापनीयत्वात्। यद्यपि च मुख्यकर्त्तुः प्रयोगविध्य-विषयत्वान्न प्रतिनिधिर्न वा मृतेन तदुपादानसम्भवः, तथापि साङ्गकर्त्तरि सप्तदशावराः सत्त्रमासीरन्निति वाक्येन साप्तदश्य-विधानात्साप्तदश्यरूपाङ्गसम्पत्त्यर्थं अन्योपादानमवशिष्टैः कार्यम्।

न च तस्याख्यातोपात्ताधिकारिसङ्ख्याविशेषत्वादानीयमानस्य च वक्ष्यमाणरीत्या फलभोक्तृत्वाभावादधिकारित्वानुपपत्तेः कथन्त-मादाय साप्तदश्यसम्पत्तिः। फलभोक्तृत्वाभावेऽपि कर्त्तृनिष्ठत्वमात्रेणैव साप्तदश्योपपत्तेः। अतएवार्त्विज्येऽपि ये यजमानास्त ऋत्विज इत्यनेन अचन्यर्त्विक्पदे आर्त्विज्यलक्षणामङ्गीकृत्य तदुद्देशेन यजमानानां कर्त्तृत्वविधानाद्यजमानपदस्य च शानजन्ततया आत्मनेपदरूपत्वेन फलभोक्तृत्वविशिष्टकर्त्तृवाचित्वेऽपि यथाशक्तिप्रयोगे भोक्तृत्वाभावे-ऽप्यानीयमानस्य कर्त्तृत्वसत्त्वात्सङ्ख्यासम्पत्त्यविघातः। ततश्च सङ्ख्या-सम्पत्तये न्यायेनैवात्र प्रतिनिध्युपादानम्।

एवं च न्यायप्राप्तेः पूर्वमेव प्रवृत्तेन, यदि सत्त्राय दीक्षितानां प्रमीयेत योऽस्य नेदिष्ठः स्यात्तं तस्य स्थाने दीक्षयित्वा तेन सह

यजेरित्यनेन वचनेन नैदिष्टत्वविशिष्टत्वविधानार्थं पुनर्विधिः। अतएवेदमधिकरणं विशिष्य व्युत्पत्तिमात्रार्थम्। एतदभावेऽपि वचनेनैवान्यागमोपपत्तेः।

अत्र च पत्नीमरणेऽपि तेन सह यजेरन्निति पुंलिङ्गनिर्देशा-यजमानबाहुल्येनैव च सङ्ख्याया अपि सम्पत्तेस्तत्कर्त्तव्यपदार्थानां च पत्न्यन्तरेण यजमानैरेव वा सिद्धेर्नान्यानयनम्। अतएव तादृश-स्थले पत्न्या नाग्निभिर्दाहः किं त्वग्न्यन्तरेणैव। यजमानस्य तु मृतस्य पृथक्कृतस्याग्निभिर्दाहेऽपि अनाहिताग्निसाधारणेनानीतस्याग्निसंसर्ग प्रमाणाभावादृत्विग्वदेव कर्त्तृत्वोपपत्तिः॥ ६॥ ३॥ ८॥

स स्वामी॥ पूर्वाक्षेपेणेदम्। आनीयमानस्य न कर्त्तृत्वमात्रमपि तु स्वामित्वमपि। तत्स्थानापन्नत्वात्। दीक्षाद्युपफलिसंस्कार-श्रवणाच्चेति प्राप्ते।

न तावदत्र सत्रफलम्। तस्य, वैगुण्ये सत्यनुपपत्तेः। तद्धि न तावदानीतस्य। साङ्गकर्त्तृत्वाभावात्। अतएव न मृतस्यापि। नाप्य-वशिष्टानाम्। समग्रस्वामिककर्त्तृत्वाभावात्। अवशिष्टैस्तु शिष्ट-विगर्हणादोषपरिहारार्थमवश्यकर्त्तव्ये 'समापने सामाद्युपायैः सङ्ख्या-सम्पत्त्यर्थमन्यः समानीयते। अतएव प्रारम्भनिमित्तसमापनसाध्य-पापक्षयोऽपि अवशिष्टानामेव। न त्वानीतस्य। प्रारम्भरूपनिमित्ता-भावात्। अतस्तस्य कर्त्तृत्वमात्रमिति सिद्धम्॥ ६॥ ३॥ ९॥

स तद्धर्मा॥ फलिसंस्कारा ब्रह्मचर्यपयोव्रतादय आनीतस्य फलित्वाभावादप्रस्तुतकार्यकारित्वापत्तेर्न कर्त्तव्याः। अवशिष्टानां तु सत्रफलाभावेऽपि प्रारम्भनिमित्तकपापक्षयस्य सत्त्वात्कर्त्तव्याः। अत-

एव फलिसंस्काराणां प्रकृतौ प्रधानफलाधानयोग्यताजननार्थत्वाद्वा प्रधानकरणात्पूर्वं मृतिस्तदैव तेषां फलिसंस्काराः पापक्षयस्य प्रधानजन्यत्वात् न तु ऊर्ध्वमिति ध्येयम् । दीक्षाकरणं तु आनीतस्य वाचनिकमप्राकृतकार्यमिति प्राप्ते ।

यद्यपि तस्य न फलित्वं, तथाप्यन्येषां फलिसंस्कारकर्त्तरि साद्गुण्यसम्पत्त्यर्थमानीतस्यापि ते कार्याः । न च ब्रह्मचर्यादिषु पुरुषस्य संस्कार्यत्वेन कर्त्तृत्वस्यार्थिकत्वात् सङ्ख्यायाश्च वैध एव कर्त्तृत्वे निवेशात्फलिसंस्कारकर्त्तरि साद्गुण्याभावः । वैधावैधसाधारणावश्यककर्त्तृत्वद्वारेणैव लाघवात्साद्गुण्यस्य सङ्ख्याकृत्वोपपत्तेः । अतस्तत्सम्पत्त्यर्थं कर्त्तव्या एव फलिसंस्काराः ।

ननु सप्तदशावरा इत्यनेन सत्रप्रयोगे कर्त्तृपरिच्छेदकत्वेन साप्तदश्यं विहितं न तु प्रत्येकं तत्तत्पदार्थे । प्रत्येकपदार्थानां सप्तदशभिरकरणात् । न चानुमतिद्वारा सप्तदशानां सर्वत्र कर्त्तृत्वं, तथात्वे फलिसंस्कारेष्वपि अनुमतिद्वारेणैव साप्तदश्योपपत्तेरानीते फलिसंस्कारकरणानापत्तिः । किं चैवं मृतस्यैव पूर्वकालेऽनुमतिसत्त्वात्सङ्ख्यासम्पत्तिसम्भवेनानयनवैयर्थ्यम् । मृतकर्त्तव्यपदार्थानुष्ठानार्थमानयनमिति चेत् । तेषां कर्मान्तरेष्विवाध्वर्य्वादिसमाख्यया इतरमन्यस्तेषामिति न्यायेन वा कर्त्रन्तरैरेव सिद्धेः । अतस्तानयन एव प्रमाणाभावे कुतः संस्कारकल्पनमिति चेत् ।

न । न्यायेन तदसिद्धावपि वचनेनैव तत्सिद्धेः । अतएवोक्तवचने दीक्षितमरणे निमित्ते दीक्षानेदिष्ठसाहित्याद्यनेकगुणविशिष्टनैमित्तिकस्याप्यतावत्पदार्थप्रयोगस्यैव विधानान्न वाक्यभेदः । दीक्षा

चाप्राकृतकार्थोऽपि वचनादेव विधीयते। तस्माच्च यमनियमपरि-
ग्रहरूपत्वाद्ब्रह्मचर्यादिसिद्धिः। एवं च ये केचित्तद्भिन्नाः संस्कारास्ते
न कार्या इति प्रतिभाति। सचाय दीक्षितानामिति श्रवणाच्च
नाहीने तदानयनम् ॥ ६ ॥ २ ॥ १० ॥

सामान्यं ॥ एवं प्रतिनिधौ विचारिते किं सति सम्भवे सदृश-
एव प्रतिनिधिरुतानियम इति। कर्मचोदनया यत्किञ्चिद्द्रव्य-
मात्राक्षेपाद्द्रव्यशास्त्रस्य च नीवारेषु व्रीहित्वाभावेन सदृशनीवा-
रादिनियामकत्वाभावान्न सदृशनियमः। न च व्रीह्यवयविनः
स्वावयवैरत्यन्तभेदाभावात्तदवयवानामेव कतिपयानां नीवारो-
पादानतया नीवाराभिन्नतया व्रीहिशास्त्रेणैव तद्विधानमिति
वाच्यम्। तथात्वे व्रीहिसत्त्वेऽपि नीवारोपादाने वैगुण्याभावप्रसङ्गा-
दिति प्राप्ते।

व्रीहिशास्त्रेण व्रीहित्वजातेः साधनत्वे प्रमिते अमूर्त्तायास्तस्याः
साधनत्वासम्भवादर्थात्तत्परिच्छिन्नस्यावयविनः साधनत्वमवगम्यते।
तस्यापि चावयवोपादानव्यतिरेकेण साधनत्वासम्भवात्तदवयवानामपि
साधनत्वमर्थादेवावगम्यते। तज्जातीयावयवानामेव च कतिपयानां
विजातीयावयवान्तरोपेतानां नीवारारम्भकत्वमिति यथाशक्तिप्रयोगे
जातेरवयविनोऽवयवान्तराणां च साधनत्वासम्भवेऽपि कतिपयावयवा-
नामेव तत्सम्पत्त्यर्थमवनेयतया नीवारविजातीयतदवयवोपादान-
मिति सदृशप्रतिनिधिनियमसिद्धिः। अतएव सादृश्यं समान-
जातीयावयवारब्धत्वेनैव नियामकं, न तु समानजातीयधर्मा-
न्तरेण। तस्य व्रीहिशास्त्राविषयत्वात्। एवं च व्रीह्यभावे सुसदृशं,

तदभावे सदृशं, तदभावे मन्दसदृशमित्यादि क्रमेण बोध्यम् ॥ ६ ॥ ३ ॥ ११ ॥

निर्देशात्तु ॥ वैकल्पिकेषु खादिरे बध्नाति पालाशे बध्नातीत्यादि-व्येकेन प्रक्रान्ते प्रयोगे यदि तस्यापचारस्तदा वैकल्पिकान्तरमेवोपा-देयम्। न तु पूर्वोपात्तसदृशम्। वैकल्पिकान्तरस्याप्युद्देश्यतावच्छेदक-सामानाधिकरण्येन विहितस्य तस्मिन्नपि प्रयोगे अङ्गत्वस्वरूप-योग्यतया मुख्यत्वेन जातिव्यक्तिसर्वावयवानामेव साधनत्वसम्भवे पूर्वोपात्तारम्भककतिपयावयवमात्रग्रहणे प्रमाणाभावादिति प्राप्ते।

तस्मिन्नपि प्रयोगे इतरस्याङ्गत्वे तदभावविहत*वैगुण्यापत्तेरवश्यं वैकल्पिकस्थले तत्तद्वाक्ययोस्तत्तद्घटितप्रयोगमात्रविषयत्वावसायात् तत्तत्प्रयोग इतरस्याङ्गत्वाभावेऽपि न †पूर्वोपात्तसदृशमेवोपादेयम्। अतएवाग्नेयत्वादिव्याप्यधर्मावच्छिन्नं प्रत्येव व्रीह्यादेः कारणत्वमित्युक्तं कौस्तुभे। तत्रापि वैकल्पिकानामादितोऽवधारणमित्यस्य प्रामाणि-कत्वे सङ्कल्पोत्तरमेव, तदभावे त्वेकोपादानोत्तरमेव तस्यापचार इति द्रष्टव्यम् ॥ ६ ॥ ३ ॥ १२ ॥

वचनाच्च ॥ यदि सोमं न विन्देत्पूतीकानभिषुणुयादित्यादौ किं सोमाभावे पूतिकत्वेन रूपेण पूतीकानां विधानमुत प्रतिनिधि-विधया पूतीकगतसोमावयवानां नियम इति चिन्तायाम्।

---

* इत्थमेव पाठः सर्वत्र। ममतु, तदभावकृत,—इति पाठः प्रतिभाति।

† इत्थमेव पाठः आदर्शपुस्तकेषु। इतरस्याङ्गत्वाभावेन,—इति तु समीचीनं प्रतिभाति।

प्रतिनिधिनियमे पूतीकपदस्य तद्गतसोमावयवलक्षणापत्तेर-भावे विधिरेवायम् । न च नियमविधिलाघवानुरोधेन तदङ्गी-करणमप्यदोषः । निषादस्थपत्यधिकरणन्यायेनापूर्वविधिगौरवस्य फलमुखत्वात् । अभावे विधिपक्षेऽपि प्रतिनिधिनियमस्यार्थसिद्धत्वेन लाघवस्य मन्मतेऽपि सत्त्वाच्च । न ह्ययं त्वन्मतेऽपि शाब्दः प्रति-निधिनियमः । अपि तु फलतः । तच्च फलं ममाप्यविशिष्टमेव । किं च सोमाभावे सुसदृशस्यान्यस्यैव प्राप्ते मन्दसदृशानां पूतीकानां पक्षप्राप्त्यभावादेव नियमविषयत्वानुपपत्तिः । अतः पूतीकत्वेन रूपेण पूतीकानामपि सोमाभावे विहितत्वात्तदपचारे पूतीकसदृश-मुपादेयमिति प्राप्ते ।

नाभावे विधिरयम् । तथात्वे पूतीकत्वस्य तदवच्छिन्नव्यक्ते-स्तदवयवान्तराणां च सोमावयवविजातीयानां कारणत्वकल्पने गौरवापत्तेः । प्रतिनिधिनियमे तु क्लृप्तसोमावयवनिष्ठकारणताऽ-ऽक्षिप्तोपादानकपूतीकपरिच्छेदकत्वेन यागोद्देशेन पूतीकत्वनियम-मात्रविधानात्पूतीकव्यक्त्यवयवानां यागकारणत्वाकल्पनाल्लाघवम् । अतएव न लक्षणाऽपि । पूतीकानभिषुणुयादित्यत्र तु तृतीयाया-मश्रवणाद्द्वितीयया यागप्रयोजकत्वस्यैवं निरूढसम्बन्धेन लक्षणेऽपि न दोषः ।

यद्यपि च तेन सम्बन्धेन पूतीकत्वस्यैव तद्विध्यभावे न पक्षे प्राप्तिः । पूतीकानां मन्दसदृशत्वेन सोमाभावे सुसदृशस्यैव प्राप्तेः । तथापि कर्मचोदनया यत्किञ्चित्प्रतिनिधिप्रसक्तौ सदृशन्यायेन नियमकरणात्पूर्वमेवैतदपनप्रवृत्त्या नियमोपपत्तेः । अतएव पूतीक-

गतसोमावयवनियमफलकपूतिकत्वनियमकरणेऽपि न पूतीकानां सुसदृशाभावे उपादानम्। किं तु सोमाभाव एव। वचनस्यैव श्रौतप्रवृत्तिकतया नियामकत्वात्। 'यदि सोम' मित्यनुवाद-सामर्थ्याच्च। एवं च पूतीकापचारे सोमपूतीकोभयसदृशं ग्राह्यम्। पूतीकत्वस्यापि कारणकोटौ प्रवेशात्।

यत्तु शास्त्रदीपिकायामेतादृशविषये सोमसदृशमेव ग्राह्यमित्युक्तम्। तत्तन्त्ररत्नविरोधादुपेक्षितम्। तदभावे तु सोममात्रसुसदृशं पूतीकत्वावच्छिन्नसंसर्गस्य सोमावयवाङ्गत्वेन गुणलोपे चेति न्यायेन बहुतरसोमावयवानामेवानुग्राह्यत्वात्। अभावे विधिपक्षे तु सोमाभावे निमित्ते पूतीकानामेवाङ्गत्वात्तत्सदृशमेवेति विशेषः। अतएव यत्र व्रीह्यादौ तदवयवत्वेनैव नीवारप्रतिनिधिः, तत्र नीवारत्वस्यानङ्गत्वात्तदपचारे व्रीहिसदृशमेवोपादेयं, न तूभयसदृशमित्यपि सुलभम्। अतएव मूले उभयविधप्रतिनिध्यपचारे अधिकरणद्वयं कृतम्। तन्न्यायत्वाच्चलादुपेक्षितम्*। यदा मुख्यमलभ्यं मत्वा प्रतिनिधिमुपादातुं प्रवृत्तः, उपादाय वा दीक्षादयः सर्वे वा संस्काराः कृताः, कार्यं न कृतं, तत्र कार्यकरणात्पूर्वं मुख्यलाभे तमेवोपादाय पुनः संस्कारान्कृत्वा तेनैव प्रधानं कार्यम्। मुख्यालाभे विकल्पोपादानस्य वाचनिकस्याप्यन्याय्यत्वात्।

न च प्रतिनिधित्यागे सङ्कल्पबाधः। द्रव्यांशे पृथक्सङ्कल्पे प्रमाणाभावात्। सत्त्वेऽपि वा यथाशक्ति शास्त्रार्थं सम्पादयिष्ये इत्येव सङ्कल्पात्। प्रधानानुरोधेन पुनः संस्कारकरणस्य न्याय्यत्वाच्च। यदा

---

* असङ्गतोऽयं पाठः मूले स्थितत्वान्निवेशितः।

तु प्रतिनिधिनैव कार्यं निष्पन्नं, तदा प्रयोजनाभावात् न मुख्यमुपादेयम् । मुख्याभावनिमित्तकप्रायश्चित्तमात्रमेव तु कार्यम् । यदा नियोजनादिकार्यमात्रयोग्यो मुख्यः तक्षणादिसकलसंस्कारयोग्यस्तु प्रतिनिधिः, तदा मुख्यस्यैवोपादानम् । संस्काराणां तु गुणलोपे च मुख्यस्येति न्यायेन लोपेऽपि न दोषः । न चान्यत्र तथात्वेऽपि यूपस्य दृष्टादृष्टसंस्कारसमूहरूपत्वाच्च संस्काराणां काष्ठाङ्गत्वमिति वाच्यम् । लाघवेन सकलसंस्कारजन्यपरमापूर्वविशिष्टकाष्ठस्यैव यूपपदार्थत्वात् । अतएव यूपं तक्षतीत्यादौ काष्ठस्यैव संस्कार्यत्वाच्च काऽप्यनुपपत्तिः ।

यत्र तु प्रधानभूतनियोजनासमर्थमेव मुख्यं, तत्र तदनादरेण प्रतिनिधिनैव कार्यसम्पादनं द्रष्टव्यम् । यत्र लम्बग्रफपरिमाणशेषकार्याद्यपर्याप्ताः पुरोडाशजातिमात्राभिव्यक्तिसमर्था व्रीहयो लभ्यन्ते, तत्र तैरेव पुरोडाशं कृत्वा प्रधानमनुष्ठेयम् । शेषकार्याणां लोपः । न च बहूनां शेषकार्याणां पुरोडाशाङ्गभूतानां पुरोडाशाङ्गभूतैकव्रीह्याद्यनुरोधेन लोपासम्भवः । व्रीहीणामपि यागोद्देशेन विहिततया यागाङ्गत्वेन पुरोडाशाङ्गत्वाभावात् । न चोत्पत्तिशिष्टपुरोडाशावरोधाद्व्रीहिभिरिति तृतीया प्रयोजकत्वपरेति वाच्यम् । पुरोडाशरूपव्यापारकत्वेऽपि करणत्वस्य काष्ठैः पचतीत्यादिवदुपपन्नतरत्वेन लक्षणायां प्रमाणाभावात् । अतस्त्वेकप्रधानाङ्गानुरोधेनानेकेषामपि अङ्गाङ्गानां लोपो नायुक्तः ॥ ६ ॥ ३ ॥ १२ ॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां
षष्ठस्य तृतीयः पादः ।

अथ षष्ठोऽध्यायः ।

चतुर्थः पादः ।

शेषात् ॥ दर्शादौ यदा सकलस्य पुरोडाशस्य दधिपयसोरन्यस्य वा हविषः सम्पूर्णस्य नाशस्तदा प्रधानानुरोधेन हविरन्तरोत्पत्तौ प्रसक्तायां यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आज्ये-नैताद्देवताः परिसंख्याय यजेतेति श्रुतेनाज्येनैव याग इत्यविवादम् । अत्र हि नाशादीनां प्रत्येकं निमित्तत्वे वाक्यभेदापत्तेरुत्पन्नहविर-योग्यत्वमेवार्धमन्तर्वेदीतिवल्लक्षणया निमित्तम् । न तु हविरलाभः । नाशाद्युक्तिवैयर्थ्यापत्तेः । अतएवानुत्पन्नपुरोडाशाद्यसम्भवे नाज्य-नियमः, किन्तु यत्किञ्चिदनियतप्रतिनिध्युपादानमेव ।

एकदेशनाशादौ च यदि ध्रुवदानग्रहणोत्तरं प्राचीनस्य कुम्भीस्थस्य वा नाशस्तदा भाष्यकारमते तावद्ध्रुवदानस्यैव हविष्ठा-क्षेपकार्याभावेऽपि तेनैव यागः । वार्त्तिककारमते तु यावन्निरुप्त-व्रीहिपरिमितपुरोडाशस्य, यावद्दुग्धं सान्नाय्यस्य च हविष्ठाद्धवि-र्नाशसत्त्वेन प्राचीस्थनाशेऽपि आज्येनैव यागः । एवं तन्मते ध्रुवदान-नाशेऽपि हविर्नाशाविशेषाद्धविरन्तरोत्पत्तिप्रसक्तौ वचनादाज्येन यागः । भाष्यकारमतेऽपि तादृशविषये आज्येनैव यागो न पुनः प्राचीस्थादवदानम् । मध्यात् पूर्वार्धाच्चावद्यतीत्यनेन कृत्स्नस्य याव-दुपात्तस्य प्रकृतस्य पुरोडाशादेर्योमध्यादिदेशः तदुपादानतया तदु-परितनभागस्यैवावदेयत्वात् । तस्य च नष्टत्वेन पुनरवदाने मध्यादेरेवा-वदेयत्वप्रसङ्गात् । अतस्तत्रापि हविरन्तरोत्पत्तिप्रसक्तावाज्येन यागः ।

न च सर्वमते हविष्ट्वावच्छिन्ननाशादिना हविरयोग्यत्वस्य निमित्तत्वे द्विव्यवयवनाशेऽपि आज्येन यागापत्तिः। निमित्त-ज्ञानस्यैव नैमित्तिकानुष्ठापकतया तादृशनाशस्य नित्यतया च निमित्तत्वानुपपत्तेः। अङ्गुष्ठपर्वन्यूनावर्जनीयातिरिक्तावयवनाशे तु भवत्येवाज्येन यागः।

तदेवं मीमांसकमर्यादा। याज्ञिकास्तु तां न मन्यन्ते। तेषा-मयमाशयः। एकदेशश्यामवदेवैकदेशनाशस्य न निमित्तम्। एक-देशनाशेऽपि पुरोडाशाज्यपयोदधित्वादेः प्रत्यभिज्ञायमानत्वात्। तस्यैव हविष्ट्वावच्छेदकत्वेन यावच्चिरन्तत्रीहिपरिमितत्वादेस्तदन-वच्छेदकत्वात्। तन्नाशस्यावर्जनीयत्वाच्च। अत एकदेशनाशेऽव-शिष्टस्यैव यागः। होमः परं मध्यापादानकत्वाभावे द्व्यवदाना-सम्भवात् लुप्यताम्। वस्तुतस्तु यावदवशिष्टं तत्रापि हविष्ट्वात्तन्मध्या-पादानकत्वं सम्भवत्येवेति होमोऽपि कार्य एव। अत एवाश्वलायनः। द्व्यवदाननाशे पुनरायतनादवदानमिति। अतश्च यद्यपि मीमांसक-मतं न्यायसिद्धं भवेत्तथापि स्मृत्यनुमितवचनेन तद्बाधः। अग्निष्टुति सुब्रह्मण्योहवत्। कृत्स्नहविर्नाशे तु अनेकहविष्कायामिष्टौ कति-पयहविर्नाशे हविरन्तरोत्पत्तिरेव। सर्वहविर्नाश एवाज्येन पुन-रुत्पादितेन* यागः। अतएवापस्तम्बः। यद्यप्रत्तदेवतं हविर्व्यापद्ये-तान्यद्धविस्तद्दैवतं निर्वपेत्, यस्य सर्वाणि हवींषि आज्येनैतादेवताः परिसङ्ख्याय यजेतेति। यद्यपि चोत्तरवाक्ये श्रुतौ च सर्वत्वमवि-

* पुनरुत्पादितेन वा,—इति भवितुं युक्तम्।

वचितं, तथापि पूर्ववाक्यवैयर्थ्याद्यापत्तेर्दविरुभयत्ववद्विरुद्धा सर्वं-न्यायस्य निमित्तता ॥ ६ ॥ ४ ॥ १ ॥

अपि वा ॥ यत्र तु त्यागांशयुक्तानि शेषकार्याणि, यथा स्विष्टकृदादौ। तत्रोत्तरार्धादिनाशे उत्तरार्धान्तराभावादवशिष्टस्य प्रतिपत्त्यन्तरगृहीतत्वाच्च न तावच्छेषेण करणम्। नापि हविरन्तरोत्पत्तिः। अप्रयोजकत्वात्। किं त्वाज्येनैव समापनम्। उक्तवचनस्य श्रुतद्रव्यनाशे द्रव्यापेक्षामात्रेणैव प्रवृत्तेः। याज्ञिकमते तु यदि प्रक्तान्तदेवतमाज्येन शेषं संस्थापयेदित्यापस्तम्बवचनादवधेयम्। अविशेषप्रवृत्तमपि इदमपेक्षानुरोधात् स्विष्टकृत्परमेव। अतस्त्यागांशाभावादिडादेर्लोप एव। इदं चोत्तरार्धत्वादिनाऽनेकप्रतिपत्तिविधाने। शेषत्वेनानेकप्रतिपत्तिविधाने तु शेषैकदेशाविनाशेऽपि अवशिष्टेनैवावयवशः सर्वप्रतिपत्तिकरणमिति ध्येयम् ॥ ६ ॥ ४ ॥ २ ॥

निर्देशात् ॥ शेषप्रसङ्गादिदम्। दर्शपूर्णमासयोः शेषभक्षाः श्रुताः। तत्रेडाभक्षे यजमानपञ्चमा इडां भक्षयन्तीति श्रुताः कर्त्तारः। तथा, प्राशित्रभक्षे प्राशित्रं ब्रह्मणे परिहरन्तीति श्रुतः। चतुर्धाकरणभक्षेऽपि व्यादेशाम्नानाच्चत्वार ऋत्विजः। यजमानभागब्रह्मभागयोस्त्वावेव। शंयुवाककालभक्षे तु हविःशेषान् भक्षयन्तीत्याम्नातेन बहुवचनेनाध्वर्युवसमाख्याबाधेऽपि कर्मकरत्वात् सर्वर्त्विजो भवन्ति।

न चेडाभक्षे न्यायप्राप्तर्त्विक्पुनःश्रवणस्य परिसङ्ख्यार्थत्वाच्छंयुवाककालभक्षे तदन्य एव भवेयुरिति वाच्यम्। ऋत्विजां प्राप्तत्वेऽपि अप्राप्तयजमानसाहित्यस्यैव तत्र विधेयत्वेन तस्य भक्षान्तरे ऋत्विक्परिसङ्ख्यार्थत्वाभावात्।

अत्र हि द्रव्योद्देशेन कर्त्तृविशिष्टभक्षान्तरविधानेऽपि विशेषण-विधिवेलायां प्राप्ताप्राप्तविवेकेन भक्षो यजमानवाहित्यश्च विधीयते। ऋत्विजां तु भक्षस्य प्रयाजशेषाभिधारणन्यायेन कर्त्तृसंस्कारकत्वस्यापि वक्ष्यमाणत्वेनानर्थत्वात् प्राप्तिसम्भवेन न विधानम्। अत एवा-न्तत्वाच्चाप्राप्तं यजमानवाहित्यं तु विधीयते।

यदि तु करिष्यमाणकर्मणि बलाधानार्थत्वमपि भक्षस्येति विभाव्यते, तदाऽस्तु यजमानपक्षमत्वग्रहणं पत्नीपरिसंख्यार्थम्। सर्वथा भक्षान्तरे कर्त्तृपरिसंख्याऽभावाच्छंयुवाककालेऽपि भक्षे ऋत्विज एव कर्त्तारः। अस्मिंश्च पक्षे तस्मिन् पत्नीयजमानयोर्निष्टक्तिरपे-वर्त्विजो हविःशेषान् भक्षयन्तीति कल्पसूत्रकारवचनाद्वगन्तव्या॥ ३॥४॥२॥

अर्थसमवायात्॥ दर्शपूर्णमासयोः प्रायश्चित्ताधिकारे भिन्ने जुहोति स्कन्ने जुहोतीति श्रुतम्। तत्र कृत्स्नभेद एवेदश्रुतेकदेशभेद-एव उताभयथापीति चिन्तायाम्। द्वयोः सत्यपि सति एकदेशभेद-स्यावर्जनीयत्वेन नित्यत्वात् निमित्तत्वानुपपत्तेः सर्वभेद एवेदं पूर्णतादशायां प्रायश्चित्तमिति प्रथमः पक्षः।

सत्यपि कतिपयावयवानां चूर्णीभावेऽपि भिन्नमितिप्रतीत्य-भावात्कपालिकादिस्थूलावयवविभाग एव भेदप्रतीतेस्तस्य चानि-त्यत्वेन सर्वभेदवदेकदेशभेदस्यापि निमित्तत्वोपपत्तेरुभयत्रैवायं होमः। अयं हि भेदस्य निमित्तत्वेऽपि होमस्य प्रयोजनापेक्षायां सन्निपत्योपकारकत्वस्याभाव भिन्नकपालसंस्कारार्थः। कपाले हि भेदनेनोक्तपरिमाणबाधादैगुण्यप्रसक्तौ तत्परिहाररूपः होमेन

संस्कारोनानुपपन्नः। तस्य चानुपयुक्तस्य संस्काराऽयोगात्सर्वभेदने चोपयोगाभावादेकदेशभेदनं एव निमित्तम्। अस्तु वा सप्तमीयं संस्कार्यत्वपरैव न तु निमित्तत्वार्थिकाऽपि। न च भिन्नस्य कादाचित्कत्वान्नित्यानित्यसंयोगविरोधः। रथन्तरस्य कादाचित्कत्वेऽपि सप्तोक्षणादिधर्मविधिवदुपपत्तेरिति प्राप्ते।

भाव्युपयोगित्वे भूतोपयोगित्वे वा तस्योपधानावश्यकत्वे भिन्नं कपालमप्सु प्रक्षिपति अन्यदुपदधातीति वाक्यविरोधान्नायं स्नतन्त्रोहोमो भिन्नसंस्कारकः। नापि प्रकरणपठितहोमानां तत्संस्कारकत्वम्। एतेन प्राकरणिकहोमानुवादेन लौकिकस्य भिन्नकपालस्य एवाधिकरणत्वेन विधिराहवनीयबाधेनेत्यपास्तम्। होमस्य प्राकरणिकस्य कपालोपधानोत्तरत्वादन्यदुपदधातीत्यस्य वैयर्थ्यापत्तेः। प्रायश्चित्तसमाख्याऽनुपपत्तेश्च। अत एवेदं कर्मान्तरम्। तच्च नैमित्तिकं आरादुपकारकं क्रतुवैगुण्यपरिहारार्थं क्रत्वङ्गत्वेन विधीयते। अतः सर्वभेदनमेकदेशभेदनमुभयमप्येव निमित्तम्॥ १॥ ४॥ ४॥

क्षामे॥ तत्रैव यस्य पुरोडाशौ क्षायतस्तं यज्ञं वरुणो गृह्णाति यदा तद्धविः सन्तिष्ठते अथ तदेव हविर्निर्वपेदिति श्रुते प्रायश्चित्ते सर्वपुरोडाशदाहरूपं क्षाणमेव निमित्तम्। अग्निपाके हविषि एकदेशक्षाणस्यावर्जनीयत्वात्। न चावर्जनीयक्षाणातिरिक्तैकदेशक्षाणमेव निमित्तत्वम्। तस्यैव परिच्छेत्तुमशक्यत्वात्। न च तद्धविः सन्तिष्ठत इति श्रवणात् अवशिष्टेन हविषा यागप्रतीतेरेकदेशक्षाणमेवनिमित्तत्वम्। प्रयोगसमाम्नायेवैवंजातीयकशब्दप्रयोगस्य

सर्वत्र दर्शनेन प्रयोगसमाप्तेरेव लक्षणया प्रकृतेऽपि प्रतिपादनात्। अतः सर्वनाश एवेदं पुनः प्रयोगरूपं प्रायश्चित्तम्। सर्वदाहे प्रायश्चित्तं यदि वा ऽवदानेभ्यो न प्रभवेदित्यापस्तम्बेन सर्वदाहे अवदानापर्याप्तैकदेशदाहे वा पुनः प्रयोगविधानेन तद्भिन्नैकदेशदाहे प्रायश्चित्तानुपपत्तेः। अत एवैकदेशदाहस्य परिच्छेत्तुं शक्यत्वेऽपि एतन्मूलभूतश्रुत्यैव तत्र प्रायश्चित्तासम्भवः। तादृशैकदेशनाशे तु नाशाधिकरणन्यायेनाज्येन दध्नाऽवशिष्टेन वा प्रयोगसमाप्तिमात्रम्। एवं सर्वनाशेऽपि प्रयोगसमाप्तिराज्येन पुरोडाशान्तरोत्पत्त्या वा द्रष्टव्या ॥ ६ ॥ ४ ॥ ५ ॥

यथाश्रुति ॥ दधिपयसोरेकैकस्य नाशे प्रायश्चित्तमुक्त्वा, "यस्योभयं हविरार्त्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेदित्याम्नातम्। तत्र च नार्त्तिमात्रस्य निमित्तता। सर्वदैव कस्य चिदार्त्तिसत्त्वेन नित्यतया निमित्तत्वानुपपत्तेः। अतोऽर्धमन्तर्वेदीति वल्लक्षणया हविरार्त्तिर्निमित्तमिति तावदविवादम्। अतश्च तद्वदेवोभयत्वमपि उभयपदवैयर्थ्यापत्तेर्लक्षणया निमित्तकोटिप्रविष्टमित्युभयहविरार्त्तिरेव निमित्तम्। न ह्येकवचनादिवद्बाधुल्यादिकं प्रयोजनमस्तीति प्राप्ते।

षष्ठेकत्वाधिकरणन्यायेनेप्सितोद्देश्यविशेषणस्येव निमित्तरूपोद्देश्यविशेषणस्यापि विवक्षाऽयोगादविशिष्टलक्षणायाश्चैकवचनाद्यनुरोधेनेवोभयपदानुरोधेन हविरादिपदेषु करणे प्रमाणाभावात् उभयपदस्य चोभयमपीत्येवं पूर्वोक्तैकैकनाशप्रायश्चित्तापेक्षया अस्योत्कर्षेण ज्ञापकतयाऽप्युपपत्तेरुभयत्वस्य निमित्तकोटिप्रविष्टत्वायोगादेकैकहविर्नाशेऽपि इदं प्रायश्चित्तम्।

वस्तुतस्तु उभयार्त्तिरेवात्र निमित्तम्। न च तस्या अपि नित्यत्वात् निमित्तत्वानुपपत्तिः। प्रकरणादेव हविर्विशेषविषयत्वोपपत्तेः। इतरथा भवन्मतेऽपि दधिपयोविषयत्वानुपपत्तेः। अतोदोहद्वयनाश एवेदं प्रायश्चित्तम्। हविःपदमेव त्वविवक्षितम्। अधिकरणं तु हविःप्राप्त्यभावं कृत्वा चिन्तायाम्।

वस्तुतस्तु। पक्षद्वयेऽपि न हविरादिपदे लक्षणा। सर्वेषां पदार्थानामाख्यातार्थान्वयोत्तरं पश्चात्परस्परान्वयोपपत्तेः। एवं च विशिष्टस्य निमित्तत्वानादरेणैनिमित्ततावच्छेदकगौरवभियाऽन्यतरविवक्षयाऽपि निमित्तश्रुत्युपपत्तेरन्यतरपदस्य चाधानवाक्यगतपुंस्त्वस्येवानुवादत्वेनाप्युपपत्तेश्च द्रष्टव्यः ॥ ६ ॥ ४ ॥ ६ ॥

होमाभिषव ॥ सोमे हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्तीत्यत्र हविर्धानाधिकरणकग्रावकरणकाभिषवस्य आहवनीयाधिकरणकहोमस्य प्रत्यग्गमनस्य सदोधिकरणकत्वस्य च प्राप्तत्वाद्धोमाभिषवसमानकर्त्तृकभक्षान्तरमेवेदङ्गुणाद्विधीयत इत्युक्तम्। तत्र च होमाभिषवयोः क्लृप्तप्रयोजनयोरेव कर्त्तुरुपलक्षणत्वान्निमित्तत्वमिति तद्विशेषणस्यैकवाक्योपादानलभ्यसाहित्यस्याविवक्षितत्वम्।

यदि त्वार्थिकं निमित्तत्वं होमाभिषवकर्त्तुरेवोपादेयत्वात्तद्विशेषणं साहित्यं विवक्षितमित्याशङ्क्येत। तथापि प्रयाजशेषाभिधारणन्यायेन भक्षस्य तद्गतकर्त्तृनियमस्य वा कर्त्तृसंस्कारकत्वाद्धविर्विशेषणस्येव तद्विशेषणस्याप्यविवक्षा। अतोऽभिषवमात्रकर्त्ता नेष्टादिना होममात्रकर्त्तृभिः चमसाध्वर्युभिरपि स भक्षः कर्त्तव्य इति प्राप्ते।

नियमं प्रति कर्त्तुः संस्कार्यत्ववादिनः पार्थसारथेर्मते तद्वाक्ये त्वा-वपि पाष्ठिकेन विधिना भक्षं प्रति संस्कार्यत्वे उच्यमाने श्रूयमाणे विधौ कर्त्तृणामुपादेयत्वादिविशेषणविवक्षोपपत्तौ आर्थिकेन विधिना विशेषणविशिष्टस्यैव कर्त्तुरुद्देश्यत्वाङ्गीकारेण साहित्याविवक्षाऽना-पत्तिः। अतोऽत्र मिलितयोरेव होमाभिषवयोरार्थिकं निमित्तत्वम् ।

यदि तु क्त्वाप्रत्ययस्य द्वितीयक्त्वाप्रत्ययान्तपदोपात्तक्रियाया-मप्यन्वयोनाव्युत्पन्न इत्यभिषवसमानकर्त्तृकत्वं होम एव विशेषणं, विशिष्टहोमसमानकर्त्तृकत्वस्य च भक्षणभावनायामन्वय इत्युच्यते । तदा सुतरां त्रिविशेषणविवक्षा । इतरथाऽभिषवक्षणविवक्षाऽऽपत्तेः ॥ ६ ॥ ४ ॥ ७ ॥

पुनराधेय ॥ यद्योभावग्नी अनुगतौ आदित्योऽभ्युदियादस्त-मियाद्वा पुनराधेयमेव तत्र प्रायश्चित्तिरिति श्रुतं प्रायश्चित्तं किमेकैकाग्न्यनुगमेऽपि भवेदुत सर्वाग्न्यनुगतावेवेति चिन्तायाम् ।

उभयत्वस्य निमित्तविशेषणत्वेन लक्षतेऽप्यविवक्षितत्वादेकैका-ग्न्यनुगमेऽपीदं प्रायश्चित्तम् । न च हविरुभयत्ववदेकैकाग्न्यनुगमे क्षामवत्यादिप्रायश्चित्तान्तराम्नानादस्योभयविषयत्वम् । तस्यादित्यो-दयाद्यभावविषयत्वात् । न चैवमपि प्रकरणादेवकारश्रवणात्पुनः-पदप्रयोगाच्च कर्मान्तरत्वानुपपत्तेराधानस्य चोत्पत्तिवाक्ये सर्वाग्नि-जनकत्वस्यैव क्लृप्तत्वेन विधेयसामर्थ्यानुरोधेन उद्देश्यनिर्णय इति वाच्यम् । उत्पत्तिवाक्येऽप्यग्नीनामुद्देश्यत्वेनाविवक्षितविशेषणत्वात् । अतएव योगसिद्ध्यधिकरणन्यायेनाधानस्य प्रत्यग्नि भिन्न एव प्रयोग-इति प्राप्ते ।

आयतनेषु सम्भारान्निवपति इत्यत्रायतनबहुत्वस्य विवक्षितत्वा-द्वाधानस्यैकेनैव प्रयोगेण सर्वाग्न्युत्पादकत्वावगतेर्विधेयस्य सामर्थ्या-नुसारेण सर्वानुगम एवेदं प्रायश्चित्तम् । अतएव दक्षिणाग्नेर्भिन्नयो-नित्वपक्षाभिप्रायेणोभाविति श्रवणम् । समानयोनित्वे तु चित्तथा-ग्निनाशे बोध्यम् ॥ १ ॥ ४ ॥ ८ ॥

पञ्चशरावस्तु ॥ ऐन्द्रं पञ्चशरावमोदनं निर्वपेदित्यत्र हविर्नाशे आज्यादिना समापने प्रसक्ते प्रतिनिधित्वेन लाघवात् सान्नाय्यानु-वादेन पञ्चशरावपरिमितौदनमात्रविधानम् । न च वाक्यभेदः । पञ्चशरावौदनयोः समानाधिकरणत्वेनाग्नये दात्र इतिवद्विशिष्ट-विधानोपपत्तेः । ओदनपदस्य तात्पर्यग्राहकत्वेन पञ्चशरावमिति बहुव्रीहिणैवौदनस्योक्तत्वाच्च । ऐन्द्रमिति सान्नाय्यस्यैन्द्रदेवताकत्व-स्यापि सत्त्वात्तावद्भूतामितिवत्प्राप्तिकानुवादः । अथ वा तत्तदु-त्पत्तिवाक्ये इन्द्रमहेन्द्रभेदेन सान्नाय्यस्य भेदादैन्द्रयागानुवादेनैव प्रतिनिधिविधानमिति प्राप्ते ।

सुबन्तपदद्वयस्य परस्परान्वयाव्युत्पत्तेर्बहुव्रीहिणा सामान्यतो-द्रव्योपादानेऽपि ओदनत्वादिरूपेणोपादाने प्रमाणाभावात्तात्पर्य-ग्राहकत्वमङ्गीकृत्यैकस्मैव पदे विशिष्टलक्षणाङ्गीकारे च क्वापि प्राप्तकर्मानुवादेनानेकविधाने वाक्यभेदानापत्तेर्वाक्यभेदापादकगुणा-देव कर्मान्तरमिदं प्रायश्चित्तत्वेन विधीयते । समाप्तिस्त्वाज्यादि-नैव । अग्नये दात्र इत्यत्रापि तु न देवतामात्रविधिपक्षाश्रयणम् । वाक्यभेदप्रसङ्गात् । अपि तु भावनान्तरविधिपक्ष एव ।

न चैवमत्राग्नि भावनान्तरत्वापत्तेर्यागान्तरत्वानापत्तिः । उत्पन्न-

न्यधिकोगुणस्य वाजिनवद्यागभेदकत्वाख्याभावात्। अभ्युदितेष्टौ तु पूर्वदेवताऽपनयविधानाद्यच्छब्दश्रवणाच्च विशिष्य पूर्वयागोयत्वप्रतीतेर्भावनामात्रभेद इति विशेषः ॥ ६ ॥ ४ ॥ ९ ॥

स प्रत्यामनेत् ॥ तदिदं कर्मान्तरं द्रव्यनाशप्रयुक्तवैगुण्यपरिहारार्थत्वेन साम्नाय्याङ्गतया विधीयते। न तु तत्फलार्थं तत्स्थाने। तत्फलस्य पापक्षयादेः शिष्टविगर्हणनिमित्तकस्य वा साम्नाय्ययागेनैवसिद्धेः साधनान्तरानपेक्षत्वात्। न हि द्रव्यनाशे यागलोपः। द्रव्यान्तरोत्पत्त्या आज्येन वा तत्समापनोपपत्तेः।

न च स्वर्गादिरूपस्य फलस्य वैगुण्ये सत्यनुत्पत्तेस्तस्य साधनापेक्षायामस्य विधानमिति वाच्यम्। तथात्वे तत्कामनाऽभावे तदननुष्ठाने निमित्तश्रुतेः सङ्कोचापत्तेः। अतोऽपेक्षितवैगुण्यसमाधानार्थत्वेनैवास्य विधानम्। अपेक्षा च साम्नाय्ययागस्यैवेति तस्यैव विशिष्योपस्थितत्वात्तद्वाचकपदकल्पनया वाक्यात्तदङ्गत्वमेव। न तु प्रकरणात् सर्वाङ्गमनुष्ठानसादेश्याद्दर्शमात्राङ्गं वा। अतएव हविर्नाशे निमित्ते प्रयोगान्तःपात्येवेदमङ्गं, न तु क्षाणनिमित्तकपुनःप्रयोगवत्प्रयोगवहिर्भूतम् ॥ ६ ॥ ४ ॥ १० ॥

विश्वजित् तु ॥ सत्र प्रकरणे, यः सत्रायागुरते स विश्वजिता यजेतेति श्रुतेः सङ्कल्परूपमागूरणं कृत्वा यः सत्रं न करोति तस्येदं सत्रफलार्थत्वेन विधानम्। न तु सत्राङ्गतया। तथात्वे आगूरणनिमित्तत्वश्रवणवैयर्थ्यात्। न चैवं सत्राकरणस्यापि निमित्तान्तःप्रवेशाद्गौरवापत्तिः। अतः संकल्पमात्रे निमित्ते नैमित्तकमिदं फलान्तरार्थं विधीयत इति वाच्यम्। फलान्तरकल्पनापेक्षया सत्रफलस्यैव साधनसाकाङ्क्षस्य फलत्वकल्पने लाघवात्।

तच फलं यद्यपि न मुख्यमेव स्वर्गादिफलत्वेन कल्पयितुं शक्यं, तथात्वे वीतायां फलेच्छायां संकल्परूपस्य निमित्तस्य सत्त्वेन नैमित्तिकाननुष्ठाने निमित्तसङ्कोचापत्तेः। तथापि प्रारब्धाकरणनिमित्त-दोषपरिहाराय वेधातवीयास्थाने विधीयते। अतएव तादृशफल-वाचकपदकल्पनयैवाकरणविषयत्वसिद्धेर्न तस्यापि निमित्तान्तःप्रवेशः। अतएवैकस्याप्यकरणे अन्यैः कथंतरं संपाद्यासंपाद्यैव वा सत्रप्रयोगे-ऽपि अनेनैव विश्वजित्कार्य इत्येकवचनस्याप्युपपत्तिः॥६॥४॥११॥

वत्स॥ सत्रे अप्रवृत्तस्य विश्वजित्युक्ते सान्नाय्ये अप्रवृत्तस्यैव व्रतमित्युक्तमर्थमुत्तराधिकरणम्। तदुपोद्घातत्वेनेदं विचार्यते। दर्श-पूर्णमासयोर्बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायामिति श्रुतम्।

तत्र तृतीयया वत्सकरणकभक्षणापरपर्यायव्रतविधिः, रागप्राप्त-भक्षणानुवादेन अमाषममांसं ससर्पिष्कं व्रतं व्रतयतीति वचनान्तर-प्राप्तभक्षानुवादेन वा वत्समात्रविधिरिति प्राप्ते।

न तावद्वत्सस्य व्रते हस्तादिवत्करणत्वं, नापि भक्ष्यत्वेनाशक्य-त्वात्, नापि मांसप्रकृतित्वेन विना वचनं विधाने प्रमाणाभावात्।

अतः पुरा वत्सानकर्त्तोर्दम्पती अश्नीयातामितिवचनान्तरैक-वाक्यतालाभाय बर्हिषा पौर्णमास इत्येतत्प्रायपाठाच्च वत्सप्रातिपदि-केन वत्सापाकरणं लक्षयित्वा तृतीयां चेत्थम्भूतलक्षणे व्याख्याया-मावास्योद्देशेन वत्सापाकरणपूर्वकालोव्रताश्रितत्वेन विधीयते, व्रतं च प्रकरणप्राप्तमिति न कश्चिद्विरोधः॥६॥४॥१२॥

कालश्चेत्॥ यद्यपि वत्सापाकरणं कालोपलक्षणं न तु स्वयमङ्गं परार्थत्वात्, तथापि तदभावे कालस्यैव ज्ञातुमशक्यत्वात्साकाल्य-

याजिन एव वत्सापाकरणसत्त्वाद्व्रतम् । अतएव एकपुरोडाशीयाथा-मग्नीषोमीयाभावेऽपि आग्नेयसत्त्वात्कालोपलक्षणसत्त्वेनोपांशुयाजेऽपि न क्षतिरिति प्राप्ते ।

'शङ्खवेलायामागन्तव्यमित्यादौ उपलक्षणाभावेऽप्युपलक्ष्यानपा-यादत्सापाकरणाभावेऽपि अन्वाधानपश्चाद्भावरूपतत्कालानपायात्सां-नाय्याभावेऽपि कर्त्तव्यमेव व्रतम् ॥६॥४॥१२॥

प्रस्तरे ॥ सह शाखया प्रस्तरं प्रहरतीत्यत्र प्रहरणएव शाखा-साहित्यं प्रस्तरस्य न तु होम इत्युक्तं चतुर्थे । तत्तु न समप्रधानत्वेन । प्रस्तरप्रहरणस्येव शाखाप्रहरणस्यापि शाखाप्रतिपत्तितया । किन्तु प्रस्तरप्रहरणे शाखासाहित्यगुणत्वेन । मैत्रावरुणग्रह इव पयःसाहि-त्यम् । सहयोगेऽप्रधान इत्यनुशासनेन गुणत्वावगमादिति प्राप्ते ।

शाब्दबोधे गुणत्वश्रवणेऽपि प्रयाजशेषाभिघारणन्यायेनार्थिक-प्रतिपत्त्यन्तरविधिकल्पनेन प्रस्तरवच्छाखाया अपि कृतार्थत्वाविशेषेण प्रतिपाद्यत्वम् । अतएव शाब्दबोधे गुणत्वश्रवणमपि प्रस्तरप्रहरणकाल-प्रतिपत्त्यर्थमित्युक्तं न तु स्वयं तत्त्वम् । अतश्चासन्नयतः शाखां विनैव प्रस्तरप्रहरणं, पौर्णमास्यां च । यथाशक्ति प्रयोगे प्रस्तराभावे-ऽपि गुणलोपे चेति न्यायेन शाखाप्रहरणम् ॥६॥४॥१४॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां

षष्ठस्य चतुर्थः पादः ।

अथ षष्ठोऽध्ययः।

पञ्चमः पादः।

अभ्युदये॥ दर्शपूर्णमासयोः, यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा-अभ्युदियात् त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुं इति श्रुतम्। तत्र निमित्तं तावच्चन्द्रमाभ्युदयावच्छिन्नदिने* प्रारम्भ इति वक्ष्यते। स च निमित्तस्याभाव्येन दर्शस्येत्यपि सिद्धमेव। नैमित्तिकं पुनरत्र कर्मान्तरं किं वा गुणान्तरयुक्तं तदेवेति चिन्तायाम्।

वाक्यभेदापादकगुणात्कर्मान्तराण्येवात्र त्रीणि तत्तद्वाक्यै-र्विधीयन्ते। न ह्यग्न्यादयो देवता दातृत्वादयस्तद्गुणा मध्यमादीनि द्रव्याणि अष्टाकपालत्वादयस्तद्धर्मा दधिशृतयोरधिकरणत्वं चरुत्वं चेत्यनेकार्थविधानं प्राप्ते कर्मणि सम्भवति।

न चाष्टाकपालस्याग्नेये प्राप्तत्वेनाविधानं, तत्र प्राप्तत्वेऽप्यैन्द्राग्ने अप्राप्ततया वियावश्यकत्वात्†। न च दात्रादिपदानां यौगिकत्वा-त्सामानाधिकरण्याद्देवाऽदि‡ पदार्थैस्त्वन्वयोपपत्तेर्दातृत्वादिगुणवि-

---

* इत्यमेव पाठः सर्व्वत्र। चन्द्रमोऽभ्युदयावच्छिन्नदिने, इति तु भवितुमुचितम्।

† विधानावश्यकत्वात्, इति तु भवितुमुचितम्।

‡ देवाग्न्यादि,–इति भवितुमुचितम्।

शिष्टाग्न्यादिविधानम् । आग्नेयोऽष्टाकपाल:, पञ्चदशान्यानीत्यादिवदसमस्तपदानां क्रियाव्यतिरेकेण परस्पराम्वयस्याव्युत्पन्नत्वात् । अतएव प्रकृतमध्यमादिद्रव्योद्देशेन देवतान्तरमात्रविधिरिव्यपास्तम् । देवतातद्गुणरूपानेकविधौ वाक्यभेदतादवस्थ्यात् ।

किं चैवं स्वविष्टादिवाक्ययोर्द्रव्यद्वयोद्देशाद्वाक्यभेद: । न चासौ स्वीक्रियत इति तन्मरतोक्तं युक्तम् । प्रमाणाभावात् । सर्वत्रैव तदापत्तेश्च । किञ्च मध्यमादिषु यच्छब्दप्रयोगेण प्रकृतग्रहणेऽपि दधिशृतयोस्तदभावात् प्रकृतग्रहणे प्रमाणाभावेनोद्देश्यत्वानुपपत्ति: ।

न च तथापि प्रयोगान्तरमात्रस्यैव स्वीकारेण कर्मान्तरत्वे प्रमाणाभाव इति वाच्यम् । निमित्तस्य विनियोगान्वयित्वस्यैव यावज्जीवाधिकरणे स्थापितत्वेन प्रयोगान्वयिगुणाभावेन वाजिनवदेव तद्भेदानुपपत्ति: । अतएवोत्पत्त्यन्वयिनो गुणस्य कर्मभेदकत्वादेव न वाजिनवदेव भावनामात्रभेदकत्वम् । अत: पञ्चशरावदेव कर्मान्तराण्येव तत्तद्द्रव्यदेवताविशिष्टानि तत्तद्वाक्यैर्विधीयन्ते । तत्प्रकृतिभूततण्डुलानाञ्च त्रेधा तण्डुलान्विभजेदित्यनेन मध्यमादिभावेन त्रेधा विभाग: प्रयोगान्त:पातितया विधीयते । न तु देवताऽपनयादि । तथात्वे लक्षणापत्ते: । देवतान्तरविधिवत्त्वेनैव तत्सिद्धौ अपनयविधिवैयर्थ्याच्च ।

अतएव संस्कारविधिवत्त्वादेव प्रसिद्धत्वाद्ये मध्यमा इत्यादियच्छब्दोऽप्यनुवाद: । दधिशृतयोश्च न मन्मतेऽप्यधिकरणत्वेन विधि: । तथात्वे प्रणीताकार्यापन्नत्वेन सहप्रपणस्यार्थसिद्धत्वाद्भुदितेष्टिप्रकरणस्थ-सह प्रपयतीत्येतद्वाक्यवैयर्थ्यापत्ते: । अनेन चि न

सर्वेषामेव भिन्नदेवताकानामपि हविषामेककालावच्छेदेन सह अपणं विधीयते। एकप्रयोगविधिवशेनैव तत्प्राप्तेः। अतस्तेन संप्रतिपन्नदेवताकानां सह अपणं विधीयते। अतएवैतद्वैयर्थ्यभियैवोत्पत्तिवाक्ये दधिशृतयोर्नाधिकरणत्वविधिः, किन्तु करणत्वेनैव। लक्षणापि च सिद्धान्तवन्न दोषः। अतस्वत्वाधिकरणत्वयोरर्थप्राप्तत्वादेवाविधानम्। एतेषाञ्च नैमित्तिकानां कर्मणां स्वकालक्रियमाणदर्शाङ्गत्वं प्रकरणात्। तत्काकालोपक्रमनिमित्तदोषनिघातार्थत्वात् द्वादशाधिकरणन्यायेन विकल्प्यते। यदि त्वकालेऽनुष्ठितस्याविहितत्वेन वृथाचेष्टारूपत्वाद्विहिताननुष्ठाननिषिद्धानुष्ठानप्रयुक्तदोषाभावेन तन्निर्घातार्थत्वानुपपत्तेरदृष्टार्थत्वमेवैषां नैमित्तिकानामिति विभाव्यते, तदाऽस्तु समुच्चयः। यस्त्वग्नेरायतनाद्वहिर्नयनप्रयुक्तः प्रणयनपक्षे दोषो नासौ दर्शवैगुण्यापादक इति न तमादायाप्यस्य निघातार्थत्वमिति प्राप्ते।

भेदकप्रमाणाभावान्न कर्मान्तरम्। न च वाक्यभेदापादको गुणः। द्रव्योद्देशेन देवतामात्रविधानेन तस्य वाक्यभेदानापादकत्वात्। देवतायाश्चोपपादकीभूतयागापेक्षायामैन्द्रवायवादिवत्प्रकृतानामेवोपपादकत्वोपपत्तेः। भवदुक्तरीत्यैव च स्वत्वाधिकरणत्वयोरर्थप्राप्तत्वादनुवादः। यच्छब्दयोगादुद्देश्यत्वाच्च मध्यादेर्द्ध्यादेश्च प्रकृतस्यैव ग्रहणम्। देवताकारकस्यैकत्वाच्च। परस्परविशेषणविशेष्यभावेनाग्निपदस्य तात्पर्यग्राहकत्वमङ्गीकृत्यैकपदोपादानेन वा विशिष्टस्य व्युत्पन्नत्वान्न विधेयानेकता। यथा चाष्टाकपालत्वस्य प्राप्तिस्तथा अग्रयणतोऽधिकारप्रस्तावे वक्ष्यते। अग्न्योरुद्देश्यानेकत्वनिमित्तो वाक्यभेदः परमगत्या स्वीक्रियत इति मूलानुयायिनः।

वस्तुतस्तु स्वीकारे प्रमाणाभावात्पञ्चशराववाक्येऽपि चेन्द्रदेवतोद्देशेन त्वत्पक्षे नैमित्तिकपञ्चशरावौदनरूपैककारकविधानापत्तेः। प्रकृते उद्देश्यानेकत्वाङ्गीकारे च तत्र विधेयानेकत्वस्य वारयितुमशक्यत्वाद्द्व्योद्देशेन देवतामात्रविधिपक्षानुपपत्तेर्द्रव्यदेवताविशिष्टभावनान्तरविधिपक्षेणैव सिद्धान्तोपपत्तिः।

न चास्मिन्नपि पक्षे उत्पत्त्यन्वयिनो गुणस्य वाजिनवद्यागभेदकत्वापत्तिः, भावनामात्रभेदकत्वेऽपि वा पञ्चशरावेवाक्येऽपि तदापत्तिरितिवाच्यम्। यच्छब्देन पूर्वपरामर्शकेन पूर्वयागीयत्वोपस्थित्या यागान्तरत्वप्रमाणकत्वानुपपत्तेः। अतएव वाक्यभेदपरिहारार्थं परम्भावनाभेदमात्रमभ्युपगम्यते। वाजिनपञ्चशरावादौ तु तदभावाद्यागान्तरत्वमितिविशेषः।

अतएव धर्मिग्राहकप्रमाणेन यागैकत्वेऽवधारिते पूर्वद्रव्यावरुद्धे तस्मिन् द्रव्यान्तरयोर्दधिपयसोर्विकल्पेन समुच्चयेन वा निवेशायोगात्तयोरपि तत्तद्यागीययोरेव विधेयभावनाविशेषणत्वम्। अतश्च द्रव्यदेवताविशिष्टभावनान्तरविधानेऽपि पूर्वयागीयद्रव्याणां मध्यमादीनामेतद्भावनां प्रत्युपादेयत्वाच्च लौकिकमध्यमादिग्रहणप्रसक्तिर्न वा लौकिकदध्यादिग्रहणम्। भवदुक्तरीत्यैव चरुत्वाधिकरणत्वयोरनुवादत्वेन समाप्यविधेयत्वात्।

वस्तुतस्तु स्थविष्ठादिप्रकृतिकपुरोडाशेन दध्यादेः सह श्रपणापत्तेर्न चरुत्वप्राप्तिरिति तद्विधिरावश्यक एव। दध्यादिना च सह श्रपणविधानात्तदधिकरणत्वं परमनुवादः। सर्वथा न लौकिकग्रहणम्। किञ्च त्रेधा तण्डुलान् विभजेदित्यस्यापवर्गविधित्वादप्यसमर्थो-

निर्वाप्यते । तथा हि न तावदत्र तण्डुलानां मध्यमादिभावेन त्रेधा विभागोविधीयते तस्य मध्यमादिवाक्यैरेव प्राप्तत्वात् ।

न च मन्यते निर्वेष्टितण्डुलवत्पुरोडाशादिप्रकृतित्वेनापि लोकसिद्धानामेव मध्यमादीनां तण्डुलानां याग्यत्वापत्तेः प्रयोगान्तःपातिविभागसिद्ध्यर्थं विधिरर्थवानितिवाच्यम् । लोकसिद्धमध्यमादिग्रहणे तण्डुलप्रकृतिभूतव्रीहिसंस्कारकनिर्वापप्राप्त्यभावेन महाराज एव हवींषि निर्वपेदित्यनुवादानुपपत्तेः । व्रीहीणामेवावश्योपादेयतया विभागस्याप्यर्थप्राप्तत्वात् । सह अपणसत्त्वेन चिचेष्टिन्यायाभावाच्च । अतस्त्रेधा तण्डुलानिति पदद्वयमानर्थक्यभिया प्रकृतहविःपरमङ्गीकृत्य तस्यापरित्यक्तयागान्वयस्यैव प्रकृतदेवताभ्योऽपनयोविधीयते । आनर्थक्यभिया च लक्षणापि न दोषः । तदपनये च प्रकृतदेवतानां यागसम्बन्धोऽप्यपनीतो भवति ।

न चायमपनयोऽपि नैमित्तिकदेवतान्तरविधिवशादेव सिद्ध इति विधिवैयर्थ्यम् । एतद्विध्यभावे पूर्वयागस्य पूर्वदेवताऽवरुद्धतया देवतान्तरानपेक्षत्वेन तत्र नैमित्तिकदेवतान्तरस्य तद्विशिष्टभावनान्तरस्य वा विधानानुपपत्तेः । नैमित्तिकस्य हि निरवकाशतया नित्यबाधकत्वं वक्ष्यते । कर्मान्तरविधानेनैव च सावकाशत्वोपपत्तेर्न निरवकाशता । अतएव यत्र कर्मान्तरविध्यसम्भवः प्रमाणान्तरप्रमितस्तत्र फलचमसादौ निरवकाशेन नैमित्तिकेन नित्यापनयाभावेऽपि नित्यस्य बाधः ।

अत एवापनयविध्यभावादेव पशुशरावत्राक्ये कर्मान्तरम् । यः पशुकामः स्यात्सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात् ये मध्यमास्ता-

ग्निष्वात्ते ग्निविपिष्टाय शृते चरुं, ये स्वविष्टासानग्नये सुमिमते-ऽष्टाकपालं, येऽपिष्टास्तानिन्द्राय प्रदात्रे दधंस्त्वरुमिति वचनेन विहितायां पशुकामेष्टावपि चापनयविध्यभावादेव कर्मान्तरम्। यच्छब्दस्तु लोकप्रसिद्ध्यनुवादकतयैव कथञ्चित्तत्र व्याख्येयः।

अतश्चापनयविधिरेव पूर्वदेवतासम्बन्धं पूर्वयागानां अपनयंस्तेषां देवतान्तराकाङ्क्षोत्थापनद्वारा तत्र देवतान्तरसम्बन्धमुपपादयत्कर्मान्तरत्वं प्रतिबध्नाति। प्रकृतानामेव च मध्यमादीनां दधिपयसोश्च भावनान्तरे उपादेयत्वमापादयति। यथागृहीतं हविरभ्युदियादित्येव श्रवणर्था यदि गृहीतं हविरभ्युदियाद्यो तर्हि एतानेव तण्डुलान् सुफलीकृतान् दधि पयस्त्यादिलिङ्गाच्चायमर्थोविज्ञायते। तेन मध्यमादिभेदेनाग्नेयस्य वारत्रयमावृत्तिः। दधिपयोयागयोस्तु स्वविष्टापिष्टसाध्याग्नेयाभ्यासेन। सह अपयतीति वाक्याच्च अपण-मपि तेषां सम्प्रतिपन्नदेवताकानां सहैव।

अतएव दधिशृतयोः अपणाप्राप्तावपि साहित्यविध्यन्यथानुपपत्त्यैव अपणम्। शाखासाहित्यवशेन तत्प्रहरणवत्। साहित्यं हि केनचिदावश्यकम्। तत्र संप्रतिपन्नदेवताकत्वात्प्रदानवेलायां तेन तदावश्यकत्वे अपणवेलायामपि तस्यैव साहित्यप्रतियोगिकत्व-कल्पनात्। अतश्चाभ्युदितेष्टिर्न कर्मान्तरमपि तु निमित्ते नैमित्तिकं तद्यागानामेव भावनान्तरं स्वकाले क्रियमाणदर्शप्रयोगाङ्गम्। तस्यैवाकालप्रारम्भनिमित्तदोषपरिहारार्थं प्रायश्चित्तम्। अकाल-प्रारम्भस्य दोषजनकत्वं सामान्यमुखेन। अत्रैव वा वि वा एनं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तमित्यादिवाक्य-

शेषादवगन्तव्यम् । एवमातञ्चनाभ्यासदर्शनं ; यदि बिभीयादभि मोदिष्यतीति महाराज एव हवींषि निर्वपेत्कलौ हतैस्तण्डुलैरुपासीत अर्धं दधिहविरातञ्चनार्थं निदध्यादर्धं न यद्यभ्युदियात्तेनातञ्च प्रचरेत् यदि न प्रातरेतेन ब्राह्मणान् भोजयेदित्यकर्मान्तरत्वे उपपद्यते । बिभीयात् शङ्केत । महाराजे चन्द्रोदयात् पूर्व्वम् । उपासीत प्रतीचेत । आतञ्चनार्थं स्वकालक्रियमाणदर्शार्थदध्या-तञ्चनार्थम् । अर्धं न, किं तु तदभ्युदितेष्टावेव विनियुञ्जीत, न चेत् सान्नाय्ययाग एव । तेनातञ्चनार्थंनिहितेन । एतेनातञ्चनार्थं स्थापितेनैवेति तस्यार्थः ।

तद्यदि कर्मान्तरं स्यात्तदा तेनाकालप्रारम्भनिमित्तदोषपरि-हाराद्दर्शार्थमुत्पादितेन दध्ना कर्मान्तरकरणानुपपत्तेः, स्वकाल-क्रियमाणदर्शस्यैव तेन करणापत्तेस्तत्र हविरन्तरोत्पादाप्रसक्तौ तत्रातञ्चनाप्रसक्तेरर्धविध्यनुपपत्तिः । कर्मान्तरे च दध्यन्तरस्यैव संस्कारविशिष्टस्योत्पादनापत्तेर्दर्शार्थोत्पादितस्य दध्नः प्रसक्त्यभावा-दर्धविधानानुपपत्तिः ।

यत्तु मूले कर्मान्तरत्वपक्षे अधिकरणत्वेन दधिपयसोर्विधाना-ल्लौकिकस्यैवासंस्कृतस्य दध्नो ग्रहणापत्तेर्दर्शोत्पादितस्य प्रसक्त्यभाव-इत्युक्तम् । तत्तच्च अपयतितीत्यस्य वैयर्थ्यापत्तेस्तुल्यत्वेन हविष्ट्वेनैव विधानस्यावश्यकत्वादुपेक्षितम् । सिद्धान्ते तु प्रायश्चित्तस्य दर्शत्वा-नपायाद्दर्शस्यैव सर्वस्य दध्नः प्रसक्तौ स्वकाले क्रियमाणदर्शेन च दध्यन्तरोत्पादनार्थमातञ्चनप्रसक्तौ अभ्युदयशङ्कायां निमित्ते आतञ्च-नसाधनत्वेनार्धमात्रविधिरुपपद्यते । अर्धान्तरस्य चार्थादेवाभ्युदि तेष्टौ प्राप्तत्वादनुवादो विधिर्वेत्यन्यदेतत् ॥ ६ ॥ ५ ॥ १ ॥

उपांशुयाजे ॥ तत्रैवोपांशुयाजद्रव्यस्याज्यस्यापनयोऽस्ति न वेति चिन्तायां, तण्डुलग्रहणस्योपलक्षणत्वे प्रमाणाभावाद्देवतान्तरसंयोगाभावाच्च नापनय इति प्राप्ते।

तण्डुलग्रहणस्य विवक्षितत्वे दधिपयसोर्हविष्ट्वानुपपत्त्याऽधिकरणत्वापत्तेः सह श्रपयतीति वाक्यवैयर्थ्यापत्तेरेव तण्डुलग्रहणस्य हविःपरत्वावसायादाज्यस्याप्यपनयः। देवतान्तरसंयोगाभावान्नूपांशुयाजोच्यते। प्रजापतिविधिरपचारविषयत्वात् नेह प्रवर्त्तते।

यत्तच भाष्यकारेण पक्षान्तरमुक्तं विभजेदित्यनेन नापनयविधिः, किं तु पूर्वयागीयं हविर्वैक्षतीभ्योदद्यादिति सामान्यतोविभागरूपदानं उपांशुयाजाज्यसाधारण्येन विधीयते। अपनयस्तु पूर्वदेवतनामर्थात्। तच विशेषवचनाद्द्रव्यान्तराणां व्यवस्थायामपि आज्यस्य सामान्यवाक्यादेव चिभ्योऽपि दानमिति। तदपनयविध्यभावे प्रकृतहविर्ग्रहणे प्रमाणाभावात्सामान्यवाक्यस्यापि कर्मान्तरविषयकसामान्यविधित्वापत्तेरुपेक्षितम्।

अस्तु वा कर्मान्तरे सामान्यविधिवैयर्थ्यापत्तेरेव तथा। सर्वथा आज्यस्यापि पूर्वदेवतापनयः। न चैवं प्रयाजादिद्रव्यस्यापि तदापत्तिः। चन्द्राभ्युदयकालीनकर्मप्रारम्भस्यैव निमित्तत्वेन वक्ष्यमाणत्वात्तादृशकर्मसम्बन्धिहविष एव देवतापनयात्प्रयाजादीनाञ्चौचणीचादिवत् पृथगारम्भाभावात्तदीयद्रव्यस्यापनयानुपपत्तेः।

इदं चोपांशुयाजद्रव्यस्यापनयाभिधानं आश्वलायनानां, अथ यत् संनयन् साज्याज्यस्यान्तरेणोपांश्वाज्यस्य यजति तस्योक्तं ब्राह्मणमिति वचनेनामावास्यायामपि उपांशुयाजविधानादवगन्तव्यम्। दार्शिकं

तु पौर्णमास्यामेवोपांशुयाज इत्यधिकरणं कृत्वा चिन्तया। यथो-
दग्नामावास्याथामिति चावयुत्यानुवादः। एतद्वशादेवामावास्यायां
विकल्प इत्यपि गुरवः॥ ६॥ ५॥ २॥

निरुप्ते॥ यस्य हविर्निरुप्तमिति श्रवणान्निर्वापोत्तरकालीन-
चन्द्राभ्युदयस्यैव निमित्तत्वादमावास्यायां च सूर्योदयात्प्रागेवेष्या-
रम्भविधानान्निर्वापात् प्राक् चन्द्राभ्युदयज्ञानेनेदं प्रायश्चित्त-
मिति प्राप्ते।

हविरभ्युदियादित्येतावत्येव निमित्तत्वपर्यवसानेन निर्वापग्रहण-
स्याविवक्षितत्वादभ्युदयावच्छिन्नदिनप्रारम्भस्यैव निमित्तत्वं लाघवात्।
पौर्णमास्यां च तस्य नित्यत्वादेव निमित्तत्वानुपपत्तेः परिशेषादेव
दर्शविषयत्वम्। अतश्च निर्वापात् प्रागपि प्रक्रममात्रेण प्राय-
श्चित्तम्। अतएव यद्गृहीतं हविरभ्युदियादिति लिङ्गमप्युप-
पद्यते॥ ६॥ ५॥ ३॥

अनिरुप्ते॥ कर्मप्रवृत्तिमात्रस्य निमित्तत्वेऽपि नैमित्तिकोदेव-
तापनयस्तण्डुलग्रहणात्तण्डुलावस्थायामेव कर्त्तव्यः, पूर्वं तु प्राकृतीभ्य-
एव निर्वापादि कार्यमिति प्राप्ते।

तण्डुलग्रहणस्य विवक्षितत्वे दधिपयसोरपनयाभावेन देवतान्तर-
सम्बन्धानापत्तौ सह अपयतीतिवाक्यवैयर्थ्यापत्तेस्तस्य हविर्मात्रोप-
लक्षणत्वात्पूर्वमप्यभ्युदये वैकृतीभ्य एव निर्वापादि॥ ६॥ ५॥ ४॥

विनिरुप्ते॥ अर्धनिरुप्ते चन्द्राभ्युदये ज्ञाते अवशिष्टामुष्टयो न
तावत् प्राकृतीभ्यो निर्वप्तव्याः। निमित्तसत्त्वेन नैमित्तिकस्यापनयस्य
प्रवृत्तौ बाधकाभावात्। नापि वैकृतीभ्यः। पदार्थैकदेशस्या-

विहितत्वेन तच्च देवतान्तरसंयोगाप्रवृत्तेः। यथैव हि फलं न भक्षयेदित्यादिनिषेधा अवयवावयविसाधारण्येन प्रवर्त्तन्ते, एवमप- नयात्मकोनिषेधोऽपि। यथैव च फलं दद्यादित्यादिविधयोऽव- यविन्येव प्रवर्त्तन्ते, एवं देवतान्तरसंयोगोऽपि। अतश्च तूष्णीमेवा- वशिष्टोनिर्वापः। याज्ञिकास्तु पदार्थैकदेशस्याप्यार्थिकविधिविहित- त्वमङ्गीकृत्य वैकृतीभ्य एवानुतिष्ठन्ति ॥ ६ ॥ ५ ॥ ५ ॥

सान्नाय्य ॥ किमियमभ्युदितेष्टिः सन्नयत एवोतासन्नयतोऽपीति चिन्तायां, द्रव्योद्देशेन देवतामात्रविधिपक्षे यद्यपि द्रव्यसाहित्यम- विवक्षितं, तथाप्युद्देश्यानेकत्वादेवैतत्पक्षापरितोषाद्भावनान्तरविधिपक्षे च तद्विशेषणयोर्दधिपयसोः प्रकृताविष्टयोश्च साहित्यस्य विव- क्षितत्वाद्विधेयसामर्थ्यानुरोधेन सन्नयन्मात्र* विषयत्वमिति प्राप्ते।

न चेदन्येन शिष्टा इति न्यायेनाप्राप्तविशेषणस्यैव कल्प्यविशे- षणविधिविधेयत्वेन द्रव्यसाहित्यस्य तत्तद्यागसाहित्यवशेनैव प्राप्ततया विशेषणविध्यकल्पनादविवक्षितत्वेनासन्नयतोऽपि अभ्युदितेष्टावधि- कारः। अतश्चैन्द्राग्नस्याप्यौषधद्रव्यकत्वान्मध्यमादिभेदेनाग्नेयवदावृत्तिः। तत्रापि सह श्रपयतीति वचनेनाग्नेयैन्द्राग्नहविषोः सह श्रपणे विहितेऽष्टाकपालत्वद्वादशकपालत्वयोर्विरोधे मुख्यत्वादष्टाकपाल- त्वैवानुग्रहेण त्रयोऽप्यष्टाकपाला एव कार्याः। अथवा आद्य एवाष्टा- कपालं उत्तरौ तु अन्य एव चरू ॥ ६ ॥ ५ ॥ ६ ॥

साम्युत्थाने ॥ यदि सत्राय दीक्षितानां साम्युत्थितेरन्सोममपभज्य

---

* सर्व्वत्रेत्थमेव पाठः। सन्नयन्मात्र,– इति तु समीचीनं प्रतिभाति।

विश्वजिताऽतिरात्रेण सर्वस्तोमेन सर्वपृष्ठेन सर्ववेदसदक्षिणेन यजेरन्निति श्रुतम् । तत्र विश्वजिदयं सोमक्रयोत्तरमुत ततः पूर्वमपि उत्थाने भवेदिति चिन्तायाम् ।

यद्यपि त्यागापरपर्य्यायं व्युत्थानमात्रं निमित्तं, न तु स्वामिपदवाच्यार्थत्वमपि विशेषणं, नापि सोमक्रयः, तथापि सोमविभागस्यापि विश्वजिदङ्गत्वेन विधेयत्वात्पुनराधानवदेव नैमित्तिकत्वरूपपर्यालोचनया सोमक्रयोत्तरमेव विधीयते । न हि पूर्वं सोमोऽस्ति, येन सोमविभागरूपमङ्गमनुष्ठीयेत । न च बौधायनादिकल्पपर्यालोचनया पूर्वमपि सोमस्य सत्त्वाद्विभागोपपत्तिः । विक्रेतृसोमस्यैव क्रयात्पूर्वमुपकल्पनेन तस्मिन् यजमानस्वत्वाभावात् । अतः सोमक्रयोत्तरमेव व्युत्थाने विश्वजिदिति प्राप्ते ।

नात्र विभागविधिः, संसृष्टद्रव्याणां व्युत्थाने द्रव्यविभागस्यार्थप्राप्तत्वात् । अतएव सोमपदं संसृष्टवस्तुमात्रपरम् । अतश्च सोममपभज्येत्यस्यानुवादत्वात् विश्वजिन्मात्रं नैमित्तिकं सोमक्रयात्पूर्वमपि व्युत्थानस्य निमित्तस्य सत्त्वात्कर्त्तव्यमेव ।

किं च यद्यपि विभागोविधीयते, तथापि तस्यादृष्टविधया विश्वजित्यारादुपकारकाङ्गत्वस्यावश्यं क्रीतस्यैव स्वस्यैव वा सोमस्य विभागः । किं तु लौकिकस्यैव सत्रासम्बन्धिनोयस्य कस्यचित्सोमस्य प्रत्येकं विभागः । अतश्च तादृशनैमित्तिकस्य पूर्वमपि सम्भवादविशेषः । अयं विश्वजिद्गुणात्कर्मान्तरं स्वर्गार्थविश्वजिदपेक्षया आगूरणविश्वजिदपेक्षयाऽपि । तयोस्त्वेतदपेक्षया कर्मान्तरत्वे अभ्यासः प्रकरणान्तरं च प्रमाणं बोध्यम् । एतत्फलस्यागूरणविश्वजिदवदेव द्रष्टव्यम् ।

वस्तुतस्तु निमित्तभेदस्य निर्वक्तुमशक्यत्वात्काम्यान्तरन्यायेनैक एव विश्वजिद्वाक्यद्वयेन विधीयत इति नागूरणविश्वजितोऽस्य भेदः। प्रवृत्तस्य विश्वजिदुताप्रवृत्तस्येति विचारस्तु एतद्वचनाभावं कृत्वा चिन्तयेति ध्येयम्॥ ६॥ ५॥ ७॥

दीक्षा॥ सोमे एका दीक्षा तिस्रोदीक्षेत्येवं बहवोदीक्षापक्षाः श्रुताः। तत्र सोमे द्वादशदीक्षापक्ष एव। द्वादशरात्रीर्दीक्षितोभृतिं वन्वीतेति विहितस्य भृतिपदवाच्यदक्षिणाद्रव्यार्जनानुकूलयाच्ञा-रूपस्य भृतिवननस्य पक्षान्तरेष्वसम्भवात्। अतोऽन्ये पक्षाविकृति-विषयाः एकं वृणीत इत्यादिवदनुवादा इति भाष्यकाराभिप्रायः।

वार्त्तिककाराशयस्तु भिन्नप्रदेशस्थत्वेनैकं वृणीत इतिवदर्थ-वादत्वायोगात्सर्व एव विधय इति तावदविवादम्। प्रकरणानु-रोधाच्च नानेकेषामुत्कर्षकल्पना। तदरमेकस्यैव भृतिवननवाक्यस्य पाक्षिकत्वकल्पना। द्वादशरात्रिशब्दोवा दीक्षापरिमाणमात्रपरः।

वस्तुतस्तु लक्षणाऽपीयत्न विधौ, दीक्षितकर्त्तृकभृतिवचनस्यैव पक्षप्राप्तस्य प्रयोगमध्ये अत्यन्ताप्राप्तस्यैव वा विधेयत्वात् द्वादशरात्रि शब्दस्यानुवादत्वोपपत्तेः। अतोनैतस्य प्राक्षिकत्वकल्पनाऽपि। दीक्षा-पक्षाणामेव परं व्रीहियववद्विकल्पः। अस्तु वा तस्य विधेयत्वेऽपि लक्षणा, तथापि न दोष इति॥ ६॥ ५॥ ८॥

द्वादशाहस्तु॥ द्वादशाहे द्वादशरात्रीर्दीक्षितः स्यादिति वाक्येन यवमयश्चरुरितिवद्द्वादशदीक्षाकत्वस्यैव नियमनान्न विकल्प इति प्रत्युदाहरणमात्रम्।

अतएव षट्त्रिंशदह्नो वा एष यज्ञोद्वादशाह इति लिङ्गं छुपसत्तु-

त्यानां द्वादशत्वस्य प्रमाणान्तरसिद्धत्वाद्दीक्षा अपि द्वादशेति गमयति। तथाभौंधत एव दीक्षाभिरिति दीक्षावत्त्वं विधाय द्वाभ्यां लोमावद्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृग्द्वाभ्यां मांसं द्वाभ्यामस्थि द्वाभ्यां मज्जानमिति तद्वाक्यशेषे षट्द्विकानुक्रमणमपि ॥ ६ ॥ ५ ॥ ९ ॥

पौर्णमास्यां ॥ गवामयने, एकाष्टकायां दीक्षेरन्नेषा वै संवत्सरस्य पत्नी यदेकाष्टका इत्युपक्रम्य आर्त्तं वा एते संवत्सरस्याभिदीक्षन्ते यदेकाष्टकायान्दीक्षन्ते, व्यस्तं वा एते संवत्सरस्याभिदीक्षन्ते यदेकाष्टकायां दीक्षन्ते, अपो नाभिनन्दन्तोऽवभृथमभ्यवयन्तीत्यनेन तत्र दोषानभिधाय, चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासः तस्य न काचन निर्या भवतीत्यनेन चैत्रीं स्तुत्वा, चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन्नेषामेकाष्टकायां क्रयः सम्पद्यते तेनैकाष्टकां न छंवट् कुर्वन्तीति श्रुतम् ।

आर्त्तं दुःखयुक्तं शीतात्, व्यस्तं अयमपराहत्या*, अपोनाभिनन्दन्ति शीतादेव, निर्या दोषः, छंवट् रिक्तम् । अत्र जर्त्तिलयवागून्यायेन सर्वमिदमेकं वाक्यमिति तावदविवादम् । अतश्चतुरह इत्येव विधिः पयोहोमन्यायेन । तत्र च पौर्णमासीवाक्यशेषे चैत्र्याः स्तुतत्वाच्चैत्र्येव ।

न च वाक्यशेष एवोपक्रमोपसंहारयोरेकाष्टकायामाध्युत्तराष्टमीरूपायाः परामर्शात्तस्याः क्रयसम्पत्त्याऽनुग्राह्यत्वोक्तेश्च माघ्येव प्राप्नोति वाच्यम् । अष्टकाशब्दस्य कर्मविशेषनामतया तत्कालत्वेना-

* पाठोऽयं न समीचीनः। अयनपराहत्या,–इति तु समीचीनं प्रतिभाति।

इत्यामष्टकाशब्दप्रयोगे ऐमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमी-ष्वष्टका इति चतुर्ष्वपि तदष्टमीषु प्रयोगेण माध्युत्तराष्टमीग्रहण-एव प्रमाणाभावात् । द्वादशपौर्णमास्यो द्वादशाष्टका इति श्रुत्यन्तरे सर्वत्रैव प्रयोगाच्च । अतस्तैष्युत्तराष्टम्या अपि तत्त्वानपायात्तैष्या-एव पौर्णमासीपदेन ग्रहणात् तस्याः पुरस्ताच्चतुरहे एकादश्यां दीक्षेति प्राप्ते ।

इहव्यवहारे एकाष्टकाशब्दस्य माध्युत्तराष्टम्यामेव प्रयोगात्त-स्याश्च संवत्सरपत्नीत्वेनोपक्रमे स्तुतत्वात् माध्युत्तराष्टमीस्थकर्माङ्ग-देवतायाश्च, यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम् । संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गलीति तन्मन्त्रे संवत्सर-पत्नीत्वेन सङ्कीर्तनात् । माध्युत्तराष्टम्या एव एकाष्टकात्वप्रतीतेस्तस्यां क्रयसम्पत्त्यनुरोधेनोपक्रमोपसंहारयोः श्रुतत्वेन च माघ्या एव पौर्ण-मासीपदेनाभिधानात्ततः पुरस्तादेकादश्यां दीक्षेति सिद्धम् ।

अतएव सर्वोऽप्ययमर्थवाद एवं व्याख्येयः । यद्यपि दोषान्तरा-भावादेकाष्टकैव दीक्षायां प्रशस्ता, तथाप्यार्त्तत्वव्यस्तत्वानभिनन्दकत्व-रूपदोषत्रयात्तामतिक्रम्यापि चैत्रेव परं प्रशस्ता, माघ्येकादशी तु तदपेक्षयापि प्रशस्ततरा । एकाष्टकाया द्वादशदीक्षोत्तरचयोदश-दिनरूपायाः क्रयसम्पत्त्याऽनुग्टहीतत्वादिति ॥ ६ ॥ ५ ॥ १० ॥

दीक्षाकालस्य ॥ सोमे दीक्षितो न जुहोतीत्यादिना पुरुषार्था-नामग्निहोत्रादीनां कालत्वेन पर्युदासः प्रतिषेधो वा दीक्षितस्य श्रुतः । अवभृथे च कृते दीक्षामुक्तिः । तद्यदि दैवादिना कारणेन वन्ध्यातः पूर्वं क्रियमाणावभृथस्योत्कर्षस्तदा कालेऽग्निहोत्रं कर्त्तव्यमेव ।

यावन्तं कालं शास्त्रवशेन दीक्षानुवृत्तिः, तावत्कालं न जुहोतीति प्रतिषेधशास्त्रार्थावधारणादिति प्राप्ते ।

काललक्षणायां प्रमाणाभावाद्दीक्षैव निषेधावधिः । तस्याश्चा-निवृत्तत्वाच्च कर्त्तव्यमेवाग्निहोत्रादि ॥ ६ ॥ ५ ॥ ११ ॥

तत्र प्रतिहोमः ॥ दीक्षायां सत्यां सोमाङ्गत्वेन अग्निहोत्रप्रति-षेधेऽपि अग्निहोत्रवाक्ये दीक्षितभिन्नस्य कर्त्तृत्वाश्रुतेः काले तद-करणनिमित्तप्रत्यवायस्यावश्यकत्वात्तत्परिहारार्थं गौणकाले प्राय-श्चित्तपूर्वकं कार्य्य एवाग्निहोत्रहोमः । दैवापराधकृतदीक्षोत्कर्षे तु सुतरामिति प्राप्ते ।

यावज्जीवादिवाक्ये कालाद्यवच्छिन्नस्य जीवनादेर्निमित्तत्व-मित्यविवादम् । तेषां च न सायंकालत्वशुचित्वादिना तत्त्वेन तत्त्वेनावच्छेदकत्वं गौरवात् । अपि तु शब्दतोऽर्थतोवा यो निषिद्धः कालस्तद्भिन्नकालत्वेन । सायमादिकालविधेर्हि नियमविधित्वात्त-दितरकालनिवृत्तिरार्थिकी । एवं शुचित्वादिना अशुचिकाल-निवृत्तिरपि । निषेधोऽपि चात्र न विधेयक्रियाङ्गभूत एव विव-क्षितोऽपि अविशेषात्,* तस्मिन् सति विधेयक्रियाया अकरणस्य तत्राप्यावश्यकत्वाच्च ।

अतश्च यथैव पश्वर्थेनापि गोदोहनेनावरुद्धस्य प्रणयनस्य न चमसप्रयोजकत्वं, तस्मिन् सति तस्य कर्त्तुमशक्यत्वात् । अतएव न तदभावकृतं वैगुण्यमपि । एवं सोमाङ्गभूतेनापि निषेधेनावरुद्धस्य दीक्षाकालावच्छिन्नजीवनस्य नैमित्तिकानुष्ठापकत्वानुपपत्तेः न

* विवक्षितोऽविशेषात्,—इति पाठः समीचीनः प्रतिभाति ।

तदकरणे प्रत्यवायादि । अतो ऽपशुकामस्येव चमसेऽधिकारवद्‌दीक्षितस्यैवाग्निहोत्रादावधिकारो निषेधपक्षेऽपि फलितो भवति ।

यदा तु दीक्षितो न जुहोतीत्यस्याग्निहोत्रादिविध्येकवाक्यतया पर्युदासत्वमङ्गीक्रियते, तदा स्पष्ट एव दीक्षितस्य तत्रानधिकारः । अतश्च मुख्यकालेऽनधिकारात् गौणकाले करणमनाशङ्क्यम् । एवं दैवादिनाऽवभृथोत्कर्षेऽपि दीक्षावत्त्वस्य कथमप्यविशेषान्मुख्यकालेऽनधिकारस्य तुल्यत्वेन न गौणकाले प्रतिहोमकरणम् ॥ ६ ॥ ५ ॥ १२ ॥

प्रतिषेधश्च* ॥ कृते ऽवभृथे यद्युदवसानीयोत्कर्षो दैवादिना भवेत्तदा काले प्राप्तेऽग्निहोत्रहोम एव कर्त्तव्यः । तदकरणे वा प्रतिहोमः कार्यः । दीक्षाया अवभृथेनोन्मोचितत्वात् । यत्तु एतया पुनराधेयसंमितयेष्ट्वाऽग्निहोत्रं जुहोतीति वचनं, तत्प्रकरणान्तरन्यायात् सोमाङ्गतयोदवसानीयेष्ट्यङ्गतयैव वा कर्मान्तरविधायकमिति प्राप्ते ।

निषेधप्रतियोगित्वेनाग्निहोत्रादेरुपस्थितत्वात्तदपेक्षितावधिसमर्पकत्वेनाप्युपपत्तौ कर्मान्तरविधायित्वानुपपत्तेर्दीक्षोन्मोकेऽपि उदवसानीयेष्टिप्रतीक्षाया आवश्यकत्वात्पूर्ववदेवानधिकाराच्च प्रतिहोमादिकरणम् । यदा तु दीक्षा सञ्जाता यस्येति दीक्षित इति व्युत्पत्त्या वृत्तदीक्षोत्पत्तिकत्वमेव प्रतिषेधप्रयोजकं रूपमाश्रीयते, तदा दीक्षाभावेऽपि सर्वदा निषेधप्रसक्तौ उदवसानीयाया अवधित्वमव्याहतमेवेति न तदुत्कर्षे प्रतिहोमादि ॥ ६ ॥ ५ ॥ १३ ॥

---

* प्रतिषेधाच्च,—इति भाष्यधृतः पाठः ।

प्रतिहोमस्येत्॥ यदा अवभृथोत्कर्षे प्रतिहोमस्तदा कृत्वा चिन्तया विचार्यते। अग्निष्टोमसंस्थाके ज्योतिष्टोमेऽवभृथस्य सायङ्कालात्पूर्वमेव कर्त्तव्यत्वेन तदुत्तरं रात्रौ करणे एकस्यैव सायंहोमस्य दीक्षाविमोकोत्तरं गौणकाले करणम्। आप्रातराहुतेः सायंहोमस्य गौणकालोवाचनिकः। प्रातर्होमस्य सायंकालावधिवद्गौणकालस्यात्यतिक्रमे स्वकालक्रियमाणप्रातर्होमेन सह समस्य होमविधया तन्त्रेण करणम्। अवभृथोत्कर्षेणानेकहोमकालातिपत्तौ तु सर्वान् सायंहोमान् प्रातर्होमांश्च पञ्चहोमैर्विधिना समस्य होमविधिना च स्वकालक्रियमाणहोमेन सह तन्त्रेण कुर्यात्। न चातिपत्तिक्रमेण होमानां क्रमेणैव करणं युक्तम्। एकदेशकालकत्वेन समस्य होमपक्षे होमविधिवैयर्थ्यप्रसङ्गेन चानेकदर्शपूर्णमासातिपत्तिनिमित्तकपथिकृद्देव पृथक् करणानुपपत्तेः।

अतएव सर्वान् सायं होमान्, सायङ्काले प्रातर्होमांश्च प्रातःकाल एव कुर्यादित्यपास्तम्। स्वकालक्रियमाणहोमात् पूर्वमेवातिपन्नहोमानां कर्त्तव्यत्वात्। एवं षोड़शिस्तोत्रवति क्रतौ तस्य समयाध्युषितकालीनत्वेनावभृथस्य रात्रावेव क्रियमाणत्वात्तस्य द्वितीयदिने उत्कर्षे प्रातर्होमस्यैव पूर्वोक्तविधयाऽनुष्ठानम्। अनेकहोमकालातिपत्तावपि तथैव।

न च दर्शपूर्णमासयोः पौर्णमासोपक्रमयोरेव मिलितयोः फलसाधनत्वंवत्सायमुपक्रमयोरेव सायंप्रातर्होमाभ्यासयोरेकफलसाधनत्वस्य कल्पसूत्रेष्वभिधानात् षोडशिनि सायंहोमे अनधिकारे कथं प्रातर्होमेऽप्यधिकार इति वाच्यम्। प्रातस्तु षोडशिनीति जैमिनि-

सूचकद्वयादेव सायमुपक्रमकालस्य नैयत्याभावप्रतीतेः । अतएव कालाविच्छेदोद्घाटनेऽपि यद्युदवसानीयायाराग्नौ करणं तदा प्रातर्होमानुष्ठानं जैमिनिमते नानुपपन्नम् ॥ ६ ॥ ५ ॥ १४ ॥

प्रायश्चित्तं ॥ भिन्ने जुहोतीत्यादिप्रायश्चित्तं नैमित्तिकमपि फलापेक्षायां प्रकरणात् क्रत्वङ्गम् । निमित्तमपि भेदनादि न लौकिककपालादेः । प्रायश्चित्तसमाख्याबलेन क्रत्वङ्गभूतकपालादिभेदननिमित्तवैगुण्यपरिहारार्थत्वस्यैव कल्पनेन स्वतन्त्रादृष्टकल्पने गौरवात् ॥ ६ ॥ ५ ॥ १५ ॥

व्यापन्नस्य ॥ व्यापन्नमप्सु प्रहरतीति वाक्ये श्रुतस्य व्यापन्नशब्दस्य यदार्याणामभोज्यं केशकीटावपन्नादि तदर्थः, तद्वैव तेषां प्रयोगादिति शिष्यहितार्थमुक्तम् ॥ ६ ॥ ५ ॥ १६ ॥

विभागश्रुतेः ॥ ज्योतिष्टोमे दक्षिणादानात् प्राक् बहिष्पवमानार्थं तद्देशं कच्छं धृत्वा प्रसर्पतां उद्गातृप्रतिहर्तृप्रस्तोतॄणां मध्ये यद्युद्गाताऽपच्छिन्द्यादद्क्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत तत्र तद्दद्याद्यत् पूर्वस्मिन् दास्यन् स्याद्यदि प्रतिहर्ता सर्ववेदसन्दद्याद्यदि प्रस्तोता ब्रह्मणे वरं दद्यादित्यादिना तत्तत्कर्तृकापच्छेदे निमित्ते प्रायश्चित्तं श्रुतम् । तत्रापच्छेदोनाम विभागरूपं फलमेव, यदि वा तज्जनकक्रिया, सर्वथा तज्जनकक्रियाकर्तृत्वादेवाच तत्कर्तृत्वव्यवहारः । तस्यां चान्यतरक्रियाजन्ये उभयक्रियाजन्ये च विभागे एकैकस्यापि प्रत्येकमस्त्येव कर्तृत्वमिति उद्गातृमात्रनिष्ठक्रियाजन्यविभाग इव उभयनिष्ठक्रियाजन्यविभागेऽपि उद्गातृकर्तृत्वव्यपदेशोपपत्तेर्भवत्येव तत्रापि प्रायश्चित्तमित्युत्तरविवक्षया प्राप्यते ॥ ६ ॥ ५ ॥ १७ ॥

तत्र विप्रतिषेधात्॥ यौगपद्ये प्रायश्चित्तद्वयमविरोधोत्समुच्चये-नैव। प्रतिहर्त्रपच्छेदनिमित्तं हि सर्वस्वदानं उद्गात्रपच्छेदनिमित्ते पुनः प्रयोगेऽपि शक्यत एव कर्त्तुम्। अथ वा दक्षिणोत्कर्षविशिष्ट-पुनःप्रयोगमात्रं तन्नैमित्तिकं न पुनरदाक्षिण्यमपि। तस्यार्थप्राप्तत्वि-धानुवादत्वात्। अतः पूर्वप्रयोगेऽपि सर्वस्वदाने न कश्चिद्विरोध-इति प्राप्ते।

न तावत् पूर्वप्रयोगे एव सर्वस्वदानं असत्यप्यदाक्षिण्यस्य नैमित्तिकत्वे दक्षिणोत्कर्षस्यैव पूर्वप्रयोगे सर्वस्वदानेऽनुपपत्तेः। नापि पुनः प्रयोगे सर्वस्वदानम्। प्रतिहर्त्रपच्छेदवति प्रयोग एव तद्वि-धानात्। अन्यथा एकस्मिन् प्रयोगे प्रतिहर्त्रपच्छेदे कृतेस्तद्दत्त्वा-विशेषादुत्तरसर्वप्रयोगेषु सर्वस्वापत्तिः। निमित्तवति प्रयोगे नैमि-त्तिकस्य दैवादकरणे प्रयोगान्तरेऽपि तदापत्तिः। अतो विरोधाद-दाक्षिण्यसर्वस्वदाक्षिण्ययोर्विकल्प एव। पुनः प्रयोगमात्रं परमविरो-धाद्भवत्येव। तेनापि विकल्पं केचिदिच्छन्ति॥ ६॥ ५॥ १८॥

पौर्वापर्य्ये॥ यदा क्रमेण निमित्तद्वयसन्निपातस्तत्रासञ्जातविरो-धित्वादाद्यनिमित्तकमेव नैमित्तिकम्। अथ वा नात्र शास्त्रद्वयस्य सामान्यविशेषादिरूपतया बलाबलं, नापि प्रमाणतदभावरूपतया। उभयोरपि समतयैव प्रमाणत्वात्। अनुष्ठानवेलायां पौर्वापर्य्यन्तु न शास्त्रार्थावधारणायालम्। अतो विकल्प एवेति प्राप्ते।

यथैव नित्यं द्वादशशतं नैमित्तिकेन सर्वस्वेन बाध्यते, परत्वात्। तद्बलेन च द्वादशशतविधेर्निमित्तरहितप्रयोगविषयत्वकल्पनम्। तथैव परस्यापि नैमित्तिकत्वेन पूर्व्वस्य नैमित्तिकस्यापि परत्वाविशेषादेव

बाधः । पूर्व्वनैमित्तिकविधेश्च परनिमित्तरहितप्रयोगविषयत्वकल्पना, तद्वदेव चानुष्ठानकालीनमेव पौर्वापर्यं शास्त्रार्थावधारणवेलायां पूर्वमालोच्य व्यवस्थितविषयत्वकल्पनेति न कश्चिद्विरोधः ।

न च सञ्जातविरोधित्वेनेह परविज्ञानस्यानुत्पत्तिः । ज्ञापकप्रमाणस्य क्लृप्तत्वेन तदयोगात् । न ह्यचोत्तरं प्रमाणं पूर्वप्रमाणेनैकवाक्यतया स्वार्थबोधजनकम् । येन तदुपजीवित्वेन तदानुगुण्येन वर्त्तेत । अत उत्तरमेव निरपेक्षतयोत्पद्यमानं पूर्वप्रमाणस्य परनिमित्तवत्प्रयोगविषयत्वांशे मिथ्यात्वं कल्पयति ।

न च पूर्वमेव विज्ञानं परप्रमाणस्य पूर्वनिमित्तवत्प्रयोगविषयत्वांशे मिथ्यात्वं किमिति न कल्पयेत् । न ह्यत्र नित्यापेक्षया नैमित्तिक इव निरवकाशत्वमस्ति । उभयोरप्येकैकनिमित्तकप्रयोगे सावकाशत्वादितिवाच्यम् । पूर्वनिमित्तोपनिपातवेलायां परप्रमाणजन्यज्ञानस्य नियमेनोपस्थित्यभावेन धर्मिज्ञानाभावात्तद्गतस्य पूर्वनिमित्तवत्प्रयोगविषयत्वांशे मिथ्यात्वस्य कल्पयितुमशक्यत्वात् । परनिमित्तोपनिपातवेलायां पूर्व्वविज्ञानस्य चिकीर्षितविषयत्वेन पुरःस्फूर्त्तिकत्वाद्धर्म्मिज्ञानसत्त्वेन तद्गतमिथ्यात्वकल्पने न किञ्चिद्बाधकम् । यदि तु परनिमित्तोपनिपातोत्तरमेव पूर्व्वेण मिथ्यात्वकल्पनमित्याशङ्क्येत, तथापि यदा परनिमित्तोपनिपातोत्तरं पूर्वप्रमाणविस्मरणं तदाऽनेनोत्तरस्य मिथ्यात्वकल्पनानुपपत्तेरवश्यम्भवन्मते पूर्वप्रमाणस्मरणं कल्प्यम् । मन्मते तु यदा दैववशात् पूर्वप्रमाणस्मरणं, तदा तस्य मिथ्यात्वकल्पनेऽपि विस्मरणे परनैमित्तिकस्यैवानुष्ठानान्न किञ्चित्कल्प्यम् ।

तथा चायमत्र क्रमः। परनिमित्तोपनिपाते नैमित्तिकवाक्यार्थ-ज्ञानं, ततः पूर्वविज्ञानस्मरणं, ततः परविज्ञानस्य तेन सह विरोध-ज्ञानं, ततस्तेनापेक्षाबुद्ध्यात्मकेन विनश्यद्वस्थेन चतुर्थक्षणे पूर्वज्ञानस्य भ्रान्तित्वकल्पना, विरोधज्ञानदशायां तदुत्तरं वा परनैमित्तिक-वाक्यार्थस्मरणकल्पनेति न विरोधः। अतः सिद्धं परेण पूर्वस्य बाध इति॥ ६॥ ५॥ १९॥

यद्युद्गाता॥ क्रमेऽपि यद्युद्गातुरपच्छेदो जघन्यस्तदा तन्निमित्त-पुनःप्रयोगे सर्वस्वमेव देयं, न तु द्वादशशतम्। परनिमित्तपा-तात्पूर्वं तस्यैव देयत्वेन प्रसक्तत्वात्। तच यद्दद्यादित्यनेन यत्पूर्व्वप्रयोगे परनिमित्तपातात्पूर्वं देयत्वेन प्रसक्तं, तस्यैव दक्षिणात्वेन विधानात्। द्वादशशतस्य पूर्वनिमित्तेनैव बाधितत्वेन देयतयाऽप्रसक्तेः।

अतश्च यद्यपि सर्वस्वमप्यदाक्षिण्येन दक्षिणोत्कर्षेणैव वा पूर्वप्रयोगे वस्तुतो बाधितमेव, तथापि परनिमित्तपातात्पूर्वं बाधज्ञानाभावा-द्देयत्वेन प्रसक्तेर्न काचित् क्षतिः। यदा तु प्रतिहर्त्रपच्छेदो जघन्य-स्तदा तस्मिन्नेव प्रयोगे सर्वस्वं देयं, न तु पूर्वापच्छेदनिमित्तकः पुनः प्रयोगः कार्यः। न च सर्वस्वदानेनादाक्षिण्यस्यैव विरोधात्तद्बाधेऽपि पुनःप्रयोगबाधे प्रमाणाभावः। अदाक्षिण्यपुनःप्रयोगयोः समुच्चितयो-रेव नैमित्तिकत्वेन एकाभावे इतरस्यानुपपत्तेः। अतश्च यथैव पत्न्याः श्मश्रूणामभावात्केशानामपि न वपनं साहित्यस्य विवक्षित-त्वात्तथैवादाक्षिण्याभावे पुनःप्रयोगस्याप्यभावः।

यद्यपि च दक्षिणोत्कर्षस्य पुनःप्रयोगाङ्गतया विधानस्यावश्यक-त्वादेव पूर्वप्रयोगे अदाक्षिण्यस्यार्थप्राप्तत्वाद्दक्षिणान्तमित्यस्यानुवाद-

त्समुच्यते । तथापि पाक्षिकानुवादभियैवादाक्षिण्यलोपे पुनःप्रयोग-लोप इति द्रष्टव्यम् ।

वस्तुतस्तु सोममपभज्येतिवत् पाक्षिकानुवादत्वेऽपि पुनःप्रयोग-लोपे प्रमाणाभावः । न च तस्य संसृष्टद्रव्यमात्रोपलक्षणत्वान्न पाक्षि-कानुवादत्वमिति वाच्यम् । संसृष्टद्रव्यनाशेऽपि विश्वजित आवश्यक-त्वेन पाक्षिकानुवादत्वानिवारणात् ।

वस्तुतस्तु नायमनुवादः । तत्र तद्दद्यादित्यनेन पूर्वप्रयोगे दातव्यदक्षिणायाः पुनःप्रयोगाङ्गतया विधानेऽपि पूर्वप्रयोगाङ्गभूत-कर्मान्तरार्थं तस्मिन्नपि तस्या आवश्यकत्वेनादाक्षिण्यप्राप्त्यभावात् । न चैवं पुनःप्रयोगस्य ज्योतिष्टोमत्वादेव द्वादशशतादिरूपदक्षिणा-प्राप्त्युपपत्तेः तत्र तद्दद्यादित्यस्य वैयर्थ्यमिति वाच्यम् । तस्य पूर्वप्रयोगे एकविंशत्येत्यादिपञ्चकरणेन पुनःप्रयोगे द्वादशशतादेरपि प्राप्त्यापत्तौ तन्निवृत्त्यर्थत्वेन सार्थक्यात् । उद्गातुर्जघन्यत्वे सर्ववेदसप्राप्त्यर्थत्वाच्च ।

न चैवं केशश्मश्रुन्यायेन पुनःप्रयोगबाधः । तत्र द्वन्द्वेन साहित्य-स्योपादेय-केशश्मश्रुगतत्वेनोक्तत्वात् साहित्यावच्छिन्नस्यैव क्रियाङ्गत्वेन प्रत्येकं तदङ्गत्वाभावात् । प्रकृते त्वरुणैकहायन्योरिवापनयदेव-तान्तरसंयोगयोरिव च प्रत्येकमेव क्रियान्वयादेकवाक्योपादानादिना पश्चात् साहित्यावगमेऽपि नैकलोपे परस्य लोपः । न ह्यारुण्यासम्भवे एकहायनीलोपः, उपांशुयाजे देवतान्तरसंयोगाभावे चापनय इष्टः । प्रतिहर्तुः परत्वे पूर्वप्रयोगे सर्वस्वं दत्वा पुनःप्रयोगेऽपि तद्देयमिति सिद्धम् ।

यदा त्वाद्यप्रयोगे उद्गातृमात्रापच्छेदस्तन्निमित्तकद्वितीयप्रयोगे

च प्रतिहर्त्रपच्छेदस्तदा तच्चैव सर्वस्वमेव देयम्। नैमित्तिकत्वेन नित्यदक्षिणाबाधकत्वात्। न च पुनःप्रयोगस्य प्रायश्चित्ततया पूर्वप्रयोगाङ्गत्वात्तत्र तद्द्याद्दित्यनेन च पूर्वप्रयोगाङ्गभूतदक्षिणाया-एवोत्तरप्रयोगवृत्तित्वमात्रविधानादङ्गगुणविरोधन्यायेनाङ्गभूतपुनः-प्रयोगाङ्गसर्वस्वदक्षिणाबाधेन प्रधानभूतपूर्वप्रयोगाङ्गदक्षिणाया एव देयत्वमुचितमिति वाच्यम्। अपूर्वविधित्वाददृष्टार्थत्वादिदोषप्रसङ्गे-नोत्तरप्रयोगवृत्तिर्दक्षिणायाः पूर्वप्रयोगाङ्गत्वानुपपत्तेः। अतस्तस्यापि पुनःप्रयोगाङ्गत्वात्परेण नैमित्तिकेन पूर्वस्य बाधात् सर्वस्वमेव देयम् ॥ ६ ॥ ५ ॥ २० ॥

अहर्गणे ॥ द्वादशाहाद्यहर्गणे यद्येकस्मिन् कस्मिंश्चिदहनि उद्गातुरपच्छेदो भवति, तदा कृत्स्नस्याहर्गणस्यावृत्तिः। सुत्यागणस्यैव द्वादशाहपदवाच्यत्वेन फलसाधनत्वात्तस्यैव प्रायश्चित्तादिरूपाङ्ग-ग्राहित्वात्। अस्तु वोत्पत्तिवाक्ये प्रत्येकं करणत्वावगमाद् द्वाद-शाहपदेनापि च समुदायिनामेवोक्तेः प्रत्येकमेव फलं प्रति करणत्वम्। एकपदोपादानाच्च करणानां समुच्चयः। अतश्चाङ्ग-ग्राहित्वमपि प्रत्येकमेव। तथापि यत् क्रतुसम्बन्ध्युद्गाताऽपच्छिद्यात्तेन क्रतुना यजेतेत्यर्थावगमादुद्गातुस्य एकस्यैव सर्वसाधारणत्वेन सर्वा-वृत्तिरिति प्राप्ते।

नोद्गातुः क्रतुसम्बन्धो विवक्ष्यते, अपि त्वावश्यकत्वाद्यत्क्रतु-सम्बन्धिबहिष्पवमानार्थं प्रसर्पणमुद्गाताऽपच्छिद्यात्तेन* क्रतुना यजे-

---

* इत्थमेव पाठः सर्वत्र। प्रसर्पेण उद्गाताऽपच्छिन्द्यात्तेन,—इति भवितु-मुचितम्।

नित्यर्यावमतेस्तस्य च प्रतिसुत्यं भेदेन तत्सुत्याया एवावृत्तिः। तत्सुत्याया अपि च तत्सुत्याव्यवहितोत्तरमेवावृत्तिः। साङ्गपूर्वसुत्याकरणाव्यतिरेकेणोत्तरसुत्यायामनधिकारात् । अतएव पूर्वाङ्गानामप्यच नावृत्तिरिति ध्येयम् ॥ ६ ॥ ५ ॥ २१ ॥ ॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां

षष्ठस्य पञ्चमः पादः ॥

अथ षष्ठोऽध्यायः ।

षष्ठः पादः ।

सन्निपाते ॥ दर्शपूर्णमासादौ कल्पभेदः श्रुतः, वाशिष्ठादीनां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामित्यादिना । अत्र हि तनूनपातं यजतीत्यनेन एकदेशप्रवृत्तिनिमित्तनामधेयमङ्गीकृत्य विहितस्य द्वितीयप्रयाजस्य क्रमेण शाखाभेदेन समाम्नातयोर्नराशंस-तनूपान्मन्त्रयोरव्यवस्थया विकल्पेन द्वितीयप्रयाजसंबन्धित्वेन प्राप्तयोर्वाशिष्ठसंबन्धमात्रं नराशंसस्य क्रियते । अतएव नाराशंस इति तद्धितो द्वितीयप्रयाजपदस्यानुवादः । ततश्च परिशेषादेव तनूनपान्-मन्त्रे अन्यसम्बन्धसिद्धेस्तनूनपादन्येषामित्यपि षोडश्युत्तर इति वदनुवाद एव ।

न च नराशंसमन्त्रस्य पशुप्रकरणे पाठेऽपि दर्शपूर्णमासप्रकरणे पाठाभाव इति केषाञ्चिदुक्तं युक्तम् । पशुप्रकरणे आप्रीसूक्ते वैकृतनाराशंसमन्त्रपाठेऽपि नराशंसोऽग्न आज्यस्य वेत्वित्यस्य दर्शपूर्ण-मासप्रकरणे पाठात् । अतएवाश्वलायनादिभिरपि तत्रैव स पठितः । यत्तु नराशंसवाक्ये द्वितीयत्वादिविशिष्टप्रयाजान्तरविधिस्तस्य च वाशिष्ठसम्बन्धित्वेन विधानादन्येषामभाव इति । तन्न । तथा सति समिद्यागोत्तरत्वरूपद्वितीयत्वस्य नराशंसयागे विधानेऽपि वाशि-ष्ठानां तनूनपाद्यागबाधे प्रमाणाभावान्नराशंसोत्तरं तत्करणापत्तेः ।

न हि द्वितीयपदेन तत्कार्य्यकारित्वेन नाराशंसविधिः, येन तेषान्तनूनपाद्बाधः शङ्क्येत। तथात्वे सिद्धान्ते वासिष्ठानामप्युद्देश्यत्वेन वाक्यभेदापत्तेः।

न च तनूनपादन्येषामित्यनेनान्येषामेव तनूनपाद्विधानाद्वासिष्ठानां तद्बाधोपपत्तिः। तस्यैकवाक्यत्वेनोपपत्तौ वाक्यभेदाङ्गीकारे प्रमाणाभावात्। विशिष्टविधिकर्मान्तरकल्पनागौरवप्रसङ्गाच्च। अतः पूर्वोक्तप्रकारेण मन्त्रस्यैव वासिष्ठसंबन्धविधानेन कल्पभेद उपपादनीयः। स च दीक्षणीयादिद्वाराऽनेककर्त्तृकेषु सत्रादिषु प्राप्तः। अतः सत्रादौ भिन्नकल्पानामप्यधिकारः उत समानकल्पानामेवेति चिन्तायाम्।

अविशेषाद्भिन्नकल्पानामपि। न चैककल्पकरणेऽन्येषां वैगुण्यप्रसङ्गः। वासिष्ठानामित्यत्र मन्त्रस्य शुद्धवासिष्ठार्थत्वविधाने प्रकरणबाधाद्यापत्तेः, क्रतुयुक्तपुरुषधर्मत्वे च परिसङ्ख्यापत्तेर्वासिष्ठत्वस्य नराशंसमन्त्रे शौचे वैश्वामित्रविधानात् साक्षात्कर्त्तरि परिच्छेदकत्वेन विधानायोगेऽपि प्रयोजककर्त्तृभूतयजमानपरिच्छेदकत्वेन वासिष्ठत्वविध्युपपत्तेः। सत्रादावौदुम्बरीसम्मानवदेकवासिष्ठकर्तृकत्वेऽप्यन्येषां वैगुण्यानापत्तेः। अतोभिन्नकल्पानामप्यधिकार इति प्राप्ते।

विकल्पेन प्राप्तयोर्नियमार्थत्वेन वाक्यसार्थक्योपपत्तौ नियतप्राप्ताऽवासिष्ठव्यावृत्तिरूपपरिसङ्ख्याफलकत्वायोगाद्वासिष्ठोद्देशेनैव प्रमाणान्तरवशाद्वासिष्ठाभिलषितफलसाधनीभूतदर्शपूर्णमासाङ्गभूतद्वितीयप्रयाजद्वारा नराशंसमन्त्रविनियोगविधिः। अतश्च नराशंसमन्त्रस्यावासिष्ठेषु विनियोगाभावादेव निवृत्तिरिति न तत्परिसङ्ख्यायावाक्य-

प्रवृत्तिफलत्वम्। अतश्च भिन्नकल्पानामधिकारे एकाङ्गभूतमन्त्रपाठे इतरेषां फलानापत्तेः समानकल्पानामेवाधिकारः ॥ ६ ॥ ६ ॥ ९ ॥

वचनात्तु ॥ एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताभित्यत्रापि न भिन्नकल्पयोरधिकारः। द्वन्द्वस्य युगपदधिकरणवचनत्वेन पदद्वयेऽपि लक्षणावृत्तत्वात्। तदनङ्गीकारेऽपि वा साहित्यबोधार्थं पदद्वये लक्षणाया आवश्यकत्वाच्च। अन्यथा देवतात्वादेर्व्यासज्यवृत्तित्वानुपपत्तेः। अतस्तत्पुरुष एवायन्तदुत्तरश्चैकशेषः। अतश्च समासादुत्पन्नं द्विवचनन्तदर्थस्यैव द्वित्वमाह। तस्माद्राजद्वयसम्बन्धिनौ द्वौ पुरोहितौ समानकल्पावेव यजेयातामित्याद्यः पक्षः।

द्विवचनस्य विशेष्यान्वयित्वव्युत्पत्तेः सङ्ख्याधिकरणे व्युत्पादितत्वात् एकस्यानेकस्य वा राज्ञो द्वौ पुरोहिताविल्यपरः।

अथ वैकशेषकृत्वैव तत्पुरुषः कार्यः। इतरथा पदद्वयावृत्तिप्रसङ्गात्। राजपदवैयर्थ्यप्रसङ्गाच्च। अत एकस्यैव राज्ञो द्वौ पुरोहितावित्यन्यः।

पूर्वपदे लक्षणायां प्रमाणाभावात् पुरोहितं वृणीत इत्युपादेयदशायामेकस्यैव विवक्षितत्वेनैकराज्ञः पुरोहितद्वयाभावाच्च कर्मधारय एवायमिति प्राप्ते।

ब्राह्मणानामेव पौरोहित्यश्रवणात् कर्मधारयानुपपत्तेर्द्वन्द्व एवायम्। न च तत्र पदद्वये लक्षणा, युगपदधिकरणवचनत्वस्य निराकृतत्वात्। साहित्यप्रतीतेरानुमानिकत्वेनाप्युपपत्तौ लक्षणायां प्रमाणाभावात्। समाहारे परं एकत्वान्वयार्थं पदद्वयेऽपि समुदायलक्षणेति विशेषः।

वस्तुतस्तु इतरेतरद्वन्द्वेऽपि व्याप्यभावेन साहित्यप्रतीतेरानुमानिकत्वायोगादवश्यं प्रतीयमानस्य तस्य यद्यपि लाक्षणिकत्वमावश्यकमेव, तथापि तल्लक्षणाया एकशेषेऽपि समानत्वेन सर्वपक्षेष्वावश्यकत्वात् पूर्वोक्तयुक्त्या द्वन्द्वत्वोपपत्तिः। अतश्च राज्ञः पुरोहितस्य च भिन्नकल्पयोरप्यधिकारः। पुरोहितोऽपि च तस्यैव राज्ञः। पुरोहितत्वस्य सम्बन्धिकत्वेन राजप्रतियोगिकत्वावश्यम्भावे ऐहिकस्यैकराज्यप्रतियोगिकत्वरूपसायुज्यफलकत्वस्यान्यथानुपपत्तेः। अस्तु वाऽन्यस्यापि।

भिन्नकल्पत्वं च यद्यपि न नराशंसमन्त्रे, राज्ञोऽनुरोधेन पुरोहितस्यापि नराशंससमानकल्पस्यैव सम्भवेन तादृशयोरेव तयोरधिकारोपपत्तेः। तथापि सोमफलचमसरूपभिन्नकल्पयोरप्यधिकारः। तत्रापि न विकल्पः। राज्ञः प्राथमिकत्वान्निमित्तत्वाच्च तन्नैमित्तिकेन सोमस्य बाधात् ॥ ६ ॥ ६ ॥ २ ॥

सत्राणि ॥ सत्रे ये यजमानास्त ऋत्विज इति श्रुतम्। तत्र न तावद्यजमानानां ऋतुयजनकर्तृत्वरूपऋत्विक्त्वमादाय द्वयोः प्रथमान्तयोः समानाधिकरण्येनान्वयः। स्वामिसप्तदशा इति न्यायेन प्राप्ततया वाक्यवैयर्थ्यापत्तेः। अतोऽत्र ऋत्विक्पदं परिक्रयक्रीतत्विक्परम्। तेनापि च न यजमानपदस्य यागकर्तृभिन्नाः* इत्येवं सामानाधिकरण्येनान्वयः। स्वात्मनि परिक्रयासम्भवेन बाधात्। न च ऋत्विक्पदेन प्रकृतौ वस्तुतो ये परिक्रयक्रीतास्तत्कार्यकर्तृनभिधाय तेन सह यजमानपदस्याभेदान्वयः। सुबन्तयोः परस्परान्वयस्या-

---

* यागकर्त्रभिन्नाः—इति भवितुमुचितम्।

व्युत्पन्नत्वात् । विशिष्टकर्त्तृलक्षणाऽपेक्षया तत्कार्यलक्षणाया एव ऋत्विक्पदे न्याय्यत्वाच्च ।

अतो यो होता सोऽध्वर्युरितिवज्ञ्चग्रन्थे ऋत्विक्पद एव तत्कार्यं लक्षयित्वा यजमानसंस्कारार्थत्वेन तद्विधीयते । यच्छब्दप्राथम्याभ्यां यजमानस्यैवोद्देश्यत्वप्रतीतेः । अतएव फलमुखत्वादप्राकृतकार्यकल्पनाऽपि न दोषः । एवं च ऋद्धिकामत्वाविशेषाच्चयाणामपि वर्णानामार्त्विज्यसंस्कार्यत्वावगतेस्त्रयाणामपि सत्रेऽधिकारः । अतएव दाद्शाहे बार्हद्गिरं ब्राह्मणस्येत्यादि लिङ्गमपि सङ्गच्छते । एवं च यजमानसंस्कारकैरेव ऋत्विक्पदार्थैः प्राकृतक्रतूपकारस्यापि सिद्धेः न तदर्थं परिक्रयादिभिः ऋत्विगन्तरसम्पादनमित्यपि द्रष्टव्यमिति प्राप्ते ।

ज्ञापकसत्त्वे व्यवहिताम्वयकल्पनया शाब्दबोधस्य लोके दृष्टत्वादिहापूर्वविधित्वादिष्टरूपाप्राकृतकल्पनादिदोषभिया यच्छब्दस्य व्यवहिताम्वयेन स्वरूपप्राप्तिमाचसूचनेन वा ऋत्विक्कार्यस्यैवोद्देश्यत्वमङ्गीकृत्य यजमानाः कर्त्तारोविधीयन्ते । न चैतावताऽनार्त्विज्यकर्त्तृकत्वं शंक्यं, यजमानानामपि ऋत्विक्त्वस्य साधितत्वात् । वरणादिविध्युन्नीतं यजमानभिन्नत्वं परमतिदेशप्राप्तमुपदेशेन बाध्यते । न त्वेतावताऽब्राह्मणकर्त्तृकत्वमपीति तदनुग्रहाय ब्राह्मणानामेवाधिकारः । बार्हद्गिरादिदर्शनन्त्वहीनाभिप्रायेण ॥ ६ ॥ ६ ॥ २ ॥

वासिष्ठानां ॥ प्रकृतौ वासिष्ठो ब्रह्मा वैश्वामित्रोहोतेति ब्रह्मत्वाद्युद्देशेन वासिष्ठादिविधानात्तयोस्तु विरुद्धकल्पत्वात्सत्रे विकल्प इति प्राप्ते ।

य एव कश्चित् सोमभागानधीयते* स एव वासिष्ठ इत्यर्थवादेन ब्राह्मणपदस्यैव विधिस्त्वर्वासिष्ठपदस्य लक्षणया सोमभागाध्येतृमात्रपरत्वाभावाच्छ्रक्यार्थविध्यभावेन वैश्वामित्रयजमानकस्यागानामेवाधिकारः।

भाष्ये तु य एव कश्चित् सोमभागानधीयीत स एव ब्रह्मा भवेदिति वाक्यमुदाहृत्य तत्र विधित्वाङ्गीकारेण वासिष्ठो ब्रह्मेत्यस्य तदर्थवादत्वाच्छ्रक्यार्थविध्यभाव इत्युक्तम् ॥ ६ ॥ ६ ॥ ४ ॥

विशाख्य ॥ सारस्वतसत्रे, परस्परैर्वा एते स्वर्गं लोकं यन्ति ये अनाहिताग्नयः सत्रमासत इति विधौ सत्रपदस्य प्रकरणेन सङ्कोचे प्रमाणाभावात् सर्वसत्रेष्वपि अनाहिताग्नीनामपि आहिताग्निसहितानामधिकार इति मन्यते ।

अत एव सारस्वतसत्रवदेवेतरसर्वसत्रव्यतिरिक्तविषयमेवाधानगतात्मनेपदम् । इष्टिसोमोत्तरकालता तु कलङ्कलादेकं कश्चिन्ताहृग्नं इष्टिसोमकर्त्तारमपेक्ष्योपपन्नैव । न हि तत्रेष्टिसोमयजमानकर्तृकत्वमपि विधीयते वाक्यभेदप्रसङ्गादिति प्राप्ते ।

एकपदोपादानेन वाक्यभेदाभावादिष्टिसोमयजमानकर्तृकत्वावगतेस्तत्र आधानगतात्मनेपदानुरोधादाहिताग्निमात्रकर्तृकत्वावगतेः सारस्वतसत्रे प्रकरणस्थविधिवाक्येन, स औत्सादिवत्तस्यैवानाहिताग्नेरभ्यनुज्ञानादात्मनेपदानुरोधेनैवेतरसत्रेषु आहिताग्नीनामेवाधिकारः ॥ ६ ॥ ६ ॥ ५ ॥

शुक्रादीनां ॥ शुक्रादिभ्यात्मनेपदाश्रवणादौदुम्बरीसंमानवद्गुणत्वाच्च यस्य कस्य चिद्यजमानस्य पात्रैरपि सत्रेऽधिकार इति प्राप्ते ।

* अधीयीत इति समीचीनं प्रतिभाति ।

यस्यैव पात्रैरुपक्रान्तः प्रयोगस्तस्यैव यजमानस्य सत्रप्रयोगमध्ये कदाचिन्मरणे यदि तत्पात्रैरस्य दाहः तदा सत्रवैगुण्यम्। यदि न दाहस्तदा आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च दक्षिणे हस्ते जुहू-मासादयतीत्यादिना विहितस्य पात्रप्रतिपत्तिपूर्वकस्य पात्रगुणक-दाहस्य लोपप्रसङ्गः। अतः साधारणान्यन्यानि पात्राण्युत्पाद्य सत्रेऽधिकारः ॥ ६ ॥ ६ ॥ ६ ॥

पुरुषकल्पे ॥ यासु विकृतिषु सप्तदश सामिधेनीरनुब्रूयादिति श्रुतं, तासु वैश्यस्यैवाधिकारः। प्रकृतौ सप्तदश वैश्यस्येत्यनेन तत्तद्विकृतिस्थसाप्तदश्यानुवादेन वैश्यस्य कर्तृत्वेन विधानात्। वैश्योद्देशेनापूर्वसाप्तदश्यविधौ पाञ्चदश्यबाधापत्तेः। वासिष्ठानामित्यत्र तु व्यवस्थार्थत्वात्तथाऽङ्गीकरणमिति विशेषः। अतश्च वैश्यकर्तृक-साप्तदश्यानुरोधेन तस्यैव तास्वधिकार इति प्राप्ते।

सामिधेनीसाधनीभूतसाप्तदश्योद्देशे विशिष्टोद्देशापत्तेः, साप्तदश्य-मात्रोद्देशे च विकृत्यपूर्वसाधनीभूतसामिधेनीनामेव विशिष्योप-स्थापकाभावेनानुवादायोगात् यूपसाप्तदश्यादावपि विधानापत्तेः, प्रकरणानुग्रहाच्च वैश्योद्देशेनैव तदधिकारकदर्शपूर्णमाससम्बन्धि-सामिधेनीवृत्तित्वसम्बन्धेन साप्तदश्यं विधीयते। अर्थाच्च वैश्यस्य निमित्तत्वं विकृतौ सामैमिन्तिकार्थं पुनः श्रवणमिति सर्वाधि-कारः ॥ ६ ॥ ६ ॥ ७ ॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां

षष्ठस्य षष्ठः पादः।

अथ षष्ठोऽध्यायः।

सप्तमः पादः।

स्वदाने ॥ विश्वजिति सर्व्वस्वन्ददातीति श्रुतम्। तत्र पित्रा- दीनामपि ज्ञातित्वेन स्वशब्दवाच्यत्वाद्धनवदेव दानम्। न च पित्रादिषु यथेष्टविनियोज्यत्वरूपस्वत्वस्य, स्वामी रिक्थक्रयसंविभाग- परिग्रहाधिगमेष्वित्यादिस्वत्वहेतुभावेनासम्भवात्पितृत्वाद्यतिरेकेणा- त्मीयत्वाभावात्स्वत्वत्यागघटितदृदातिकर्मत्वानुपपत्तिः। कन्यापुत्र- दानादेरपि स्मृतिषूक्तत्वेन तत्रापि स्वत्वाङ्गीकारात्। अस्तु वा तदनुरोधेन परस्वत्वापादानमेव दानपदार्थ इति प्राप्ते।

परविधेयीकरणमात्रेण लोके दानशब्दप्रयोगाभावात्स्वत्वत्याग- पूर्वकपरस्वत्वापादानमेव दानपदार्थः। न च पित्रादौ स्वत्वे प्रमाण- मस्ति। स्वत्वहेतूनामभावात्। कन्यादानादौ ददातेर्गौणत्वात्। न चेह तदाश्रयणं युक्तं, स्वशब्दस्य स्वत्वाश्रयीभूतधनपरत्वेनाप्युपपत्तेः। किञ्चायं स्वशब्दः प्रत्येकशक्त्यैवात्मीयज्ञातिधनेषु वर्त्तते। सर्वानु- गतैकशक्यतावच्छेदकाभावात्। अतश्चैकस्मिन्प्रयोगे एकस्यैवार्थस्य ग्राह्यत्वाद्दात्यनुरोधेन धनस्यैव ग्रहणम् ॥ ६ ॥ ७ ॥ १ ॥

न भूमिः ॥ येयं महापृथिवी तस्याः सार्वभौमधनत्वात्तेन दानमिति प्राप्ते।

सार्वभौमस्यापि न तस्यां स्वत्वम्। जयस्यापि प्रभुस्वामिकधन-क्षेत्रादिविषय एव स्वत्वोत्पादकत्वात्। महापृथिव्यां तु राज्यमात्रा-धिकारस्यैव जयेन सम्पादनात्। राज्यं हि स्वविषयपरिपालनं कण्टकोद्धरणरूपम्। तन्निमित्तकं च तस्य कर्षकेभ्यः करादानं दण्ड्येभ्यश्च दण्डादानमित्येतावन्मात्रम्। न त्वेतावता तस्यां स्वत्वम्। तथात्वे वनगततृणकाष्ठादावपि स्वत्वापत्तौ तत्र स्वत्वोत्पादकपरि-क्रयविधिविरोधापत्तेः। तद्विषयस्थप्रजादिगृहादिष्वपि स्वत्वापत्तेश्च। तस्मान्नासौ देया माण्डलिकेनापि मण्डलम्। परिक्रयादिलब्धं गृहक्षेत्रादिकं तु देयमेव ॥ ६ ॥ ७ ॥ २ ॥

अकार्यत्वात् ॥ अश्वादयः केसरिणोऽपि न सर्वस्वे देयाः। न केसरिणो ददाति नोभयतोदतः प्रतिगृह्णातीति तेषां पर्युदासात्। यद्यपि चानारभ्याधीतेनानेन रागतः प्राप्तस्यैव मित्रादिभ्योऽश्वदानस्य, यथा* श्राद्धे दक्षिणां ददातीत्यादावनियमेन विहितस्यापि चाश्वविषये ऐच्छिकस्य दानस्य प्रतिषेध एव क्रियते, तथापि विश्वजित्प्रकरणस्थेनानेन पर्युदास एव। सर्वस्वपदेन नियमत एव सर्वदानस्य विहितत्वेनाश्वांशेऽपि तत्प्रवृत्तेर्वैधतया निषेधपक्षे विकल्प-स्यापरिहार्यत्वात्। आवश्यकी चेयं वाक्यद्वयकल्पना। इतरथा-ऽश्वप्रतिग्रहेष्ट्यधिकरणादौ लौकिकाश्वदाननिषेधकथनानुपपत्तेः। नोभयतोदतः प्रतिगृह्णातीति पुरुषार्थः प्रतिषेधो दानलक्षणया वा पर्युदास इत्यप्यवधेयम्।

वस्तुतस्तु प्राकृतस्यैव नैमित्तिकस्य सर्वस्वदानस्यानैमित्तिकत्वार्थं

---

* तथा — इति पाठः समीचीनः प्रतिभाति।

विशेषत्वस्य वक्ष्यमाणत्वात् प्रकृतौ च दक्षिणार्थभागे पूर्वस्यैवाश्वानां प्रत्यक्षैरनारभ्याधीतेनैव सन्निषेधोपपत्तौ न निरूढाग्निप्रकरणे वाक्यान्तरकल्पनमपि। अत एव ज्योतिष्टोमतद्विकारान्तर्भूते सर्वस्वदानेऽश्वानां दानमिष्टमेव ॥ ६ ॥ ७ ॥ ३ ॥

नित्यत्वाच्च ॥ यत्किञ्चित्पुरुषस्य भोग्यं कृत्स्नाकृत्स्नधनधान्य-गवादि, तत्सर्वं ददातीति शास्त्रार्थावधारणाद्यस्यापि यन्नास्ति सोऽपि तदर्जयित्वा दद्यात्कृत्स्नार्थविधित्वाभावादिति प्राप्ते।

षष्ठविधिप्रकारापत्तेर्योदकप्राप्तदानानुवादेन सर्वतामात्रविधानात्प्रसिद्धस्वत्वेष्वेव सर्वशब्दस्योपपत्तौ अप्रसिद्धस्वत्वार्जनाक्षेपकत्वा-नुपपत्तेश्च नार्जयित्वा देयम् ॥ ६ ॥ ७ ॥ ४ ॥

शूद्रश्च ॥ धर्मार्थं भृत्यर्थं वा परिचारकत्वेनावस्थितः शूद्रोऽपि न देयः। तत्रास्य स्वत्वाभावात्। परवश्यत्वानभ्युपगमसम्भवाच्च। गर्भदासादयस्तु देया एव ॥ ६ ॥ ७ ॥ ५ ॥

दक्षिणाकाले ॥ दक्षिणाकाले यत्रास्य स्वत्वं तस्यैव दानं न तु ततः प्रागपि यत्प्राप्तोपभोगं धनं तदनुपभुज्य प्रयत्नेन धारयित्वा देयम्। धारणप्रयोजकत्वे प्रमाणाभावात्। भाविनस्तु तदानीं स्वत्वाभावादेवाशक्यं दानम्। न च भाविन्यपि प्रतिश्रवणमात्रेण स्वत्वोत्पत्तिः। तथात्वे दत्तस्य पुनर्दानासम्भवेन, देयं प्रतिश्रुतं चैवेति विधिवैयर्थ्यप्रसङ्गात्। ददातेः समर्पणमात्रार्थत्वे लक्षणाप्रसङ्गाच्च। प्रतिश्रवणेन च स्वोपभोगान्यदानायोग्यता परं जन्यते। उक्तदान-नियमात्। यथान्यस्मै प्रतिश्रुतमित्यन्यस्मै दाननिषेधाच्च। न तु स्वत्वं, निर्वापवत् ॥ ६ ॥ ७ ॥ ६ ॥

अशेषत्वात् ॥ ज्योतिष्टोमे तद्विकारे तदन्यस्मिन्वच सर्वस्वदान-माम्नातं तत्र हन्ता कथा। तत्र तु कर्मारम्भे एव त्रिधा यजमानेनात्मीयं धनं वचनाद्व्यवस्थापितं, भक्षार्थं क्रत्वर्थं दक्षिणार्थं चेति। तत्र सर्वस्य स्वत्वाविशेषात् त्रिविधस्यापि दानं न तु दक्षिणार्थ-भागस्यैव सर्वता। तस्य प्रकृतौ दक्षिणार्थत्वे सर्वस्वदानविधिवैयर्थ्यम्। तदभावे भागत्रयस्याप्यविशेषाद्दक्षिणार्थोऽयं भाग इति व्यवहारा-नुपपत्तिः। अतश्च प्रत्यक्षवचनोपदिष्टसर्वस्वदानवशेन अतिदेशप्राप्त-कर्मशेषलोपः। पदार्थानां प्रधानत्वादङ्गभूतदक्षिणानुरोधेन बाधस्य प्रमेयवत्वाबलन्यायेनानुपपत्तेर्वा किञ्चिन्नातवे शिष्टा सर्वमन्यत्प्रदी-यतामिति प्राप्ते।

दक्षिणार्थेन निर्दिष्टस्य तत्सम्बन्धप्राप्तौ सर्वतामात्रविधानेन लाघवमिति तस्यैव सर्वस्य दानम्। न चैवं प्रकृतावपि तस्य दाना-पत्तेश्च विधिवैयर्थ्यं, इतरथा तस्य दक्षिणार्थत्वानुपपत्तिरिति वाच्यम्। यद्येतावता ऋत्विजोनानमेयुरपि तु सर्वस्वेनेत्यनेन वचनेन द्वादशशतेनानत्यसम्भवे तस्यापि दक्षिणार्थत्वात्। अत्र दक्षिणार्थ-भागस्यैव देयत्वेऽवस्थिते पूर्वतनानि षड्धिकरणानि कृत्वा चिन्तयेति केचित्।

वस्तुतस्तु पित्रादीनामपि दक्षिणाभागान्तःपातेन विचारोपपत्तेः न कृत्वाचिन्तात्वम् ॥ ६ ॥ ७ ॥ ७ ॥

अहर्गणे ॥ अस्त्यष्टरात्रोऽहीनः। तस्य, विश्वजित्प्रथममहः, ततोऽभिप्लवः षडहः, ततोऽभिजित्, पशुकामो ह्येतेन यजेतेति श्रुतः। तत्र विश्वजिति प्रकरणान्तरोक्तन्यायेन कर्मान्तरे नामाति-

देशेनैकाहकाण्डपठितविश्वजितो धर्मः सर्वस्वं, अन्येषु तु गणत्वाद्-द्वादशाहतो ज्यौतिष्टोमिकी। द्वादशाहे च प्रतिसुत्यं भेदेनातिदेशोऽपि प्रयोगैकत्वेन कर्त्रैकत्वस्य दशमे वक्ष्यमाणत्वात्। तद्वानन्त्यर्थाया अपि दक्षिणायास्तन्त्रेणादावन्ते वा देयत्वप्रसक्तौ अन्वहं द्वादशशतं ददातीत्यनेनावृत्तिफलकोऽन्वहकालो विधीयते। द्वादशशतस्यापि तु विधाने वाक्यभेदापत्तेः। प्राकृतषष्टिपचादिदक्षिणामात्रोपलक्षणं तत्। तेन या दक्षिणा तन्त्रेण देयत्वेन प्रसक्ता, तां प्रत्यहं ददातीति तद्वाक्यार्थः। त्रिदिवाष्टरात्रे नामातिदेशप्राथम्याभ्यां विश्वजिद्धर्मानुग्रहप्राप्तावपि भूयोऽनुग्रहस्य न्याय्यत्वाद्द्वादशशतस्यैव तन्त्रेणोपकारकत्वप्रसक्तेः तस्यैवान्वहमित्यनेनावृत्तिकरणाद्द्वादशशतमेव प्रत्यहं देयमिति वार्तिककाराशयः। भाष्यकारीयस्त्वष्टरात्रप्रकरणस्थेनैव हीयते वा एष पशुभिर्यो विश्वजिति सर्वस्वं न ददातीत्यनन्यथासिद्धलिङ्गोपष्टम्भप्राथम्यादिना तत्कल्प्यविधिनैव वा सर्वस्वविधानादाद्य एव सर्वेषु वा अहःसु सर्वस्वं देयमिति ॥ ६ ॥ ७ ॥ ८ ॥

विकारः ॥ प्रकृतिभूते विश्वजिति द्वादशशतादिन्यूनधनस्यापि सर्वस्वपदवाच्यत्वोपपत्तेस्तद्वतोऽप्यधिकार इति प्राप्ते।

प्रकृतौ ज्योतिष्टोमे यद्येतावता ऋत्विजो नानमेयुरपि तु सर्वस्वेनेत्यनेन द्वादशशतासाध्यत्वोमानतौ सर्वस्वविधानात्तत्र च तदधिकस्यैव योग्यतया प्राप्तेस्तादृशस्यैव चात्र पक्षप्राप्तस्य नियममात्रकरणाद्द्वादशशताधिकधनवत एव विश्वजित्यधिकारः ॥ ६ ॥ ७ ॥ ९ ॥

अपरिमिते ॥ आधाने एका देया षट् देया द्वादश देयाः

शतं देयं सहस्रं देयमपरिमितं देयमिति श्रुतम्। तत्रापरिमित-शब्दः परिमाणशून्यमवयवव्युत्पत्त्याऽभिधीयते। न च परिमाणशून्यस्य दानं सम्भवतीत्यतः प्रकृतपरिमाणशून्यत्वमर्थः। अतः प्रकृतपरि-माणप्रतिषेध एवायं इति प्राप्ते।

ज्ञातपरिमाणेऽपि बाहुल्यमात्रेण लोके अपरिमितशब्दप्रयोगा-द्बाहुल्ये शक्तिः। ततश्चाश्वकर्णादिवद्रूढ्या योगबाधान्नायं पूर्वपरि-माणप्रतिषेधः। अपरिमितशब्दस्य नञ्समासे तदन्तर्गतस्य नञः क्रियान्वयव्युत्पत्त्यभावेन निषेधायोगाच्च। प्रकृतपरिमाणाति-रिक्तानियतपरिमाणकदानान्तरविध्यङ्गीकारे च लक्षणापत्तेर्वरं बहुत्वावच्छिन्नद्रव्यकदानान्तरविधिरेवायम्। बहुत्वस्य चापेक्षितत्वेन पूर्वप्रकृतसहस्रावधिकत्वनिश्चयात्तदपेक्षयाऽधिकमेवापरिमितम्॥६॥७॥१०॥

परकृति॥ दर्शपूर्णमासयोरिति हस्माह वट्कु*र्वार्ष्णिर्माषान्मे पचतेति श्रुतम्। इदं चैककर्तृकोपाख्यानरूपत्वात्परकृतिः। अयं चारण्याशनविधेः शेषः। बहुकर्तृकोपाख्यानपरं च वाक्यं पुराकल्पः। सत्रे उल्मुकैः सह पूर्वे समाजग्मुः तानसुरा रक्षांसि निर्जघ्नुरिति। अयं च गृहपतेरेवाग्निषु त्रिर्मन्थ्यं निर्वपेदग्निर्मन्थ्याग्निसंसर्ग-स्तुत्यर्थं उल्मुकसंसर्गनिन्दकः संस्तद्विधेः शेषः, न तु स्वतन्त्रो विधि-रिति औदुम्बराधिकरणे निर्णीतमेव। परकृत्युदाहरणं तु यदि विधिस्तदा कृत्वा चिन्तया विचार्यते।

---

*. वक्रु, इति भाष्यधृतः पाठः।

दृष्णिगोत्रोत्पन्नाधिकारकदर्शपूर्णमासोद्देशेन तत्कर्तृसंस्कारार्थं-तया वा माषपाकविधिरिति तद्गत एव माषपाकेऽधिकारो-वैश्यनिमित्तकसान्नाय्यवत्। न चात्र प्राच्यत्ववद्वृष्णिगोत्रत्वं दुर्वचं, येन तत्कर्तृकस्य विधेः सामान्यविषयत्वं स्यादिति प्राप्ते।

स्तुत्युपादेयत्वेनोपात्तस्य दृष्णिगोत्रत्वस्य विधेयमाषपाकविशेषण-त्वकल्पने प्रमाणाभावान्माषपाकमात्रविधानेन सर्वाधिकारः॥ ६॥ ७॥ ११॥

सहस्रसंवत्सरं॥ पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः पञ्चपञ्चाशतः सप्तदशाः पञ्चपञ्चाशत एकविंशा विश्व-सृजामयनं सहस्रसंवत्सरमिति श्रुतम्। अत्र पञ्चाशच्छब्दः संख्या-पर एव, त्रिवृत्संवत्सरशब्दौ तु लक्षणया त्रिवृत्स्तोमकसंवत्सर-साध्यक्रतुवृत्तिपरौ, पञ्चाशच्छब्दविशेषणं पञ्चशब्दोऽपि। तेन तादृशक्रतुवर्त्तिनी इयं पञ्चसंख्यावच्छिन्ना पञ्चाशत्संख्येति पार्ष्ठि-कान्वयवेलायां फलितार्थः। तदिह त्रिवृदादिस्तोमकत्वं यद्यपि साक्षात्सम्बन्धेनाहन्येव, तथापि तादृशाहर्घटितत्वात्सम्वत्सरेऽपि तत्सम्भवतीति न कोऽपि दोषः। तत्र सम्वत्सरशब्दोऽपि मुख्यया वृत्त्या संवत्सरमेवाभिधत्ते। तेन मनुष्याणां सहस्रायुष्याभावात्ति-र्यगधिकरणे निराकृतोऽपि श्रुतिबलाद्गन्धर्वादीनामेवाधिकारः। तेषां लभ्याद्युपसंहारासामर्थ्यान्मनुष्याणामेव वा रसायनलब्धसह-स्रायुषां वा। रसायनादेरेतावद्दायुःसम्पादकत्वे प्रमाणाभावाच्छता-युर्वै पुरुष इति श्रुतेश्चैकेनारब्धस्य पुत्रादिपारम्पर्येण समापनमिति कुलकल्पो वा। शास्त्रफलं प्रयोक्तरीति न्यायस्य विना वचनमपवादे

प्रमाणाभावात्समस्तकर्मानुष्ठानाभावे विकलानुष्ठायिनां फलानुत्पत्ति-प्रसङ्गात्सचारम्भादेव सहस्रायुष्ट्वं जायत इति वा कल्प्यम् । एतादृशकल्पनेऽपि प्रमाणाभावात् पञ्चपञ्चाशत इति यजमानाभि-प्राया संख्या । तेनैकोऽपि त्रिवृत्स्तोमकयाग उक्तः संवत्सरः पञ्च-पञ्चाशत्संख्याकैर्यजमानैः सम्बध्यमानस्तावत्संख्य इत्युपचर्यते । अतश्च चतुःसम्वत्सरमिदं सत्रं सार्धशतद्वयैर्यजमानैः कार्यमिति वा पक्षा-न्तरम् । अस्यापि बुद्धावत्यन्तमनारोहात्सप्तदशावराश्चतुर्विंशतिपरमा-इत्यातिदेशिकपरिमाणबाधापत्तेश्चानुपपत्तिः ।

तस्मात्संख्याशब्दं संवत्सरशब्दं वा गौणमाश्रित्यैवात्र मनुष्या-धिकारः समर्थनीयः । तत्रापि संख्याशब्दयोर्मुख्यत्वादेकार्थनिश्चय-सामर्थ्याच्च न स्वार्थत्यागः । संवत्सरपदं तु जघन्यत्वात्सौर्यचान्द्रादि-भेदेनैकार्थनिश्चयासमर्थं भवति गौणम् । तत्र यो मासः स संवत्सर-इति दर्शनान्मासेष्वेवेत्येकः पक्षः । तत्रापि त्वशक्तिस्तद्वस्थैव । न ह्याधानोत्तरं सहस्रमासपर्यन्तं जीवनं सम्भवति । अतः संवत्सरप्रतिमा वै द्वादशरात्रय इति प्रयोगाद्द्वादशरात्रिष्वित्यपरः ।

प्रतिमाशब्दविशेषणं त्वत्र, संवत्सरशब्दः, न तस्य द्वादशरात्रिषु प्रयोगः । तेन त्रिवृदादिशब्दसामञ्जस्याद्दिवसेषु संवत्सरशब्दः । त्रिवृदादिपदैर्हि स्तोममात्रवाचकैरपि तद्विशिष्टमहरेव लक्षणया प्रकाश्यते । लक्ष्यतावच्छेदकगौरवाङ्गीकारेण वा । अतस्त्रिया संवत्सरपदं दिवसपरमेवेति सिद्धान्तः ।

इदं च कृतादियुगान्तरेष्वपि मनुष्याणां शतमेव परमायु-रितिकृत्वा चिन्तया । यदा तु स्मृतिपुराणेतिहासादौ श्रुतस्य

प्रकृष्टतरज्ञापकबलेन सहस्रवत्सरपरिमितस्यायुषोऽपि प्रकृतश्रुत्युपष्ट-म्भस्य प्रमाणिकत्वं; एतज्ज्ञापकबलेनैव च शतायुर्वै पुरुष इति श्रुतौ शतान्यायुर्यस्येतिविग्रहः, कलियुगाभिप्रायकत्वं वाऽऽश्रयणीयं, तदा चित्रदादिशब्देनाहःसत्रमेव चित्रत्स्तोमकाहर्घटितत्वसम्बन्धेन लक्षयित्वा संवत्सरशब्दो यथाश्रुत एव। सत्रञ्च गोवधादिवद्युगान्तर-स्थतावदायुष्कमनुष्यपरमिति ध्येयम्। न हि मीमांसकमते युगादिव्यवस्थाऽलीका। तत्तद्युगधर्मव्यवस्थापकस्मार्त्तविधीनां निर्वि-षयत्वापत्तेः ॥ ६ ॥ ७ ॥ १२ ॥

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां

षष्ठस्य सप्तमः पादः ।

अथ षष्ठोऽध्यायः ।

अष्टमः पादः ।

इष्टिपूर्वकत्वात् ॥ सन्ति चतुर्होतृसंज्ञकामन्त्राः पृथिवी होता द्यौरध्वर्युरित्यादयः । तैर्जपाहोमाश्च विहिताः । तत्र ये तावत्क्रत्वर्थाः पुरुषार्था अपि वा वचनात्क्रतुप्रयोगमध्यवर्तिनस्तेषु विवाद एव नास्ति । ये तु पृथग्भूताः काम्याजपास्तेष्वप्यविवाद एव । आहिताग्न्यनाहिताग्निसाधारण्यात् । ये तु तादृशाहोमास्तेषां यदाहवनीये जुहोतीत्यनेनाहवनीयाधिकरणकत्वस्य विहितत्वादि-तरहोमवदेवाहिताग्निमात्राधिकारकत्वम् । यत्त्वेषा वै अनाहिताग्ने-रिष्टिरिति चतुर्होतृसन्निधौ वचनं, तदेयमनाहिताऽग्नेः क्रिया जपादिरूपा, सा इष्टितुल्या । एवमिष्टिसादृश्यमात्रानुवादेन जपा-द्यभिप्रायकतया नानुपपन्नम् ।

यदि तु विध्यन्तरश्रवणाभावेनार्थवादत्वानुपपत्तेरपि इष्टिसादृ-श्यस्य कथमप्यनुपपत्तेश्च येयं त्यागघटितत्वसादृश्याच्चतुर्होतृहोम-रूपेष्टिः साऽनाहिताग्नेरित्यर्थाङ्गीकारेण विधिरित्याश्रीयते, तथापि तस्यानाहिताग्निपरिसंख्यार्थत्वे, प्रमाणाभावात्पिण्डपितृयज्ञवदुभया-धिकारकत्वमिति प्राप्ते ।

प्रत्यक्षवचनेनानाहिताग्नेः कर्तृत्वविधौ तत्र एव आर्त्तान्यधि-

करणत्वप्राप्तेराहवनीयाधिकरणत्वस्यासम्भवादेव बाधात् परि-
संख्यात्वानापत्तेरनाहिताग्नेरेवाधिकारः । पिण्डपितृयज्ञं तु एव-
मनाहिताग्निरिति वचनेनानाहिताग्नेरप्यभ्यनुज्ञानादुभयाधिकार-
इति विशेषः ॥ ६ ॥ ८ ॥ १ ॥

उपनयन् ॥ उपनयनाङ्गभूता होमा आचार्यकर्त्तृकामाणवक-
कर्तृकाश्च उभये अप्युपनयनद्वारा माणवकसंस्कारार्था, इत्यविवादम् ।
तत्र ये तावदाचार्यकर्त्तृकास्तेषां सत्यप्याचार्यस्याहिताग्नित्वे आधान-
गतात्मनेपदविरोधान्नाचार्याग्निषु कार्याः, अपि तु लौकिके
एवाग्नौ ।

ये तु माणवककर्त्तृकास्ते सुतरां । क्रतुविधीनामिवोपनय-
नाङ्गभूतहोमानामपि आधानप्रयोजकत्वात्* । प्रयोजकत्वेऽपि वा
ऽऽधानस्येतरकर्मवत् ज्ञानाक्षेपकत्वाभावेनोपनयनात्पूर्वं कर्त्तुमशक्य-
त्वाच्च । आक्षेपकत्वेऽपि चोभयाधिकारकस्याधानस्य भार्याऽभावेऽनुप-
पत्तेश्च । भार्यायाश्च स्नात्वा भार्यामधिगच्छेदिति समावर्त्तनोत्तरकालं
विवाहविधानेन पूर्वमसम्भवात् ।

न च प्रयोजनानुरोधेन कालादिबाधः । एतद्वाक्यस्य निर्विष-
यत्वापत्तेः । न चापत्यार्थं दारान्तरकरणे कालविधिः । धर्मे चार्थे
चेत्यादिपर्यालोचनया धर्मार्थमपत्यार्थं च दारान्तरानुपपत्तेः ।
दारक्रियायामपि स्वतन्त्रकालाम्नानेन क्रतुविधीनामाधानाध्ययन-
वदेव दारक्रियाप्रयोजकत्वाभावाच्च । अतएव विरक्तस्य न कर्मार्थं

---

* आधानाप्रयोजकत्वादिति भवितुमुचितम् ।

दारक्रिया किन्त्वाश्रमान्तरमेव। किं चापनयनात्पूर्वमाधानकरणे जातपुत्रत्वाद्याधानकाललोपोऽष्टवर्षत्वाद्युपनयनकाललोपो वा प्रसज्येत। अतस्तेऽपि लौकिकाग्नावेव ॥ ६ ॥ ८ ॥ २ ॥

स्थपतीष्टिः ॥ निषादेष्टेर्दर्शपूर्णमासविकृतित्वादतिदेशेनाहवनीयादिप्राप्तौ तेषामाधानाधीनत्वाद्दसत्यपि तस्य स्वतन्त्राधानविधौ निषादेष्टिरेव तस्याधानं प्रयोजयेदिति प्राप्ते।

सत्यपि तस्या अग्निजनकाकाङ्क्षत्वे जनकीभूतस्याधानस्य ब्राह्मणादिकर्तृकत्वेनैवोत्पन्नत्वान्निषादकर्तृकत्वेन तेनाग्निनिष्पत्तौ प्रमाणाभावात्, प्रकृतौ परप्रयुक्ताभ्युपजीवनेनेहाहवनीयादिप्राप्तेरेवाभावाच्च, न तेषु सा। विद्यायास्तु तद्व्यतिरेकेण निषादेष्टेरेवासम्भवात्तदुपायस्य लौकिकत्वेनाक्षेपोपपत्तिरिति वैषम्यम्। तेनाहवनीयाद्यनाक्षेपकत्वेऽपि, यत्र क्वचन होष्यन् स्यात् पञ्च भूसंस्कारान् कृत्वा लौकिकाग्निं प्रतिष्ठापयेदिति स्मृतिवचनेनाग्न्यन्तराभावे होममात्रोद्देशेन लौकिकाग्निविधानात्तमेव तदुद्देशे स्थापयित्वा तेष्विष्टिः कार्या।

यत्तु तस्मिन् गृह्याणीति गौतमवचनं लौकिकाग्निप्रापकत्वेन तन्त्ररत्ने उदाहृतं, तद्गौतमस्मृतौ तच्छब्देन स्मार्ताग्नेरेव परामर्शान्निषादेष्टेश्च गृह्यत्वाभावाच्चोपेक्षितम्। न हि गृहशब्दवाच्यदम्पत्योर्हितमिति व्युत्पत्त्या अस्या अपि गृह्यपदवाच्यत्वम्। अभियुक्तप्रसिद्ध्या गृह्यपदस्य गृह्यसूत्रोक्तकर्मस्वेव रूढत्वेन योगस्याप्रयोजकत्वात्। इतरथा दर्शादेरपि गृह्यत्वापत्तेः ॥ ६ ॥ ८ ॥ ३ ॥

अवकीर्णि ॥ यो ब्रह्मचर्यावकिरेत्स नैर्ऋतं गर्दभं पशुमालभेतेति अतोयागोऽपि लौकिके एवाग्नौ। सत्यपि त्रैवर्णिकत्वे विद्यत्वे

वा भार्याऽभावेनाधानासम्भवात्। न चावकीर्णिनोऽपि स्नात्वा विवाहे बाधकाभावः।

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्।

इति वचनेन विप्लुतब्रह्मचर्यस्यावकीर्णिनोऽकृतप्रायश्चित्तस्य विवाहनिषेधात्। न चाविप्लुतब्रह्मचर्यपदेन कृतब्रह्मचर्याश्रमोत्तराश्रमयोः पौर्वापर्य्यमाचक्षाणेन विधानादवकीर्णिनोऽपि विवाहे बाधकाभावः। स्नात्वा भार्यामुपेयादित्यनेनैव स्नानपूर्वभाविनो ब्रह्मचर्यस्य स्नानोत्तरभाविना विवाहेनार्थात्पौर्वापर्यसिद्धेरस्य वचनस्य प्राक्ब्रह्मचर्यवत एव विवाहाधिकार इत्येवमर्थतयाऽवकीर्णिनो विवाहानुपपत्तेः। अतः सोऽपि लौकिकाग्नावेव। आपस्तम्बादिवचनादप्सु वा।

अयञ्चावकिर्णियागो न दैवप्रकृतिकः गर्द्दभं पशुमिति पशुशब्दोपादानवैयर्थ्यात्। किं तु अथ पशुकल्प इत्याश्वलायनोक्तायाः स्मार्त्तपश्वितिकर्तव्यताया एतद्गुलमिति केचित् ॥ ६ ॥ ८ ॥ ४ ॥

उदगयन ॥ श्रुतौ स्मृतौ वा यस्मिन् कर्मणि दैवे पित्र्ये वोदगयनशुक्लकृष्णायनादिर्यः कालः प्रत्यक्षवचनेनान्यार्थदर्शनकल्प्यविधिना वा विहितः, सोऽविरोधे समुच्चयेन विरोधे विकल्पेन ग्राह्य इत्येवं सुखज्ञात्वा सूत्रकारः शिष्येभ्य उपदिष्टवान् ॥ ६ ॥ ८ ॥ ५ ॥ ६ ॥

याञ्चाक्रयणं ॥ दीक्षितोऽभूतिं वस्नीतेति याञ्चा यस्यापि दक्षिणादानार्थं द्रव्यमस्ति तेनापि कार्या, न त्वविद्यमानद्रव्येणैव नित्यवच्छ्रवणेन सर्वदैव क्रतुना अपूर्वेण च प्रयुक्तत्वात्। न चास्या द्रव्यप्राप्तिद्वारा द्रव्यसंस्कारकत्वाद् द्रव्यसत्त्वे च तत्प्रापणोपायवैय-

र्थात्, असत्यपि निमित्तत्वश्रवणे प्रयोजनवशादेवाकाङ्क्षितविधि-
न्यायेन नियमविधित्वोपपत्तिरिति वाच्यम् । अनाकाङ्क्षितविधानस्य
फलकल्पकत्वेन दोषत्वात् । प्रकृते चाविद्यमानद्रव्यस्थले द्रव्य-
प्राप्तिरूपफलवद्विद्यमानद्रव्यस्थलेऽपि तत्फलस्याविशेषात्कल्पनाऽभावेन
दोषत्वाभावाद्याज्ञाप्राप्तद्रव्यस्यैव क्रयपूर्वेण ग्रहणात् नित्यत्वोपपत्तेः ।
एवं विद्यमानेऽपि सोमे क्रयस्याप्यावश्यकत्वम् ॥ ६ ॥ ८ ॥ ७ ॥

तथा भच ॥ एवं पयोव्रतताद्यपि विद्यमानेऽविद्यमानेऽपि भचा-
न्तरे स्यात् । अग्नीदग्नीन्विहरेति च प्रैषोऽन्यतोऽनवबुद्धेऽवबुद्धेऽपि च
स्यात् । बुद्धेऽप्यर्थे एतद्बोधजन्यनियमादृष्टसिद्ध्यर्थं प्रैषावश्यकत्वात् ।
अत एव प्रैषजन्यबोधानुष्ठितेनैव फलसिद्धिरिति कल्पनमपि
प्रामाणिकम् । प्रैषग्रहणं च मन्त्रमात्रोपलक्षणम् । तथा दर्भमयं
वासो वाजपेये वासोऽन्तरसत्त्वेऽपि परिधेयमेव ।

तथा यत् पशुभिर्मायुमकृतोरोवा पद्भिराहते अग्निर्मा तस्मा-
देनसो विश्वान्मुञ्चत्वंहस इति मन्त्रेण विहितस्य संज्ञप्तहोमस्यापि
पशुयागे नित्यं करणम् । न च संज्ञप्तहोमस्य मान्त्रवर्णिकशब्द-
करणादिजन्यदोषनिर्घातार्थत्वप्रतीतेस्तदनुरोधेन मायुपदवाच्यशब्द-
करणादावेव होम इति वाच्यम् । शब्दादिकरणस्य दोषजनकत्वे
प्रमाणाभावेन मान्त्रवर्णिकफलकल्पनानुपपत्तेः । एतद्वलेनैव दोष-
कल्पने गौरवाच्च । किं च नात्र शब्दादिकरणाद्दोषोऽपि तु तदनु-
कूलयत्नरूपादाख्यातार्थात् । तस्य च प्रतिबन्धकवशाच्छब्दाद्य-
नुत्पत्तावप्युत्पत्त्यावश्यकत्वेन संज्ञप्तहोमस्य नित्यत्वम् ।

तथा योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति मन्त्रोऽपि द्वेष्य-

निश्चयसत्त्वेऽसत्त्वे वा सर्वदैव प्रयोक्तव्यः। न च मन्त्रलिङ्गवशेन प्रकरणसङ्कोचः। परकर्तृकद्वेषस्यायोग्यत्वेन तदभावनिश्चयायोगात्। स्वनिष्ठद्वेषविषयस्यान्ततः पापादेरपि सम्भवेन मन्त्रलिङ्गा-विरोधात्॥ ६॥ ८॥ ८॥

अनर्थकं॥ पयोव्रतं यदि रोगोत्पत्त्यादिना मरणादिहेतुः सम्भाव्यते, तदा क्रतुविरोधप्रसङ्गान्न कार्यमपि। जातेष्टिन्यायेन गतार्थमपीदं शिष्यहितार्थमुक्तम्॥ ६॥ ८॥ ९॥

पशुचोदनायां॥ अग्नीषोमीयं पशुमालभेतेत्यादौ पशुशब्दो-न सामान्यवचनः। न हि पशुत्वं जातिः, प्रमाणाभावात्। कार्य-ताया: कारणताया वाऽनवच्छेदकत्वात्। नापि पुच्छादिमत्त्वं, तस्यानुगतत्वाभावेन सामान्यत्वाभावात्। अतः पशुशब्दोव्यक्तिवाची। ततश्च सर्वासां अश्वादिव्यक्तीनामप्युक्तत्वादयं सन्दिग्धः। तथा च नार्थवादवदत्र छागस्य वपाया इति मन्त्रस्य निर्णायकत्वम्।

यद्यपि चायं सामान्यवाची भवेत्तथापि मन्त्रस्य भिन्नवाक्यत्वा-त्तद्व्यतिरेकेणैव विधेः सर्वविषयतया पर्यवसानात्र तत्सङ्कोचकत्वम्। एवं सत्यपि यदि मन्त्रस्य विधायकत्वं भवेत्तदाऽऽर्षेयं वृणीते चीन् वृणीत इतिवद्भवेदपि विशेष्यविशेषणभावः। न त्वेतदस्ति। अतोमन्त्रस्थं छागपदं छिन्नपुंस्त्वाख्यगमनवत्त्वयोगेन वयोविशेषवच-नत्वेन वा सर्वपशुपरम्। छागपक्षे वाऽयं मन्त्र इति प्राप्ते।

छागशब्दस्याजे रूढत्वेन यौगिकत्वानुपपत्तेः पुंस्त्ववतो विहितत्वेन यौगिकार्थग्रहणानुपपत्तेश्च न तावद्यौगिकम्। वयोऽवस्थाविशेष-वचनत्वेऽपि च शोणादिशब्दवदजगतस्यैव वयसो वाच्यत्वादश्वादि-

णानुपपत्तेः, छागग्रहणेनापि पशुत्वस्याविरोधोपपत्तौ मन्त्रस्य विकल्पकल्पनानुपपत्तेः, छागस्यैव ग्रहणम् ।

यद्यपि पशुशब्दोव्यक्तिवचनः स्यात्तथापि युगपत्सर्वव्यक्तिग्रहणाविनैकव्यक्तिग्रहणे मन्त्रस्य निरवकाशत्वाच्छागव्यक्तिमात्रग्रहणेऽपि किञ्चिद्बाधकम् । वस्तुतस्तु सामान्यवाच्येवायम् । तदपि यद्यपि पुच्छवत्त्वादि, तथापि पुच्छत्वावच्छिन्नवत्त्वस्यैवानुगतस्य वक्तुं क्यत्वान्न विरोधः ।

वस्तुतस्तु पुच्छाद्यप्रतीतावपि पशुत्वप्रतीतेः पशुत्वं जातिरेवेति सामान्यवचनत्वमप्यव्याहतम् । तेन युक्त एव मन्त्रेण निर्णयः । भिन्नवाक्येऽपि च पशुच्छागशब्दयोर्विशेषणविशेष्यभावोवाक्यैकवाक्यतया न विरुध्यते । इदं च सर्वमणोऽग्नीषोमीय इति शाखान्तरवाक्यं नास्तीति कृत्वा चिन्तया बोध्यम् । तत्सिद्धं छागवत एवाधिकारति निरूपितोऽधिकारः ॥ ६ ॥ ८ ॥ १० ॥

इति श्रीभाट्टदीपिकायां खण्डदेवकृतौ षष्ठस्याष्टमः पादः ॥

अध्यायश्च समाप्तः ॥

समाप्तञ्च पूर्वषट्कम् ॥